लघुपाणिनीयम्

अ. रा. राजराजवार्मणा प्रणीतम्

A. R. Rajaraja Varma

Laghu-Paniniya

Popular Sanskrit Grammar

FOR BEGINNERS



A. R. RAJARAJA VARMA, M. A., M. R. A. S.

PROFESSOR OF

SANSKRIT AND DRAVIDIAN LANGUAGES

H. H. The Maharaja's College, Trivandram.

B. V BOOK DEPOT,

TRIVANDRAM.

Printed at the 'Bhaskara Press

TRIVANDRAM

Reserved]

1911

Price Rs. 3.

श्रीः

लघुपाणिनीयम् ।

अनन्तशयनस्थराजकीयाङ्गलीविद्यामन्दिरे
संस्कृत–द्राविडभाषाप्रवक्त्रा
ए-ए-त्रिरुदशालिना

अ. रा. राजराजवर्मणा

प्रणीतम् ।

तच्च

भाषाभिवर्धिनी–पुस्तकशालाध्यक्षेण
अनन्तशयनस्थ–भास्करमुद्रालये
मुद्रयित्वा प्रकाशितम् ।

1911

सर्वेऽधिकारा प्रकाशकेन स्वायत्तीकृता ।

मूल्यं रूप्यत्रयम् ।

PREFACE.

Our fathers justly held the subject of Grammar (Vyakarana) in high esteem, and defined it as a Sastra (science)and a Vedanga In any literature, true mastery is impossible without a thorough grasp of the grammar of the language and this is especially the case with Sanskrit A living language may be learned, without much grammar, but without an adequate grounding in grammar, it is not easy to learn a dead, classical language. It is a matter of common knowledge, that under the old indigenous scheme of education, Indian youths began the study of Sanskrit, not, as they now do, with a *reader*, but with a simplified grammar, containing the elementary rules of declension and conjugation This practice is even now followed, and the student who does not purpose to acquire the reputation of a grammarian (vaiyakarana) takes to such other studies as he cares for, the classical treatises on grammar, of which Sanskrit has such an abundant number—almost all of matchless excellence-being only studied by special students of the subject Specialisation in the different branches of Sanskrit lore—however desirable, in the interests of a revival of genuine classical scholarship in India,—is not now common, and, following the traditions of the west, the greater number of modern students of Sanskrit desire only such an equipment in grammar and phonetics as would enable them to understand and enjoy the gems of classical Sanskrit literature My experience as a Sanskrit teacher and examiner has convinced me that neither the traditional curriculum for the non-grammarian, nor the modern scheme of graduated readers, furnishes this

equipment Further, a knowledge of Sanskrit, that is independent of an understanding of one of the most characteristic forms of Sanskrit literary and scientific expression and of the system of "notation" adopted in the *Sutra* style, is, in my humble view, apt to give a very inadequate idea of the power, range and genius of the language It is true that Panini who remains now, as in the ancient times, without a peer, as a grammarian, by the very perfection of his aphorisms and their comprehensiveness, created difficulties for their understanding by any one not blessed with the requisite leisure and ascetic inclinations, to engage on the arduous study of his eight chapters (Ashtadhyayi)—,and that the great commentators, like Patanjali, the Vartika-kara and the author of the Kasika, have *added* to the difficulties of the study, by clouding the meaning of Panini, in a very mist of words Nevertheless, it has always struck me, that if it were possible to prepare an elementary grammar, *in Sanskrit itself*, on the basis of Panini's unmatched aphorisms, simplifying his principles and interpreting them in accordance with modern tendencies—so as to form an introduction to Panini, and to the ordinary classical literature generally, the attempt would be worth making Strengthened by this conviction, which kept growing on me since 1895, when I was Principal of His Highness the Maharaja's Sanskrit College, I published a very elementary treatise on these lines, in Malayalam, in November 1907. The success of that experiment, and the approval it has met with from those competent to judge, have now emboldened me to publish the following brief introduction to classical Sanskrit Grammar, on the lines of Panini In the light of the above facts, I make no apology for submitting the book to the kindly judgment of fellow-students of Sanskrit, being assured of being corrected by their erudition, wherever I have gone wrong, and of being strengthened by their sympathy, always.

The different typographical and other devices, adopted to emphasise the relative importance of various Sutras are described in a separate note, and the principles on which I have interpreted and commented on Panini are expounded, in the Sanskrit introduction, and in the first few pages of the book itself It only remains to me to acknowledge with much gratitude the constant assistance encouragement and advice I have received from my revered uncle and preceptor, M R. Ry KeralaVarma Avl. C S I., the *doyen* of Sanskrit scholarship in South India, and from my fellow-student, former colleague and friend, Brahmasri R Narayana Sastriar, the present head of the local Sanskrit College

TRIVANDRUM,
3rd August 1911.

A. R. Rajaraja Varma.

॥ श्रीः ॥

मुद्रणव्यवस्थाः ।

पुस्तकेऽस्मिन् गात्रभेदेन रेखाभेदेन च चतुर्विधा अक्षरमुद्रा उपयुक्ताः—

१. बृहल्लिपि स्थूलरेखा ।	३ अणुलिपि स्थूलरेखा ।
२ सैव कृशरेखा ।	४. सैव कृशरेखा ।

इति । अथैतासा विनियोग· —

१. बृहल्लिपि स्थूलरेखा ।

१. सामान्यसूत्राणि प्रथमोपादाने ।

२. यदृच्छाशब्दा —यथा काशिकारूपावतार इत्यादयः पञ्चमपृष्ठे ।

२ बृहल्लिपि कृशरेखा ।

१. सूत्रव्याख्यानरूप ग्रन्थशरीरम् ।

२. सूत्रेष्वनुवृत्त्या योज्यानि पदान्यन्ते वलयाभ्यां विश्लेषितानि । यथा—**उच्चैरुदात्तः** (अच्) इति सप्तमपृष्ठे ।

३. अणुलिपि स्थूलरेखा ।

१. वार्तिकानि नक्षत्रचिह्नाङ्कितानि ।

२. विशेषविधिपराण्यनत्यन्तोपयुक्तानि सूत्राणि ।

४. अणुलिपि कृशरेखा ।

१. उदाहरणानि ।

२ अनत्यन्तोपयुक्तानां विशेषविधिपराणा अणुलिपिभिर्मुद्रितानां सूत्राणा व्याख्यानम् ।

३. पृष्ठानामधोभागे टिप्पणानि ।

सविशेषमुद्दिष्टानि पदान्युभयोरपि लिप्यो. स्थूलरेखाक्षरैर्मुद्रितानि । यथा—(१) प्रत्यय आदेश इत्यादीनि प्रथमपृष्ठे । (२) ग्लौशब्दस्य रूपाणि ६९ तमपृष्ठे । यथा च भू सत्तायां, एध वृद्धौ इत्यादयो धातव, सूयात् एधिषीष्ट इत्यादीनि तेषा रूपाणि च २२९ तमपृष्ठे ।

सूत्रानुक्रमानुरोधादुपात्तानि प्रकरणान्तर एवोपयुक्तानि सूत्राणि व्याख्योदाहरणसहितानि आनुषङ्गिकत्वद्योतनाय कोष्ठाचिह्नेन [ ] एवरूपेण पृथक्कृतानि । यथा २२ तमपृष्ठे अन्तादिवच्च, षत्वतुकोरसिद्धः इति सूत्रद्वयम् ।

उक्ताना व्यवस्थानां क्वचित् क्वचित् भङ्गोऽपि जात इति सलज्जमभ्युपगन्तव्य वर्तते । एव शुद्धिपत्रमपि न सम्पूर्णम्, यथा—३४ तमपृष्ठे 'पुम खय्यम्परे' इति सूत्रस्य प्रत्युदाहरणे 'पु+क्षमा=पुक्षमा' इति मुद्रणीये 'पु+प्रतिभा=पुप्रतिभा' इति मुद्रित न शोधितमिति पश्चात् ज्ञातम् । सर्वाणीदृशानि स्खलितानि द्वितीयायामङ्कनावृत्तौ शोधयिष्यन्त इति मर्षणीयानीत्यर्थ्यन्ते दक्षिणा वाचयितारः ।

अत्यूर्जितं वस्तु चल च चित्तमत. प्रमाद सुलभ· प्रणेतु· ।
प्रमादिनौ लेखकमुद्रकौ च, कात्यन्तिकी पुस्तक! ते विशुद्धिः ?

A. R. Rajaraja Varma.

॥ श्रीः ॥

विषयानुक्रमणिका ।

विषयः	पुटम्
भूमिका	१
शिक्षाकाण्डः ।	
सञ्ज्ञाप्रकरणम्	५
परिभाषाप्रकरणम्	१६
सन्धिप्रकरणम्	२०
शब्दविभाग.	५०
परिनिष्ठाकाण्डः	
लिङ्गप्रकरणम् (स्त्रीप्रत्यय)	५६
सुबन्तप्रक्रिया	६७
सञ्ज्ञा	७१
सन्धिकार्याणि	७८
प्रत्ययानामादेशा	८१
अङ्गकार्याणि	८४
बलप्रकरणम्	१२०
णत्वप्रकरणम्	१२४
नामरूपावलि.	१२८
तिङन्तप्रक्रिया	१३५
भ्वादिगणः	१४७
तुदादिगणः	१६१
स्वादिगणः	१६७
तनोत्यादिगणः	१६९
क्रयादिगण	१६९
रुधादिगण	१७२
अदादिगण	१७३
जुहोत्यादिगण	१८५
लटलडौ स्थसस्करणको	१९४
इडव्यवस्था	१९६
लुट् तासिसस्करणक	२०२
लृट् सिजादिसस्करणक.	२०४
कित्वप्रकरणम्	२०६
सिचिवृद्धि	२०८
सिचो लुक्	२१०
क्स सस्करणम्	२१२
अट् सस्करणम्	२१३
चङ् सस्करणम्	२१५
लिट्	२१७
आशीर्लिङ्	२२५
सार्थको णिच्	२२९
सार्थक सन्	२३३
यङ्यङ्लुकौ	२३६
स्वार्थिकप्रत्ययाः	२३९
नामधातुप्रत्ययाः	२४३
मिश्रप्रकरणम्	२४८
भावकर्मप्रक्रिया	२५३
कर्मकर्तृप्रक्रिया	२५७
पदव्यवस्था	२६०
आत्मनेपदविधि.	२६०
परस्मैपदविधि.	२६८
कृत्प्रकरणम्	२७०
कृतामर्थव्यवस्था	२७४
आख्यातकानि	२७६
लुडस्थानीया निष्ठा	२८०
लिडस्थानीया. क्त्वा.	२८३

विषय.	पुटम्
लोट्स्थानीया	२८६
क्रियाविशेषणाख्यातकानि	२८८
कर्त्रर्थककृत्प्रत्यया	२९६
भावकृत्प्रत्यया	३००
लकारार्थप्रकरणम्	३०३
विभक्त्यर्थप्रकरणम्	३१३
कर्मप्रवचनीया	३३४
निरुक्तकाण्डः ।	
तद्धितप्रकरणम्	३३७
तद्धितसामान्यकार्याणि	३३७
भसञ्ज्ञाकार्याणि	३४०
प्राग्दीव्यतीयोऽणधिकार	३४४
प्राग्वहतीयष्ठगधिकार	३५२
प्राग्घितीयो यत्	३५२
प्राक्क्रीतीयौ च्छयतौ	३५३
प्राग्वतीयष्ठञ्धिकार.	३५४
वति	३५४
भावप्रत्यया	३५५
प्रकीर्णका	३५६
पूरणीप्रत्यया.	३५७
मत्वर्थीया	३५९
विभक्तितद्धिता.	३६०
अतिशायनतद्धिता	३६३
अपकर्षक क	३६५
अव्ययतद्धिता.	३६६

विषय.	पुटम्
आकाङ्क्षाकाण्डः ।	
समासप्रकरणम्	३६८
समाससामान्यकार्याणि	३७१
अव्ययीभाव.	३७२
तत्पुरुष	३७४
बहुव्रीहि	३८०
द्वन्द्व	३८२
षटकपदसन्निवेशव्यवस्था	३८३
एकशेष	३८४
समासे लिङ्गवचनव्यवस्था	३८५
पूर्वपदकार्याणि	३८९
अलुक्	३८९
आनङ्	३९१
पुवद्भाव	३९१
ह्रयन्तह्रस्व	३९२
आत्वम्	३९३
ङयापोर्ह्रस्व	३९४
नञ आदिलोप.	३९५
आदेशा	३९५
दीर्घ	३९६
उत्तरपदकार्याणि	३९७
ससासान्ता	३९७
सुडागम	४०१
द्विरुक्तिप्रकरणम्	४०२
उपसहार.	४०३

॥ श्रीः ॥

लघुपाणिनीयम् ।

भूमिका ।

व्याकरणदुर्गमार्गेष्वप्रौढान् बालकान् प्रचारयितुम् ।
लघुपाणिनीयमेतत् प्रणीयते राजराजेन ॥

अत्र किल भगवानाचार्यः **पाणिनिर्महेश्वरप्रसादादधिगत्य** शब्द-विद्यारहस्य वैदिकलौकिकभेदेन द्विविधाया संस्कृतभाषाया व्याकरण प्रणिनाय । तस्य च सूत्राणा किञ्चिदूनैश्चतुर्भि सहस्रैरुपकल्पितोऽष्टभिरध्यायै. परिच्छिन्नत्वादष्टाध्यायीति शब्दित **सूत्रपाठः** शरीरम् । **गणपाठो धातुपाठः अक्षरसमाम्नायः शिक्षा लिङ्गानुशासनम्** इति पञ्चाङ्गानि ।

'अल्पाक्षरमसन्दिग्ध सारवद्विश्वतोमुखम् ।
अस्तोभ्यमनवद्य च सूत्र सूत्रविदो विदु ॥'

इत्युक्तलक्षणै· सूत्रै· प्रायश प्रत्यय आदेश आगम इति त्रिधा भिन्नानि व्याकरणकार्याण्यनुशास्त्याचार्य । पृथक्प्रयोगानर्ह परससर्गेणार्थप्रत्यायक अक्षर अक्षरसमुदायो वा **प्रत्यय** इत्युच्यते । यस्मिन्छब्दे प्रत्यय. ससृज्यते सा प्रकृति· । यथा—'घटत्वम्' इत्यत्र घटशब्द प्रकृति., 'त्व' इत्यक्षर प्रत्यय । स्थित वर्णमपनीय तत्स्थाने विहितमक्षरमक्षरसमुदायो वा **आदेशः**। तत्र स्थितो वर्ण **स्थानी**त्युच्यते। यथा—'तौ+इव =ताविव' इत्यत्र औकार. स्थानी, आव् इत्यादेश. । प्रतिनवस्य वर्णस्य योजनमागमः । यथा—'तरु+छाया=तरुच्छाया' इत्यत्र रुकारछकार·

योर्मध्ये चकार आगम । आगमविपरीत स्थितस्य नाशरूप आदेश एव लोप इत्युच्यते । यथा— राजन् + पुरुष. = राजपुरुष इत्यत्र नकारस्य लोप. ।

'स्थाने शत्रुवदादेश· काले पुण्ड्रवदागम ।
दन्तानामिव लोप स्याच् छत्रवत् प्रत्यया परे ॥'

इत्यागमादेशलोपप्रत्ययाना भेदो दर्शित प्राचीनै ।

अथाङ्गभूताना धातुपाठादीना स्वभावो वर्ण्यते । भू, एध, स्पर्द्ध, अद, हु इत्यादीना क्रियावाचिनीनां प्रकृतीनां परिगणन **धातुपाठ** इति व्यवह्रियते । तत्र 'भू सत्ताया' 'एध वृद्धौ' इत्याद्यर्थनिर्देशोऽर्वाचीन एव न त्वाचार्यप्रणीत । भूवादिरदादिरित्यादि दशगणात्मको धातुपाठ । सर्वादि, प्रादि इत्यादिनामशब्दप्रकृतीना परिगणन **गणपाठः** । ते च बहव सन्ति । स्वरान्तो व्यञ्जनान्तो गुणवाची बहुक्षर इत्यादिवत् केनापि साधारणेनानुगतधर्मेण ये निर्देष्टु न शक्यन्ते तैरेव शब्दै पाणिनिर्गणान् कल्पयति । गणे य शब्द प्रथम पठ्यते तेन तस्य गणस्य सज्ञा क्रियते । यथा— सर्व, विश्व, उभ, उभय इत्यादिर्गण सर्वादिरित्युच्यते । अक्षराणा पाठोऽक्षरसमाम्नायः । अक्षराणामेवोच्चारणशिक्षण **शिक्षा**ख्यस्य भागस्य विषय. । अमुकस्य शब्दस्यासुक लिङ्गं इत्यनुशासन लिङ्गानुशासनम् । तत्राक्षरसमाम्नायो महेश्वरेण प्रोक्त इति ह स्माहु, अन्यानि तु पञ्च निःसशय पाणिनीयान्येव ।

पञ्चपाठ्यामस्या प्रतिष्ठापितमाचार्येण स्वकीयं व्याकरणम् । व्याप्नोति चैषा व्याकरणस्य समग्र विषयम् । तथापि नैक. सर्व जानातीति न्यायेन भगवत पाणिनेस्तन्त्रे तत्र तत्र न्यूनता पश्यन् **कात्यायन** ऋषि प्राधान्येन शेषपूरणपर **वार्तिक**सज्ञित तद्विवरण प्रणिनाय । पाणिने· सूत्रेषु कात्यायनस्य वार्तिकेषु च कूलङ्कषा चर्चा कुर्वन् **पतञ्जलिः** शब्दानुशासनसर्वस्वभूत **महाभाष्य**मभाषिष्ट । अतश्च मुनित्रयस्य यथोत्तर प्राशस्त्य इच्छन्ति पाणिनीयाः । न्याय्य चैतत् । किन्तु मुनित्रयेणास्मृता अपि

दृश्यन्त एव प्रयोगा महाकविग्रन्थेषु । तथाहि—विश्रम इति वक्तव्ये विश्राम इति प्रयुञ्जाते काळिदासभवभूती । ऋतेशब्दयोगे पाणिनीयाना-मनभिमतापि द्वितीयाविभक्तिर्बहुत्र दृश्यते । एव कृशाङ्गी, कम्बुकण्ठी, मृदुगात्री इत्यादिपदानि पाणिनीयानुल्लङ्घ्य ईकारान्तान्येव कविभि प्रयुज्यन्ते । अनुशिष्टाश्चैते प्रयोगा पतञ्जलेरनन्तरगामिभि काशिकाकार-चन्द्रस्वामिप्रभृतिभि. । तथापि भट्टोजिप्रभृतय केचिदर्वाचीना मुनित्रये श्रद्धाजाड्येन सुशब्दानेतान् न सहन्ते । वीरवैयाकरणाना दुश्शाठ्यमिद वीरवैष्णवै· कृत शङ्करदूषणमिव मध्यस्थैरुपेक्षणीयमिति मन्यामहे ।

प्रसङ्गवशात् पाणिनीयव्याख्यातृणामन्येऽपि केऽप्यसुन्दरा व्याख्या-प्रकारा अत्र निरूप्यन्ते । ते हि पाणिने सर्वज्ञत्व प्रतिज्ञाय तेन स्वप्ने ऽप्यनुत्प्रेक्षितानर्थान्, तत्सूत्राणि निष्पीड्य, सम्पादयन्ति । तथा हि ते कदाचिदिष्टसिद्ध्यर्थमेकधा स्थित सूत्र द्विधा छिन्दन्ति, य किल योगविभाग इत्युच्यते । अन्यदा सूत्रगतानि पदानि समग्रमेव वा सूत्रमावर्तयन्ति। एकदा 'छन्दोवत् भवन्ति सूत्राणि' इति स्वातन्त्र्येण कञ्चिन्न्यायमुल्लिख्य पञ्चम्यर्थे चतुर्थी, चतुर्थ्यर्थे प्रथमा, अविभक्तिको निर्देश इत्यादि प्रतिज्ञा-नैर्विभक्तीर्व्याकुलीकुर्वन्ति । सूत्रेषु कुत्राप्यदृष्ट वर्णमैन्द्रजालिका इव प्रश्लेषादिभिरुपायैराविष्कुर्वन्ति । कि बहुना, नास्ति स उपायो य काश-कुशावलम्बिन एते नाद्रियेरन् । कुसृष्टिकल्पनाव्यवसायोऽय, मन्ये, महा-भाष्यादेवाधीत एभि । भाष्यकारस्तावत् कमप्यर्थमादाय द्विसहस्रजिह्व इव सर्वतोमुख प्रश्नसहस्र प्रयुङ्क्ते, एकैक स्वय चोत्तरयति । तत्सरम्भेषु कदाचिद्वादकोलाहले कुमार्गेणापि सञ्चरते । थोऽय प्रौढिवाद इति व्यपदिष्ट-पन्था दुर्व्याख्यातृभि शिष्यव्यामोहनाय स्वग्रन्थेषु निबध्यते । मार्गोऽय सर्वथा कुमार्गो वा न वेति विचारो दूरे तावदास्ता, बालशिक्षणार्थमुद्दिष्टेषु ग्रन्थेषु नैष मार्ग शोभत इत्यत्र कस्य वा विप्रतिपत्ति ? अतश्च ग्रन्थेऽस्मिन् सूत्राणि यथाश्रुतरीत्यैव व्याख्यायन्ते । तावतैव च तृप्यन्ति सुशब्दग्रहण-मात्रदत्तदृष्टयो व्याकरणाध्यायिन. ।

लोकेऽस्मिन् पाणिनीयं तन्त्रमिव परिपूर्णं नास्त्येवान्यद्व्याकरणप्रस्थानमिति निर्विवादमेतत्, तथापि तन्त्रमेतत् पथ्यमेरण्डतैलमिव बालेभ्यो न रोचते । तत्र गुडजिह्विकाप्रयोगार्थमस्माकमयमारम्भ । पाणिनीय व्याकरणमिति श्रुत्वैव बाला यत् बिभ्यति तत्र को हेतुरिति विमृशाम — पाणिनिस्तावत् सङ्केतजटिलै सूत्रैर्व्यवहरति । सङ्केता पुनस्तत्र तत्र विकीर्णा परस्परसापेक्षाश्च । तथाहि— 'वृद्धिरादैच्' इति प्रथम सूत्र 'वृद्धि' 'आत्' 'ऐच्' इति त्रिभि प्रथमान्तै पदैर्घटितम् । अनेन आ. ऐ, औ इत्येषा वर्णाना वृद्धिरिति सज्ञा विधीयते । तत्र 'आत्' इत्यस्य आकार इत्यर्थ ग्रहीतु 'तपरस्तत्कालस्य' इति वक्ष्यमाणस्य सूत्रस्यापेक्षास्ति । 'ऐच्' इत्यय शब्द ऐकार औकारं च बोधयतीति ग्रह 'आदिरन्त्येन सहेता' इति सूत्रस्यार्थज्ञाननैव भवति । तस्य च सूत्रस्यार्थग्रहो 'हलन्त्यम्' इति सूत्रान्तरेण विहिता सज्ञा अपेक्षते । 'हलन्त्य' इति सूत्रे च हल्पद 'आदिरन्त्येने'-त्यादिना सिद्धमिति परस्पराश्रयाद्व्याकुलीभाव । किं च पूर्वापेक्षया परस्य सूत्रस्य प्रामाण्य, कानिचित् सूत्राणि सूत्रान्तरापेक्षया असिद्धानि, इत्यादीना स्वतन्त्रसङ्केतानामनुरोधेन बालसुगम क्रमपि विषय विभाग पाणिनिर्न कृतवान् । विषयश्च प्रकृत्या कर्कश । मूलस्य तावदवस्थेय, व्याख्यानाना तु दशा शोच्यतरेति पूर्वमेव किल प्रतिपादितम् । एव च पाणिनीय तन्त्र परिखाभि प्राकारैश्च परिक्षिप्त दुर्गमिव दुरासद संवृत्तम् । दुर्गेऽस्मिन् प्रविविक्षूणा पुरातनैरुद्घाटित द्वारद्वयं वर्तते —**काशिका**कृतमेक, **रूपावतार**कृतमन्यदिति । तत्र च प्रथमेन (द्वारेण) प्रविशन् द्रिदृक्षु पुरुषो रथ्योपरथ्याक्रमेण बभ्रम्यमाण सर्वतो नीतोऽपि तत्रत्यानामद्भुतपदार्थाना शकलीकृत्य तत इतो विकीर्णत्वात् पृथक्कृतानेकदेशानेव पश्यति, न तु समग्र किमपि दृश्य वस्तु । द्वितीयेन तु प्रविशन् शकलीकृत्य विक्षिप्तानेकदेशानुच्चित्य यथास्थान विनिवेश्य समग्रीकर्तुं पुर पश्चात् पार्श्वयोश्च पदेपदे विकृप्यमाण आयास्यते । एव च द्वाराभ्यामुभाभ्यामपि प्रवेशे क्लेश एव प्रविष्टस्य । अतो वय प्रकटामेद प्राचीनै प्रहृत द्वारद्वयमपि विहाय पक्वेष्टकचितास्वपि प्राकारभित्तिषु तत्र तत्र सुलभैर्जालमार्गैर्बालानन्त प्रवेश्य

तत्र च सुखसवासोचितासु विरळास्वपि कासुचिद्वलभीषु निवेश्य दूरदर्शिनी-प्रभृतीना नवीनदृष्टाना यन्त्राणा साहाय्येन दूरविकीर्णानि शकलानि सन्निधाप्यावश्यदर्शनीय सर्वमप्यर्थजात दर्शयिष्याम. ।

तथा च ग्रन्थेऽस्मिन् प्राचीनं प्रस्थानद्वयमुपेक्ष्य नवीनमेकं प्रस्थान-मुल्लिखितम्। काशिकावृत्त्यादिष्विव सूत्राणा पाठक्रमेण व्याख्याने रूपसिद्धि-कथन न चारु स्यात्, कौमुदीरूपावतारादिष्विव रूपसिद्ध्यपेक्षया क्रममु-पेक्ष्य व्याख्याने प्रकरणाधिकारानवृत्त्यादीनामयोगात् सूत्रार्थबोधो दुर्घटो भवति अत सम्मिश्र कोऽपि मार्गोऽत्र गृहीत ।

ग्रन्थारम्भः ।

व्याकरणप्रतिपाद्यो विषयोऽत्र चतुर्धा विभज्यते—

१ अक्षरनिरूपणपर **शिक्षाकाण्डः**,

२ शब्दाना रूपसिद्धिविचारक **परिनिष्ठाकण्डः**,

३. शब्दाना व्युत्पत्तिप्रतिपादको **निरुक्तकाण्डः**,

४ पदाना अन्वयव्यवस्थावर्णनरूप **आकांक्षाकाण्डश्चेति** ।

शिक्षाकाण्डः ।

संज्ञाप्रकरणम् ।

१.	अ	इ	उ	ऋ	ऌ						
२.	आ	ई	ऊ	ॠ	ॡ	—	ए	ऐ	ओ	औ	
३	क	ख	ग	घ	ङ		७.	प	फ	ब	भ	म
४	च	छ	ज	झ	ञ		८	य	र	ल	व	—
५.	ट	ठ	ड	ढ	ण		९	श	ष	स	—	—
६.	त	थ	द	ध	न		१०.	ह	—	—		

संस्कृतभाषाया लौकिकीयमक्षरमाला । अक्षरैरेभिर्घटितमेव गैर्वाण्यां समस्त पदजातम् । भाषा तावद्वाक्यरूपा, वाक्यानि पदैर्घटितानि, पदान्यक्षरैरारभ्यन्ते, अक्षराणि वर्णैरुपकल्पितानि । तथा च घटादिपदार्थाना परमाणव इव भाषाया उपादानकारण वर्णा । निरवयव एकत्वव्यवहाराई स्फुटो नादो **वर्ण** इति तस्य लक्षणम् । तत्र स्वयमुच्चारणार्हो वर्ण· **स्वरः**, तदनर्हं **व्यञ्जनम्** । अत्र प्रदर्शितायामक्षरमालाया प्रथमद्वितीयपङ्क्त्योर्विन्यस्ता स्वरा , शेषा व्यञ्जनानि । व्यञ्जनाना स्वयमुच्चारणाक्षमत्वात् ते ष्वेकैकस्मिन्नपि प्रथमस्वर *अकारो योजित । तथा च वयमक्षराण्येव लिखामो न तु वर्णान्, अत एव चाक्षरमालेति व्यवहरामो न तु वर्णमालेति। यद्यप्यक्षराणा वर्णैरारब्धत्वात् वर्णानामेव लिपिभि· (नादरूपाक्षरस्मारके रेखावितानरूपै· चिह्नै) विन्यासो न्याय्यः, तथापि व्यञ्जनानां स्वरपरतन्त्राणा स्वयमुच्चरितुमशक्यत्वात् अक्षराणामेव लिपिसज्ञितानि चिह्नानि पूर्वै कल्पितानि। युरोपदेशीयास्तु स्वस्वभाषा वर्णैरेव लिखन्ति, न त्वक्षरै.। यथा 'श्री' इत्येकां लिपिं Sri इति तिसृभिर्लिखन्त्याङ्गलेयाः।

अविभाज्य एको नादो वर्ण ; केवलो व्यञ्जनसंसृष्टो वा स्वर एकोऽक्षरम् इति वर्णाक्षरयोर्भेद । अनेन च केवल स्वरो वर्ण इत्यक्षरमिति च द्वावपि व्यपदेशावर्हतीति स्फुटम् । केवल तु व्यञ्जनं वर्ण एव । केवला एव स्वरा लिपिषु स्वस्वचिह्नैर्निर्दिश्यन्ते, व्यञ्जनसंसृष्टास्तु चिह्नान्तरैरेव लिख्यन्ते । यथा—

क् + अ = क	क् + उ = कु	क् + ए = के
क् + आ = का	क् + ऊ = कू	क् + ऐ = कै
क् + इ = कि	क् + ऋ = कृ	क् + ओ = को
क् + ई = की	क् + ॠ = कॄ	क् + औ = कौ

इत्यादि । 'क्' इति व्यञ्जनलिपीनामधो दक्षिणायता रेखा तेभ्य स्वरांशपृथक्करण सूचयति । यद्यपि लोके व्यवहारेष्वक्षरैरेवोपयोगस्तथापि वैया-

* वर्णेषु 'कार' इत्यस्य प्रयोगो निर्देशसौकर्यार्थ । अकार अ इत्यय वर्ण ।

करणा वर्णैर्व्यवहरन्ति। अतश्च 'क' 'कि' 'कु' इत्याद्या लिपय एकैक-चिह्नात्मिका अपि स्वरव्यञ्जनरूपवर्णद्वयघटिता इति व्याकरणाध्येतृभि सविशेषमनुस्मरणीयम् ।

अथाक्षरमालाया परिगणितानां वर्णानां विभाग कथ्यते, तत्र स्वर-व्यञ्जनात्मना द्विविधो महाविभाग उक्त एव । उच्चारणकालमात्रानुसारेण स्वरास्तावत् त्रिविधा —

१ एकया मात्रया अ, इ, उ इत्यादिवदुच्चार्यमाणो ह्रस्व ;

२ आ, ई, ऊ इत्यादिवत् द्वाभ्यामुच्चार्यमाणो दीर्घः,

३. अ३, इ३, उ३ इत्यादिवत् तिसृभिरुच्चार्यमाण प्लुतः ।

एषु ह्रस्वदीर्घाभ्यामेव पदानि घटितानि । प्लुतस्तु काकादिवत् वाक्यमात्र-दृष्ट स्वरविकार । अत एव च तस्य लिपिषु चिह्नानि न कल्पितानि । स्वरेषु ऌकारोऽतीव विरल 'क्लृप्त' 'क्लृप्ति' इति द्वयोरेव पदयोर्दृष्ट । अस्य दीर्घ कुत्रापि नोपयुज्यते । ए, ऐ, ओ, औ एषा चतुर्णां ह्रस्व सम्भवन् देश्यभाषासु दृष्टोऽपि संस्कृते नापेक्ष्यते, शेषा अ, इ, उ, ऋ ऌ एते चत्वार एव त्रिविधा अपि उपयुज्यन्ते । अत्र सूत्रित पाणिनिना—

(१) **ऊकालोऽज्झ्रस्वदीर्घप्लुतः** । १ । २ । २७ ।

ऊकाल, अच्, ह्रस्वदीर्घप्लुत इति च्छेद । 'अच्' इति स्वरस्य पाणिनिकृता सज्ञा । उ, ऊ, उ३ इतिवत् यस्य काल स स्वर क्रमात् ह्रस्वदीर्घप्लुतसज्ञ इत्यर्थ । सङ्गीतशास्त्रप्रसिद्ध तारमन्द्रत्वभेद निमित्तीकृत्य स्वराणां उदात्त, अनुदात्त, स्वरित इत्यन्यथापि त्रैविध्यमस्ति। अयमपि भेद सूत्रकारवचनैरेवोच्यते—

(२) **उच्चैरुदात्तः** (अच्) । १ । २ । २९ ।

(३) **नीचैरनुदात्तः** । १ । २ । ३० ।

(४) **समाहारः स्वरितः** । १ । २ । ३१ ।

उच्च स्वर उदात्त., नीचोऽनुदात्त, उच्चनीचमिश्रित स्वरित. ।

अथानुनासिकोऽननुनासिकश्चेति स्थानभेदप्रयुक्तस्तृतीयोऽप्यस्ति स्वराणां विभाग । तत्राविकृतो यथास्थित स्वरोऽननुनासिक ।

(५) **मुखनासिकावचनोऽनुनासिकः** । १ । १ । ८ ।

मुखशब्देन मुखास्थितानि कण्ठादिस्थानानि गृह्यन्ते । मुखसहिता नासिका मुखनासिका, तया उच्चार्यमाणो वर्ण अनुनासिकसज्ञ । नाय विभागः स्वराणामेव, **यत्नलानामपि** अनुनासिकाननुनासिकभेदो विद्यते । उदात्तानुदात्तस्वरितभेद, अनुनासिकाननुनासिकभेदश्च स्वराणां लौकिकभाषायामिदानी नातीवोपयुज्यते, पाणिनिस्त्वेतैरपि व्यवहरतीत्येव तत्स्वरूप सक्षेपतोऽत्र वर्णितम् । लौकिकव्यवहारेषु ह्रस्वदीर्घाभ्यामेवातीवोपयोग ।

अथ व्यञ्जनानि विभज्यन्ते । तेषा स्वरवत् जातिभेदो नास्ति; सर्वाण्यप्येकविधानि । विभागस्तु तेषां सङ्ख्याशः पृथक्कृत्य संज्ञाकरणमेव । तत्र **कादयो मपर्यन्ता** २५ वर्णा. '**स्पर्शा**' इति 'वर्ग्या' इति चोच्यन्ते । **यरलवाश्चत्वारो** '**मध्यमा**' '**अन्तस्था**' वा । **शषसा** '**ऊष्म**' सज्ञिताः । स्पर्शेषु पञ्चभि पञ्चभिरेको वर्ग इति पञ्च वर्गा । ते च **कवर्ग.**, **चवर्ग**, **टवर्ग**, **तवर्ग**, **पवर्ग** इति आद्यवर्णैर्व्यपदिश्यन्ते । पाणिनिस्तु 'मात्रालाभ पुत्रलाभो दाक्षीपुत्रस्य पाणिने' इति वचनमन्वर्थयन् उकारयोगेन वर्गाणा कु चु टु तु पु इति सज्ञा करोति । प्रथमा **खराः**, द्वितीया **अतिखराः**, तृतीया **मृदवः**, चतुर्था **घोषाः**, पञ्चमा **अनुनासिका** इति पञ्चापि वर्गा समानरूप कल्पिता ।

सर्वोऽय वर्णविभाग· प्रयत्नमुपाधिमवलम्ब्य क्रियते । को नाम प्रयत्नः ? वर्णा हि मुखगततत्तत्स्थानेभ्य श्वासोदीरणेनोत्पद्यन्ते । तत्र श्वासोदीरणार्थमास्थित. प्रयास एव प्रयत्नशब्देनोच्यते । स **चाभ्यन्तरो बाह्यश्चेति** द्विविध । तत्र प्रथममाभ्यन्तरो वर्ण्यते । स्वराणामुच्चारणे श्वासो नियन्त्रणाभावादनर्गळ प्रसरतीति तेषा **विवृतः** प्रयत्न । व्यञ्जनोच्चारणे त्वन्तर्नियन्त्रितो न निस्सार्यते श्वासः । अत एव व्यञ्जनानि स्वयमुच्चारणा-

क्षमाणीत्युक्तम् । ऊष्मणामुच्चारणेऽपि किञ्चिदेव श्वासो विवृत इति तेषां **ईषद्विवृत** प्रयत्न । तत्तत्स्थानेषु श्वासस्य बलवद्घट्टनेनोत्पद्यन्त इति स्पर्शाना **स्पृष्टः** प्रयत्न , अत एव तेषां स्पर्शसज्ञा च । अन्त स्थाना भूयानशो विवृत इति **ईषत्स्पृष्टः** प्रयत्न । एव विवृत, ईषद्विवृत , स्पृष्ट, ईषत्स्पृष्ट इति चत्वार आभ्यन्तरप्रयत्नाः । विवृतप्रयत्नवानपि ह्रस्व अकार औत्तराहैर्व्यञ्जनवत् (श्वासस्य) सवारेणोच्चार्यत इति तस्य प्रयत्न. संवृत इत्युच्यते । पाणिनिना च तथा समाम्नातम् ।

(६) अ अे । ८ । ४ । ६८ ।

इत्यन्तिमेन सूत्रेण । अस्मिश्च प्रथमोऽकारो विवृत , द्वितीय सवृतं , सवृतत्वद्योतनाय मूर्द्धन्यकुशचिह्न निवेशितम् । विवृतोऽप्यकार उच्चारणकाले सवृतो भवतीत्यर्थ । उच्चारणमात्रकार्यमिद सम्प्रदायाभावाद् द्राविडैर्न सर्वत्रानुष्ठीयते। सन्त्यन्येऽपि देशभेदादुच्चारणभेदा । यथा— यत्र द्राविडानां वकारोच्चारण सम्प्रदायस्तत्र वज्ञा. वकारमुच्चरन्ते । बवयोरभेद , रलयोरभेद', डलयोरभेद इत्यादिप्रपञ्च सर्वोऽप्येवमुत्पन्न ।

बाह्यप्रयत्नस्त्वेकादशविध , यन्निबन्धन किल वर्गाणा खरातिखरादिभेद । स पुनर्नात्यन्तमुपयुक्त इति नात्र वर्ण्यते ।

अथ 'मुखनासिका ' इति सूत्रे परामृष्टानि वर्णाना स्थानानि विवृणुम — अकुहविसर्जनीयानां कण्ठ । इचुयशाना तालु । उपूपध्मानीयानामोष्ठौ । ऋटुरषाणां मूर्द्धा । लृतुलसाना दन्ता । एदैतोः कण्ठतालु । ओदौतो कण्ठोष्ठम् । वकारस्य दन्तोष्ठम्। ञमङणनाना नासिका च । नासिकानुस्वारस्य । विसर्गापरपर्यायो विसर्जनीय अर्द्धहकारसदृशध्वनि पदान्तरेफस्योच्चारणविशेष । तद्भेदावन्वर्थसज्ञौ जिह्वामूलीयोपध्मानीयौ । अर्द्धमकारसदृशध्वनिरनुस्वार. । विसर्गादयो न स्वतन्त्रा वर्णा , नैमि किमपि पदमारभ्यते । पशूनां शृङ्गाणीव ते स्वराणामन्तेषु कदाचिदुपलभ्यन्त इत्येव ।

अत एवैतेऽक्षरसमाम्नाये न पठिता. । वर्णाना स्थानविभाग· पट्टिकया प्रदर्श्यते—

स्थान	कण्ठ	तालु	ओष्ठौ	मूर्द्धा	दन्ता	कण्ठतालु	कण्ठोष्ठम्
	अ	इ	उ	ऋ	ऌ	ए ऐ	ओ औ
खरा	क	च	प	ट	त		
अतिखरा	ख	छ	फ	ठ	थ		
मृदव	ग	ज	ब	ड	द		
घोषा	घ	झ	भ	ढ	ध		
अनुनासिका	ङ	ञ	म	ण	न		
मध्यमा·	—	य	व	र	ल		
ऊष्माण	ह	श	—	ष	स		

उक्तौ स्थानाभ्यन्तरप्रयत्नौ ययो· साधारणौ तौ वर्णौ मिथ सवर्णावुच्येते । तथा च सूत्रम्—

(७) **तुल्यास्यप्रयत्नं सवर्णम् । १ । १ । ९ ।**

आस्यशब्देन मुखगतस्थानान्युच्यन्ते । स्थानप्रयत्नसाम्येऽपि—

(८) **नाज्झलौ । १ । १ । १० ।**

स्वरव्यञ्जनयोर्न मिथ सावर्ण्यम् । अयमत्र फलितोऽर्थ — स्थानप्रयत्नभेन्नेनोपाधिना यो वर्णोऽनेकधा भिद्यते तस्य भेदप्रभेदा मिथः सवर्णा इति । तादृशाश्च भेदा स्वराणा मध्यमाना चैव, अतः एकस्यैव स्वरस्य ह्रस्वदीर्घादयो मिथ. सवर्णा , एवमनुनासिका अननुनासिकाश्च यवला मिथ.

सवर्णा । वर्णान्तरेषु सावर्ण्यस्य न प्रसक्ति । सवर्णेषु भेदेषु एकस्य विहित कार्य अन्यस्यापि कर्त्तव्यम् । यथा— अकारस्य यद्विधीयते तत् आकारस्यापि कर्त्तव्यम् । उकारस्य विहितं ऊकारस्यापीत्यादि । यत्र पुनरेकस्यैव भेदस्य विधिर्विवक्ष्यते तत्र स्वरेषु तकार योजयत्याचार्य । यथा– अत्, उत्, एत् इत्यादि । एवं च अ=सर्वविधोऽप्यकार, अत्=ह्रस्व अकार । इ=सर्वविधोऽपीकार, इत्=ह्रस्व इकार इत्यादि ।

लौकिकीमत्र प्रदर्शितामक्षरमाला पाणिनि क्रमभेद कृत्वा सूत्रात्मना निबध्नाति । यानि (सूत्राणि)

(१) महेश्वरादधिगतानीत्यैतिह्यात् **माहेश्वरसूत्राणी**ति,

(२) अक्षरपाठरूपत्वात् **अक्षरसमाम्नाय** इति,

(३) प्रत्याहाराख्यसङ्केतोपयोगित्वात् **प्रत्याहारसूत्राणी**ति,

(४) चतुर्दशसख्याकत्वात् **चतुर्दशसूत्री**ति च व्यवह्रियन्ते । तानि चेमानि—

१ अ इ उ (ण्)	८ ञ म (ङ्)
२ ऋ ऌ (क्)	९ घ ढ ध (ष्)
३ ए ओ (ङ्)	१० ज ब ग ड द (श्)
४ ऐ औ (च्)	११ ख फ छ ठ थ च ट त (व्)
५ [ह] य व र (ट्)	१२. क प (य्)
६ ल (ण्)	१३ श ष स (र्)
७ ञ म ङ ण न (म्)	१४ ह (ल्)

(१) व्यापकजात्याक्रान्तस्य ।

(२) व्याप्यजात्याक्रान्तस्यापि ।

(३) उपात्तधर्मसमानाधिकरणजात्याक्रान्तस्यैव ।

(४) यथा स्थूला वा कृशा वा, कृष्णा वा श्वेता वा गौर्गौरेव तथा ह्रस्वो वा दीर्घो वा, उदात्तो वा अनुदात्तो वा अकारोऽकार एव इति स्वरा जात्या आह्या , कृशा गौरित्यादिवद्विशेषणस्य विवक्षाया तु तत्स्थाने 'अत्' 'आत्' 'इत्' 'ईत्' इति ह्रस्वदीर्घौ तकार पर कृत्वा उच्येते इति व्यवस्था तन्त्रेऽस्मिन् कृतेति तत्त्वम् ।

अत्र चाय रचनाक्रम — प्राधान्यात् प्रथम स्वरा । तत्र अ इ उ इति मूलस्वरै प्रथम सूत्रम् । रेफलकाररूपव्यञ्जनाशोपस्कृताभ्या ऋ ऌ-भ्या द्वितीयम् । अ+इ=ए, अ+उ=ओ इति मूलस्वरद्वयसकीर्णाभ्या ए-ओभ्या तृतीयम् । अ+अ=आ, आ+इ=ऐ, आ+उ=औ, इति संसृष्टाकारविशिष्टसकररूपाभ्या ऐ-औभ्या चतुर्थम् । ए, ओ, ऐ, औ इत्येते स्वरा सङ्कररूपत्वात् सन्ध्यक्षराणीत्युच्यन्ते । स्वरानन्तर स्वराणा पूर्णव्यञ्जनाना च मध्यपतितत्वात् मध्यमव्यपदेशभाभिः यवरलैः पञ्चमषष्ठे सूत्रे । इ उ ऋ ऌ इति स्वराणा यवरल इति मध्यमानां च सगर्भ्याणा भ्रातृणामिव कोऽपि सजातीयो धर्म प्रकटमुपलभ्यते, तत्र इ उ ऋ ऌ इति स्वराणा क्रममनुसर्त्तु यवरल इति (यरलव इति लौकिकक्रमात् भिन्न) क्रम उपात्त । मध्यमानन्तर वर्ग्या पठ्यन्ते । ते च साम्प्रदायिकीं रीति-मुल्लङ्घ्य खरा पृथक्, अतिखरा पृथक् इत्यादि भङ्ग्या सङ्गीकृत्य (अनुना-सिक, घोष, मृदु, अतिखर, खर इति) व्युत्क्रमेण परिगणिता । वर्ग्ये-भ्य पर ऊष्माण पठिता । अत्र हकार एको व्यञ्जनानामादावन्ते चेति द्विरुपात्त । सूत्रसीवने च मध्येमध्ये विच्छेदद्योतनार्थमिव ण्, क्, ङ् इत्यादय केवलव्यञ्जनरूपा ग्रन्थयो निवेशिता । अन्ते श्रूयमाणानामेषा केवलव्यञ्जनाना 'इत्' इति सज्ञा कृता । अन्यत्रापि (आगमादेशप्रत्ययादिषु) इत्सज्ञितानि व्यञ्जनान्यायोजयत्याचार्य. । इद नानाप्रकाराणि प्रयोजनान्यु-द्दिश्य क्रियते । अक्षरसमाम्नाये तावत् इता प्रत्याहार. प्रयोजनम् । प्रत्या-हारो नाम मध्यपतिताना ग्रहणाय आद्यन्तयोर्मेळनम् । तथाहि – उद्दिष्टमेक-मक्षरमादाय तेन सह सूत्रान्तपठितानामितां योजनेन सम्पादित. शब्दो म-ध्यगताना वर्णाना सज्ञा भवति, यथा— 'अण्' इति अ, इ, उ वर्णानां संज्ञा, 'अक्' इति ऌपर्यन्ताना, 'अच्' इति औपर्यन्तानां । एव 'इक्' इति इ उ ऋ ऌ इत्येतेषा, 'यण्' इति मध्यमानां, 'जश्' इति मृदूनां, 'झष्' इति घोषाणां, 'शर्' इत्यूष्मणां, च सज्ञा भवति । अत एव

'अच्' इति स्वराणा प्रत्याहार, 'हल्' इति व्यञ्जनानां 'अल्' इति वर्णमात्रस्य । हकारस्य द्विरुपादान तस्य 'अट्'-प्रत्याहारेण, शल् प्रत्याहारेण च ग्रहणार्थम् । अनियतसख्याकैर्वर्णै· सूत्रकरणमपि प्रत्याहारसौकर्यार्थमेव । अत्र चार्थे सूत्रम्—

(९) **आदिरन्त्येन सहेता । १ । १ । ७१ ।**

आदित्वेनोपात्तो वर्णः अन्त्येन इता सह उच्चार्यमाणो मध्यगाना स्वस्य च सज्ञा भवति । प्रत्याहारैर्वर्णग्रहणे मध्यपतितान्यपि इत्सज्ञकानि व्यञ्जनानि न गृह्यन्ते । पुष्पैर्मालाग्रथने गुणेन यावदुपक्रियते तावदेव वर्णै. प्रत्याहारकरणेऽपीति तेष्वश्रद्धैव । अभ्यासार्थ प्रचुरप्रयोगाः केऽपि प्रत्याहारा. स्वग्राह्यैर्वर्णै सहाथ. प्रदर्शिता —

१	अण्	इति	मूलस्वराणा	प्रत्याहार·.
२	अक्	,,	सन्ध्यक्षरभिन्नाना स्वराणां	,,
३	एच्	,,	सन्ध्यक्षराणा	,,
४	अट्	,,	स्वराणा ह्रस्व लभिन्नमध्यमानां च	,,
५	झल्	,,	वर्गेष्वाद्यानां चतुर्णामूष्मणा च	,,
६.	खर्	,,	खरातिखरोष्मणा	,,
७	चर्	,,	खरोष्मणो	,, इत्यादि ।

एव प्रत्ययादिष्वपि इत्करणेन तत्तदस्ति प्रयोजनम् । अथ कीदृशा वर्णा इत इति विवेचनार्थमित्सज्ञाविधिरुच्यते ।

(१०) **उपदेशेऽजनुनासिक इत् । १ । ३ । २ ।**

शास्त्रप्रवर्तकानां प्रत्यक्षमाख्यानमुपदेशः । स च प्राय आगमादेशधातुगणपाठप्रत्ययप्रत्याहारसूत्ररूप । तेषु अनुनासिको योऽच् (स्वर) स इत् स्यात् । अनुनासिकत्वेनोच्चारण कालक्रमेण लुप्त, इदानी यस्य इत्सज्ञा अपेक्षिता तस्य स्वरस्य अनुनासिकत्व प्रतिज्ञायत इत्येव सम्प्रदाय । धातुपाठे 'एध' 'स्पर्द्ध' 'वद' इत्यादिष्वकारः, 'चक्षिङ्' इत्यादाविकारः, 'कटे' इत्यादौ एकारः, 'गुपू' इत्यादावूकारः इत्यादय इत्संज्ञा ।

'नुक्', 'नुट्', 'पुक्', 'नुम्' इत्याद्यागमेषु उकार इत् । प्रत्ययादिषु च अनुनासिकत्वप्रतिज्ञानेनाचामित्सज्ञा विरलास्ति । 'शतृ' प्रत्यये ऋकार 'मतुप्' प्रत्यये उकारश्च इत् ।

(११) **हलन्त्यम्** । १ । ३ । ३ ।

उपदेशेऽन्त्य हल् (व्यञ्जन) इत् स्यात् । अत एव प्रत्याहारसूत्रेषु अन्त्यव्यञ्जनाना णकारादीनामित्सज्ञा । एव 'नञ्' 'आङ्' 'माङ्' इत्यादिनिपातेषु 'तिप्' 'शानच्' 'ल्यप्' इत्यादिप्रत्ययेषु, 'कृञ्' 'चक्षिङ्' इत्यादिधातुषु च अन्त्या हल इत्सज्ञा ।

अथ प्रत्ययेषु कुत्रचिदन्त्यस्य हल इत्सज्ञाया अनपेक्षितत्वान्निषेधमारभते—

(१२) **न विभक्तौ तुस्माः** । १ । ३ । ४ ।

विभक्तिप्रत्ययेषु तदादेशेषु च सकारमकारौ विभक्तिप्रत्ययादेशेषु तवर्ग्याश्च अन्त्या अपि नेत्सज्ञका[1] । 'किमोऽत'स्तकारस्य विभक्तिप्रत्ययेऽपीत्सज्ञास्ति । अनेन 'भ्यस्' 'भ्याम्' 'ध्वम्' 'स्मात्' 'स्मिन्' इत्यादिविभक्तिषु तदादेशेषु चान्त्यस्य हलो न इत्सज्ञा ।

(१३) **आदिर्ञिटुडवः** । १ । ३ । ५ ।

धातूनामादौ 'ञि' 'टु' 'डु' इत्येतान्यक्षराणीत्सज्ञानि ।

यथा—ञिमिदा स्नेहने । टुनदि समृद्धौ । डुकृञ् करणे ।

(१४) **षः प्रत्ययस्य** । १ । ३ । ६ ।

प्रत्ययादि षकार इत् । यथा— प्यञ्, ष्फ इत्यादौ ।

(१५) **चुटू** । १ । ३ । ७ ।

प्रत्ययादी चवर्गटवर्गौवित्सज्ञौ । यथा–जश्, ञ्य, टच्, डण् इत्यादौ ।

---

१ इता प्रत्याहारस्य प्रत्याहारेण इतश्च विधान शाकटायनादिप्राचीनवैयाकरणसङ्केतावलम्बेन । अन्यत्रापि 'औङ आप' इत्यादौ प्राचीनसज्ञाभिर्व्यवहरत्याचार्य । अतो नान्योन्याश्रयदोषस्यात्र प्रसक्ति ।

(१६) **लशक्वतद्धिते । १ । ३ । ८ ।**

नामपदेभ्यो नामान्तरव्युत्पादनार्थका· प्रत्ययास्तद्धिता इत्युच्यन्ते । तद्धितभिन्नप्रत्ययाद्या लशकवर्गा इत स्यु· ।

यथा—'ल्युट्' 'शस्' 'क्विप्' 'खश्' 'घञ्' इत्यादौ ।

(१७) **तस्य लोपः । १ । ३ । ९ ।**

इतो लोप· स्यात् । इत्सज्ञाना वर्णानामक्षराणा वा नाश कार्य, ते सिद्धेषु पदेषु नोच्चारणीया इत्यर्थ । चिह्नमात्रमित्, न तु प्रत्ययादीना वस्तुतो घटको वर्ण इति तात्पर्यम् ।

सज्ञान्तराण्यपि बहुत्रोपयुक्तानि प्रकरणेऽस्मिन् कथ्यन्ते—

(१८) **वृद्धिरादैच् । १ । १ । १ ।**

'आत्' इति तपरकरण निर्देशसौकर्यार्थम् । ऐच् प्रत्याहार । आ, ऐ, औ, एते प्रत्येक वृद्धिसज्ञका ।

(१९) **अदेङ् गुणः । १ । १ । २ ।**

'अत्' इति ह्रस्वमात्रग्रहणाय निर्देशसौकर्याय च तपरो निर्देश । अ, ए, ओ एते प्रत्येक गुणसज्ञका ।

(२०) **हलोऽनन्तराः संयोगः । १ । १ । ७ ।**

हल स्वरै कालेन वा अव्यवहिता समुदिता· सयोगसज्ञका· ।

यथा—स्त, श्च, क्ष, स्त्री, ष्म्या, त्स्न्यं, इत्यादय ।

(२१) **अचोऽन्त्यादि टि । १ । १ । ६४ ।**

अचा मध्ये योऽन्त्य स आदिर्यस्य स वर्ण· वर्णसमूहो वा टिसंज्ञ स्यात् । स्वरान्त्येषु शब्देष्वन्त्यस्वर·, व्यञ्जनान्तेष्वन्त्यव्यञ्जन स्वपूर्वस्वरमिळित च टिसज्ञमित्यर्थ· ।

यथा—	शब्दः	टिः	शब्दः	टिः
	हरि इत्यस्य	इ	प्रत्यक् इत्यस्य	अक्
	गुरु ,,	उ	सरस् ,,	अस्
	भोस् ,,	ओस्	अजागर्त् ,,	अर्त्
	किम् ,,	इम्	ऊर्क् ,,	ऊर्क्

(२२) **अलोऽन्त्यात् पूर्व उपधा** । १ । १ । ६५ ।

उपान्त्यो वर्ण **उपधासंज्ञ** । यथा– हरि इत्यत्र रेफ उपधा । ओम् इत्यत्र ओकार इत्यादि ।

(२३) **परः सन्निकर्षः संहिता** । १ । ४ । १०९ ।

मध्ये विच्छेद विना वर्णाना धारारूपेणोच्चारण **संहिता** । यथा— श्लोकवाचनादौ । एकैकस्य पदस्य पृथक्पृथक् कथने सहिता नास्ति ।

(२४) **विरामोऽवसानम्** । १ । ४ । ११० ।

स्पष्टार्थमिद व्याख्या नापेक्षते । गद्येषु वाक्यविरति पद्येष्वर्धविरतिश्चावसानत्वेन गण्यते ।

इति संज्ञाप्रकरणम् ।

अथ परिभाषाप्रकरणम् ।

लाघवाय सन्देहवारणाय च शास्त्रेषु स्वातन्त्र्येण निबद्धा व्यवस्थाः **परिभाषा**शब्देनोच्यन्ते । परिभाषाज्ञान विना विधिसूत्रार्थबोधो न स्यादिति ता व्याख्यायन्ते—

सूत्रैस्तावत् आगम आदेश प्रत्यय इति प्रायस्त्रिविधानि कार्याणि विधीयन्ते । तत्र प्रत्यय प्रकृते पर एव कर्तव्य इति नियम । आगमा· कदाचिदादौ, अन्यदान्ते, जातुचिन्मध्ये । आदेश कदाचिदादे, अन्यदान्त्यस्य, जातुचित् सर्वस्य च । तत्र नियम परिभाषाभि क्रियते । प्रथमागमाना देशनियम·—

(२५) **आद्यन्तौ टकितौ** । १ । १ । ४६ ।

टकौ इतौ ययोस्तौ टकितौ । तौ आद्यन्तौ स्त । टकाररूपेण इता चिह्नित आगम आदौ कार्य. । ककाररूपेण इता चिह्नितोऽन्ते कार्य इ.

स्यर्थ । टकारमनुबन्ध दृष्ट्वा आदौ, ककारमनुबन्ध दृष्ट्वान्ते चागम कुर्या-दिति व्यवस्थास्वरूपम् ।

(२६) **मिदचोऽन्त्यात् परः** । १ । १ । ४७ ।

यस्य मकारेण इत्कृत. स अन्त्यस्वरात् पर कार्य । तथा च मित् हलन्तेष्वन्त्याद्धल पूर्व निवेशनीय, अजन्तेष्वन्त एव । आदेशाना नियमोऽनुपद वक्ष्यते । अष्टाध्यायीक्रमानुरोधेन मध्यगतानि परिभाषासूत्राणि प्रथम व्याख्यायन्ते ।

(२७) **एच इग्घ्रस्वादेशे** । १ । १ । ४८ ।

इक् ह्रस्वादेशे इति च्छेद । ए ओ ऐ औ इति सन्ध्यक्षराणा ह्रस्वा न सन्तीत्युक्त, तेषा ह्रस्वो यदि विधीयते तर्हि तत्स्थाने इक् (इ उ ऋ ऌ) प्रयोक्तव्य । इदमुदाहरणस्थलेषु स्फुटीकरिष्यते ।

(२८) **षष्ठी स्थानेयोगा** । १ । १ । ४९ ।

'स्थाने' इति पदस्य योगो यस्या सा स्थानेयोगा । 'तस्य स्थाने' इति वक्तव्ये पाणिनि 'तस्य' इति षष्ठीमेव प्रयुङ्क्ते, 'स्थाने' इति पदमध्याहार्यमित्यर्थ । अय सम्प्रदाय आदेशविधिषूपयुज्यते । यथा— 'अस्तेर्भू' इति सूत्रस्य 'अस्ते. स्थाने भू' रित्यर्थ ।

(२९) **स्थानेऽन्तरतमः** । १ । १ । ५० ।

स्थाने चान्तरतम (सदृशतम) आदेश कार्य । यत्र अमुक आदेश इति वर्णविशेषमनुक्त्वा पूर्वसवर्ण, परसवर्ण, मूर्धन्य, यण् (प्रत्याहार) इत्यादि सामान्यरीत्या आदेश कल्पते तत्र स्थानप्रयत्नाभ्या योग्यता परीक्ष्य सदृशतमो वर्ण आदेशत्वेन ग्राह्य इत्यर्थ ।

(३०) **उरण् रपरः** । १ । १ । ५१ ।

'उ.' इति 'ऋ' इत्यस्य षष्ठ्यन्त रूपम् । ऋकारस्थाने आदिश्यमान अण् (अ इ उ) रेफ पर कृत्वा उच्चार्य । ऋकारस्य अ इ उ इत्येते आदेशा क्रमात् *अर्, इर्, उर्, इत्येवरूपा ग्राह्या इत्यर्थ ।

* ऋ स्वरे हि रेफाश स्फुट श्रूयते । अतस्तदादेशा रेफसस्कृतमुच्चारणमर्हन्तीति न्याय्यमेवैतत् । अणादेश ऋकारस्य रेफाश पृथक्त्वेन कार्य इति हृदयम् । एव ऌकारादेशो लकार पुरस्कृत्योच्चारणीय ।

(२१) अलोऽन्त्यस्य । १ । १ । ५२ ।

आदेश सर्वोऽपि अन्त्यस्य अल (=वर्णस्य) कार्य ।

(२२) ङिच्च । १ । १ । ५३ ।

ङकारेण इता चिह्नितोऽप्यादेश अन्त्यस्यैव कर्त्तव्य । पूर्वेणैव सिद्धे पुनर्विधानमिद किमर्थमित्यनुपदमेव स्पष्टीभविष्यति ।

(२३) आदेः परस्य । १ । १ । ५४ ।

'अलोऽन्त्यस्ये'त्युक्त, किन्तु यत्रादेश कस्मादपि परस्य विधीयते तत्र तस्य (परस्य) आदेरेव कर्त्तव्य , न त्वन्त्यस्य । यथा— अहन् शब्दस्य रेफ इति विधौ 'अहन्' इति शब्दान्त्यस्य नकारस्यादेश । 'उत्' इत्युपसर्गात् परस्य स्तम्भ इत्यस्य तकार इति विधौ तु स्तम्भ इतिशब्दादे सकारस्यादेश ।

(२४) अनेकाल् शित्सर्वस्य । १ । १ । ५५ ।

अनेकवर्ण शकारेण इता चिह्नितश्चादेश समग्रस्य स्थानिन कर्त्तव्य । यथा— 'दृश्' इति धातो 'पश्य' इत्यादेश अनेकाल्त्वात् समग्र स्थानिनमपनीय तत्स्थानमाक्रामति। एव इदशब्दस्य तृतीयादिविभक्तिषु अश् इति शित्वान्नोऽपि सर्वादेशो भवति। 'अलोऽन्त्यस्य' इत्यादिभिश्चतुर्भि सूत्रै आदेशाना देशव्यवस्था क्रियते। सा चैव—भावरूप आदेशस्तावत् एकाल्, अनेकाल् इति द्विविध । तत्र एकाल् अन्त्यस्य कार्य, अनेकाल् तु सर्वस्य इति सामान्यतो नियम । अथ विशेष —एकाल् अप्यादेश शित्चेत् सर्वस्य, (यत कुतश्चित् परस्य विधीयमानस्तु आदे) अनेकालपि ङिच्चेदन्त्यस्येति । तथा च स्वघटकाना वर्णानां सख्यैव आदेशस्य देश व्यवस्थापयति । यत्र पुनस्तद्व्यभिचारोऽपेक्षितस्तत्र शकारङकारावनुबन्धौ प्रयुज्येते इति सङ्केतमात्रमेव करोति ।

(२५) तस्मिन्निति निर्दिष्टे पूर्वस्य । १ । १ । ६६ ।

(२६) तस्मादित्युत्तरस्य । १ । १ । ६७ ।

पूर्वपरयो पूर्वस्य कार्ये कर्त्तव्ये पर सप्तम्यन्त क्रियते, परस्य तु

कार्ये कर्त्तव्ये पूर्वं पञ्चम्यन्त क्रियते । यथा— मित्रशब्दे परे विश्वशब्दस्य दीर्घ विधातु 'विश्वस्य मित्रे दीर्घ' इत्याचार्य सूत्रयेत्, मित्रशब्दस्य विश्वशब्दे पूर्वे पुल्लिङ्गत्व विधातु 'विश्वान्मित्र पुमान्' इति सूत्रयेत् । 'मित्रे' इत्यत्र 'मित्रे परे' इति, 'विश्वात्' इत्यत्र 'विश्वात् पर' इति च परशब्द उभयत्राप्यध्याहार्य इति तात्पर्यम् । सप्तम्यन्त दृष्ट्वा पूर्वस्य कार्य कुर्यात्, पञ्चम्यन्त दृष्ट्वा परस्य कार्य कुर्यादिति सङ्केतस्वरूपम् ।

(३७) **स्वं रूपं शब्दस्याशब्दसंज्ञा । १ । १ । ६८ ।**

सूत्रेऽस्मिन् (1) 'स्वरूप शब्दस्य' इत्यशेन विधि क्रियते । (2) 'अशब्दसज्ञा' इत्यशेन स एव विधिर्निषिध्यते । (1) शब्दस्य स्वरूपमेवास्मिन्छब्दशास्त्रे विशेष्यतया गृह्यते न तर्थ । यथा—पूर्वोक्ते 'विश्वस्य मित्रे' इत्युदाहरणे विश्वमित्रशब्दावेव ग्राह्यौ, न तु कृत्स्नबन्धू इति तयो पर्यायौ । (2) अशब्दसज्ञा=शब्दसज्ञा वर्जयित्वा । शब्दसज्ञेत्यत्र शब्दशास्त्रकृता सज्ञेत्यर्थ । शास्त्रे 'गुण' 'वृद्धि' इत्याद्या या साङ्केतिकसज्ञा कृतास्तत्र तु अर्थ एव ग्राह्यो न शब्दरूपमिति उक्तस्य विधे सङ्कोचनम् । तथा च गुणवृद्ध्यादिविधौ अदेङ् गुण, वृद्धिरादैच् इत्यादीन् सङ्केतितानर्थानेव गृह्णीयात्, अन्यत्र तु शब्दरूपम् ।

(३८) **अणुदित् सवर्णस्य चाप्रत्ययः । १ । १ । ६९ ।**

अण् इति 'लण्' सूत्रणकारेण प्रत्याहर, स्वरान् मध्यमाश्च प्रत्याहरति । स्वरमध्यमौ, उकारेण इता योजितश्च वर्ण स्वस्य सवर्णस्य च ग्राहक स्यात् । 'इक्' 'अच्' इत्यादिप्रत्याहारै सूत्रानुक्ता दीर्घाद्या अपि ग्राह्या । व्याख्यातमिद पूर्वमेव । 'अप्रत्यय' इति निषेधाश पर व्याख्यातव्योऽस्ति । प्रत्ययरूपस्तु स्वरो न सवर्णग्राहक इत्यशरार्थ । प्रत्यय इति विधेयोपलक्षणम् । तेन आगमादेशयोरपि निषेधेऽन्तर्भावो ज्ञेय । तदेतदुक्तम्—

॥ ॥ **'भाव्यमानेन सवर्णानां ग्रहणं न'**

इति । 'अ' इति प्रत्यय आदेश आगमो वा विधीयते चेत् तत्र 'आ' इति दीर्घस्वरूपोऽपि सोऽस्त्विति नापादनीयमित्यर्थ ।

(३२) **तपरस्तत्कालस्य** । १ । १ । ७० ।

ये पुन स्वरा निर्दिष्टमात्रका एवापेक्षितास्ते तकार पर कृत्वा उच्चार्यन्ते । अयमपि सङ्केत उक्त एव ।

(९) **आदिरन्त्येन सहेता** । १ । १ । ७२ ।

इद सूत्र सज्ञाप्रकरणे प्रसङ्गवशाद्व्याख्यातम् ।

(४०) **येन विधिस्तदन्तस्य** । १ । १ । ७२ ।

विशेषणेन तदन्त ग्राह्य, यथा— आतो धातोरित्युक्ते आदन्तस्य धातोरित्यर्थ ।

(४१) **यथासंख्यमनुदेशः समानाम्** । १ । ३ । १० ।

उद्देश्यानुद्देश्ययो सख्यासाम्ये उद्देशक्रमेणैव प्रवृत्ति । चतुर्णा स्थानिना चत्वार आदेशाश्चेदुच्यन्ते, प्रथमस्य प्रथमो द्वितीयस्य द्वितीय इति क्रमो ग्राह्य इत्यर्थ ।

(४२) **स्वरितेनाधिकारः** । १ । ३ । ११ ।

अन्येषु पर्योत्तरवाक्ययो सम्बन्ध सर्वजनविदित. । क्वचिदुत्तरवाक्यस्यान्वयपूर्तये पूर्ववाक्यात् पदान्यायोजनीयान्यपि स्यु । एव पूर्ववाक्यस्थपदानामुत्तरवाक्ये उपस्थिति अनुवृत्तिरित्युच्यते । अनुवृत्तिमात्रफलकान्यपि कदाचित् सूत्राणि क्रियन्ते—यान्यधिकार इति व्यपदिष्टानि । अनिष्टस्य पदस्यानुवृत्तिर्माभूदिति स्वरितस्वरेणोच्चार्यमाण पद सूत्रान्तरेष्वनुवर्त्तनीयम् इत्याचार्य सङ्केतयति । किन्तु सम्पदायोऽस्य कालक्रमाल्लुप्त । सम्प्रति यस्य पदस्यानुवृत्तिरिष्टा तस्य स्वरितत्व प्रतिज्ञायते इत्येव ।

इति परिभाषाप्रकरणम् ।

अथ सन्धिप्रकरणम्

प्रकृतिप्रत्ययो पदयोर्वा मेलने पूर्वान्त्यवर्णस्य परादिवर्णस्य उभयोर्वा ये विकारा उत्पद्यन्ते तानि सन्धिकार्याणि । विकारश्च आदेश,

आगम, द्वित्व, लोप इत्येषामन्यतम एव । सन्धिस्तावत् त्रिविध सम्भवति—पदमध्यमात्रे कर्त्तव्य, पदान्तमात्रे कर्त्तव्य, उभयत्रापि कर्त्तव्य इति । तत्र पदमध्यमात्रे कर्त्तव्य सन्धिर्विरल एव, प्रकृतिप्रत्ययविवेचन चापेक्षते । सन्धिप्रकरणेऽस्मिन् उभयसन्धि पदान्तसन्धिश्चोच्यते । तत्र च यत्र स्वरो विकार्य स स्वरसन्धि. प्रथम कथ्यते—

स्वरसन्धिः—

(४३) **इको यणचि** । ६ । १ । ७७ ।

'इक' इति पष्ठ्यन्त, अत. (२८) इक स्थाने इत्यर्थ । 'अचि' इति सप्तम्यन्तम्, अत (३५) अचि परे इत्यर्थ । सूत्रघटक पदत्रयमपि प्रत्याहाररूपम्, अतस्तत्तद्वर्णा ग्राह्या । एव च स्वरेष्वेकस्मिन् परे इ उ ऋ ऌ एषा वर्णाना स्थाने. य् व् र् ल् एते वर्णा आदेशा भ्यु इति सूत्रार्थ सम्पद्यते । यथासख्यपरिभाषया (४१) इकारस्य यकार, उकारस्य वकार, ऋकारस्य रेफ, ऌकारस्य लकार, इत्युद्देशक्रमेणादेशा प्रवर्त्तन्ते । 'अचि' इति निमित्तस्य तु सख्यासाम्याभावान्न कोऽपि क्रम । यथा—

दधि + अर्थ = द ध् य् अर्थ = दध्यर्थम् ।
मधु + ,, = म ध् व् ,, = मध्वर्थम् ।
पितृ + ,, = पि त् र् ,, = पित्रर्थम् ।
गम्ऌ + ,, = ग म् ल् ,, = गम्लर्थम् ।

अणुदित्सवर्णस्य च (३८) इति परिभाषाबलात् दीर्घ ईकारादिरपि इगच्प्रत्याहाराभ्या ग्राह्य । तेन—

सुधी + ऊढ = सुध्यूढ
वधू + आनत = व धानत
कृ + आकृति = काकृति
ल्कृ + आपत्ति = लापत्ति
} इत्यादावपि यण सिद्धयति ।

(४४) **एचोऽयवायावः** । ६ । १ । ७८ ।

अचीति पूर्वसूत्रादनुषज्यते, अय्, अव् आय्, आव् इत्येषां द्वन्द्वे

अयवायाव इति प्रथमाबहुवचनम् । ए ओ ऐ औ एषा अचि परे क्रमात् अय् अव् आय् आव् इत्यादेशा स्यु ।

पदमध्ये				पदान्ते			
हरे	+ ए	= हरय्	ए = हरये	हरे	+ इह = हरय्	इह = हरयिह ।
गुरो	+ ए	= गुरव्	ए = गुरवे	गुरो	+ इह = गुरव्	इह = गुरविह ।
ने	+ अक	= नाय्	अक = नायक	तस्मै	+ उक्त = तस्माय्	उक्त = तस्मायुक्त ।
पौ	+ अक	= पाव्	अक = पावक	तौ	+ एव = ताव्	एव = तावेव ।

अय पञ्चमि सूत्रै अयवायावादेशा हलि परेऽपि कुत्रचिद्विधीयन्ते । तानि प्रकरणान्तरे व्याख्यास्याम ।

(४५) **एकः पूर्वपरयोः** । ६ । १ । ८४ ।

अधिकारसूत्रमिदं न तु विधायकम् । इत परं विधीयमाना आदेशा पूर्वपरयोर्मिलितयो कर्तव्या इत्यनेन सूत्रेण प्रतिज्ञायते ।

[(४६) **अन्तादिवच्च** । ६ । १ । ८५ ।

एकादेशोऽय पूर्वस्यान्तवत् परस्यादिवच्च गणयितु शक्यते । इदमपि एकादेशस्य स्वरूपकथनरूपत्वादधिकार एव । एवमुत्तरसूत्रमपि—

(४७) **षत्वतुकोरसिद्धः** । ६ । १ । ८६ ।

षत्वे तुकि च कर्तव्ये एकादेशविधिरसिद्ध स्यात् । अधिकारसूत्रद्वयस्यास्य प्रयोजनमुपरिष्टाद्दर्शयिष्यते । सूत्रक्रमानुरोधेनैवैतदत्र व्याख्यातम् । प्रारम्भे बाला नैतत् पठन्त्विति कोष्ठकान्तर्निवेशित प्रारम्भका निरस्यन्तु ।]

(४८) **आद् गुणः** । ६ । १ । ८७ ।

'आत्' इति 'अ' इत्यस्य पञ्चम्यन्त, तपरकरणाभावात् सर्वविधमप्यकार गृह्णाति । 'इको यणचो'त्यत 'अचि' इत्यनुवर्तते, 'एक पूर्वपरयो' इत्यधिकृत च । अत अवर्णादचि परे पूर्वपरयोरेको गुण आदेश इति सूत्रार्थ । 'अदेङ् गुण' (१९) इति सज्ञाकरणात् अ (ह्रस्व) ए, ओ इत्येते स्वरा गुणशब्देन गृह्यन्ते । 'एक पूर्वपरयो' (४५) इत्यधिका

* पदान्तसन्धौ यवयोर्विकल्पेन लोपो वक्ष्यते । अतो 'हर एहि' इत्यादापि रूपभवति ।

रादत्र स्थानिनौ द्वौ, तयो पूर्व सर्वत्रापि अवर्ण , पर सर्वोऽप्यच् इत्युक्तेऽपि इक् (इ, उ, ऋ. ऌ) एव विवक्षित इति उपरि स्पष्टीभविष्यति। एव चात्र (1) अ, इ वर्णौ, (2) अ, उ वर्णौ, (3) अ, ऋ वर्णौ, (4) अ, ऌ वर्णौ चेति चत्वारि द्वन्द्वानि स्थानिन । अ, ए, ओ इति त्रय एवादेशा । अतो यथासख्य कर्तु नावकाश । ततश्च 'स्थानेऽन्तरतम' (२९) इति परिभाषितत्वात् कस्य क सदृशतम इति परीक्षणीयमापतितम्। तत्र अवर्णस्य कण्ठ स्थानम्, इवर्णस्य तालु, एकारस्य च कण्ठतालु इति स्थानसाम्यात् अ, इ वर्णयो एकारो गुण । एव अ. उ वर्णयो ओकार । ऋ, ऌ वर्णयो अकार एव । तत्र ऋकारस्थाने आदिष्ट अकार 'उरण् रपर' (३०) इति पारिभाषया 'अर्' इति रपरो भवति। ऌकारस्य तु तुल्यन्यायेन 'अल्' इति लपर । अथ उदाहरणम्—

उप + इन्द्र = उपेन्द्र	महा + ऋषि = महर्षि
कुल + उचितम् = कुलोचितम्	प्लुत + ऌकार = प्लुतऌकार

(४९) वृद्धिरेचि । ६ । १ । ८८ ।

अवर्णादेचि परे वृद्धिरेकादेश स्यात् । आ, ऐ, औ इति वृद्धिवर्णेषु पूर्वदन्तरतम्यात् अ+ए, अ+ऐ इत्यनयो ऐकार आदेश । अ+ओ, अ+औ अनयो औकार । यथा—

तस्य + एव = तस्यैव	नृप + ऐश्वर्यम् = नृपैश्वर्यम्
महा + ओज = महौज	वन + औत्सुक्यम = वनौत्सुक्यम्

अत्रेदमवधेय—उत्सर्गापवादन्यायमनुसृत्याचार्य कार्याणि विदधाति। न्यायोऽयमविसृश्यकारीव प्रथम व्यापकस्य सामान्यस्य विधेय विधाय पश्चादुद्बुद्ध इव विशेषविधीनारभमाणो विषयसङ्कोचनेनातिव्याप्ति परिहरति । तत्र च लौकिकोऽत्र दृष्टान्त—ब्राह्मणान् भोजयन् कोऽपि गृहस्वामी सूदानादिशति (1) 'ब्राह्मणेभ्यो दधि देयता, (2) तक्र कौण्डिन्याय' इति । अत्र महावाक्यपूर्वभागेण ब्राह्मणत्वसाधारण्यात् प्राप्त कौण्डिन्यस्यापि दधिदान, तक्रदानरूपविशेषविधि कुर्वता उत्तरभागेण बाध्यते । एव च पूर्वान्तये 'ब्राह्मणेभ्य' इति सामान्य कौण्डिन्यभिन्नत्वविशेषणेन

सङ्कोचितविषय पर्यवस्यति । विषयस्यैकदेशसाम्ये अधिकदेशव्यापको विधिरुत्सर्ग, अल्पदेशव्यापकोऽपवाद । अथ न्याय प्रकृते सञ्चार्यते—आदिचि गुणो विधीयते, आदेचि वृद्धि । अच्=अक्+एच् । अतोऽत्र गुणविधिरुत्सर्ग, वृद्धिविधिरपवाद । तेन च अपवादस्य विषय परिहृत्यैवोत्सर्ग प्रवर्तते । एव च (अच्—एच्=अक्), अन्त एचि व्यपकलिते शिष्ट अक् एव गुणस्य विषय । 'आदिचि गुण, एचि वृद्धिरि'ति फलितम् ।

उक्ता एव स्वरसन्धावुत्सर्गविषय, एभि कृत्स्नो विषयो व्याप्त इति पट्टिकापर्यवेक्षणेन स्फुट भविष्यति ।

पूर्व	पर	आदेश	करयेति	सूत्रम्
अ	इक् (इ उ ऋ ऌ)	(ए ओ अर् अल्) गुण	एका-देश	आद्गुण (1)
अ	एच् (ए ओ ऐ औ)	(ऐ औ ऐ ओ) वृद्धि	,,	वृद्धिरेचि (2)
इक् (इ उ ऋ ऌ)	अच्	(य् व् र् ल्) यण्	पूर्वा-देश	इको यणचि (3)
एच् (ए ओ ऐ औ)	अच्	अय् अव् आय् आव् यान्त. वान्त.	,,	एचोऽयवा-याव (4)

अथोक्तानां चतुर्णामपि सामान्यविधीनां यथायथमपवादा उच्यन्ते—

(५०) **एत्येधत्यूठ्सु** । ६ । १ । ८९ ।

यथा अकार ककार इत्यादिवद्वर्णौ 'कार'-प्रत्ययेन निर्दिश्यन्ते, तथा भवति एधतिरिखेभ्यः तिप्रत्ययेन * धातवो निर्दिश्यन्ते । अत सूत्रे एत्येधतिभ्याम् 'इ' 'एध' इत्येतौ धातू ग्राह्यौ । 'वृद्धिरेची'ति पूर्वसूत्र समग्रमनुवर्त्तते । 'आत्' इति च 'आद् गुण' इत्यतोऽनुषज्यते । एवीलेतत् 'एत्येधत्यूठ्सु' इत्यस्य विशेषण सत् 'एजादौ इत्यर्थं बोधयति । तत्र 'ऊठ्' इत्यस्यासम्भवात् एजादित्वविशेषण न सम्बध्यते । एच्प्रत्याहारेऽपि एकार एव सम्भवति । एव च अवर्णादेकारादौ 'इ' 'एध' धात्वो परयो ऊठि वा परे वृद्धिरेकादेश इति सूत्रार्थ । एत्येधत्यो पूर्वसूत्रेणैव सिद्धे 'एढि पररूपम्' इति वक्ष्यमाणमपवाद वाधितुमिद वृद्धिविधानम् । ऊठरतु आद्गुण बाधितुम् । ऊठ स्वरूप तद्विधौ स्पष्टीभविष्यति । अथोदाहियते—

उप + एति = उपैति । उप + एधते = उपैधते ।

प्रत्युदाहरण—एकारादिर्न चेत् , उप + इत = उपेत ।

(९१) ‡ **उपसर्गादृति धातौ** । ६ । १ । ९१ ।

अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेश । आद्गुणस्यायमपवाद । यथा—

प्र + ऋच्छति = प्रार्च्छति । अ + ऋ इत्यस्य 'आर्' इति वृद्धि ।

(९२) **एढि पररूपम्** । ६ । १ । ९४ ।

अवर्णान्तादुपसर्गात् एढादौ धातौ परे परस्य रूप (प्रकृते एढ्) एकादेश स्यात् । पूर्वस्य लोप इति फलितम् । यथा—

प्र + एजते = प्रेजते । प्र + ओषति = प्रोषति

वृद्धिरेचीत्यस्यायमपवाद । अस्यापवाद 'एत्येधत्यूठ्सु' इति । अपवादस्यापवदनात् प्रत्यावृत्त उत्सर्ग प्रतिप्रसव इत्युच्यते । तस्मात् उपैतीत्यादौ वृद्धे प्रतिप्रसव । अत्र वार्त्तिकम्—

॥ ' ॥ **ओत्वोष्ठ्यो समासे वा** ।

---

* धातुलक्षणम् (१२५) सूत्रे दृश्यताम् ।

‡ उपसर्ग (१३३) सूत्रे लक्षित ।

अवर्णादोलोष्ठ्यो एडि परे पररूप विकल्पेन स्यात् । तच्च समास एव । यथा—

स्थूल+ओतु =स्थूलोतु, स्थूलौतु । बिम्ब+ओष्ठ =बिम्बोष्ठ, बिम्बौष्ठ ।

अन्यु—(समासाभावे तु) तव+ओष्ठ =तवौष्ठ ।

(५३) **ओमाङोश्च** । ६ । १ । ९५ ।

अवर्णात् ओमिति प्रणवे आङ् इत्युपसर्गे च परे पररूपमेकादेश स्यात् । आङो ङकार इत् । यथा—

शिवाय+ओनम =शिवायो नम ।

अद्य+ओढा (आ+ऊढा=ओढा) अद्योढा । 'वृद्धिरेचि' इत्यस्यापवाद ।

शिव+एहि (आ+इहि=एहि) शिवेहि । 'एत्येधत्यूठ्सु' इत्यस्यापवाद ।

(५४) **अकः सवर्णे दीर्घः** । ६ । १ । १०१ ।

अक सवर्णेऽचि परे दीर्घ इति यण्गुणयोरपवाद । अत 'इको यणचि' 'आद्गुण' इत्युभयोरपि सूत्रयो असवर्णेऽजेव विषय । अक सवर्णोऽच् अगेव ह्रस्वदीर्घादिभेदभिन्न । अकोऽकि परे स्ववर्णदीर्घ इति फलितम् । अथोदाह्रियते—

मुर+अरि =मुरारि	अवि+ईश =अवीश
गुण+आढ्य =गुणाढ्य	यदु+ऊढ =यदूढ
दया+अब्धि =दयाब्धि	पातृ+ऋषभ =पातृषभ
रमा+आलिङ्गित =रमालिङ्गित	

(५५) **एङः पदान्तादति** (पूर्व) । ६ । १ । १०९ ।

पूर्व पूर्वरूपम् । पदान्तादेङ अति (ह्रस्वे अकारे) परे पूर्वरूप (=एङ्) एकादेश स्यात् । अयमेक पदान्तसन्धि. । अन्ये तु विशेषकथनाभावादुभयसन्धय । यथा—

हरे+अव=हरेव । विष्णो+अव=विष्णोव । अत्र स्थित अकार पूर्वरूपेण लुप्त इति द्योतयितु ऽ इति प्रश्लेषात्मक चिह्न निवेश्यते । यथा—हरेऽव, विष्णोऽव । इद सूत्र 'एचोऽयवायाव' इत्यस्यापवाद ।

अथ सन्धिनिषेध—योऽय प्रकृतिभाव इति व्यपदिश्यते, सन्धौ ह्यकृते पद प्रकृत्या (यथास्थितरूपेण) एवावतिष्ठते ।

(५६) **प्लुतप्रगृह्या अचि नित्यम्** (प्रकृत्या) । ६ । १ । १२५ ।

प्लुताश्च प्रगृह्यसज्ञाश्च अचि परे प्रकृत्या स्यु । सन्धि न लभेरान्नेत्यर्थ । विकल्पानुवृत्तिनिवृत्त्यर्थ नित्यमिति । प्लुतस्तावद्दूरादाह्वानादौ भवति । स लौकिकसस्कृते नातीवोपयुज्यत इति तद्विधिर्नात्र व्याख्यायते । प्रगृह्यसज्ञा पर विधियते—सा च प्रथमाध्यायप्रथमपादे विहिता ।

(५७) **ईदूदेद्विवचनं प्रगृह्यम्** । १ । १ । ११ ।

ईदन्त, ऊदन्त, एदन्त च द्विवचन प्रगृह्यसज्ञ स्यात् । अथोदाहरण—प्रथमं प्लुतस्य—

एहि कृष्ण ३ अत्र गौश्चरति । कृष्णात्रेति दीर्घो न । अनन्तर प्रगृह्यस्य—

कवी एतौ—कव्येतौ इति यण् न । पटू इमौ—पट्विमौ इति यण् न । द्वे अज्ञे—द्वेऽज्ञे इति पूर्वरूप न । आसाते इमौ—आसातेमौ इति अयादेशो न ।

(५८) **अदसो मात्** । १ । १ । १२ ।

अदस्शब्दस्य मकारात् परौ ईदूतौ प्रगृह्यौ स्त । असम्भवादेदित्यशो न सम्बध्यते । अद्विवचनार्थ अनीदूदेदन्तार्थ च वचनम् । अमू (पुमि) आसाते । मुत्वस्यासिद्धत्वेनाप्राप्तावारम्भ । असिद्धत्वमुपरिष्टात् स्पष्टीभविष्यति । यथा—अमी ईशा.—अमीशा इति सवर्णदीर्घो न ।

(५९) **ओत्** (निपात) । १ । १ । १५ ।

ओदन्तो निपात प्रगृह्य स्यात् । यथा—

अहो आश्चर्य—अहवाश्चर्यमिति अवादेशो न । अथो आरभ्यते—अथवारभ्यत इति न ।

अन्यत्रापि प्रगृह्यसज्ञोक्ता नातीवोपयुज्यते । प्रसङ्गवशात् प्रगृह्यसज्ञाविधयर्थ प्रथमाध्यायसूत्राणि व्याख्याय प्रकृत षष्ठाध्यायप्रथमपाद एवानुबध्यते—

(६०) **ऋत्यकः** (प्रकृत्या वा पदान्ते) । ६ । १ । १२८ ।

ह्रस्वे ऋकारे परे पदान्तस्थ. अक् प्रकृत्या वा स्यात् । यथा—

देव + ऋषि = देवऋषि, देवर्षि । दधि + ऋते = दधिऋते, दध्यृते ।

विधिस्तावन्नित्यो वैकल्पिको बहुलश्चेति । अवश्य कर्त्तव्यो नित्य, इच्छया कर्तुमकर्तुं वा शक्यो वैकल्पिक,

'क्वचित् प्रवृत्ति क्वचिदप्रवृत्ति क्वचिद्विभाषा क्वचिदन्यदेव'

इत्यव्यवस्थितो बहुल । वा, विभाषा, अन्यतरस्या इत्यव्ययत्रय विकल्प द्योतयति । ऋषीणा नामग्रहणेऽपि विकल्प पर्यवस्यति । तेषा हि तुल्य प्रामाण्य, तत्रैकस्य मतेऽस्ति, अन्येषा मते नास्तीति च स्थितिर्विकल्प एव किल । विषयैकदेशे प्रवृत्तिरेकदेशेऽप्रवृत्तिरिति स्थितिश्च विकल्पस्यैव कोऽपि भेद । सेय व्यवस्थितविभाषेत्युच्यते ।

हल्सन्धिः ।

हल्सन्धिस्तावदसिद्धकाण्डे वर्तते । असिद्धकाण्डो नामाष्टाध्याय्याश्चरमा त्रिपादी (अष्टमस्याध्यायस्य द्वितीयतृतीयचतुर्था पादा) । सपादै सप्तभिरध्यायैरुक्तेषु विधिषु कर्त्तव्येषु उत्तरा त्रिपादी असिद्धा (अविद्यमानप्राया) । त्रिपाद्यामपि पूर्वपूर्व विधिमपेक्ष्य पर परो विधिरसिद्ध । सपादसप्ताध्याय्या कृत्स्नापि रूपनिष्पत्तिप्रक्रिया प्रतिपादिता, त्रिपाद्यां तु यदुच्यते तत्केवल निष्पन्नस्य पदस्य उच्चारणसस्करणम् । अतस्त्रिपादीचोदितो विधिरन्त एव प्रवर्त्तते । कृतेऽस्मिन् पुनः सपादसप्ताध्यायीविहितस्य विधेर्न प्रवृत्त्यवकाश । सपादसप्ताध्यायी सिद्धा (=सर्वसम्प्रतिपन्ना), त्रिपादी तु असिद्धा (=असम्प्रतिपन्ना सपादसप्ताध्याय्या) । प्रथम सिद्धकाण्ड, उत्तरोऽसिद्धकाण्ड । असिद्धकाण्डकार्यलक्षण निमित्तमाश्रित्य सिद्धकाण्डगतो विधिर्न प्रवर्त्तयितव्य इति सङ्केतस्य तत्त्वम् । असिद्धकाण्डस्तावन्न केवल सिद्धकाण्ड प्रत्यसिद्ध, किन्तु तत्रापि पूर्वपूर्व प्रति परपर सूत्रमसिद्धमिति सङ्केत । एव च त्रिपाद्या यत्र कुत्रापि स्थित सूत्र सपाद-

सप्ताध्यायी त्रिपाद्यामेव स्वपूर्वसूत्राणि च प्रत्यसिद्धं, स्वोत्तरसूत्राणि तु प्रति सिद्धम् । अनया च रीत्या त्रिपाद्यां यथायथोपचीयते सूत्रसख्या तथा तथापचीयते सिद्धत्वम्, एवमन्तिम सूत्र सर्वमेव सूत्रान्तर प्रत्यसिद्ध भवति। व्याख्यात चैतत् सूत्र 'अ अ' (६) इति । अत एव त्रिवृतस्य सवृत केवलमुच्चारणमात्रकार्यमित्युक्तम्। तदेतदसिद्धत्वविधायक सूत्र व्याख्यायते –

(६१) **पूर्वत्रासिद्धम्** । ८ । २ । १ ।

इत पर यदुच्यते तत् पूर्वोक्त प्रत्यसिद्धम् । अष्टमाध्यायद्वितीयपादस्य प्रथममिद सूत्रमिति सपादसप्ताध्यायी प्रति उत्तरा त्रिपाद्यसिद्धा, अधिकारसूत्रमिदमिति त्रिपाद्यामपि पूर्व प्रति पर सूत्रमसिद्धम् ।

असिद्धकाण्डे तावद्व्यञ्जनविकारा एवोच्यन्त इति विषयपर्यालोचनेन यद्यपि सिद्धकाण्डादस्य व्यावर्त्तन सुकरं तथाप्यसिद्धकाण्ड एवान्तरालिकस्यासिद्धत्वस्य विवेचने सूत्रानुक्रम एव यत शरणीकरणीयो वर्त्तते ततो लाघवार्थमसिद्धकाण्डगता विषय उद्देशानुक्रमेण पञ्चभि कारिकाभिरत्र परिगणिता —

नलोपोऽन्ते, मतोर्वत्व, रोल , सयोगतक्षणम् , ।
चो कु,-र्हेढि , छशो षत्व, भष्भावोऽथ, पदान्तजश् ॥ १ ॥
षढो. को, नश्च निष्ठाया , क्विन्कु,-र्नो मान्तधातुषु. ।
रुत्व, वसुस्रस्वादीना दत्व, र्वोपधदीर्घता, ॥ २ ॥
सुत्व, प्लुत, श्छान्दसरु, ढ्लोपो, रविसर्गता, ।
रोर्य , शाकल्यलोपश्च, मो बिन्दु, स्थुट्तुकौ, ङमुट् ॥ ३ ॥
सत्वशत्वे विसर्गस्य, मूर्द्धन्यो, णत्वकीर्त्तनम् , ।
श्चुत्वष्टुत्वे, पञ्चमत्व, वर्णद्वित्व च, जश्चरौ, ॥ ४ ॥
बिन्दुत्वो परसावर्ण्य, हो षोष , शश्छ इत्यमी ।
हल्विकारास्त्रिपाद्युक्ता असिद्धा. स्युरनुक्रमात् ॥ ५ ॥

स्वरव्यञ्जनसन्ध्यो सिद्धासिद्धत्वकृतादन्योऽप्यस्ति भेद । स्वर-सन्धिमेव पाणिनि सन्धित्वेन गणयति, यत स एव 'सहिताया । ६ । १ । ७२ ।' इत्यधिकृत्य विहित । व्यञ्जनसन्धिस्तु 'पदस्य । ८ । १ । १६ ।' इत्यधिकृत्यारब्धो झलि परेऽपि क्वचित्क्वचिद्विधीयत इत्येव । अत पदान्ते झलि परे वा विहितानि, वर्णाना योगमात्रे चोदि-तानि च कार्याण्यस्मिन् प्रकरणे यावच्छक्य सूत्रानुक्रमेण कथ्यन्ते ।

(६२) **चोः कुः** (झलि पदान्ते च) । ८ । २ । ३० ।

चवर्गस्य कवर्ग आदेश स्यात् झलि परे पदान्ते च । यथा—

पदान्ते	झलि परे
वाच् = वाक्,	सिच् + त = सिक्तम् ।
प्राच् = प्राक्,	मुच् + त = मुक्तम् ।
स्रज् = स्रग्,	भज् + त = भक्तम् ।
भिषज् = भिषग्,	तिज् + त = तिक्तम् ।

(६३) **होढः** । ८ । २ । ३१ ।

झलि परे पदान्ते च हस्य ढ आदेश स्यात् । यथा—

पदान्ते	झलि परे
लिह् = लिढ् (= लिड्),	लिह् + त = लिढ् त (= लीढ) ।
वाह् = वाढ् (= वाड्),	वह् + त = वढ त (= ऊढ) ।

---

१ अष्टमे २-३-४ पादेषु व्यञ्जनकार्याणि प्लुतश्च विधीयन्ते । तत्र २-यपादे पदान्ते, झलि परे च कार्याणि प्लुतश्च सहिताविकार विनैवानुशिष्यन्ते । ३य ४थ पादयो 'तयोर्यावचि सहिताया' इत्यधिकरोत्याचार्य । ततश्च द्वितीयपादकार्याणा नित्यत्व, अन्तिमपादयोस्तु कार्याणा सहिताविवक्षाविवक्षाभ्या ऐच्छिकत्व च फलति । त्रिपादीप्रथ-मपादविहिताना हल्कार्याणा निर्णये, पदान्ते झलि च हलामल्पानामेव सम्भव इति ज्ञान सुलभम् । तेन च सन्धिकार्याणि सुष्ठिग्राह्याणि भवन्ति । यथा—

पदान्ते—(१) हस्य ढ (२) म यमेषु यवलान्ता अप्रसिद्धा' (३) चो कु (४) झषा षस्य च जश् (५) शस्य ष (६) सस्य रु एव व्यपकलिते. र, ग, द, ड, ण, न, न, ब, म इति नवैव । एवमन्यदप्यूह्यम् ।

पदान्ते झशि परे च खरातिखरघोषाणा मृदुरादेशोऽनुपदमेव विधास्यते । अतो लिड्=लिड्, लिड्भि=लिड्भि । अन्येष्वप्युदाहरणेषु मृद्वादेशोऽय द्रष्टव्य ।

(६४) **दादेर्धातोर्घः** । ८ । २ । ३२ ।

दकारादेस्तु धातोर्हकारस्य झलि परे पदान्ते च दस्यापवादो घ । यथा—

दह्=दघ् (=दग्) । दह्+भि=दघ्+भि (=धग्भि) ।

'दग्' इति रूपनिष्पत्तिरनुपद वक्ष्यते

(६५) **वा द्रुहमुहष्णुहष्णिहाम्** । ८ । २ । ३३ ।

द्रुहादीना धातूना हकारस्य वा घ, पक्षे ढ यथा—

पदान्ते	झलि परे
द्रुह्=द्रुघ्, द्रुढ् (=द्रुग्, द्रुद्)	मुह्+त=मुघ्त (=मुग्ध), मुढ्त (=मूढ) ।

(६६) **नहो धः** । ८ । २ । ३४ ।

नहधातोर्नकारस्य तूक्ते निमित्ते धकार इति विशेषविधि । यथा—

पदान्ते	झलि परे
उपानह्=उपानध् (=उपानद्)	उपानह्+त=उपानध्+त (=उपानद्ध) ।

(६७) **त्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः** । ८ । २ । ३६ ।

'हो ढ' इतिवत् छशो ष इति नवो विधि । 'नहो ध' इतिवत् त्रश्चादिसप्तकस्य चवर्गान्तत्वेऽपि न कु, अपि तु ष इति 'चो कु' (६२) इत्यस्यापवादोऽपि सूत्रेऽस्मिन् मिश्रीकृत्योच्यते । (१) 'छशो ष.' (२) 'त्रश्चभ्रस्जसृजमृजयजराजभ्राजा च' इति यद्याचार्यो विभज्य सूत्रमकरिष्यत्तर्हि स्पष्टतरमभविष्यत् । झलि पदान्ते च छकारशकारयो. ष आदेश, त्रश्चादीनां च कुत्वापवाद ष इत्यर्थ । यथा —

पदान्ते	झलि परे
छान्तस्य – प्राच् = प्राच् (= प्राड्)	प्रच्छ् + तम् = प्रष्ट (पृष्टम्) ।
शान्तस्य – नश् = नष् (= नड्)	नश् + तम् = नष्ट (नष्टम्) ।
ऋकारादे – सृज् = सृज् (= सृड्)	सृज् + तम् = सृष्ट (सृष्टम्) ।

(६८) **एकाचो बशो भष् झषन्तस्य स्ध्वोः** । ८ । २ । ३७ ।

धातोरित्यनुवर्तते, एक अच् यस्मिन् स वर्णराशिरेकाच् इति, सूत्रेषु प्राय एकाच्शब्दो बहुव्रीहि । धातोरवयवभूतस्य झषन्तस्य च एकाचो वर्णराशे सम्बन्धी यो बश् तस्य भष् आदेश पदान्ते, सकारध्वप्रत्ययोश्च परयो । झष इति घोषाणा प्रत्याहार , भष् इति बश इति च चवर्गवर्ज घोषमृद्वो । यथा

पदान्ते—दह् (६४) = दघ् = दध् (= दग्)
गोदुह् (,,) = गोदुघ = गोदुध् (= गोदुग्)
मित्रद्रुह् (,,) = मित्रद्रुघ् = मित्रद्रुध् (= मित्रद्रुग्)
,, ,, = मित्रद्रुह् = मित्रद्रुड् (= मित्रद्रुड्)
सकारे— दह् + स्यति = धक्ष्यति ।
ध्वप्रत्यये—अबुध् + ध्वम् = अबुद्ध्वम् ।

(६९) **झलां जशोऽन्ते** । ८ । २ । ३९ ।

पदान्ते झला जश आदेशा स्यु । झलिति पञ्चमवर्ज वर्ग्याणां ऊष्मणा च प्रत्याहार । जशिति मृदूना (वर्गतृतीयाना) । तत्रान्तरतम्यपरीक्षाया वर्गान्ताना स्वस्ववर्गीयो मृदुरादेश । ऊष्मणा तु मध्ये 'छशा ष' (६७), 'हो ढ' (६३), 'ससजुषो रु.' (७०) इति शहसाना तत्तद्विशेषविधानात् षकार एक एवावशिष्यते । तस्य 'ऋटुरषाणा मूर्धा' इति मूर्धस्थानसाम्यात् टवर्गमृदु डकार आदेशो भवति । यथा—

वाक् = वाग्	चित् = चिद् ।
गोदुघ् = गोदुग्	ककुभ् = ककुब् ।
मित्रद्रुह् = मित्रद्रुड्	द्विष् = द्विड् ।

अवसाने अलां विकल्पेन चर्त्वं (मृदूना खरादेशं) वक्ष्यति, अत गोयुक्, ककुप् इत्यादिरूपाण्यपि भवन्ति। वाक्यमध्ये तु गोयुगय, ककुब्विभाग इत्यादि जश्त्वमेव ।

(७०) **ससजुषो रुः** । ८ । २ । ६६ ।

पदान्तस्य सकारस्य सजुष् इति शब्दस्य च रु स्यात् । 'अलोऽन्त्य'परिभाषया (३१) सजुष्शब्दान्त्यवर्णस्य षकारस्यादेश । अय शब्द छन्दस्येव बहुशो दृश्यते । 'रु' इत्यादेशे उकारस्यानुनासिकत्वप्रतिज्ञानादित्सज्ञाया लोपे 'र्' इत्येवादेशस्वरूपम् । रेफस्याम्य पुनरपि उत्वयत्वयोरादेशान्तरयोर्विधानार्थ उकारानुबन्धयोजनम् । उत्वयत्वे सकारादेशभूतस्य रेफस्यैव विवक्षिते, तथा च नैसर्गिकरेफात् सकारादेशरेफस्य भेदप्रदर्शनाय पूर्वो र इति, उत्तरो रु इति च व्यपदिश्यते । यथा —

ज्योतिस् + इद = ज्योतिरिदम्	दोस् + दण्ड = दोर्दण्ड
धनुस् + आनय = धनुरानय	उच्चैस् + वृक्ष = उच्चैर्वृक्ष ।

अवसाने रेफस्य विसर्गविधानात् (८२) ज्योति, धनु, दो, उच्चै इति रूपाणि स्यु । रोर्निमित्तभेदेन यकार उकारश्चादेशौ वक्ष्येते ।

(७१) **अहन्** । ८ । २ । ६८ ।

(७२) **रोऽसुपि** । ८ । २ । ६९ ।

'अहन् इत्यस्य पदस्य रु स्यात्, सुप्प्रत्ययनिमित्ते तु परे रोरपवादो र । तथा च 'अहन्' इति पदस्य सुपि परे रु , अन्यत्र र इति फलितम् । सुप् इति २१ विभक्तिप्रत्यया (प्रथमादीना) प्रत्याहार । तेषा मध्ये हलादिषु प्रत्ययेषु परेषु पूर्वस्या प्रकृते प्रत्ययान्तस्य च पदसज्ञा वक्ष्यते । यथा—

अहन् + भि = अहर् भि (अहोभि) — रु ।

अहन् + गण = अहर्गण — र ।

रुरेफस्य उत्वविधानात् (९०) अहोभिरिति रूप ; रस्य तदसावाद अहर्गण इति रेफस्यैव श्रवणम् । अत एव रोरपवादो रो विधीयते ।

॥ * ॥ **अहश्चित्यस्य रेफे परेऽपि रुः** । यथा —

अहन् + रम्य = अहर रम्य (अहो रम्यम्) ।

(७३) **वसुस्रंसुध्वंस्वनडुहां दः** । ८ । २ । ७२ ।

वस् प्रत्यय , स्रंस्, ध्वंस् इति धातु, (एषु उकार इत्) अनड्वह् इति नामशब्द । पदस्येत्यनुवर्तते । एषा पदान्ते द स्यात् इत्यर्थ । विद्वस्, निषेदिवस्, उपेयिवस् इत्यादयो वस्प्रत्ययान्ता । यथा—

विद्वस् + भि = विद्वद्भि । स्रंस् = स्रद् ।
अनड्वह् + भि = अनड्वद्भि । ध्वंस् = ध्वद् ।

अथ 'तिप्यनस्ते ' (८ । २ । ७३) इत्यादिभि त्रिभि सूत्रै तिङ्-प्रत्ययेष्वपि दरू विधीयते । प्रक्रियाबाहुल्यात् तानि नात्र व्याख्यायन्ते । तत 'र्वोरुपधाया ' (८ । २ । ७६ ।) इत्यादिदीर्घविधिनिषेधौ, अदसो मुत्वविधिश्च हलसन्धावप्रकृतत्वात् प्रकरणान्तरेषु व्याख्यास्यन्ते । पश्चात् प्लुतविधिर्भाषायामनुपयुक्त इत्युपेक्ष्यते ।

'ससजुषो रु ' (७०) इति रुविधिरुक्त , अन्यदप्यस्ति रुविधान— 'मतुवसो रु सम्बुद्धौ छन्दसि' (८ । ३ । १) इति । तत्र प्रथमो रु इति-पुल्लिङ्ग , छान्दसलौकिकभाषासाधारणश्च , द्वितीयो रु इति नपुसक लौकिक-भाषाया विरळप्रयोगश्च इति भेद । एव च पदान्तरेफास्त्रिविधा —रु , रु, र इति । तत्र वक्ष्यमाणयो उत्वयत्वयो स्थानिनौ रु, रुश्च , पूर्वस्वरस्यानुना-सिकत्व अनुस्वारासज्जन वा कर्तु निमित्तभूत रु एव, रस्तु रेफसामान्य न कस्यापि विशेषविधेर्विषय ।

(७४) **मतुवसो रु सम्बुद्धौ छन्दसि** । ८ । ३ । १ ।

अथ रुण सन्निगोगेन (साहचर्येण) विशेषकार्यमुपदिशति ।

(७५) **अत्रानुनासिकः पूर्वस्य तु वा** । ८ । ३ । २ ।

तुकारो भिन्नक्रम अनुनसिकस्तु वा इति । रु नित्य भवति, अनुनासिकस्तु पूर्वस्य वैकल्पिक इति तुकारो भेद द्योतयति । रुप्रकरणेऽत्र रुण पूर्वस्य स्वरस्य विक-ल्पेनानुनासिकत्व कार्यमित्यर्थ । अनुनासिको वेत्युक्त , तदभावे कि कर्तव्यमित्याह—

(७६) **अनुनासिकात् परोऽनुस्वारः** । ८ । ३ । ४ ।

'अनुनासिकात्' इत्यस्य अनुनासिकस्थानिन इत्यर्थः । अनुनासिकस्थानिन स्वरात् परमनुस्वारासज्जन कार्यम् । अनुनासिक पूर्वस्वरस्योक्त , अतो रुण पूर्वस्य स्वररय पश्चादनुनासिकत्वाभावे अनुस्वारो योजनीय इति फलितम् । एव च रुणि कृते पूर्वस्वरोऽनुनासिकोऽनुस्वारपरो वा कार्य । द्विधा एवात्र भाषोपयुक्ता विधय , तत्राप्येक एव सामान्यविधि ।

(७७) **पुमः खय्यम्परे** । ८ । ३ । ६ ।

अम् परो यस्मात् इति बहुव्रीहि , अम् खय् इत्युभौ प्रत्याहारौ । पदान्ते पुशब्दस्य रु अन्तादेश खयि परे , खयश्च अम् परोऽस्ति चेत् । 'सम स् सुटि' (८-३-५) इति पूर्वसूत्रात् (अनुवृत्ते) सकारमनुवर्त्य रुण सकारादेशोऽप्यनेन विधीयते । रु श्रवण तु 'हरिवो मेदिन त्वा' इत्यादिषु च्छान्दसप्रयोगेष्वेव । अथोदाहरणम्—

पुम् + कोकिल = पुर् कोकिल = पुम्कोकिल
(अनुनासिकानुस्वारविकल्पात्) = पुँस्कोकिल , पुस्कोकिल

पुम् + खर = पुँस्खर , पुस्खर	पुम् + फल = पुँस्फल, पुस्फलम् ,
पुम् + पुत्र = पुँस्पुत्र , पुस्पुत्र	पुम् + चली = पुँस्चला (= पुँश्चली), पुम्चली (= पुश्चली) ।

प्रत्यु— खय् परो न चेत् — पु + गव = पुग्गव ।
(खयोऽम् न परश्चेत्) पु + प्रतिभा = पुप्रतिभा ।

सयोगान्तलोपाभावो रुविधानद्वारा विधीयते इति फलति । **पुंस्** इति सान्तो हि पुशब्द । सयोगान्तलोप २५९तमसूत्रेण विधीयते ।

(७८) **नश्छव्यप्रशान्** । ८ । ३ । ७ ।

अम्परे छवि परे पदान्तस्य नस्य रु स्यात् , न तु प्रशान्शब्दनकारस्य । अत्रापि रुण सादेश । यथा—महान् + तरु = महारुतरु , = महारुतरु , महाँस्तरु ।

छान्दसेऽस्मिन् रुप्रकरणे बाला मा क्लिश्यन्त्विति भाषोपयुक्तयोस्सूत्रयोर्विषय कारिकया सगृह्यते ।

चटताञ्छठथाच्च प्रागन्त्यो नो बिन्दुपूर्वसः ।
अम्परादेव, पुसश्च खरातिखरवर्णतः ॥

च ट त छ ठ थ एभ्यो वर्णेभ्य पूर्व स्थितस्य पदान्तसकारस्य अनुस्वारपूर्वक सकार आदेश , चटतादिभ्यो वर्णेभ्य, अम्प्रत्याहार परो

भवितुमर्हति । एव पुशब्दमकारस्याप्यनुस्वारपूर्वक सकार, किन्त्वत्र परे वर्णा न केवल चटतछठथा अपि तु सर्वे खरातिखरा । यथा—

महान् + तरु = महास्तरु
कस्मिन् + चित् = कस्मिस् चित् (= कस्मिंश्चित्)
तस्मिन् + टीका = तस्मिस् टीका (= तस्मिंष्टीका)
वृक्षान् + छिनत्ति = वृक्षास्छिनत्ति (= वृक्षाञ्छिनत्ति)

पुस् + कोकिल = पुरकोकिल | पुम् + पुत्र पुस्पुत्र
पुम् + चली = पुश्चली (= पुश्चली) | पुम् + खर = पुस्खर ।

(७९) **ढो ढे लोपः** । ८ । ३ । १३ ।

ढस्य ढे परे लोप स्यात् । ढान्तस्य पदस्याभावात् पदमध्य एवायं भवति । अत इदमुपरिष्टाद्ढढारिष्याम ।

(८०) **रो रि** । ८ । ३ । १४ ।

रेफस्य रेफे परे लोप स्यात् । ढरेफयोर्लोपे कार्यान्तर षष्ठाध्याये विधीयते—

(८१) **ढ्रलोपे पूर्वस्य दीर्घोऽणः** । ६ । ३ । १११ ।

ढकाररेफयोर्लोपे लुप्ताभ्या ताभ्या पूर्वस्य अणो दीर्घ स्यात् । यथा—

स्वर् + राज्य = (८०) स्व राज्यम्, (८१) स्वाराज्यम्
निर् + राग = (८०) नि राग, (८१) नीराग
दुर् + रक्त = (८०) दु रक्तम्, (८१) दूरक्तम्
वपुस् + रम्य = (७०) वपुर् रम्यम् (८०) वपु रम्यम्, (८१) वपूरम्यम

---

१ (१) सम सुटि, (२) पुम खय्यम्परे, (३) न झलां प्रशान्, (४) उभयथर्क्षु (५) दीर्घादटि समानपादे, (६) नश्च पे, (७) स्वतवान् पायौ, (८) कानाम्रेडिते, इत्यष्टसूत्रीविषयऽनुनासिकानुस्वारो विधीयते । तत्रानुना सकौ लौकिकभाषाया परिलुप्त । रु विधाय तस्य सकारकरणापेक्षया साक्षात्सकारविधाने प्रक्रियालाघव भवति । ५-६-७ सूत्रै रुविधान एवेष्टसिद्धिरिति रुप्रकरणमिदमिति प्राचीनाना व्याख्या । तन्मते 'सकार प्रक्लिप्य रुण सविधान' कृत्वा प फेषु विसर्गादिधानार्थमावश्यकमेव । एव सति सम स सुटि इति द्विसकार पठित्वा इद सप्रकरणमिलेवास्तु । दीर्घादटीत्यस्य च्छान्दसत्वाद्दीर्घसिद्धत्वाभावकल्पनया रकारस्य ससजुषोरिति रुरस्तु । ६ ७ सूत्रयो ससजुषोरित्यनन्तर पाठ क्रियताम् । एव चेदनुस्वारासिद्धिरिति तु नापायम् विसर्गोपधमानीययो आगनुस्वारस्य तुरुढरत्वात् इति स्वतन्त्र प्रस्थानमाश्रीयते ।

(८२) **खरवसानयोर्विसर्जनीयः** (र) । ८ । ३ । १५ ।

खरि परे अवसाने च रेफस्य विसर्ग स्यात् । यथा—

अवसाने	खरि
पुनर् = पुन,	पुनर् + करोति = पुन करोति,
पितुर् = पितु,	पितुर् + प्रेम = पितु प्रेम,
दोस् = (७०) दोर = दो,	दोर् + फल = दो फलम्,
उच्चैस् = (७०) उच्चैर् = उच्चै,	उच्चैर् + खण्ड = उच्चै खण्ड,
अन्तर् = अन्त,	अन्त + सारम् = अन्त सारम् ।

यद्यपि खर्प्रत्याहारे सर्वेऽपि खरातिखरा अन्तर्भूतास्तथापि 'विसर्जनीयस्य स' (९४) इत्यादेशान्तरविधानात् कपवर्गीयाणामेवाय विधि फलति ।

'रोरि' 'खरवसानयोर्विसर्जनीय' इत्येताभ्या सूत्राभ्यां रेफसामान्यस्य कार्यमुक्त, अथ 'रु' इति कृत्रिमस्य रेफस्य कार्याण्याह—

(८३) * **रोः सुपि** । ८ । ३ । १६ ।

सुप् सप्तमीबहुवचनप्रत्यय । तस्मिन् परे रोरेव विसर्गो न तु रेफान्तस्य । 'खरव ' (८२) इति रेफसामान्यस्य प्राप्तो विसर्ग एव नियम्यते यथा—

पयस् + सु = पयर् स = पय सु | दोस् + सु = दोर् स = दो सु ।

विसर्गस्य पुनर्विकल्पेन सत्व विधास्यते, अत 'पयस्सु' 'दोस्सु' इत्यपि रूप साधु ।

प्रत्यु— (नैसर्गिकरेफस्य तु) गीर् + सु = गीर्सु (= गीर्षु)

(८४) **भोभगोअघोअपूर्वस्य योऽशि** । ८ । ३ । १७ ।

भोस्, भगोस्, अघोस् इति सकारान्ता निपाता, तदश इहोपात्ता ।

---

* सुप् इति सकारस्य खरि अन्तर्भूतत्वात् 'खरवसानयो—'रित्येव सिद्धे नव विधिमारभमाण आचार्य पिष्टमेव पिनष्टि । तच्च तस्मिन् न सम्भाव्यते । अत कल्प्यते नियमार्थो विधिरिति । नियमस्वरूप च सुप्सकारे भवति चेत् रोरेवेति । एवमन्यत्रापि सिद्धे पुनरारम्भो नियमे पर्यवस्यतीति बोध्यम् । मात्रालाभव्यसनात् 'रोरव सुपि' इति न सूत्रितमाचार्येण ।

अ = अवर्ण । एतत्पूर्वकस्य (एभ्य परस्य) रोर्यकार आदेश स्यात् अशि परे । अत्र 'अ-पूर्वस्ये'त्यश सामान्यविधि . भोस्प्रभृतीना विशेषविधिरिति विषयविवेको बोद्धव्य । यथा—

यशस्+उज्ज्वलम् = (७०) यशर् + उज्ज्वलम् = यशय् उज्ज्वलम्,
वेधास् + इह = ,, वेधार् + इह = वेधाय् इह,
वेधास् + वन्द्य = ,, वेधार् + वन्द्य = वेधाय् वन्द्य,
भोस् + एहि = ,, भोर् + एहि = भोय् एहि,
भोस् + गच्छ = ,, भोर् + गच्छ = भोय् गच्छ ।

यत्वयकारस्योच्चारणे पक्षभेदा सन्ति, तानाह—

(८५) **व्योर्लघुप्रयत्नतरः शाकटायनस्य** । ८ । ३ । १८ ।

व्योरिति वकारयकारयो षष्ठीद्विवचनम् । 'भो अघो अपूर्वस्य' इत्यनुवर्तते । 'पदस्य' इत्यधिकारोऽप्यस्ति । भोऽगोऽघोः पूर्वयोरवर्णपूर्वयोर्वा पदान्तयकारवकारयोर्लघुप्रयत्नतरौ यकारवकारौ स्यातामशि परे । इद च शाकटायनस्याचार्यस्य मतम् । उक्तविधौ यकारवकारौ यत्न लघूकृत्य ध्वनिशैथिल्येनोच्चार्यावित्यर्थ. ।

(८६) **लोपः शाकल्यस्य** । ८ । ३ । १९ ।

उक्तविधयोर्यवयो श्रवणमेव मास्त्विति शाकल्य आचार्यो मन्यते ।

(८७) **ओतो गार्ग्यस्य** । ८ । ३ । २० ।

ओकारात् परयोरेव यवयोरुक्तनिमित्ते लोपमिच्छति गार्ग्य आचार्य. ।

(८८) **हलि सर्वेषाम्** । ८ । ३ । २२ ।

अचि परे एव पक्षभेदा, हलि परे तु यवयोर्लोप एव सर्वाचार्यसम्मत । एतेन अचि परे यशायुज्ज्वल, यशयुँज्ज्वल, यश उज्ज्वल इति त्रीणि रूपाणि । हलि (हशेव सम्भवति) तु—वेधा वन्द्य, भो गच्छ—इति लुप्तयकारमेव रूपम् ।

अत्रायमाचार कविसम्प्रदायात्—अवर्णपूर्वयो पदान्तयोर्यवयोर्लघुप्रयत्नतरौ लोपो वा विधीयते, अवर्णपूर्वौ यवौ च अय्, अव्, आय्,

आव् इत्येव रूपौ । चत्वार्यप्येतानि 'एचोऽयवायावः' (४४) इत्यनेन विधीयन्ते, अय्, आय् इति यान्ते द्वे 'भो भ अपूर्वस्य' (८४) इत्येक । तत्र रोर्यत्वेन (८४) निष्पन्नो यकार सर्वत्र लुप्यते, एच आदेशै-(४४)र्निष्पन्नेष्वपि एऽादेशयोरयवोर्यवौ लुप्येते, ऐजादेशयोरायावोस्तु अलघुनैव प्रयत्नेन उच्चार्येते इति । तथा हि—

देवस् + इह = देव इह ९४ लोप	गुरो + इह = गुर इह ४४ लोप
देवास् + इह = देवा इह ,, ,,	तस्मै + इह = तस्मायिह ,, उच्चारणम्
देवे + इह = देव इह ४४ ,,	देवौ + इह = देवाविह ,, ,,

रोर्यत्व पदान्त एव, एजादेशस्तु पदान्ते पदमध्ये च । तत्र पदमध्ये लोपस्य प्रसक्तिरेव नास्ति । अत हरये, गुरवे, नायक, पावक, इत्येव रूपाणि । यदयोर्लोपस्य षष्ठाध्यायविहित स्वरसन्धि प्रत्यसिद्धत्वात् 'देव इह' इत्यादौ 'देवेह' इति आद्गुणादयो न भवन्तीति स्पष्टम् । स्वरसन्धिविधायकाना षाष्ठाध्यायिकाना सूत्राणा दृष्ट्या नास्त्येव हि शाकल्यलोपोऽसौ । अथ रो 'उ' इति षष्ठाध्यायेऽपि कश्चिदादेशो विधीयते । यथा—

(८९) **अतो रोरप्लुतादप्लुते** (अति उत्) । ६ । १ । ११३ ।

अप्रसिद्ध्या प्लुतस्यास्माभिरगेक्षितत्वात् '*अप्लुतादप्लुते' इति पदद्वयं विहायैव सूत्रार्थो व्याख्यायते । तथा च 'अतो रोरत्युत्' इत्येवानुवृत्त्युपस्कृत सूत्रम् । अत (ह्रस्वात्) अकारात् परस्य रो उ स्यात् अति परे । 'उत्' इत्यत्र तकार इत्सज्ञो लुप्यते । 'अत' 'अति' इत्यनयोस्तु दीर्घनिवृत्त्यर्थं तपरकरणम् । यथा—

यशस् + अस्य = यशर् + अस्य = यश उ + अस्य = (आद्गुणेन)

---

* अप्लुतादत परस्य रो अप्लुते अति परे उ इत्यन्वय । तपरकरणेनैव दीर्घवत प्लुतस्यापि निवारणे सिद्धे अप्लुतविशेषणमुभयत्रापि किमर्थमिति चेत्, प्लुतविधिश्चपादीगत षाष्ठाध्यायिकस्य उत्वविधेरस्य दृष्ट्या असिद्ध इति निलीय स्थितस्यापि प्लुतस्य वारणार्थम् ।

यशो अस्य = (एङ पदान्तादतीति पूर्वरूपेण) [1]यशोऽस्य ।

उत्वस्य सिद्धत्वात् गुणपूर्वरूपे भवत । असिद्धकाण्डगतस्य रोर्वचनसामर्थ्यात् उत्वविधिमात्रे सिद्धत्वम् । प्रत्युदाहरणम्—

(अत परो न चेत्) देवास् + असौ = देवा असौ,
(अत् परो न चेत) यशस् + आर्जय = यश आर्जय,
(रेफान्त चेत्) प्रातर् + अत्र = प्रातरत्र ।

(९०) हशि च । ६ । १ । ११४ ।

हशि परे च अत परस्य रो उ । यथा—

मनस् + हरम् = मनर् + हरम् = मन + उ हरम् = मनोहरम्,
देवन् + वन्द्य, = देवर् + वन्द्य = देव + उ वन्द्य = देवो वन्द्य,
देवस् + नम्य = देवर् + नम्य = देव + उ नम्य = देवो नम्य ।

उत्वविधिरय ' अपूर्वस्य योऽशि' (८४) इति यत्वस्यापवाद । तेन आत परस्यैव रो समग्रे अशि परे यत्वम्, अत परस्य तु अति हशि च परे उत्वम्, आति इचि चैव परे यत्वमिति विषयविवेक ।

[अश्—(अत् + हश्) = आत् + इच्]

अथ प्रकृतोऽष्टमाध्याय एव व्याख्यायते—

(९१) मोऽनुस्वारः । ८ । ३ । २३ ।

---

१ अत्र पूर्वपक्षी प्रत्यवतिष्ठते—"ननु उकारस्य पूर्वेण अता प्रथम गुण कृत्वा तत पूर्वरूपेण 'यशोऽस्य' इति रूपमुक्त, (उकारस्य) परेण अता प्रथम यणादेश हू वा 'यशवस्य' इति रूप कुतो नापद्यते ?" इति । शब्दाना क्रमेणोच्चारणप्रसङ्ग एव कार्यसम्भवेन पूर्वकार्यस्य ('अ + उ' इत्यस्य) निमित्त प्रथममुपतिष्ठते । तत परकार्यस्य ('उ + अ' इत्यस्य) । ततश्च पूर्वकार्य सञ्जातनिमित्तक, परकार्यमसञ्जातनिमित्तक सम्पद्यम् । कथ वाऽसञ्जातनिमित्तकस्य परकार्यस्य प्रथम प्रवृत्तिरापाद्यते ? इति युक्त्या प्रत्यवस्थाता प्रतिक्षेप्य । २ अस्यापवाद —(१) **मो राजि समः क्वौ** । ८ । ३ । २५ । क्विप्रत्ययान्ते राजतौ परे 'सम्' इत्युपसर्गमकारस्य म एव न त्वनुस्वार । 'क्वि' इति सर्वलोपी प्रत्यय । तेन 'राज्' इत्येव क्विप्रत्ययान्तो राज्धातु । उदा—सम् + राज = सम्राज् = (६७) 'सम्राड्' । एकशब्दनिष्पत्त्यर्थमिद सूत्रमिति ग्रन्थशरीरे नोपात्तम् । अनन्तराश्च 'हे मपरे वा' इत्यादयो विधयो लौकिकसस्कृतेऽनुपयुक्ता इत्युपेक्षिता ।

पूर्वसूत्रात् 'हली'त्यनुवर्तते । पदान्तस्य मकारस्य हलि परेऽनुस्वार । यथा—

इदम् + वनम् = इद वनम् | किम् + हसति = कि हसति
सायम् + सन्ध्या = साय सन्ध्या | सम् + रक्तम् = सरक्तम्

प्रत्यु—(अचि तु परे) इदम् + अरण्यम् = इदमरण्यम् ।

(९२) **नश्चापदान्तस्य झलि** । ८ । ३ । २४ ।

अपदान्तस्य नस्य मस्य च झलि परेऽनुस्वार । यथा—

पयान् + सि = पयासि | आक्रम् + स्यते = आक्रस्यते
धनून् + षि = धनूषि | अविजिगाम् + सति = अविजिगासति ।

प्रत्यु—(पदान्तस्य तु) राजन् भुङ्क्ष्व | (झलोऽन्यस्मिन् परे) गम्यते, तन्यते ।

(९३) **ङमो ह्रस्वादचि ङमुण्नित्यम्** । ८ । ३ । ३२ ।

ङम् इति प्रत्याहार, उट् इत्यागमचिह्नम् । द्वन्द्वान्ते श्रूयमाणं पदं यथा प्रत्येकमन्वेति तथा प्रत्याहारान्ते प्रयुक्तमागमचिह्नमपि एकैकेन वर्णेनान्वेति, तथा च डुट्, णुट्, नुट्, इत्यागमा । ह्रस्वात् परो यो ङम् तदन्तात् पदात् परस्य अचो ङमुडागम स्यात् । ङान्तात् डुट्, णान्तात् णुट्, नान्तात् नुट् इति यथासख्यमागमा । आगमेपूकार इत् इति पूर्वमेवोक्तम् । टित्त्वादागम आदौ योजनीय । (२५) । यथा—

प्रत्यङ् + आत्मा = प्रत्यङ् ङात्मा = प्रत्यङ्ङात्मा
सुगण् + ईश = सुगण् णीश = सुगण्णीश
लिखन् + आस्ते = लिखन् नास्ते = लिखन्नास्ते ।

प्रत्यु—'ह्रस्वात्' किं ? प्राङ् + आस्ते = प्राङास्ते । भवान् + आस्ते = भवानास्ते ।

(९४) **विसर्जनीयस्य सः** । ८ । ३ । ३४ ।

इह हि 'साहिताया' इत्यधिक्रियते । साहिता च विसर्जनीयस्य परेण वर्णेन सम्भवतीति नावसानेऽस्य प्रवृत्ति । विसर्जनीयश्च खरवसान-

* 'ह्रस्वा'-दिति पद किमर्थम् ? तस्य कि प्रयोजनमिति प्रश्न । एवमग्रेऽपि प्रत्युदाहरणेषु 'कि' इत्यस्य किप्रयोजनक इत्यर्थो बोध्य ।

योर्विहित । इत्थ च खरीत्यर्थात् सिद्ध्यति । अपवादाभावे विसर्गस्य सकार आदेश स्यात् खरि । अपवादा उत्तरसूत्रेषु वक्ष्यन्ते । यथा—

पुनर् + तत्र = पुन + तत्र = पुनस्तत्र,
यशस् + तस्य = यशर् + तस्य = यश + तस्य = यशस्तस्य,
पुनर् + च = पुन + च = पुनस् + च = (पुनश्च),
पुनर् + टीकते = पुन + टीकते = पुनस् + टीकते = (पुनष्टीकते) ।

(९५) **शर्परे विसर्जनीयः** । ८ । ३ । ३५ ।

खरीत्यर्थात् सिद्ध्यतीत्युक्तम् । शर् परो यस्मात् तादृशे खरि परे विसर्गस्य विसर्ग एव, न कोऽपि विकारो भवतीत्यर्थ । अत उत्तरसूत्रे वक्ष्यमाणो जिह्वामूलीयोपध्मानीयविकल्पोऽपि न भवति । यथा—

शित + क्षुर = शित क्षुर । दृढ + त्सरु = दृढ त्सरु । मृग + प्साति = मृग प्साति ।

(९६) **वा शरि** । ८ । ३ । ६३ ।

शरि परे विसर्गस्य विसर्ग एव वा स्यात् । यथा—

यशस् + शुभ्र = यशर् + शुभ्र = यश शुभ्र, यशस् शुभ्र (= यशश्शुभ्रम्),
यशस् + सित = यशर् + सित = यश सित, यशस्सितम्,
यशस् + षण्ड = यशर् + षण्ड = यश षण्ड, यशस् षण्ड (= यशष्षण्ड) ।

(९७) **कुप्वोः ᳘क ᳘प ौ च** । ८ । ३ । ३७ ।

कवर्गपवर्गयो परयोर्विसर्गस्य क्रमात् जिह्वामूलीयोपध्मानीयौ स्याता, चकारग्रहणात् विसर्गश्च । ᳘क इति जिह्वामूलीयस्य, ᳘प इत्युपध्मानीयस्य च सङ्केत ।

कस् + करोति = कर् + करोति = क᳘करोति, क करोति ।
कस् + खनति = कर् + खनति = क᳘खनति, क खनति ।
कस् + पचति = कर् + पचति = क᳘पचति, क पचति ।
कस् + फलति = कर् + फलति = क᳘फलति, क फलति ।

खरि पर एव विसर्गो विहित, खर् च खरातिखरान् प्रत्याहरति, अतः 'कुप्वोः' इत्युक्तेऽपि कवर्गपवर्गान्तर्गताना खरातिखराणामेव ग्रहणं सम्भवतीति बोध्यम् ।

(९८) **इसुसोस्सामर्थ्ये** (विसर्जनीयस्य वा ष कुप्वो) । ८ । ३ । ४४ ।

सामर्थ्यम् एकवाक्यान्वय । इस् उस् इत्येतयोर्विसर्गस्य कुप्वो परयोर्वा षकार आदेश एकवाक्यतायाम् । यथा—

सर्पि + करोति = सर्पिष्करोति, सर्पि करोति ।
धनु + प्राप्नोति = धनुष्प्राप्नोति, धनु प्राप्नोति ।

अत्यु—(सामर्थ्याभावे) तिष्ठतु सर्पि पिब त्वमुदकम् ।

(९९) **नित्यं समासेऽनुत्तरपदस्थस्य** । ८ । ३ । ४५ ।

समासविषयेऽनुत्तरपदस्थस्य इस् उस् इत्याभ्यां निष्पन्नस्य विसर्गस्य कुप्वो परयो ष आदेश । जिह्वामूलीयोपध्मानीययोरपवादोऽय ष. । यथा—

सर्पि + कुण्डिका = सर्पिष्कुण्डिका — इस्
धनु + कपाल = धनुष्कपाल — उस
आयु + फल = आयुष्फल — उस्
ज्योति + खण्ड = ज्योतिष्खण्ड — इस्

(१००) **अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य** । ८ । ३ । ४६ ।

अत परस्य अनव्ययविसर्गस्य समासेऽनुत्तरपदस्थस्य नित्य सकारादेश कृकमि इति धात्वो कंसादिशब्देषु च परेषु । यथा—अय + कार = अयस्कार, यश + काम = यशस्काम, पय + कुम्भ = पयस्कुम्भ । इत्यादि ।

(१०१) **कस्कादिषु च** । ८ । ३ । ४८ ।

कस्कादिगणपठितेषु शब्देषु च इण परस्य विसर्गस्य ष, अन्यस्य तु स । यथा—

सर्पिस् + कुण्डिका = सर्पिर् + कुण्डिका = सर्पिष्कुण्डिका ।
क + क = करक । कौत + कुत = कौतस्कुत ।

विसर्गस्य षत्वादेशौ येष्वपेक्ष्येते ते शब्दा कस्कादिषु पठिता बोध्या । ईदृशो गण 'आकृतिगण' इत्युच्यते । इत ऊर्ध्वं सूत्रक्रमे मूर्द्धन्यादेशविधि * विनामविधिश्च वर्त्तते । प्रकरणद्वय तत् तयो प्रसङ्गे व्याख्यास्याम ।

(१०२) **स्तोः श्चुना श्चुः** । ८ । ४ । ४० ।

सकारतवर्गयो शकारचवर्गाभ्या योगे शकारचवर्गावादेशौ स्याताम् । अत्रोत्तरसूत्रे च स्थान्यादेशयोरेव यथासख्य विवक्षित, न तु योगस्य ।

---

* विनामो नाम नकारस्य णकारादेश णत्वमिति पाणिनीयैर्व्यवहृत ।

तेन आदेशा —सकारस्य शकार, तकारस्य चकार, दकारस्य जकार, नकारस्य ञकार इत्येव । योगस्तु यथाम्नम्भव सर्वोऽपि । यथा—

पयस् + शीत = पयश्शीतम्,	राजन् + जय = राजञ्जय,
तपस् + चिनोति = तपश्चिनोति,	वृक्षस् + छिद्यते = वृक्षश्छिद्यते,
सत् + चित् = सच्चित्,	तद् + ज्ञान = तज्ज्ञानम्,
परिषत् + जन = परिषज्जन,	यज् + न = यज्ञ ।

(१०३) **ष्टुना ष्टुः** । ८ । ४ । ४१ ।

सकारतवर्गयो षकारटवर्गाभ्या योगे षकारटवर्गावादेशौ स्याताम् ।

यथा—महस् + पण्ड = महष्पण्ड,	महान् + ढौकते = महाण्ढौकते,
रामस + टीकते = रामष्टीकते,	पिष् + त = पिष्टम्,
उत् + टङ्कन = उट्टङ्कनम्,	तद + डिण्डिम = तड्डिण्डिमम् ।

अत्र श्चुत्वष्टुत्वयो 'पयश्शीत' 'महष्पण्ड' इत्यादिषु पदान्तसकारोदाहरणेषु प्रथम 'ससजुषो रु' (७०) इति रुत्व, ततो रो 'खरवसानयो ' (८२) इति विसर्ग, अनन्तर विसर्गस्य 'विसर्जनीयस्य स' (९४) इति पुनस्सकार । तस्यैव श्चुत्वष्टुत्वे भवत इति प्रक्रियाक्रमो ज्ञेय । तत्तव्यायसञ्चारणार्थकश्चायमायास ।

अथ श्चुत्वष्टुत्वे निषेधति—

(१०४) **न पदान्ताट्टोरनाम्** । ८ । ४ । ४२ ।

पदान्तात् टवर्गात् परस्य स्तो ष्टुत्व न स्यात्, 'नाम्' इति षष्ठीबहुवचन वर्जयित्वा । यथा—

(षष् + सन्त) = षट् + सन्त = षट्सन्त । षट् + तरव = षट्तरव
सम्राड् + दयते = सम्राड्दयते
प्रत्यु—(पदान्तात् किं ?) ईड् + ते = ईड्ढे ।

॥ ॥ **अनारनलतिलगरीणामिति वक्तव्यम्** ।

'नाम्' एक एव सूत्रकारेण वर्जित । नवतिनगरीशब्दावपि वर्ज्यावित्याह वार्तिककार । षष् इति षान्त शब्दो (६९) जश्त्वेन षड् इति डान्तो भवति । तथा स्थिते प्रकृतसूत्रस्य प्रवृत्ति । यथा—

षड् + नाम् (६९) = षड्ढ + र्णाम् (= ण्णाम्)

षड् + नवति = षड् + णवति (= षण्णवति,)
षड् + नगरी = षड् + णगरी (= षण्णगरी।)

(१०५) **तोः षि** । ८ । ४ । ४३ ।

तवर्गस्य षकारे परे ष्टुत्व न भवति । यथा—

सत् + षण्ड = सत्षण्ड | महान् + षण्ड = महान षण्ड ।

(१०६) **ष्टुना ष्टुः** । ८ । ४ । ४४ ।

शकारात् परस्य तवर्गस्य प्राप्त कार्य (ष्टुत्व) न स्यात् । यथा—

विश् + न = विश्न ।

शकारात् पररतवर्ग पदमध्य एव भवति । 'न पदान्ताट्टो'रिति पदान्ते ष्टुत्व च निषिद्धम् । अतो ज्ञापकादेव स्तुत्वष्टुत्वे पदम येऽपि भवत ।

(१०७) **यरोऽनुनासिकेऽनुनासिको वा** । ८ । ४ । ४५ ।

पदान्तस्य यर अनुनासिके परे अनुनासिकादेशो वा स्यात् । यर्-प्रत्याहारो हकारभिन्नानि व्यञ्जनानि क्रोडीकरोति । तत्र वर्ग्याणा स्वस्व-पञ्चम एवानुनासिक । यवलाना स्व स्व अनुनासिकरूपम् । रेफस्य पर अनुनासिकादेशो न भवत्येव । यथा—

वाग् + माधुर्य = वाङ्माधुर्य, वाग्माधुर्यम् ,
चित् + मय = चिन्मयम्, | अप् + मय = अम्मयम् ।

॥ * ॥ **प्रत्यये भाषायां नित्यम् ।**

वैकल्पिकोऽय अनुनासिकादेश प्रत्ययस्थेऽनुनासिके परे भाषाया नित्य भवति । अत एव 'चिन्मय' 'अम्मय' इत्युदाहरणयोर्विकल्पो न दर्शित । हलादौ विभक्ति-प्रत्यये परे प्रकृतेरपि पदसज्ञास्तीति पूर्वमेवोक्त, अतोऽस्त्येव पदान्तत्वमपि ।

(१०९) **अचो रहाभ्यां द्वे** । ८ । ४ । ४६ ।

यर इत्यनुवर्तते अच परौ यौ रेफहकारौ ताभ्या परस्य यरो द्वे स्याताम् । द्वे द्विरुच्चारण (द्वित्व) । यथा—

अर्क = अर्क्क, ब्रह्मा = ब्रह्म्मा ।

(१०९) **अनचि च** । ८ । ४ । ४७ ।

अच परस्य यरो द्वे स्याताम् । न त्वचि । यथा—

सुयुक्त = सुय्युक्त = (सुद्युक्त) | पित्युक्त = पित्त्युक्त
मय्वरि = मय्य्वरि = (मद्वरि) | गम्ल्हाद = गम्म्लाद ।

भस्सम, पक्क्त, अस्क्क, पक्क्क, उष्ण्ण, निष्ठा, निष्ठ्यूत, लक्ष्म्या, पुरन्ध्रया इत्यादि।

सूत्रेणानेन अत्र परस्य यरोऽचूपरत्वाभावे द्वित्व विधीयते। एव च *अवाक्यादौ सयोगे प्रथमवर्णस्य द्वित्वमिति फलितम्। सयोग पुनर्यदि रेफादिर्वा कारादिर्वा भवति तर्हि द्वितीयवर्णस्य द्वित्वमिति पूर्वसूत्रेण विहितम्। अत्र सर्वथापि सयोगेषु वर्णद्वित्व अवश्य कार्यम्। सार्वत्रिकोऽय विधिरिति कृत्वा वाचयितार स्वयमेव वाचयिष्यन्तीति बुद्ध्या लिपिकारा द्विरुक्त्यर्ह वर्ण द्विर्न लिखन्तीति सम्प्रदाय। अत 'सुध्यर्च्य' 'मध्वरि' 'क्षत्रियस्त्री' इति लिखितान्यपि पदानि 'सुद्ध्यर्च्य' 'मद्ध्वरि' 'क्षत्रियस्त्री' इत्येव वाचनीयानि। शाकल्यादीना मते द्वित्वस्यास्य प्रतिषेधा 'त्रिप्रभृतिषु शाकटायनस्य' इत्यादिभिरुत्तरसूत्रै पाणिनिनैव दर्शिता तथापि सयोगद्वित्वाभाव आर्षप्रयोगेष्वेव उपलभ्यते। काव्येषु तु 'अह्ने वा' इति पिङ्गलसूत्रस्य उदाहरणभूता

'झटिति प्रविश गेह मा बहिस्तिष्ठ बाले'
'द्वितीय हेमप्रकार कुर्वद्भिरिव वानरै'

इत्यादयो द्वित्रा एव प्रयोगा दृश्यन्ते।

(११०) झलां जश् झशि। ८।४।५३।

झशि परे झला जशादेश स्यात्। 'झलां जशोऽन्ते' (६९) इति पदान्ते पूर्वमेव जश्त्वविधानात् अपदान्तार्थोऽयमारम्भ.। यथा—

सुध् + ध्यच्त्य = सुद्ध्यच्त्यं	दुघ् + ध = दुग्धम्
लभ् + ध = लब्धम्	इध् + ध = इद्धम्।

[(१११) अभ्यासे चर्च। ८।४।५४।

षष्ठाध्यायोक्ते अक्षरद्वित्वे द्विरुक्तपूर्वभागस्य 'अभ्यास' इति सज्ञा। अभ्यासे स्थिताना झला जशश्चरश्च स्यु। तत्रान्तरतम्यात् अशा

* वाक्यवोरपि सहिताया पूर्ववाक्यान्त्यस्वरमादाय उत्तरवाक्यादिमयोगस्य द्वित्व भवत्येव। 'शोण + ह्रदा'दौ रेफस्य हकारात् परस्य, 'वर्षति' अर्शसौ इत्यादौ रेफात् शषयोश्च द्वि-व सर्वथापि न भवति च।

जश, खरा चर इति विवेक । अतिखराणां खरा, घोषाणा मृदवश्च आदेशा स्यु इति तात्पर्यम् । यथा—

भभूव = बभूव, झघान = जघान, थस्थौ = तस्थौ ।
धधौ = दधौ, छिच्छेद = चिच्छेद, फफाल = पफाल ।]

(११२) **खरि च** । ८ । ४ । ९९ ।

खरि परे झलां चर आदेशा स्यु । इद पदान्ते अपदान्ते च भवति । अतो 'झला जशोऽन्ते' (६९) इति विहित जशत्व खरि परे न भवति । तत्र प्रकृतसूत्रेण चर्त्वमेव । यथा—

पदान्ते—सम्पद् + काम = सम्पत्काम । | तद् + टीका = तट्टीका (१०३) = तट्टीका,
विराड् + पुरुष = विराट्पुरुष । | ककुभ् + कोण = ककुप्कोण,
तद् + चित्र = तज् + चित्र । (१०२) = तच्चित्रम् । | भिषग् + सङ्घ = भिषक्सङ्घ,
अपदान्ते—भेद् + तुं = भेत्तुम् । | धघ् + ष्यति = धक्ष्यति ।
लभ् + स्यते = लप्स्यते ।

(११३) **वावसाने** । ८ । ४ । ९६ ।

अवसाने झला चरादेशो वा स्यात् । यथा—

वाक्, वाग् । त्रिष्टुप्, त्रिष्टुब् । सम्राट्, सम्राड् । द्विष्, द्विट्, द्विड् । चित्, चिद् । भिषक्, भिषग् ।

(११४) **अणोऽप्रगृह्यस्यानुनासिकः** । ८ । ४ । ५७ ।

अप्रगृह्यस्य अण अवसाने अनुनासिको वा । यथा—

कर्मँ, कर्म, | बालिकाँ, बालिका,
दधिँ, दधि, | कुमारीँ, कुमारा ।
मधुँ, मधु,

(११५) **अनुस्वारस्य ययि परसवर्णः** । ८ । ४ । ५८ ।

अनुस्वारस्य ययि परे परस्य सवर्ण आदेश स्यात् । यथा—

सुन्चति = सुञ्चति = सुञ्चति । शन्कते = शङ्कते । शम्यु = शयु = शयुँ ।

(११६) **वा पदान्तस्य** । ८ । ४ । ५९ ।

यथा—त्व करोषि = त्वङ्करोषि, त्व करोषि ।

त्व पचमि = त्वम्पचामि, त्व पचसि, | स वत्सर = सव्वॅत्सर, सवत्सर,
त्व याचसे = त्वय्याचसे, त्व याचसे, | पु लिङ्ग, = पुल्लिङ्ग, पुलिङ्ग । *

(११७) **तोर्लि । ८ । ४ । ६० ।**

तवर्गस्य लकारे परे परसवर्ण स्यात् । आन्तरतम्याल्लकार एव परसवर्ण ।

यथा— तद् + लक्ष्य = तल्लक्ष्यम् ।
चित् + लय = चिल्लय | तस्मिन् + लय = तस्मिल्लॅय ।

(११८) **उदः स्थास्तम्भोः पूर्वस्य । ८ । ४ । ६१ ।**

उद् इत्युपसर्गात् परयो स्थास्तम्भधात्वो पूर्वसवर्ण आदेश स्यात् । 'आदे परस्य' (३३) इति परिभाषया 'स्था' 'स्तम्भ्' इत्यनयोरादिवर्णस्य सकारस्यादेश । आन्तरतम्यपरीक्षाया सकारस्य थकार आदेशो युज्यते । यथा—

उद् + स्थान = उत् + स्थान = उत् + थ्यान = उत्त्थानम् ।
उद् + स्तम्भन = उत् + स्तम्भन = उत् + त्तम्भन = उत्तम्भनम् ।

(११९) **झयो होऽन्यतरस्याम् । ८ । ४ । ६२ ।**

झय परस्य हस्य पूर्वसवर्णो वा स्यात् । हकारस्यान्तरतमो नोष ।

यथा— सम्यग् + हित = सम्यग्धित, सम्यग्हितम्,
सम्राड् + हरति = सम्राड्ढरति, सम्राड् हरति,
तद् + हित = तद्धित, तद्हितम्, ककुभ् + हि = ककुब्भि, ककुब्हि ।

(१२०) **शश्छोऽटि । ८ । ४ । ६३ ।**

झय परस्य शस्य छो वा अटि परे । यथा—

प्राक् + शेते = प्राक् छेते, प्राक् शेते,
कश्चित् + शेते = कश्चित्छेते, कश्चिच्छेते, (१०२) कश्चिच्शेते,
अप् + शब्द = अप्छब्द, अप्शब्द, | द्विट् + शत्रु = द्विट्छत्रु, द्विट्शत्रुम् ।

॥ * ॥ **छत्वममीति वक्तव्यम् ।**

अटीति न पर्याप्त, शश्छोऽमीति सूत्रयितव्यम् । यथा—

तद् + श्लोक = तच्छ्लोक, तच्श्लोक, | तद् + श्मश्रु, तच्छ्मश्रु, तच्शमश्रु ।

अत्र प्रकरणपूर्त्यर्थं तुक्सन्धिरित्युक्तो भागो वक्तव्योऽस्ति, यमेव पाणिनि· 'सहिताया' (६ । १ । ७२) इत्यधिकृत्य 'छे च' (ह्रस्वस्य

* 'रेफेऽनुनासिकद्विर्वचनपरसवर्णप्रतिषेध' इति वार्त्तिकेन 'खर् नय' 'शोणद्रू' 'कुण्ड रथेन' इत्यादौ 'यरोऽनुनासिकेऽनुनासिको वा' 'अचो रहाभ्या द्वे' 'वा पदान्तस्य' इति विधयो न प्रवर्तन्ते ।

तुक्') ६।१।७३।, 'आङ्माङोश्च'।६।१।७४।'दीर्घात्'।६।१।७५।'पदान्ताद्वा'।६।१।७६। इति चतुर्भि सूत्रै संहिताकार्येषु प्रथमत्वेन निर्द्दिशति । अवाक्यादौ स्थितस्य छकारस्य द्वित्व कार्यमिति प्रकरणस्यास्य फलितोऽर्थ । छकारस्य द्वित्वे कृते खरि च (११२) इति पूर्वस्य चकारो *भवति । यथा —

परि + छिन्न = परिच्छिन्न,	आ + छादन = आच्छादनम्,
तरु + छाया = तरुच्छाया,	वि + छेद = विच्छेद ।

प्रत्यु—वाक्यादौ तु—'छत्रोपान्त परिणतफलद्योतिभि काननाभै'—[मेघ] एव च वाक्यादावेव केवलश्छकारो भवति । अन्यत्र सर्वत्रापि द्विरुक्त इति पर्य्यवसितम् ।

हल्सन्धिप्रकरणेऽत्र बहवो विधय उक्ता । तेषां हृदयोपस्थितिकरणे लाघवाय तत्र मुख्या सिंहावलोकितकेन कारिकामि समृह्यन्ते—

अन्ते अलि च चो कुत्व, हस्य ढ, श्छशयोश्च ष ।
झला जशोऽन्ते झशि च, खर्येषा सर्वदा चर, ॥ १ ॥
स्तो श्चुना श्चु, ष्टुना ष्टुश्च द्वयमप्यन्तमध्ययो ।
झयि पूर्वे हस्य घोषो, झय शोऽमि च्छता व्रजेत् ॥ २ ॥
तोर्लि लो, हलि मो बिन्दु, पञ्चमे पञ्चमो यर, ।
झल्यनन्त्ये नमोर्बिन्दु, र्बिन्दोर्य्यनुनासिक, ॥ ३ ॥
विसर्गो रस्यावसाने, झलां चर्त्त्वे च वा तथा ।
पदान्ते सस्य रुत्व स्यादिसादावशि तच्छ्रुति ॥ ४ ॥

[इस्, ईस्, उस्, ऊस्, इत्यादिवर्दिकारादिस्वरपूर्वकस्य सकारस्य अशि पर एव रुरेफस्य श्रवण भवति । हरिस् + अत्र = हरिरत्र धनुस् + अत्र = धनुरत्र ।]

* अत्र पाणिने प्रक्रिया—हस्वस्य छे परे तुगागम । किन्त्वादयमन्त्यावयव । तथा च—परि + छिन्न = परित् छिन्न = परिच्छिन्न (१०२)। दीर्घस्यापि तुक विधाय पदान्तदीर्घस्य तुग्विकल्प्यते। वल्ली + छाया = वल्लीच्छाया = वल्ल छाया इति। किन्तु पदान्तदीर्घेऽपि तुग्विल्प एवोपयुज्यत इति सम्प्रदाय । लाघवार्थमत्र फलितार्थ एव ग्रन्थे निर्दिष्ट ।

आसि रोरति हश्युत्वम्,

[अस् इति ह्रस्वाकारपूर्वस्य सस्य रुत्वे कृते तस्य अति हशि च परे उत्वम् । यशस् + अत्र = यशोऽत्र यशस् + हर = यशोहर]

असासोराति चेचिय ।

[अस्, आस् इत्यवर्णपूर्वस्य सस्य यो रुस्तस्य आकारे, इकारादिस्वरे वा परे यकार आदेश । देवास् + अत्र = देवा अत्र । देवास् + आयान्ति = देवा आयान्ति । देवस् + इह = देव इह । देवास् + इह = देवा इह]

लघुप्रयत्नो वा योऽयम्,

[अस्य यकारस्य लघुप्रयत्नो लोपो वा भवति]

आसि लोपोऽति हश्यपि ॥ ५ ॥

[देवास् + अत्र = देवा अत्र । अत्र लघुप्रयत्नोऽपि स्यादेव । देवास् + हरन्ति = देवा हरन्ति]

रो रि लोपे पूर्वदीर्घो, रो विसर्ग कपो खफोः ।
तत्र ≍क≍पौ च वा स्याता, शर्विसर्गौ तथा शरि ॥ ६ ॥
विसर्गस्य सकार स्यात् कुपुभित्रे परे खरि ।
श्चुष्टू चास्य श्चुष्टुयोगे, तस्मात् स्तावेव सश्रुति ॥ ७ ॥
अवाक्यादिस्थसयोगे द्विर्वाच्यो वर्ण अदिमः ।
रहादौ तु परद्वित्व द्विर्वाच्यश्छोऽप्यनादिमः ॥ ८ ॥

इति हल्सन्धिः ।

अथ शब्दविभागः ।

वर्णैरक्षराण्यारभ्यन्ते, अक्षरै प्रकृतय , प्रकृतिभिः पदानि; पदैर्वाक्यानि, वाक्यैर्भाषा इति हि क्रमः । तत्र वर्णा व्याख्याता विभक्ताश्च । अक्षराणा विभागश्छन्द शास्त्रविषयोऽपि व्याकरणेऽपि क्वचिदुपयुज्यत इति सोऽपि प्रदर्श्यते--

(१२१) ह्रस्वं लघु । १ । ४ । १० ।
(१२२) संयोगे गुरु । १ । ४ । ११ ।
संयोगे तु परे ह्रस्व गुरुसज्ञ स्यात् ।

(१२३) **दीर्घं च** । १ । ४ । १२ ।

दीर्घमपि गुरुसज्ञ स्यात् । एव च दीर्घ, सयोगात् पूर्वं च ह्रस्व-मक्षर गुरु, असयोगात् पूर्व ह्रस्व लघु इत्यक्षर द्विविधम् ।

अथ प्रकृतेर्विभाग·—

(१२४) **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** । १ । २ । ४५ ।

अर्थवच्छब्दरूप (अक्षरसमुदाय) प्रतिपदिकसज्ञमिति विधि·; धातु प्रत्ययान्तश्चार्थवन्तावपि न प्रातिपदिकसज्ञाविति निषेध । को नाम धातुरित्यन्यत्रोक्तम् । यथा—


(१२५) **भूवादयो धातवः** । १ । ३ । १ ।

भू, एध, अद, हु इत्यादयो दशभिर्गणै· पठिता क्रियावाचिका प्रकृतयो धातुसज्ञा । एव च, प्रकृतिस्तावद् द्विविधा-क्रियावाचका दशगणी-परिगणिता 'भूसत्तायां' इत्यादयो धातव, द्रव्यगुणसम्बन्धबोधका शेषा· सर्वा अपि प्रकृतय प्रातिपदिकानीति । 'अप्रत्यय' इति निषिद्धा प्रातिपदिकसज्ञां पुन कचिद्विदधाति—

(१२६) **कृत्तद्धितसमासाश्च** । १ । २ । ४६ ।

कृत्प्रत्ययान्तास्तद्धितप्रत्ययान्ता· समासाश्च प्रातिपदिकसंज्ञा स्यु । अष्टाध्याय्यास्तृतीयचतुर्थपञ्चमैरध्यायै· प्रत्यया विधीयन्ते। तत्र तृतीयाध्या-यगतानां धातव प्रकृतय, तेषु धातुप्रकृतिकेषु प्रत्ययेषु लकारसनादिभिन्ना· सार्थका कृत्प्रत्यया इत्युच्यन्ते। चतुर्थपञ्चमयोरध्याययोर्विहिता· प्रत्यया प्रा-तिपदिकेभ्यो भवन्ति, तेषु प्रातिपदिकप्रकृतिकेषु प्रत्ययेषु विभक्तिस्त्रीप्रत्यय-भिन्ना तद्धितप्रत्यया इत्युच्यन्ते । अन्योन्यान्विताना पदानामेकीकरण समास· । तथा च द्विविध प्रातिपदिक—व्युत्पन्नमव्युत्पन्नं चेति । कृदन्त-स्तद्धितान्तस्समासश्चेति व्युत्पन्न त्रिविधम् । सखण्ड व्युत्पन्न, अखण्ड-मव्युत्पन्नम् । अव्युत्पन्नमपि वाचक, द्योतकमिति द्विविधम् । तत्र कस्य-चित् सत्त्वस्य साक्षात् बोधक वाचकं, कस्यचित् सम्बन्धस्य प्रतीतिकरं

द्योतकम् । द्योतकानां प्रातिपदिकाना 'निपात' इति सज्ञा कृता । उक्तो विभाग. पट्टिकया प्रदर्श्येते—




व्युत्पन्नोऽव्युत्पन्न इति विभागो धातूनामप्यस्ति । यथा—


(१२७) **सनाद्यन्ता धातवः** । ३ । १ । ३२ ।

सनादय प्रत्यया येषामन्ते तेऽपि धातुसज्ञा स्यु ।


*सन्, क्यच्, काम्यच्, क्यङ्, क्यष्, णिङ्, णिच्, यङ्, यक्, आय, ईयङ् इत्येते सनादय प्रत्यया धातुभ्यो विहिता । केवला उक्तप्रत्ययान्ताश्च धातवो भवन्ति । अत्रापि पट्टिका—



* सन्नच क्यच-क्यङ् क्यष काम्यच् णिङणिचौ यटचकौ तथा ।
आय ईयङिति प्रोक्ता एकादश सनादय ॥



उक्तयो पट्टिकयोर्मेळने प्रकृतिविभाग पूर्णो भवेत्—




अथ पदस्य विभाग – पद द्विविधम् । तथा च सूत्रम्—

(२२८) **सुप्तिङन्तं पदम् । १ । ४ । १४ ।**

सुबन्त तिङन्त च पदसज्ञ स्यात् । सुप् इति २१ विभक्तिप्रत्ययानां प्रत्याहार, तिङ् इति १८ पुरुषप्रत्ययानाम् । सुबन्तं पद नामेत्युच्यते, तिङन्तम् आख्यातमिति । प्रातिपदिक-सुब्योगेन पद भवति, धातु-

स्तिङ्योगेन । प्रकृतेरुक्ता विभागा पदस्यापि सम्भवन्ति, अन्योऽपि तस्य विभाग. पट्टिकाया द्रष्टव्य —



भाषान्तरेषु बहुधा विभक्तान्यपि पदानि संस्कृते द्विविधान्येवेति पट्टिकैषा प्रदर्शयति । अत्र असत्ववाचिनां निपाताना नामस्वन्तर्भावन पाणिनेर्बलात्कार एव । ते हि प्रकृत्या विभक्तियोगानर्हा कथ सुबन्ता भवितुमर्हन्ति? सङ्कटेऽस्मिन्नाचार्य 'सुप्तिङन्त पद' (१२८) इति स्वप्रतिज्ञा सत्यापयितु निपातेष्वपि सुप्प्रत्ययमुत्पाद्य लोपयति । प्रथमाविभक्तिर्नपुसकलिङ्ग एकवचन च सामान्यमिति कृत्वा लुप्तप्रथमैकवचनान्ता निपाता इति कल्पयत्याचार्य. । तथा च तेन सूत्रितम्—

(१२९) **अव्ययादाप्सुपः**।२।४।८२।

अव्ययात् परस्य आप सुपश्च लुक् (=लोप) स्यात् । आप इति स्त्रीलिङ्गप्रत्ययस्योपलक्षणम् । तथा चाव्ययाना लिङ्गविभक्तिवचनभेदो नास्तीति फलितम् ।

'सदृश त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥'

इत्यन्वर्था चाव्ययसंज्ञा । न, व्येति विकार प्राप्नोतीत्यव्ययम् । निपाताना चाव्ययत्वमुक्तम्—

(१३०) **स्वरादिनिपातमव्ययम्** । १ । १ । ३७ ।

स्वरादिगणपठिता शब्दा निपाताश्चाव्ययसज्ञा स्यु इति । एव च 'न केवल प्रत्यय' प्रकृतिर्वा प्रयोक्तव्य ' इति वैयाकरणाना सिद्धान्त । यत्र सुप्तिङोर्योगो दुर्घटो भवति तत्रापि प्रथमैकवचन लुप्तमस्तीति प्रतिज्ञायते । निपाता परिमिता इति ते गणेन परिगणिता, तथा हि—

(१३१) **चादयोऽसत्त्वे** (निपाता) । १ । ४ । ५७ ।

सत्व=द्रव्यम् । अद्रव्यार्थे वर्तमाना (सम्बन्धादिद्योतका) चादिगणपठिता निपाता स्यु । च, व, ह, एव, एव, नून, शश्वत्, युगपत्, चेत्, कच्चित्, हन्त, माकि, नकि, माङ्, नञ्, यावत्, तावत्, वषट्, वौषट्, स्वाहा, स्वधा, ओम्, किल, तथा, अथ, सु, स्म, अस्मि, तत्, किं, पुरा, धिक्, हा, हे, अहो, उताहो, आम्, अथो, हि इत्यादि ।

(१३२) **प्रादयः** । १ । ४ । ५८ ।

प्रादयोऽप्यसत्ववाचिनो निपातसज्ञा स्यु । प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप एते प्रादय । प्रादीना बहुत्रोपयोगात्ते कारिकया परिगण्यन्ते—

प्रविपरापसमन्ववनिर्निसो दुरति दुष्प्रति सूदविपर्यपि ।
तदनु चाऽभिनी उप, विंशतिर्द्विसहितेत्युपसर्गसमाह्वया ॥

आङ् इत्यत्र ङकार इत् 'आ' इति निपातान्तरव्यावर्तनार्थक ।

(१३३) **उपसर्गाः क्रियायोगे** । १ । ४ । ५९ ।

क्रियावाचकशब्दयोगे प्रादय उपसर्गसज्ञा स्यु ।

(१३४) **गतिश्च** । १ । ४ । ६० ।

प्रादय क्रियायोगे गतिसज्ञाश्च स्यु । उभयसज्ञाप्रयुक्तानामपि कार्याणां सग्रहाय उभयसज्ञाकरणम् । प्रादयो धातुयोगे गत्युपसर्गसज्ञा, प्रति-

पादिकयोगे केवलावस्थाया च निपातमात्र इति विवेक । एष्वेव केषांचिदर्थ-विशेषे कर्मप्रवचनीयसज्ञा विधास्यते ।

एव पट्टिकाया दर्शिता निपातविभागा लक्षिता । भास्कादयस्तु प्राचीना उक्त हठात्कार विना 'नामाख्याते चोपसर्गनिपाताश्च' इति चतुर्द्धैव पद विभक्तवन्त

इति शिक्षाकाण्ड. ।



परिनिष्ठाकाण्डः ।



परिनिष्ठाकाण्डेऽत्र पदाना रूपनिष्पत्ति कथ्यते । तत्र सुप्तिङन्तयो प्रथम सुबन्तस्य प्रक्रिया । प्रातिपदिकेभ्य किल सुप उत्पद्यन्ते, प्रातिपदिकाना च लिङ्गभेदोऽस्तीति लिङ्गव्यवस्था क्रियते ।

लिङ्गप्रकरणम् ।

पुमान् स्त्री नपुसकमिति लिङ्ग त्रिविधम् । लोके प्राणिना स्त्रीपुरुषविभाग प्रसिद्ध , तद्भेदहीना जडपदार्था नपुसकानि । वाच्याना पदार्थाना स्त्रीपुन्नपुसकभेद एव पदेष्वप्यारोप्यत इति देश्यभाषाणा सम्प्रदाय. । सस्कृते तु कृत्रिमाप्यस्ति लिङ्गव्यवस्था । शिला, नगरी, भाषा सृष्टिरित्यादयो जडा अपि स्त्रीलिङ्गा , तथा आश्रम , आहार , उपल इत्यादय पुल्लिङ्गा । भार्यावाचकोऽपि दारशब्द पुल्लिङ्ग , कळत्र नपुसकम् । इत्यादि । किञ्च विशेष्यगता लिङ्गवचनविभक्तयो विशेषणेऽप्यारोप्यन्ते । यथा—

निपुण पुमान् , निपुणा स्त्री , निपुण सैन्य—लिङ्गम्
निपुणा पुमास , निपुणा स्त्रिय , निपुणानि सैन्यानि—वचनम्
निपुणस्य पुस , निपुणाया स्त्रिया , निपुणस्य सैन्यस्य—विभक्ति

नाम्नां लिङ्गव्यवस्था नामलिङ्गानुशासनेभ्यो ज्ञातव्या । भूमि-विद्युद्-रात्रि-

लता-सरिता पर्याया स्त्रिय , पर्वत वृक्ष-समुद्राणा पर्याया पुमांसः, मुख-जल-कमलपर्याया नपुसका । घञ्प्रत्ययान्ता पुंल्लिङ्गा ; क्तिन्प्रत्ययान्ताः स्त्रीलिङ्गा , ल्युट्प्रत्ययान्ता नपुसकलिङ्गा इत्यादय काश्चन व्यवस्थाश्च सन्त्येव । सर्वथापि तु प्राणिजातिवाचकशब्देषु पुरुषवाचक पुल्लिङ्ग, स्त्री-वाचक स्त्रीलिङ्ग इति क्वचिदशे देश्यभाषासाम्यमप्यस्ति ।

लिङ्गकृतो भेद पुल्लिङ्गशब्दाना स्त्रीलिङ्गरूपनिष्पादन एवास्ति ; तत्रापि बाहुल्येन अदन्ता (ह्रस्व अकारान्ता) एव शब्दा लिङ्गभेदेन विक्रियन्ते । अदन्तपुल्लिङ्गा स्त्रियामादन्ता ईदन्ता वा सम्पद्यन्ते । एव च अदन्तस्त्रीलिङ्गशब्दो नास्त्येव । नित्यस्त्रीलिङ्गा अपि शब्दा प्रक्रियार्थं स्त्री-प्रत्ययान्ता इति कल्प्यन्ते । तत्र आ-प्रत्यय-ई-प्रत्ययथोर्विषयविवेक एव स्त्रीप्रत्ययाधिकारे प्रतिपाद्यते । अनुबन्धयोगेन आ-प्रत्यय टाप् , डाप् , चाप् इति त्रिविध, ई प्रत्यय च ङीप् , ङीष्, ङीन् इति त्रिविध करोत्याचार्य । तत्र आप् इति साधारणो भाग टाच्-चाप्-डापा, ङी इति साधारणो भाग ङीप्-ङीष्-ङीना च सग्रहणाय प्रयुज्यते । इङ्गेदेन स्वर एव भेद , तत्श्च लौकिकभाषायामेकविधाभ्यामेव प्रत्ययाभ्या प्रयोजनम् । स्त्रियामदन्त-शब्दा न सन्तीत्युक्त, ऋदन्तेषु, नान्तेषु, सान्तेषु, तान्तेषु च भूयासः स्त्रिया भिन्नरूपा , अन्यवर्णान्ताना उत्सर्गतो न कोऽप्यस्ति लिङ्गकृतो भेद ।

अथ स्त्रीप्रत्यया विधीयन्ते—

(१३५) **प्रत्ययः** । ३ । १ । १ ।

(१३६) **परश्च** । ३ । १ । २ ।

(१३७) **ङ्याप्प्रातिपदिकात्** । ४ । १ । १ ।

इत्यधिकारेषु पूर्वमेव वर्त्तमानेषु

(१३८) **स्त्रियाम्** । ४ । १ । ३ ।

इत्याधिकृत्य

(१३९) **अजाद्यतष्टाप्** । ४ । १ । ४ ।

ङ्याब्विधिप्रस्तावेऽस्मिन् 'ङ्याप्प्रातिपदिकात्' इति अधिकारसूत्रे ङ्याबिति भागो योग्यताविरहादुपेक्ष्यते । अजादिगणपठितेभ्य प्रातिपदिकेभ्य, अदन्ताच्च प्रातिपदिकात् स्त्रिया द्योत्यायां टाप् इति प्रत्यय परः स्यात् । 'चुटू' (१५) इति टकारस्य, 'हलन्त्य' (११) इति पकारस्य च इत्सज्ञाया लोपे 'आ' इत्येव प्रत्ययस्वरूपम् । यथा—अत

विशेष्यनिघ्ना		नियतलिङ्गा ।	
समर्थ—समर्था	वृद्ध —वृद्धा	खट्व—खट्वा	लत — लता
विरूप—विरूपा	कुपित—कुपिता	माल — माला	भिक्ष—भिक्षा

खट्वालतादयो नित्यस्त्रीलिङ्गा अपि शब्दा स्वभावादन्ता एव, पश्चात् स्त्रीत्वविवक्षायां टाप्प्रत्ययेन आदन्ता. सम्पद्यन्ते इति सिद्धान्त । प्रक्रियार्थश्चायमायास । अजादे —

जातौ—अजा एडका चटका अश्वा मूषिका शूद्रा
वयसि—बाला होढा पाका वत्सा मन्दा विलाता
पुंयोगे—ज्येष्ठा कनिष्ठा मध्यमा

जातौ वयसि पुयोगे च वक्ष्यमाण ङीप्रत्यय बाधित्वा अदन्ता एव शब्दा गणेऽस्मिन् पठिता ।

(१४०) **ऋन्नेभ्यो ङीप्** । ४ । १ । ५ ।

ऋकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्य. स्त्रियां ङीप्प्रत्ययः स्यात् । 'लशकतद्धिते' (१६) इति ङकार इत् । यथा—

कर्तृ—कर्त्री, होतृ—होत्री, छत्रिन्—छत्रिणी, दण्डिन्—दण्डिनी

(१४१) **उगितश्च** । ४ । १ । ६ ।

उक् इति उ ऋ ऌ एषा प्रत्याहार , एते इतो येषां ते उगितः । उगिद्भ्य. उगित्प्रत्ययान्तेभ्यो वा प्रातिपदिकेभ्यो ङीप् स्यात् । यथा—

भवत् —भवती — 'भवतु' इति सर्वादौ उदित् पठित ।
महत् —महती — महत् इति ऋदिति अतिदिश्यते ।
बुद्धिमत्—बुद्धिमती — 'मतुप्' प्रत्ययान्तत्वादुदित् ।
कृतवत् —कृतवती — 'क्वतु' ,,
तावत् —तावती — 'वतु' ,,

विद्वस् —विदुषी — 'क्वसु' प्रत्ययान्तत्वादुदित् ।
महीयस् — महीयसी — 'ईयसुन्' ,,
कुर्वत् —कुर्वती — 'शतृ' ,,

तदस्यास्तीत्यर्थे सर्वप्रातिपदिकेभ्योऽपि मतुप् तद्धितप्रत्यय' ;
भूते कर्तरि निष्ठा (Past Active Participle) क्तवतु कृत्प्रत्यय ,
भूते कर्तरि लिडादेश' (Past Perfect Participle) क्वसुप्रत्यय' ;
तोलनतद्धित (Comparative Suffix) ईयसुन्प्रत्यय ,
लट्-लृटोरादेश (Present & Future Participle) शतृप्रत्यय ।
=एत एव प्राधान्येन उगित प्रत्यया ।

(१४२) **न षट्स्वस्रादिभ्यः** । ४ । १ । १० ।

'ऋन्नेभ्य.' (१४०) इति विहितो ङीप् न स्यात् । पञ्चन्, सप्तन्, अष्टन्, नवन्, दशन् इति षट्संज्ञा नान्ता,

'स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।
याता मातेति सप्तैते स्वस्रादय उदाहृता ॥'

इति स्वस्रादय ऋदन्ता । यथा—

पञ्च स्त्रिय , सप्त, अष्ट, नव, दश वा । स्वसा, ननान्दा, माता, दुहिता, याता, तिस्र चतस्र ।

(१४३) **मनः** । ४ । १ । ११ ।

मन्नन्तादपि प्रातिपदिकात् नान्तलक्षणो ङीप् न स्यात् ।

दामन् —	दामा	दामानौ	पामन्	—पामा	पामानौ
सीमन् —	सीमा	सीमानौ	अतिमहिमन् —	अतिमहिमा	अतिमहिमानौ ।

(१४४) **अनो बहुव्रीहेः** । ४ । १ । १२ ।

अन्नन्तात् बहुव्रीहेर्न ङीप् ।

सुपर्वन् —	सुपर्वा	सुपर्वाणौ,	सुशर्मन् —	सुशर्मा	सुशर्माणौ ।

(१४५) **डाबुभाभ्यामन्यतरस्याम्** । ४ । १ । १३ ।

मन्नन्तात् प्रातिपदिकात्, अन्नन्तात् बहुव्रीहेश्च डाप् वा स्यात् ।

ङित्प्रत्यये परे प्रकृतेष्टिलोप वक्ष्यति । अतो डापि परे प्रकृतेष्टिर्लुप्यते । अत्र च 'अन्' इति टि (२१)। यथा—

पामन् + आ — टिलोपे पाम् + आ ।

पामा	पामे	पामा	सुपर्वा	सुपर्वे	सुपर्वा
सीमा	सीमे	सीमा	सुशर्मा	सुशर्मे	सुशर्मा ।

विकल्पात् पामानौ, पामान , सुशर्माणौ सुशर्माण इत्याद्यपि ।

(१४६) अनुपसर्जनात्। ४। १। १४।

अधिकारोऽय, इत ऊर्ध्वं विधीयमाना स्त्रीप्रत्यया अनुपसर्जनादेव प्रातिपदिकात् भवेयु । लिङ्ग हि द्विविध सम्भवति—विशेष्याणा प्रतिनियत स्वस्व लिङ्ग प्रधान, विशेषणाना विशेष्यानुरोधेन विद्यमानमप्रधानम् तत्राप्रधान लिङ्गमुपसर्जनमित्युच्यते । वृक्षशब्दो विशेष्यो नियतपुल्लिङ्ग ,। बहुवृक्षा पुष्पवाटी, बहुवृक्षमुद्यान इति विशेषणावस्थाया विशेष्यनिघ्न लिङ्गम्। अत एव ज्ञापकात् पूर्वोक्ता विधयस्तदन्तेष्वपि भवन्ति । बह्व. शाखिनो यत्र सा बहुशाखिनी अटवी इति नान्तलक्षणो ङीप्। वक्ष्यमाणास्तु स्त्रीप्रत्यया प्राधान्य एव स्यु ।

(१४७) टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्-ठक्ठञ्कञ्क्वरपः। ४। १। १५।

टिद्भ्यो ढादिप्रत्ययान्तेभ्यश्चाटन्तेभ्य प्रातिपदिकेभ्य अनुपसर्जने स्त्रीत्वे ङीप् स्यात्, 'अत .' (१३९) इति टापोऽपवाद । यथा—

टित्	—*कुरुचरी	—'चरेष्ट' — चर	
,,	—दृष्टचरी	—'भूतपूर्वे चरट्'	—दृष्टचर
ढ (एय)	—सौरभेयी	—'स्त्रीभ्यो ढक्'	—सौरभेय
अण्	—कुम्भकारी	—'कर्मण्यण्'	—कुम्भकार
,,	—हैमी	—'तस्य विकार' इत्यण्	—हैम
अञ्	—औत्सी	—'उत्सादिभ्योऽञ'	—औत्स

* कुरुचर + ई इति स्थिते 'यस्येति च' इति वक्ष्यमाणेन सूत्रेण प्रकृत्यन्तगतस्य अकारस्य लोप. । 'कुरुचर् + ई = कुरुचरी । एवमुत्तरत्रापि ङीविधौ द्रष्टव्यम् ।

द्वयसच् — ऊरुद्वयसी — 'प्रमाणे द्वयसच्' — ऊरुद्वयस
दघ्नच् — ऊरुदघ्नी — ,, दघ्नच् — ऊरुदघ्न
मात्रच् — ऊरुमात्री — ,, मात्रच् — ऊरुमात्र
तयप् — पञ्चतयी — अवयवे तयप् — पञ्चतय
ठक्(इक) — आक्षिकी — तेन निर्वृत्त (ठक) — आक्षिक
ठञ्(इक) — वार्षिकी — कालाट् ठञ — वार्षिक
कञ् — तादृशी — 'दृशोऽनालोचने कञ्च' — तादृश
करप् — गत्वरी।

एते प्रत्यया यथाप्रदेश कृत्तद्धितयोर्विधास्यन्ते।

॥ * ॥ **नञ्स्नञीकक्ष्युन्तरुणतलुनानामुपसङ्ख्यानम्।**

नञ् — स्त्रैणी — 'स्त्रीपुंसाभ्यां नञस्नञौ' — स्त्रैण
स्नञ् — पौंस्नी — ,, ,, — पौंस्न
ईकक् शाक्तीकी — 'शक्तियष्ट्योरीकक्' — शाक्तीक
ष्युन् (अन) — सुभगङ्करणी — 'आढ्यसुभग' — करण
तरुण — तरुणी
तलुन — तलुनी

(१४८) **वयसि प्रथमे**। ४। १। २०। [अचरम इति वाच्यम्]

अचरमवयोवाचिनोऽदन्तात् प्रातिपदिकात् स्त्रियां ङीप्।

कुमार—कुमारी, किशोर—किशोरी, वधूट—वधूटी, चिरण्ट—चिरण्टी।
प्रत्यु—(चरमे तु) वृद्धा, स्थविरा।
(अत कि) शिशु।

बाला वत्सा कन्या इत्यादयस्तु अजादिपाठाट्टाबन्ता।

(१४९) **द्विगोः**। ४। १। २१।

अदन्ताद्द्विगुसमासात् ङीप्।

त्रिलोकी, पञ्चवटी, त्रिफला तु अजादिपाठात्।

(१५०) **वर्णादनुदात्तात्तोपधात्तो नः** (वा)। ४। १। ३९।

वर्णवाचिनोऽदन्तादनुदात्तान्तात् तकारोपधात् वा ङीप् स्यात्। तत्सन्नियोगेन उपधाभूतस्य तकारस्य नकारादेशश्च। यथा—
लोहित—लोहिनी, हरित—हरिणी, एत—एनी, श्येत—श्येनी।

(१५१) **अन्यतो ङीष्** । ४ । १ । २२ ।

तोपवर्जितात् वर्णवाचिनोऽदन्तात् ङीष् स्यात् । ङीप्ङीषोः स्वरे भेद । यथा—
पिशङ्ग—पिशङ्गी, कल्माष—कल्माषी, शबल—शबळी ।
उदात्तानुदात्तत्वे लोके न प्रसिद्धे । यत्र ङीष् दृश्यते तदनुदात्तमिति कल्पनीयम् ।

(१५२) **षिद्गौरादिभ्यश्च** । ४ । १ । ४१ ।

षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात् ।
नर्त्तक—नर्त्तकी—ष्वुन्प्रत्ययान्त, | वैदुष्य—वैदुषी—ष्यञ्प्रत्ययान्त ।
गौरी, मत्सी, मानुषी इत्यादि गौरादि ।

(१५३) **वोतो गुणवचनात्** । ४ । १ । ४४ ।

वा उत इति च्छेद । गुणवाचिन उदन्तात् स्त्रिया वा ङीष् स्यात् ।
यथा— पटु—पट्वी, पटु, । मृदु—मृद्वी, मृदु, । पृथु—पृथ्वी, पृथु ।

(१५४) **बह्वादिभ्यश्च** । ४ । १ । ४५ ।

वा ङीष् । 'बह्वी—बहु' इत्यादि । अत्र गणसूत्रम्—
'**कृदिकारादक्तिनः**' । क्तिन्प्रत्ययान्तवर्ज सर्वेभ्योऽपि कृदिकारान्तेभ्यो वा ङीष् स्यात् यथा—
रजनि, रजनी, रात्रि, रात्री, भूमि, भूमी,
श्रेणि, श्रेणी, अवनि, अवनी, कोटि, कोटी

(१५५) **पुंयोगादाख्यायाम्** (नित्य) । ४ । १ । ४८ ।

य पुल्लिङ्गशब्दो दाम्पत्यसम्बन्धेन स्त्रियां वर्तते तस्माददन्तात् ङीष् स्यात् । यथा—

गणकस्य स्त्री गणकी	शङ्करस्य स्त्री शङ्करी
महामात्रस्य स्त्री महामात्री	शूद्रस्य स्त्री शूद्री ।
नारायणस्य स्त्री नारायणी	

(१५६) **इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवय-वनमातुलाचार्याणामानुक्** । ४ । १ । ४९ ।

इन्द्रादिभ्य पुयोगे ङीष्, आनुगागमश्च तत्सन्नियोगेन । किच्चात् प्रकृतेरन्तावयव आगम ।

इन्द्रस्य स्त्री = इन्द्रानी, = इन्द्राणी [रेफसान्निध्यान्नस्य णः]

वरुणस्य स्त्री = * वरुणानी , मृडस्य स्त्री = मृडानी ।
भवस्य स्त्री = भवानी , शर्वस्य स्त्री = शर्वाणी , रुद्रस्य स्त्री = रुद्राणी ,

अन्येषामर्थविशेषमाह वार्त्तिककार:—

1 **हिमारण्ययोर्महत्त्वे** । महद्धिम = हिमानी , महदरण्य = अरण्यानी ।

2 **यवाद्दोषे** । दुष्टो यवो = यवानी ।

3 **यवनाल्लिप्याम्** । यवनाना लिपि = यवनानी ।

4 **उपाध्यायमातुलाभ्यां वा** । उपाध्यायस्य स्त्री = उपा ध्यायानी, उपाध्यायी वा ।
मातुलस्य स्त्री = मातुलानी, मातुली वा ।

5 **आचार्यादणत्व च** । आचार्यस्य स्त्री = आचार्यानी । अत्र णत्वाभावोऽपि ।

6 **आर्यक्षत्रियाभ्यां वा जातौ** । आर्यजाति स्त्री = आर्याणी, आर्या वा
क्षत्रियजाति स्त्री = क्षत्रियाणी, क्षत्रिया वा ।
(पु योगे तु) आर्यो, क्षत्रियो इति ङीषेव ।

मध्ये उपेक्षितानि सूत्राणि टिप्पणे दृश्यन्ताम् ।

---

* णत्वनिमित्तानि तत्प्रकरणे वक्ष्यन्ते ।

१- **(A) क्रीतात्करणपूर्वात्** । ४ । १ । ५० ।
करणतृतीयान्तपूर्वपदात् क्रीतोत्तरपदात् समासात् स्त्रिया ङीष् स्यात् ।
यथा— यवैः क्रीयते = यवक्रीती । वस्त्रेण क्रीयते = वस्त्रक्रीती ।

(B) क्तादल्पाख्यायाम् । ४ । १ । ५१ ।
करणपूर्वपदात् क्तप्रत्ययान्तोत्तरपदात् ङीष् अल्पत्वे द्योत्ये । यथा—
अक्ष्णेण ईषत् लिप्यते—अक्षलिप्सी द्यौ । सूपेन ईषत् लिप्यते —सूपलिप्सी
प्रत्यु—('अल्पाख्याया किं?') चन्दनलिप्ता युवति । [पात्री ।

(C) बहुव्रीहेश्चान्तोदात्तात् । ४ । १ । ५२ ।
क्तादिवेव । यथा—
केशा लूना यस्या सा—केशलूनी ।
ऊरू भिन्नौ ,, ,,—ऊरुभिन्नी ।
पाणिर्गृहीत ,, ,,—पाणिगृहीती । (भार्येत्यर्थ एव)

॥ * ॥ **अ-बहु-नञ्-सु-काल-सुखादिपूर्वादिति वक्तव्यम्** ।
बहुकृता, अकृता, सुदृष्टा, वर्षजाता, मासजाता इत्यादि ।

(१९७) **स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्** । ४ । १ । ५४ ।

उपसर्जनभूतादसंयोगोपधादन्तात् स्वाङ्गवाचिन प्रातिपदिकात् स्त्रिया ङीष् स्याद्वा । यथा—

चन्द्रमुख—चन्द्रमुखी, चन्द्रमुखा । | सुकेश—सुकेशी, सुकेशा ।

(D) **अस्वाङ्गपूर्वपदाद्वा** । ४ । १ । ५३ ।

स्वाङ्ग निर्वक्ष्यते । तद्भिन्नपूर्वपदात् क्तान्तोत्तरपदाद्वा ङीष् इत्यर्थ ।

यथा— पलाण्डुभक्षितो यया सा = पलाण्डुभक्षिती, –ता ।
सुरा पीता यया सा = सरापीती, –ता ।

(E) **सहनञ्विद्यमानपूर्वाच्च** । ४ । १ । ५७ ।

सह (=स) नञ् (=अ), विद्यमान एतत् पूर्वपदात् स्वाङ्गादुक्तो ङीष् न स्यात् । यथा—

सकेशा, अकेशा, विद्यमानकेशा ।

(F) **सख्यशिश्वीति भाषायाम्** । ४ । १ । ६२ ।

सखि – सखी, अशिशु—अशिश्वी ।

(G) **इतो मनुष्यजाते.** । ४ । १ । ६५ ।

मनुष्यजातिवाचिन इदन्तात् स्त्रिया ङीष् स्यात् । यथा—

कुन्ति–कुन्ती, अवन्ति–अवन्ती, दाक्षि–दाक्षी, प्लाक्षि–प्लाक्षी ।

(H) **ऊङुत.** । ४ । १ । ६६ ।

उकारान्तान्मनुष्यजातिवाचिन ऊङ् प्रत्यय । यथा—

कुरु–कुरू, ब्रह्मबन्धु–ब्रह्मबन्धू ।

(I) **ऊरूत्तरपदादौपम्ये** । ४ । १ । ६९ ।

यथा—रम्भेव ऊरू यस्या सा रम्भोरू ।

(J) **सहितशफलक्षणवामादेश्च** । ४ । १ । ७० ।

एतत्पूर्वपदादूरूत्तरपदादौपम्येऽपि ऊङ् । यथा —

वामे–(=सुन्दरे) ऊरू यस्या सा वामोरू ।

(K) **यूनस्तिः** । ४ । १ । ७७ ।

युवन्शब्दात स्त्रिया तिप्रत्यय स च तद्धितेष्वन्तभूत 'नलोप प्रातिपदिकान्तस्य' (२५२) इति नलोप । युवन् + ति = युवति—युवति ।

प्रत्यु—('असयोगोपधात् किं?) गूढगुल्फा, सुपार्श्वी ।
('स्वाङ्गात्' किं?) बहुस्वेदा ।
('अदन्तात किं?) सुदृक, रम्भोरू ।

स्वाङ्ग प्राण्यवयव । तदेव निरुक्तम् —

'अद्रवं मूर्त्तिमत् स्वाङ्ग प्राणिस्थमविकारजम्,।
अतत्स्थ तत्र दृष्ट च, तेन चेत्तत्तथायुतम् ॥

द्रवत्वात् स्वेदो न स्वाङ्ग, अमूर्त्तत्वात् ज्ञान न स्वाङ्ग, 'सुमुखा शाले' त्यादौ अप्राणिस्थत्वात् मुख न स्वाङ्ग; शोफो विकारजत्वात् न स्वाङ्गम्। कीर्णकेशी रथ्या इत्यादिसिद्ध्यर्थ 'अतत्स्थ तत्र दृष्ट च' इति । 'तेन चेत्तथा युत' इत्युक्ते 'सुस्तनी प्रतिमा' इत्यादि सिध्यति ।

(१९८) **नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाच्च** । ४ । १ । ९९ ।

आद्ययोर्बह्वचत्वादन्येषा संयोगोपधत्वाच्चाप्राप्ते विधिरयम्। यथा--

तुङ्गनासिकी,–का, कृशोदरी,–रा, बिम्बोष्ठी –ष्ठा इत्यादि ।

अङ्गगात्रकण्ठेभ्यो वा वक्तव्यम् । (तृतिदृष्ट वार्त्तिकमिदम्) यथा—

स्वङ्गी, स्वङ्गा, सुगात्री,–त्रा, कम्बुकण्ठी,–ण्ठा ।

(१९९) **न क्रोडादिबह्वचः** । ४ । १ । ५६ ।

क्रोडाद्यन्तात् बह्वजन्ताच्च नाय विकल्प स्यात् । यथा—

सुक्रोडा, सुशफा, सुनखा इत्यादि । पृथुजघना, महाललाटा ।

(२००) **जातेरस्त्रीविषयादयोपधात्** । ४ । १ । ६३ ।

अनियतस्त्रीलिङ्गात्, अयकारोपधात्, जातिवाचिनोऽदन्तात् स्त्रिया ङीष् स्यात् । जातिर्नाम–

"(१) **आकृतिग्रहणा जाति.**

अनुगतेनावयवसस्थानेन ज्ञातु शक्येत्यर्थ । तर्कशास्त्रश्रसिद्धा जातिरियम् ।

(२) **लिङ्गानां च न सर्वभाक्**
सकृदाख्यातनिर्ग्राह्या

असर्वलिङ्गत्वे सति एकस्या व्यक्तौ कथनात् व्यक्त्यन्तरे कथन विनापि समग्रहा जाति इति द्वितीय लक्षणम् । स्मृतिप्रसिद्धा जातिरियम् ।

(२) **गोत्र च चरणै. सह**"

गोत्र(अपत्य)प्रत्ययान्ताश्चरणप्रत्ययान्ताश्च (एते तद्धितेषु वक्ष्यन्ते) जातितुल्या स्युरित्यतिदेश । यथा—

(१) कुक्कुटा, सूकरा, शुकी, मृगी, । (२) ब्राह्मणी, वृषळी ।

(३) नाडायना, कठी, बह्वृची ।

प्रत्यु—('जाते' कि ?) मुण्डा, पलिता ।

('अस्त्रीविषयात्' कि ?) बलाका, मक्षिका ।

('अयोषवात्' कि ?) क्षत्रिया, वैश्या ।

॥ ॥ **योषधप्रतिषेधे हयगवयमनुष्यमत्स्यानामप्रतिषेध** ।

यथा— हयी, गवयी, मनुषी, मत्सा इत्यादि । अन्त्ययो 'सूर्यातिष्यागस्त्य मनुष्य मत्स्याना य उपधाया, इति यलोप ।

अथ स्त्रीप्रत्ययप्रयोगे कार्या प्रक्रिया कथ्यन्ते—

(१६१) **प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः** । ७ । ३ । ४४ ।

प्रत्ययस्थात् ककारात् पूर्वस्य अकारस्य इकारादेश स्यात् आपि परे, स चेदाप् सुप परो न भवति । आप सुप परत्व समासे सम्भवति ।

यथा— मुण्डशब्दात् कप्रत्यये तद्धिते 'मुण्डक' इति प्रातिपदिक, 'दुष'-धातो 'अक' इति कृत्प्रत्यये 'दूषक' इत प्रातिपदिक, आप्-याम् अदन्तत्वात् स्त्रिया टाप्—मुण्डक + आ, दूषक + आ इति स्थिते कात्पूर्वस्यात इत्—मुण्डिका, दूषिका । एव चूर्णक—चूर्णका, मोदक—मोदिका इत्यादि ।

प्रत्यु— ('अत कि ?) नौका, शिशुका । ('प्रत्ययस्थात्' कि ?) चटका । ('असुप' कि ?) बहुपरिव्राजका नगरी । अत्र बहव परिव्राजका यस्यामिति बहुव्रीहौ परिव्राजकशब्दात् प्रथमाबहुवचन समासे लुप्तम् ।

(१६२) **उदीचामातः स्थाने यकपूर्वायाः** । ७ । ३ । ४६ ।

यकपूर्वाया इति आत स्त्रीलिङ्गविशेषणेन आकार स्त्रीप्रत्ययरूपो ग्राह्य । यकारककाराभ्या परस्य स्त्रीप्रत्ययाकारस्य स्थाने ह्रस्वादेशेन यो ऽकार तस्य कात्पूर्वस्य इत्व उदीचामाचार्याणा मते यथा—

क्षत्रियाशब्दात् चटकाशब्दाच्च अज्ञाताथर्थे कप्रत्ययेन तद्धितेन 'क्षत्रियाक' 'चटकाक' इति प्रातिपदिके, अत्र तद्धितकप्रत्यये परत पूर्वस्याणप्रत्याहारस्य ह्रस्वविधायकेन '**केऽण.**' (७ । ४ । १३ ।) इति सूत्रेण 'क्षत्रियक' 'चटकक' इति रूप

निष्पद्येते । आभ्या स्त्रीप्रत्ययै टापि—क्षत्रियिका, क्षत्रियका, चटकिका, चटकका इति सिध्यति ।

(१६३) **अभाषितपुंस्काच्च** । ७ । ३ । ४८ ।

अयकपूर्वाया अपि इत्वविकल्पार्थोऽय योग । नित्यस्त्रीलिङ्गाद्विहितस्यापि स्थाने जातस्य कात्पूर्वस्यात इत्व वा आपि । यथा—

खट्विका, खट्वाका, । मालिका, मालाका ।

(१६४) **आदाचार्याणाम्** । ७ । ३ । ४९ ।

पूर्वसूत्रविषये इत्वापवाद आत्व आचार्याणा मते । यथा—

खट्वका—खट्वाका, मालका—मालाका ।

इति स्त्रीप्रत्ययाः ।

सुबन्तप्रक्रिया

अथ लिङ्गविशिष्टेभ्य प्रातिपदिकेभ्य उत्पन्नाया विभक्ते प्रक्रियोच्यते—

(१६५) **स्वौजस,-मौट् च्छष्, टाभ्यां भिस्, ङेभ्यां भ्यस्,-ङसिभ्यां भ्यस्, ङसोसाम्, ङ्योस्सुप्** । ४ । १ । २ ।

ङ्याप्प्रातिपदिकात् इत्यधिकृतम्, ङ्याविति स्त्रीप्रत्ययोपलक्षणम् । लिङ्गविशिष्टात् प्रातिपदिकात् स्वौजसादय प्रत्यया स्यु । एषामर्थो यथास्थान वक्ष्यते । अथैषा प्रत्ययानां विभाग कथ्यते—'त्रीणित्रीणि एकवचनद्विवचनबहुवचनान्येकश' इत्यशेऽनुवर्त्तमाने—

(१६६) **सुपः** । १ । ४ । १०३ ।

सुविति स्वौजसादीना प्रत्याहार 'स्वौ' इति सुकारादारभ्य 'सुप्' इति पकारेण । स्वादीना एकैक त्रिक एकवचन-द्विवचन-बहुवचनसज्ञ स्यात् । तथाच—स्वादिषु सप्ताना त्रिकाणां प्रथममेकवचन, द्वितीय द्विवचन, तृतीय बहुवचनम् । एषा विनियोगोऽन्यत्रोक्त —

(१६७) **बहुषु बहुवचनम्** । १ । ४ । २१ ।

(१६८) **द्येकयोर्द्विवचनैकवचने** । १ । ४ । २२ ।

प्रकृतिवाच्यस्य वस्तुन एकत्वे एकवचन, द्वित्वे द्विवचन, तदधिकत्वे बहुवचन च प्रयोज्यम् ।

(१६९) **विभक्तिश्च** (सुतिङ) । १ । ४ । १०४ ।

सुप्प्रत्ययाम्तिङ्प्रत्यया (तिप् तस् झि महिङ्) च विभक्तिसज्ञा स्यु । एकैकस्य त्रिकस्य एकवचनादय सज्ञा उक्ता, आहत्य सप्त त्रिकाणि च सन्ति, तेषा प्रथमा द्वितीया इत्यादि सख्याक्रमेण व्यवहार सुगम इति सूत्रकारेण निर्दिश्य नोक्त । उक्ता प्रत्यया विभज्यन्ते—

	सानुबन्धा			निरनुबन्धा		
	एक	द्वि	बहु	एक	द्वि	बहु
प्रथमा	सु	औ	जस्	स	औ	अस्
द्वितीया	अम्	औट्	शस्	अम्	औ	अस्
तृतीया	टा	भ्या	भिस्	आ	भ्या	भिस
चतुर्थी	ङे	भ्या	भ्यस्	ए	भ्या	भ्यस
पञ्चमी	ङसि	भ्या	भ्यस्	अस्	भ्या	भ्यस
षष्ठी	ङस्	ओस्	आम्	अस्	ओस्	आम्
सप्तमी	ङि	ओस	सुप्	इ	ओस्	सु

प्रत्ययानामेषा सग्रह आर्यया—

स्वौजसमौट्छष्टाभ्या भिस्ङेभ्या भ्यस्ङसिभ्या भ्यस् ।
तदनु ङसोसा ङ्योस्सुप प्रत्ययमाला विभक्तीनाम् ॥

'सु' इत्यत्र उकार, 'ङसि' इत्यत्र इकारश्चानुनासिकत्वप्रतिज्ञानादित्, जटौ 'चुटू' (१५) इति, ङशौ 'लशकतद्धिते' (१६) इति । जसादिषु सकार, अमादिषु मकारश्च न विभक्तौ तुस्मा' (१२) इति नेत्सज्ञौ । इत्तामपनयनेन शोभित प्रत्ययरूपमुपरि द्वितीयस्तम्भे दर्शितम् । निर्देशसौकर्य (यथा—सु, टा, = म्, आ), विवेचन (यथा—जस्, शस्, ङस्, ङसि = अस्) अनुगतधर्मसम्पादन (यथा—ङे, ङसि, ङस्, ङि = ङित), प्रत्याहारकरण

(यथा—सुट् इति औट्-टकारेण प्रत्याहार) चानुबन्धाना प्रयोजनम् ।
अथोदाहियते—

I	(1) ग्लौ + स्	= ('ससजुषोरु' (७०)इति रु, अवसाने (८२) विसर्ग)	ग्लौः ;
	(2) ग्लौ + औ	= {'एचोऽयवायाव' (४४) इति आव्,}	ग्लावौ ;
	(3) ग्लौ + अस्	= (आवादेश, रुत्वविसर्गौ च)	ग्लावः ।
II	(1) ग्लौ + अम्	= (आवादेश,)	ग्लावम् ;
	(2) ग्लौ + औ	= (I 2 वत्)	ग्लावौ ;
	(3) ग्लौ + अस्	= (I-3-वत्)	ग्लावः ।
III	(1) ग्लौ + आ	= (आवादेश)	ग्लावा ;
	(2) ग्लौ + भ्याम्	=	ग्लौभ्याम् ;
	(3) ग्लौ + भिस्	= (रुत्वविसर्गौ,)	ग्लौभिः ।
IV	(1) ग्लौ + ए	= (आवादेश)	ग्लावे ;
	(2) ग्लौ + भ्याम्	=	ग्लौभ्याम् ;
	(3) ग्लौ + भ्यस्	= (रुत्वविसर्गौ,)	ग्लौभ्यः ।
V	(1) ग्लौ + अस्	= (I-3 वत्)	ग्लावः ;
	(2) ग्लौ + भ्याम्	=	ग्लौभ्याम् ;
	(3) ग्लौ + भ्यस्	= (IV-3-वत्)	ग्लौभ्यः ।
VI	(1) ग्लौ + अस्	= (I-3-वत्)	ग्लावः ;
	(2) ग्लौ + ओस्	= (आव्, रुत्वविसर्गौ)	ग्लावोः ।
	(3) ग्लौ + आम्	= (आवादेश)	ग्लावाम् ;
VII	(1) ग्लौ + इ	= (आवादेश)	ग्लावि ।
	(2) ग्लौ + ओस्	= (VI-2 वत्)	ग्लावोः ;
	(3) ग्लौ + सु	= (सस्य षत्व वक्ष्यते)	ग्लौषु ।

दकारान्तः स्त्रीलिङ्गः सम्पद् शब्दः ।

I	(1)	सम्पद् + स्	= (सुप्रत्ययलोपो वक्ष्यते) 'वावसाने' (११३)	सम्पत्, सम्पद्;
	(2)	सम्पद् + औ	=	सम्पदौ;
	(3)	सम्पद् + अस्	= (रुत्वविसर्गौ)	सम्पदः
II.	(1)	सम्पद + अम्	=	सम्पदम्;
	(2)	सम्पद् + औ	=	सम्पदौ;
	(3)	सम्पद् + अस्	= (रुत्वविसर्गौ,)	सम्पदः
III	(1)	सम्पद् + आ	=	सम्पदा;
	(2)	सम्पद् + भ्याम्	=	सम्पद्भ्याम;
	(3)	सम्पद् + भिस्	= (रुत्वविसर्गौ,)	सम्पद्भिः
IV	(1)	सम्पद् + ए	=	सम्पदे;
	(2)	सम्पद् + भ्याम्	=	सम्पद्भ्याम्;
	(3)	सम्पद् + भ्यस्	=	सम्पद्भ्यः ।
V	(1)	सम्पद् + अस्	=	सम्पदः;
	(2)	सम्पद् + भ्याम्	=	सम्पद्भ्याम्;
	(3)	सम्पद् + भ्यस्	=	सम्पद्भ्यः ।
VI	(1)	सम्पद् + अस्	=	सम्पदः;
	(2)	सम्पद् + ओस्	=	सम्पदोः;
	(3)	सम्पद् + आम्	=	सम्पदाम् ।
VII	(1)	सम्पद् + इ	=	सम्पदि;
	(2)	सम्पद् + ओस्	=	सम्पदोः;
	(3)	सम्पद् + सु = 'खरि च' (११२) इति चर्त्व		सम्पत्सु ।

एवमन्येषामपि शब्दानां रूपाण्यूह्यानि । किन्तु सर्वेषां शब्दानां रूपनिष्पत्तिर्नैव सुगमा । आदेशैरागमैश्च पत्यया प्रकृतयश्च तत्र तत्र विक्रियन्ते । विकारास्ते पञ्चपादीव्याप्तिनि 'अङ्गस्य' (६।४।१) इत्यधिकारे विहिता । किन्त्वाचार्यस्तत्र सुप्प्रक्रिया तिङ्प्रक्रियया मिश्रीकृत्य कथयति । तत सुप्प्रक्रिया पृथक्कृत्य दर्शयिष्याम । आदौ तावत् सुब्विधावुपयुक्ता सज्ञा लक्ष्यन्ते—

(१) संज्ञा ।

(१७०) **सर्वादीनि सर्वनामानि** । १ । १ । २७ ।

सर्वादीनि शब्दरूपाणि सर्वनामसज्ञानि स्यु ।

सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, (त्वत्, त्व), नेम, सम, (=सर्वपर्याय) सिम, ।

पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसज्ञायाम् । स्वमज्ञातिधनाख्यायाम् अन्तर बहिर्योगोपसव्यानयो । [त्रीण्येतानि गणसूत्राणि]

त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम् ।

इति सर्वादि । भवतुशब्दे उकार इत् । स्वाभिधेयापेक्षोऽविनियमो व्यवस्था । तत्रैव पूर्वादीना सर्वनामता । तेन कुशल इत्यर्थे दक्षिणशब्दो न सर्वनाम । असज्ञायामित्युक्ते उत्तरा कुरव इत्यादौ सत्यामपि व्यवस्थाया न सर्वनामता । स्वशब्दस्य (१) आत्मा, (२) आत्मीय, (३) ज्ञाति, (४) धन इति चतुर्ष्वर्थेषु प्रथमेऽर्थद्वय एव सर्वनामसज्ञा । डतरडतमौ प्रत्ययौ, ततस्तदन्ता ग्राह्या । अन्यथा हि सज्ञा निष्प्रयोजना स्यात् । एतौ च प्रत्ययौ कियत्तदेकेभ्य एव भवत —कतर, कतम, यतर, यतम, ततर, ततम, एकतर, एकतम, इति । अन्यतर, अन्यतम इत्यपि शब्दौ वर्तेते, किन्तु तौ न डतरडतमान्तौ, तयो 'अन्यतर' शब्दो गणे विशिष्य पठितत्वात् सर्वनाम, अन्यतमस्तु न । अत्र गणे अपूर्वशब्दा पठिता वलयचिह्निता । पूर्वादि, त्यदादि, डतरादिरित्यस्मिन् गणे त्रयोऽन्तर्गणा । अपूर्वशब्दानुपेक्ष्य सर्वा-

दय सौकर्यार्थ अन्तर्गणकार्याणि च प्रदर्श्य कारिकाभि परिगण्यन्ते--

सर्वविश्वोभयसम डतर डतम पुन ।
इतरान्ये अन्यतरत् (स्वमोरड्डतरादिषु) ॥ १ ॥
पूर्वापरावरस्वान्तरोधरोत्तरदक्षिणम् ।
पर (पूर्वादिनवक स्मात्-स्मिन्-शीषु विकल्पितम्) ॥ २ ॥
तद्यदेतदिद चादो द्वयेकम् अत्र तदादिषु) ।
युष्मदस्मद्भवतु किमिति सर्वाद्य स्मृता ॥ ३ ॥

सर्वेषा नाम सर्वनामेत्यन्वर्था सज्ञा, अत एव सर्वपर्याय सम-शब्दोऽत्र गृह्यत इत्युक्तम् । तथापि प्रक्रियासम्पादनैकव्यसनी पाणिनिर्येषा सर्वनामतुल्या प्रक्रिया दृश्यते तेषा सर्वनामत्वानर्हाणामपि शब्दाना सर्व-नाम्त्वमतिदिशति, अर्हाणा च प्रक्रियासिद्ध्यर्थ सर्वनामता विकल्पते, निषेधति च । तथाहि--

(१७१) **विभाषा दिक्समासे बहुव्रीहौ** । १ । १ । २८ ।

उत्तरसूत्रेण वक्ष्यमाणेन प्राप्ते निषेधे विभाषते । 'दिङ्नामान्य न्तराळे' इति सूत्रेण विहित पूर्वस्या उत्तरस्याश्च दिशोऽन्तराळ उत्तर-पूर्वा इत्यादि समासो दिक्समास , तस्य बहुव्रीहित्वेऽपि विकल्पेन सर्व-नामता स्यात् । तेन च उत्तरपूर्वस्ये, उत्तरपूर्वाये इति रूपविकल्प फलम् ।

(१७२) **न बहुव्रीहौ** । १ । १ । २९ ।

बहुव्रीहिसमासस्योत्तरपदभूत सर्वादिरपि न सर्वनाम । प्रियो विश्वो यस्य स प्रियविश्व इति बहुव्रीहे प्रियविश्वाय इत्येव रूप न तु प्रियविश्वस्मै इति सर्वनामकार्यम् ।

(१७३) **तृतीयासमासे** । १ । १ । ३० ।

तृतीयासमासे च सर्वनामता न । मासेन पूर्वो मासपूर्व तस्मै मास-पूर्वाय इत्येव, न तु-पूर्वस्मै इति ।

(१७४) **द्वन्द्वे च** । १ । १ । ३१ ।

द्वन्द्वसमासे च न सर्वनामता । वर्णाश्च आश्रमाश्च इतरे च वर्णाश्रमेतरा इति द्वन्द्वे वर्णाश्रमेतराणा इत्येव रूप, न तु इतरेषामिति ।

(१७५) **विभाषा जसि** । १ । १ । ३२ ।

जसि, (प्रथमाबहुवचनस्थाने) यत् कार्य तत्र वा द्वन्द्वस्य सर्वनामता । वर्णाश्रमेतरे,-इतरा इति च रूपम् ।

(१७६) **प्रथमचरमतयालपार्द्धकतिपयनेमाश्च** । १ । १ । ३३ ।

प्रथमादयोऽपि जसि वा सर्वनामकार्य लभेरन् । तत्र नेमशब्द सर्वादौ पठित इति तस्य प्राप्ते विभाषा, अन्येषा त्वप्राप्ते । प्रथमे, प्रथमा इत्यादिरूपविकल्प फलम् ।

(१७७) **पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्** । १ । १ । ३४ ।

(१७८) **स्वमज्ञातिधनाख्यायाम्** । १ । १ । ३५ ।

(१७९) **अन्तरं बहिर्योगोपसंव्यानयोः** । १ । १ । ३६ ।

सर्वादिगणे गणसूत्रतया पठितमेव सूत्रत्रयमिद जसि विकल्पविधानार्थं प्रकरणेऽत्र पुन पठ्यते । पूर्वादयो जसि विकल्पेनैव सर्वनामानीत्यर्थ । तेन च पूर्वे, पूर्वा इत्यादि रूपाणि ।

॥ * ॥ **विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम्** ।

तीयस्तीयप्रत्ययान्त , द्वितीयतृतीयशब्दौ । ङिःसु ङे-ङसि-ङस्-ङिषु । तेन द्वितीयस्मै, द्वितीयाय, द्वितीयस्मात, द्वितीयात् द्वितीयस्मिन्, द्वितीये इति पुन्नपुसकयो । द्वितीयस्यै, द्वितीयायै, द्वितीयस्या, द्वितीयाया , द्वितीयस्या, द्वितीयाया इति स्त्रियामपि रूपद्वयम् ।

अथ सज्ञान्तराण्यपि प्रकृतोपयुक्तानि कथ्यन्ते--

(१८०) **शी सर्वनामस्थानम्** । १ । १ ४२ ।

नपुंसके स्वौजसमौट्शस् इति प्रथमाद्वितीयाप्रत्ययानां अम्, शी, शि

इत्यादेशा वक्ष्यन्ते । तत्र 'शि' इति प्रथमाद्वितीययोर्बहुवचनस्य सर्वनाम-स्थानमिति सज्ञा ।

(१८१) **सुडनपुंसकस्य** । १ । १ । ४३ ।

सुट् इति 'औट्' इत्यस्य टकारेण प्रत्याहार सु, औ, जस्, अम्, औट् इति प्रथमा द्वितीयैकवचनद्विवचने च क्रोडीकरोति । पुल्लिंगो स्वादि-पञ्च वचनानि सर्वनामस्थानसज्ञानि स्यु । नपुसके तु पूर्वसूत्रेण 'शि' इति प्रथमाद्वितीययोर्बहुवचनस्य पर सर्वनामस्थानत्वम् ।

(१८२) **आ 'कडारा'-देका संज्ञा** । ४ । १ । १ ।

'कडारा कर्मधारये' (२ । २ । ३८) इति द्वितीयाध्यायद्वितीय-पादान्तिमसूत्रमभिव्याप्य एकस्यैकैव सज्ञा बोध्या । विप्रतिषेधे तु **'या परा-नवकाशा च'** सा ग्राह्येति वार्तिककार । अन्यत्र सज्ञाविधावुत्सर्गापवाद-न्यायो न सञ्चार्य इति नियमार्थमयमेकसज्ञाधिकार ।

नदी घि-लघु गुर्वङ्ग पद भ वचनत्रयम् ।
अपादान सम्प्रदानं करण च तत परम् ॥ १ ॥
अथाधिकरण कर्म कर्ता हेतुश्च कारकम् ।
गतिर्निपातोपसर्गौ कर्मप्रवचनीयका ॥ २ ॥
* उपग्रहो विभक्तिश्च सहिता चावसानकम् ।
समासाश्चेति सज्ञा स्युरेकसज्ञाविकारगाः ॥ ३ ॥

अन्यत्र तु एकस्य बहव सज्ञा भवन्त्येव । यथा—सर्वशब्द· प्रातिपदिकं, सर्वनाम च, सर्वे इति द्विवचन प्रगृह्यं च । अधिकोऽस्मिन्—

(१८३) **यू स्त्र्याख्यौ नदी** । १ । ४ । ३ ।

ई च ऊ च यू इत्यविभक्तिको निर्देश· स्पष्टप्रतिपत्त्यर्थ । स्त्र्याख्यौ स्त्रीवाचकौ । ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसज्ञौ स्त· । यथा—

---

* उपग्रह परस्मैपदात्मनेपदे ।

कुमारी, गौरी, लक्ष्मी, तनू, यवागू, कर्कन्धू ।
प्रत्यु—'स्त्याख्यौ' किं?) ग्रामणी, सेनानी खलपू ।

॥ * ॥ **प्रथमलिंगग्रहणं च ।**

स्त्याख्यस्योपसर्जनत्वेन लिङ्गान्तरविशिष्ट प्रतिन्यभावेऽपि सहज स्त्रीत्व निमित्ती-कृत्य नदीत्व भवतीत्यर्थ । यथा—अतिलक्ष्मी पुरुष ,तस्मै अतिलक्ष्म्यै इति नदीकार्यम् ।

(१८४) **नेयङुवङ्स्थानावस्त्री** । १ । ४ । ४ ।

इयङुवङादेशौ विधास्येते, तयो स्थानिनौ इदूदन्तौ न नदीसज्ञौ। स्त्रीशब्दस्तु इयङ्स्थान्यपि नदीसज्ञ एव । क्विप् इति सर्वलोपी कश्चित् कृत्प्रत्ययोऽस्ति, तदन्तानि प्रातिपदिकानि विकाराभावाद्धातव एवेति कल्प्यते । तथा च वचन—'क्विबन्ता धातुत्व न जहाति' इति । भी, ह्री, श्री, भू इत्यादयो धातुसमानरूपा, तेषा इदूतौ इयङुवङ्स्थानिनौ । अतस्ते न नदीसज्ञा । तेन हे भी, हे भू इत्येव रूप, न तु हे भि, हे भु इति नदीह्रस्व । स्त्रीशब्दस्य तु निषेधनिषेधात् हे स्त्रि इति नदीरूप स्यादेव ।

(१८५) **वामि** । १ । ४ । ५ ।

इयङुवङ्स्थानिना स्त्रीशब्दभिन्नानाम् आम् इति षष्ठीबहुवचने नदीसज्ञानिषेधो विकल्पेनैव । अत श्रीणा, श्रिया, भ्रूणा, भ्रूवा इति रूपद्वयमपि ।

(१८६) **ङिति ह्रस्वश्च** । १ । ४ । ६ ।

ङिति प्रत्यये परे ह्रस्वौ इकारोकारान्तौ च वा नदीसज्ञौ स्त । ङे, ङसि, ङस्, ङि इति चतुर्थ्यादीनामेकवचनप्रत्यया ङित । तेषु इदुदन्तौ स्त्याख्यावपि नदीकार्य लभेयातामित्यर्थ । तेन—मत्यै, मतये; धेन्वै, धेनवे इति रूपद्वयम् । चशब्देन इयङुवङ्स्थानिनोरीदूतोर्निषेधोऽपि विकल्प्यते । तेन—श्रियै, श्रिये, भुवै, भुवे इतीदूदन्तयोरपि रूपद्वयम् । तथा च सूत्रेणानेन इदुतोरप्राप्ता नदीसज्ञा इयङुवङ्स्थानिनोरीदूतोर्निषेधश्च ङित्सु विकल्प्यते ।

(१८७) **शेषो घ्यसखि** । १ । ४ ७ ।

ह्रस्व इत्यनुवर्त्तते । उक्तादन्य शेष । इदुदन्तेषु येषां न नदीसज्ञा प्राप्नोति ते घिसज्ञा इत्यर्थ । सखिशब्दस्तु नदीसज्ञाविरहेऽपि न घिसज्ञ इति निषेध । हरिणा, हरये इत्यादिरूपसिद्धिर्घिसज्ञाप्रयोजनम् ।

(१८८) **पतिस्समास एव** । १ । ४ । ८ ।

पतिशब्दः समासे घिसज्ञ, केवलस्तु न । तेन प्रजापतिना, प्रजापतये इत्यादिरूपसिद्धि । केवलस्य तु पत्या, पत्ये इत्येव ।

इत उत्तर 'ह्रस्व लघु' 'सयोगे गुरु' 'दीर्घ च' इति सूत्रत्रयं पूर्वमेव व्याख्यातमत्राप्रकृत च ।

(१८९) **यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्** । १ । ४ । १२ ।

यस्माद्धातोर्वा प्रातिपदिकाद्वा* प्रत्ययो विधीयते तदादि शब्दरूपं तस्मिन् प्रत्यये परे अङ्गसज्ञ स्यात् । धातो प्रत्ययविधौ मध्ये विकरणप्रत्ययोऽपि परापतेत्, तदा विकरणविशिष्टस्य धातोरङ्गसंज्ञासिद्ध्यर्थं 'तदादि' इति । यथा—'सु' इति धातु, तस्मात् 'ति' इति तिङ्प्रत्यय । तस्मिन् परे धातो 'नु' इति विकरणप्रत्यय, 'सुनुति' इति जातम् । तत्र 'सुनु' इत्यश तिप्रत्यय प्रत्यङ्गम्, अङ्गस्य विहितेन गुणेन 'सुनोति' इति रूपसिद्धि । इद तिङ्प्रक्रियायां स्पष्टतर भविष्यति । सुप्प्रक्रियायां तु प्रकृतिभूत प्रातिपदिकमेवाङ्गशब्देनोच्यते ।

सुप्तिङन्तं पदम् । १ । ४ । १४ । व्याख्यातमिदम् । (१२८)

[(१९०) **नः क्ये** । १ । ४ । १९ ।

क्य इत्येवरूपे प्रत्यये परे नकारान्त पदसज्ञ स्यात् । क्यप्रत्ययः पदादेव विधीयते, अत सिद्धे विधि 'नान्तमेव क्यप्रत्यये परे पदसंज्ञ'मिति नियमार्थ । इदमुचिते प्रकरणे उदाहरिष्यते ।

---

* प्रत्ययविधिस्तृतीयचतुर्थपञ्चमैरध्यायै क्रियते । तत्र तृतीये धातोरित्यधिकृत्य, चतुर्थपञ्चमयो प्रातिपदिकादित्यधिकृत्य च प्रत्यया विधीयन्ते इति भूयिष्ठ सम्बन्धं मत्वेवमुक्तम् । तेन स्त्रीप्रत्ययान्तस्य क्वचित्तिङन्तस्य चाङ्गसज्ञा भवत्येव ।

(१९१) **सिति च** । १ । ४ । १६ ।

सिति प्रत्यये परे पूर्वं पदसञ्ज्ञ स्यात् । 'यचि भं' इति वक्ष्यमाणाया भसञ्ज्ञाया पुरस्ताडपवादोऽयम् । तद्धितेष्वस्योपयोग ।]

(१९२) **स्वादिष्वसर्वनामस्थाने** । १ । ४ । १७ ।

सुप स्त्रीप्रत्ययास्तद्धिताश्च स्वादय., तेषु सर्वनामस्थानव्यतिरिक्तेषु परेषु पूर्वा प्रकृति पदसञ्ज्ञा स्यात् । 'शि सर्वनामस्थानं' (१८०) 'मुडनपुसकस्य' (१८१) इति सर्वनामस्थानसञ्ज्ञा पूर्वमेव लक्षिता । 'सुप्तिङन्तं पद' (१२८) इति सुबन्तमेव प्रयोगार्ह लौकिक पदम् । सुप्स्वपि केषांचित्प्रत्ययाना प्रकृते पदसञ्ज्ञा पदकार्यप्रवर्तनार्थमतिदिश्यते । 'रोऽसुपि' (७२) इति सूत्रव्याख्यान वीक्ष्यताम् ।

(१९३) **यचि भम्** । १ । ४ । १८ ।

य् च, अच् च, यच् इति समाहारद्वन्द्व', यकारादिषु अजादिषु च स्वादिषु परेषु पूर्व भसञ्ज्ञ स्यादिति पदसञ्ज्ञाया अपवाद: । 'असर्वनामस्थाने' इति पर्युदासोऽत्राप्यस्त्येव। यकारादीनामजादीनां च स्वादीनां प्रकृतिः भसंज्ञा, *वलादीना तु पदसंज्ञेति विवेक. ।

[(१९४) **तसौ मत्वर्थे** । १ । ४ । १९ ।

मत्वर्थे प्रत्यये यजादौ परेऽपि तकारान्ता सकारान्ता च प्रकृतिर्भसञ्ज्ञैव न तु पदसञ्ज्ञा । अस्योदाहरण मतुप्प्रकरणे दर्शयिष्यते]

उक्ताभि सञ्ज्ञाभि. सुप्प्रत्ययास्त्रिधा विभक्ता:—

(१) आद्यै पञ्चभि प्रत्ययै. सर्वनामस्थानं; शेषेषु (२) अजादीनां प्रकृतिर्भ, (३) वलादीना पदमिति । सर्वनामस्थानसंज्ञा प्रत्ययाना कृता, भ-पद-सञ्ज्ञे तु प्रकृतेरिति पर भेद' । पदकार्यातिदेशार्थं कृता पदसंज्ञा प्रकृतेरेव कर्तुं शक्यते, तदनुसारेण भसञ्ज्ञापि तथैव कृता । अत' सर्वनामस्थानसञ्ज्ञामपि प्रकृतेरेवाचार्योऽकरिष्यच्चेत् ऐकरूप्येण सामञ्जस्यमभविष्यत् । विभागोऽय पट्टिकया प्रदर्श्यते—

---

* 'वल्' इति यवर्जं हला प्रत्याहार ।

पुल्लिंगे			क्लीबे		
सु	औ	जस्	अम्	शी	शे
अम्	औट्	शस्	अम्	शी	शि
टा	भ्यां	भिस्	टा	भ्यां	भिस्
ङे	भ्यां	भ्यस्	ङे	भ्यां	भ्यस्
ङसि	भ्यां	भ्यस्	ङसि	भ्यां	भ्यस्
ङस्	ओस्	आम्	ङस्	ओस्	आम्
ङि	ओस्	सुप्	ङि	ओस्	सुप्

एषु तिर्यग्रेखाया उपरिगत, वलयान्तर्गत च सर्वनामस्थान, शेषेषु स्थूललिपिभिर्मुद्रिताना प्रकृति पद, परिशिष्टाना प्रकृतिभेम् । एषा विभागाना तत्तत्सङ्ज्ञाकार्यैरेकरूपा भवति प्रक्रिया ।

---

(२) **सन्धिकार्याणि ।**

स्वरसन्धिविधौ पदान्तसन्धिरुभयसन्धिश्चैव कथितौ, न तु पदमध्य सन्धिरिति स इदानीमुच्यते । 'अक सवर्णे दीर्घ' (५४) इत्युक्त्वा तदुत्तरं सूत्रयत्याचार्य —

(१९५) **प्रथमयोः पूर्वसवर्णः** । ६ । १ । १०२ ।

प्रथमयोर्विभक्त्यो . प्रथमाद्वितीययोरित्यर्थ । अक ,अचि, दीर्घ इति पदत्रयमनुवर्तते । अक प्रथमाद्वितीययोरचि परे पूर्वसवर्णो दीर्घ एकादेश स्यात् ।

यथा— हरि + औ = हरी | गुरु + औ = गुरू ।

(१९६) **तस्माच्छसो नः पुंसि** । ६ । १ । १०३ ।

तस्मात् पूर्वसवर्णदीर्घात् परस्य शसो नकारादेश स्यात् पुल्लिङ्गे । "अलोन्त्यस्य" इति शस सकारस्य नकार । यथा—

राम + अस् = रामास = रामान् | गुरु + अस् = गुरूस् = गुरून्
हाहा + अस् = हहास् = हाहान् | हम्भू + अस् = हम्भूस् = हम्भून्
हरि + अस् = हरिस् = हरीन् | पितृ + अस् = पितृस् = पितॄन् ।
वातप्रमी + अस् = वातप्रमीस् = वातप्रमीन्

प्रत्यु—('पुसि' कि?) रमा, मती, गौरी, तनू, मातृ ।

ङीबि त्वस्य प्रसक्तिरेव नास्ति ।

अथ दीर्घोऽय निषिध्यते—

(१९७) **नादिचि** । ६ । १ । १०१ ।

अवर्णादिचि परे पूर्वसवर्णदीर्घो न स्यात् । इच् इति व्यापकोऽप्यर्थं प्रत्याहारो विषयाभावात् 'औ' 'ई' इति द्विवचनद्वयमेव परामृशतीति ब्रूमः । यथा—

राम + औ = रामौ, न तु रामा इति | वन + ई = वने, न तु वना इति ।

(१९८) **दीर्घाज्जसि च** । ६ । १ । १०५ ।

दीर्घेभ्यो जसि इचि च परे न पूर्वसवर्णदीर्घ । यथा—

गौरी	**गौर्यौ**	**गौर्यः**	वधू **वध्वौ** **वध्वः** ।

अपवादैर्निषेधैश्चापहृतव्यातिरय पूर्वसवर्णदीर्घ कुत्र प्रवर्त्तेतेति विषयोऽस्य कारिकया सगृह्यते—

एकादेश पूर्वदीर्घ (१) इदुतोरौङि, (२) जस्यत,

(३) अक शसीति त्रिष्वेव, तत्र नत्व च पुंशस. ॥

औङीति औकारविभक्तेः प्राचां संज्ञा । 'अतो गुणे' इति वक्ष्यमाण पररूप बाधितु 'जस्यत' इति, अन्यथा 'अक सवर्णे...' इति दीर्घेणैव सोऽपि सिध्यति ।

अथ पूर्वसवर्णदीर्घस्यापवाद —

(१९९) **अमि पूर्वः** । ६ । १ । १०७ ।

अक इत्येव । अक अमि परे पूर्वरूपमेकादेश । यथा—

राम + अम् = रामम्	गुरु + अम् = गुरुम्
रमा + अम् = रमाम्	वधू + ,, = वधूम्
हरि + ,, = हरिम्	ऋकारस्य तु गुणविधानान्नाय स-
गौरी + ,, = गौरीम्	भवति ।

'सम्प्रसारणाच्च' इत्युत्तरसूत्रमन्यत्र व्याख्यास्यते । एङ पदान्तादति (९९) इति तदुत्तर सूत्र व्याख्यातम् ।

(२००) **ङसिङसोश्च** ।६।१।११०।

एङो ङसिङसोरति परत पूर्वरूपमेकादेश स्यात् । अपदान्तार्थ वचनम् । यथा—

गो + अस् = गोस् = गो | हरे + अस् = हरेस् = हरे ।

गुरो + अस् = गुरोस् = गुरो ।

हरिगुरुशब्दयोरिदुदन्तयो 'र्घेर्डिति' इति गुणो वक्ष्यते ।

(२०१) **ऋत उत्** ।६।१।१११।

ऋकारात् ङसिङसोरति परे उकार एकादेश । यथा—

पितृ + अस् = पितुस् = पितु | मातृ + अस् = मातुस् = मातु ।

'उरण् रपर.' इति रपरोऽयमुकारादेशो भवितुमर्हति । तथापि पितुस् इति जाते वक्ष्यमाणेन सयोगान्तलोपेन सलोपे तुल्यमेव रूपम् ।

(२०२) **ख्यत्यात् परस्य** ।६।१।११२।

इकारान्तेषु सखिपतिशब्दयो पर विसज्ञा नास्ति (१८७,-८) । तस्मात् तयोर्हरिशब्दस्य 'र्घेर्डिति' इति गुणे, 'ङसिङसोश्च' इति पररूपेण 'हरे' इतिवत् रूप न सिध्येत् । 'सखि + अस्,' 'पति + अस्' इति स्थिते 'इको यणचि' ति यणादेशेन 'सख्यस्,' 'पत्यस्' इत्येव भवति । एव कृतयणादेशयोस्तयोरनुकरण 'ख्यत्य' इति, अकर उच्चारणार्थ । विकृतरूपग्रहण विसज्ञाभावे उत्व यथा स्यादिति । परस्येत्युक्ति. 'एकः पूर्वपरयो'-रित्यधिकारनिवृत्त्यर्थ । सखिपतिशब्दाभ्यां परस्य ङसिङसोरत उत् स्यात् । यथा—

सखि + अस् = सख्यु ; पति + अस् = पत्यु ।

(२०३) **औतोऽशसोः** ।६।१।९३।

आ ओत इति च्छेद । ओकारादशसोरचि परे आकार एकादेश स्यात् । यथा—

गो + अम् = गाम्, गो + अस् = गा ।

---

(३) **प्रत्ययानामादेशाः** ।

(२०४) **अतो भिस ऐस्** ।७।१।९।

अङ्गस्येत्यधिकृतम् । अदन्तादङ्गात् परस्य भिस ऐस् इत्यादेश स्यात् । 'न विभक्तौ तुस्मा' इति सकारस्य नेत्सञ्ज्ञा, अनेकाल्त्वात् सर्वादेश । यथा—

राम + भिस् = राम + ऐस = रामै ।

(२०५) **नेदमदसोरकोः**।७।१।११।

'अव्ययसर्वनाम्नामकच् प्राक् टे' इति सर्वनाम्नाम् अल्पार्थे 'अक' इति प्रत्ययो वा टे पूर्वं भवति । तद्ग्रहणनिरासार्थं 'अको'रिति । अकञ्रहितयोरिदमदसोर्भिस ऐस् न स्यात् । इदमदसो-'स्त्यदादीनाम' इत्यदन्तत्वं भवति । अत ऐसादेश प्राप्नोत्येव । यथा—

इदम्—एभि, अदस्—अमीभि, अमूभि ।
प्रत्य—('अको' कि ?) अमुकै ।

(२०६) **टाङसिङसामिनात्स्याः** ।७।१।१२।

अदन्तादङ्गात् टादीनामिनादय आदेशा स्यु । टा—इन, ङसि—आत्, ङस्—स्य इति यथासख्यमादेशा भवन्ति ।

राम + आ = रामेन (रेफसाभ्यान्नस्य णत्वम्) रामेण । राम + अस = रामात् । राम + अस् = रामस्य ।

(२०७) **ङेर्यः** ।७।१।१३।

अदन्तादङ्गात् ङे इति चतुर्थ्येकवचनस्य यादेश । यथा—

राम + ए = राम + य = रामाय ('सुपि च' इति दीर्घोऽत्र वक्ष्यते) ।

(२०८) **सर्वनाम्नः स्मै** ।७।१।१४।

अदन्तात् सर्वनाम्नस्तु ङे इत्यस्य 'स्मै' इत्यादेश । यथा—

सर्वस्मै, पूर्वस्मै, अन्यस्मै, तस्मै इत्यादि ।

(२०९) **ङसिङ्योः स्मात्-स्मिनौ** ।७।१।१५।

अदन्तात् सर्वनाम्न इत्येव । यथा—

सर्वस्मात्, सर्वस्मिन् । तस्मात्, तस्मिन् ।

(२१०) **पूर्वादिभ्यो नवभ्यो वा** ।७।१।१६।

पूर्वादिनवकात परयोर्ङसिङ्योः स्मात्-स्मिनौ विकल्पेनैव । यथा—

पूर्वस्मात्, पूर्वात्, पूर्वस्मिन्, पूर्वे ।

(२११) **जसः शी** ।७।१।१७।

अदन्तात् सर्वनाम्नो जस शी इत्यादेश । शित्त्वादय सर्वादेशो भवति । यथा—

सर्व + अस् = सर्व + ई = सर्वे ।

एव विश्वे, अन्ये, एके इत्यादि । पूर्वादीना जसि सर्वनामसज्ञाया विकल्पितत्वात् (१७७-८९) पूर्वे, पूर्वा· इति रूपद्वयम् ।

(२१२) **औङ आपः** ।७।१।१८।

औडित्यौकारविभक्ते सज्ञेत्युक्तम् । आप् स्त्रीप्रत्यय चाप्, टाप्, डाप् वा । आबन्तात् परयो प्रथमाद्वितीयाद्विवचनयो शी इत्यादेश । यथा—

रमा + औ = रमा + ई = रमे ।

(२१३) **नपुंसकाच्च** ।७।१।१९।

औङ शी इत्ययमादेश स्यात् । यथा—

धन + औ = धन + ई = धने । यशस् + औ = यशस् + ई = यशसी । नामन् + औ = नामन् + ई = नामनी ।

(२१४) **जश्शसोश्शिः** ।७।१।२०।

नपुसकाज्जश्शसो शि इत्ययमादेश । यथा—

वा· वारी **वारि** ।

(२१५) **अष्टाभ्य औश्** ।७।१।२१।

'अष्टा' इति कृतात्वस्याष्टन्शब्दस्य ग्रहणार्थं 'अष्टाभ्य' इति । तस्माज्जश्शसोरौश् इत्ययमादेश । शित्त्वात् सर्वादेश । यथा—

अष्टन्—दीर्घे अष्टा, । अष्टा + अस् = अष्टा + औ = अष्टौ । दीर्घाभावे तु उत्तरसूत्रेण लोपे 'अष्ट' इत्यपि रूपम् ।

(२१६) **षड्भ्यो लुक्** । ७ । १ । २२ ।

षट्सञ्ज्ञकेभ्यो जश्शसोर्लुक् स्यात् । लुक्=लोप । के नाम षट्-सञ्ज्ञा ?—

(२१७) **ष्णान्ता षट्** (सङ्ख्या) । १ । १ । २४ ।

(२१८) **डति च** । १ । १ । २४ ।

षान्ता नान्ता च सङ्ख्या डतिप्रत्ययान्तश्च इत्येते षट्सञ्ज्ञा स्यु । षान्ता सङ्ख्या षष् इति, नान्ता पञ्चन्, सप्तन्, अष्टन्, नवन्, दशन् इति एते पञ्च, डतिप्रत्ययान्त कतिशब्द । पञ्चादे सङ्ख्याषट्कस्य वाचिकेयमिति षट्सञ्ज्ञा कृतेति प्रतिभाति । अथ प्रकृत सूत्रमुदाह्रियते—

षष् + अस = षष् । षकारस्य जश्त्वेन (६९) डकार, तस्य चावसाने चर्त्व-विकल्प (११३) षट्, षड् । पञ्चन् + अस् = पञ्चन्, वक्ष्यमाणेन नलोपेन पञ्च ।

एव सप्त, अष्ट, नव, दश कति इति । **'पदाङ्गाधिकारे तस्य च तदन्तस्य च'** इति परिभाषया षट्सञ्ज्ञान्तानामपि जश्शसोर्लुक् भवति । तेन एकादश, द्वादश इत्यादि ।

(२१९) **स्वमोर्नपुंसकात्** । ७ । १ । २३ ।

नपुंसकादङ्गात् परयो सु अम् इति प्रथमाद्वितीयैकवचनयोर्लुक् स्यात् । यथा—

दधि, मधु, कर्तृ, महत्, यश, तत् इत्यादि ।

(२२०) **अतोऽम्** । ७ । १ । २४ ।

अदन्तात्तु नपुंसकात् स्वमोरमादेश । अमोऽप्यमादेशो लोपबाधनार्थं । यथा—

धन—धनम्; वन—वनम् । 'अमि पूर्व' इति पूर्वरूपमेकादेश ।

(२२१) **अड्डतरादिभ्यः पञ्चभ्यः** । ७ । १ । २५ ।

डतर, डतम, अन्य, अन्यतर, इतर एभ्यस्तु नपुंसकेभ्योऽदन्तेभ्यः स्वमो 'अद्' इत्यादेश । यथा—

कतर + स् = कतर + अद्,—'अतो गुणे' इति वक्ष्यमाण पररूप,—कतरत्, कतरद् । एव अन्यत्, इतरत् इत्यादि ।

'*प्रथमयो पूर्वसवर्ण' (१९५) दीर्घस्तु नपुंसकेऽनपेक्षित इति न प्रवर्तते ।

(४) **अङ्गकार्याणि** ।

(२२२) **हल्-ङ्याब्-भ्यो दीर्घात् सु-ति-स्यपृक्तं हल्** । ६ । १ । ६८ ।

लोप इत्यनुवर्तते, स चात्रान्वयानुरोधेन 'लुप्यते' इति विपरिणम्यते । दीर्घादिति ङ्याप्रोर्विशेषणम्, अपृक्त नाम—

(२२३) **अपृक्त एकाल् प्रत्ययः** । १ । २ । ४१ ।

एकवर्णात्मक प्रत्यय अपृक्तसज्ञ स्यात् इत्युक्तलक्षणम् । हलन्तात्, दीर्घौ यौ ङ्याप्रौ तदन्ताच्च पर सु ति सि इति प्रत्ययानां अपृक्तं हल् लुप्यते । 'सु' इति प्रथमैकवचनमेकवर्णात्मकमेव । ति सि इत्येतौ प्रथममध्यमपुरुषयोरेकवचने, तयोर्लडादिषु लकारेषु इकारलोपे त् स् इत्यपृक्तत्व भवति । अथोदाह्रियते यथा—

हल्	सम्पद् + स् = सम्पद्	माला + स् = माला	आप्
	वाक् + स् = वाक्	सीमा + स् = सीमा	
	त्विष् + स् = त्विड्	गौरी + स् = गौरी	ङी
	ककुभ् + स् = ककुप्, ककुब्	कुमारी + स् = कुमारी ।	

* अत्र व्याख्यातार 'अड्डतरादिभ्य' इति सूत्रे डकारप्रश्लेषेण 'अद्ड्' इत्यादेशस्य स्वरूप प्रकल्प्य डित्त्वात् प्रकृतेष्टिलोपेन कतर् + अद् = कतरद् इति रूपसिद्धिं सम्पाद्य 'प्रथमयो पूर्वसवर्ण' इति दीर्घस्याबकाश वारयन्ति ।

मालामतिक्रान्तोऽतिमाल इत्यादौ उपसर्जनह्रस्वे मा भूदिति ङ्याप्रोर्दीर्घ-विशेषणम् ।

(२२४) **एङ्ह्रस्वात् सम्बुद्धेः** । ६ । १ । ६९ ।

एङन्तात् ह्रस्वान्ताच्च सम्बुद्धेर्लोप स्यात् । सम्बुद्धिर्नाम सम्बोधनार्थे प्रथमाया एकवचन, तथा च सूत्रम्—

(२२५) **एकवचन सम्बुद्धिः** (प्रथमा सम्बोधने) । २ । ३ । ४९ ।

राम + स् = (हे) राम, हरे + स् = (हे) हरे, गुरो + स् = (हे) गुरो } 'हे' इति निपात सम्बोधनं द्योतयति ।

'अतो दीर्घो यञि' इत्यनुवर्तमाने

(२२६) **सुपि च** । ७ । ३ । १०२ ।

अदन्तस्याङ्गस्य दीर्घ स्यात् यञादौ सुपि परे । यथा—

राम + य = रामाय | राम + भ्या = रामाभ्याम् ।

(२२७) **बहुवचने झल्येत्** । ७ । ३ । १०३ ।

झलादौ बहुवचने सुपि परे अदन्तस्याङ्गस्य एकारादेशः स्यात्, दीर्घापवाद । तेन 'भ्यां, य' इत्यनयो परयोर्दीर्घ । 'भ्यस्, सुप् साम्' इत्येष्वेत्व च फलितम् ।

राम + भ्यस् = रामेभ्य ।

राम + सु = रामेषु, = रामेषु (इण्कवर्गाभ्या परस्य सस्य षत्व वक्ष्यते) ।

(२२८) **ओसि च** । ७ । ३ । १०४ ।

ओसि परे च अदन्ताङ्गस्य एत् । यथा—

राम + ओस् = रामे + ओस् = रामयो ।

(२२९) **आङि चापः** । ७ । ३ । १०५ ।

'आङ्' इति तृतीयैकवचनस्य ('टा' इत्यस्य) पूर्वाचार्याणां संज्ञा । आबन्तस्य टाप्रत्यये (चकारात्) ओसि च परे एकार ।

रमा + आ = रमे + आ = रमया । रमा + ओस् = रमे + ओस् = रमयोः ।

(२३०) **सम्बुद्धौ च** । ७ । ३ । १०६ ।

आबन्तस्य एत् सम्बुद्धौ परत । यथा—

रमा + स् = रमे - स् ('सम्बुद्धिलोप' २२४) = (हे) रमे ।

(२३१) **अम्बार्थनद्योर्ह्रस्वः** । ७ । ३ । १०७ ।

अम्बार्थाना नदीसज्ञाना च ह्रस्व सम्बुद्धौ । अम्बा, अक्का, अल्ला इति त्रय एव शब्दा आदन्ता अम्बार्था ।

(हे) अम्ब, अक्क, अल्ल (ह्रस्वात सम्बुद्धिलोप २२४)

(२३२) **ह्रस्वस्य गुणः** । ७ । ३ । १०८ ।

ह्रस्वान्तस्याङ्गस्य गुण स्यात् सम्बुद्धौ । यथा—

हरि + स = हर + स् = हरे
गुरु + स् = गुरो + स् = गुरो
'एङ सम्बुद्धिलोप' (२२४)

(२३३) **जसि च** । ७ । ३ । १०९ ।

ह्रस्वस्य गुण स्यात् जसि च परे । यथा—

हरि + अस = हरे + अस = हरय । गुरु + अस् = गुरो + अस् = गुरव ।

अकारान्तस्य गुणेन कोऽपि न विशेष । ऋकारान्तस्य तु न केवल जसि सम्बुद्धौ च गुण, अपि तु अन्यत्राप्यस्ति । तदेवाह—

(२३४) **ऋतो ङिसर्वनामस्थानयोः** । ७ । ३ । ११० ।

ऋदन्तस्य ङौ सर्वनामस्थाने च गुण ।

पितृ — पितरौ, पितर, हे पित, पितर, पितरौ, पितरि ।

सम्बुद्धौ पितृ+स् इति स्थिते गुणेन पितर् स् इति जाते हल्ङ्यादिलोप । सौ अनङादेशस्य विशेषविधानाद्गुणो न प्रवर्तते ।

(२३५) **घेर्ङिति** । ७ । ३ । १११ ।

घिसज्ञस्य ङिति प्रत्यये गुण । ङे, ङसि, ङस्, ङि एतानि चतुर्थ्यादेकवचनानि ङित्प्रत्यया ।

हरि + ए = हरे + ए = हरये । गुरु + ए = गुरो + ए = गुरवे ।
हरि + अस् = हरे + अस्—'ङसिङसोश्च' (२००) इति पूर्वरूपे, हरेस् = हरे ।
गुरु + अस् = गुरो + अस्, (पूर्वरूप) = गुरो । षष्ठ्येकवचनेऽपि तुल्य रूपम् ।
ङौ तु विशेषो वक्ष्यते ।

(२३६) **आण् नद्याः**।७।३।११२।

नदीसज्ञात् परस्य ङित्प्रत्ययस्य आडागम स्यात्। टित्त्वादाद्यावयवय । आ+ए=ऐ, आ+अस्=आस्। यथा—

गौरी + ऐ = गौर्यै, गौरी + आस् = गौर्या । वधू+ऐ = वध्वै, वधू+आस् = वध्वा ।

(२३७) **याडापः**।७।३।११३।

आबन्तात् ङित्प्रत्ययस्य याडागम । या+ए=यै; या+अस् =यास्। यथा—

रमा + यै = रमायै, रमा + यास् = रमाया ।

(२३८) **सर्वनाम्नः स्याड्ढ्रस्वश्च**।७।३।११४।

आबन्तात् सर्वनाम्नस्तु ङित्प्रत्ययस्य स्याट् इत्यागमः। तत्सन्नियोगेन आपो ह्रस्वत्व च। यथा—

सर्वा—सर्वस्यै सर्वस्या ।

(२३९) **ङेराम्नद्यामीभ्यः**।७।३।११६।

नदीसज्ञादाबन्तात् नीशब्दाच्च ङे 'आम्' इत्यादेश । यथा—

गौरी — गौर्याम् ।
रमा — रमायाम् (२३७ सूत्रेण याडागमश्च)
सर्वा — सर्वस्याम (२३८ सूत्रेण स्याडागमह्रस्वौ)
नी — नियाम् (इयङादेशोऽत्र वक्ष्यते)

(२४०) **इदुद्भ्याम्**।७।३।११७।

नदीसज्ञकाभ्या इकार—उकाराभ्या परस्य ङेराम्। उत्तरसूत्रेण औत्त्व मा भूदिति वचन, अन्यथा पूर्वसूत्रेणैवात्राप्या सिध्यति। यथा—

मति — मत्याम्, धेनु — धेन्वाम् ।

(२४१) **औत्**।७।३।११८।

इदुद्भ्या परस्य ङेरौकारादेश स्यात्। यथा—

सखि — सख्यौ, पति — पत्यौ ।

पूर्वसूत्रेण नद्या आम् विहित, उत्तरसूत्रेण ङेश्च विशेषो विधीयते। अतः विनदीसंज्ञारहितौ सखिपतिशब्दावेवास्य सूत्रस्य विषयौ ।

(२४२) **अच घेः**।७।३।११९।

घे परस्य डेरपि औकारादेश । किन्तु तदा प्रकृतेर्घेरकारोऽन्तादेशश्च । यथा—

हरि + इ = हर + औ = हरौ । गुरु + इ = गुर + औ = गुरौ ।

(२४३) **आङो नास्त्रियाम्**।७।३।१२०।

घे परस्य टा इति तृतीयैकवचनस्य ना इत्यादेश स्यात् (अस्त्रिया) पुन्नपुंसकयो । यथा—

कविना, गुरुणा अमुना (कुलेन) । स्त्रिया तु मत्या तन्वा ।

अथ प्रकरणान्तरविहितानि कार्याणि ।

(२४४) **आमि सर्वनाम्नः सुट्**।७।१।५२।

'आत्' इत्यनुवर्तते । अवर्णान्तात् (न तु अदन्तात्) सर्वनाम्नः परस्य *आम सुडागम स्यात् ।

सर्व + आम् — सर्व + साम — 'बहुवचने झल्येत्' (२२७) सर्वेसा — षत्व, सर्वेषाम् । स्त्रिया तु अदन्तत्वाभावात् न एत्व, इणभावान्न षत्व, सर्वासाम् । एव अन्येषु अन्यासा इत्यादि ।

प्रत्यु—('आत्' कि) भवताम् ।

(२४५) **त्रेस्त्रयः**।७।१।५३।

त्रि इत्यस्य आमि परे त्रय इत्यादेश । उत्तरसूत्रेण त्रयाणामिति रूपसिद्धिः ।

(२४६) **ह्रस्वनद्यापो नुट्**।७।१।५४।

ह्रस्वान्तान्नदीसज्ञादाबन्ताच्च आमो नुडागम ।

राम + आ = राम + नाम्—'नामि' इति वक्ष्यमाण प्रकृतेर्दीर्घ, रामानाम—षत्व—रामाणाम् । एव वनाना, हरीणा, गुरूणा, पितृणा, (नदी) गौरीणा, वधूना, (आप्) रमाणा, जायानाम् ।

---

* 'आमि' इति सप्तमीनिर्देश उत्तरसूत्रेऽनुवृत्त्यर्थ । अत्र तु 'आत्' इत्यनुवृत्ते 'सर्वनाम्न' इत्यपि पञ्चमीति स्पष्टम् । तस्मात् 'तस्मादित्युत्तरस्य' इति परिभाषया आम एव सुट् सिध्यति । टित्त्वादाद्यावयवश्च ।

नान्तस्योपधाया दीर्घ सम्बुद्धिभिन्ने सर्वनामस्थाने परे । यथा —

राजन् + स् = राजान् + स्—हल्ङ्यादेर्लोप, राजान्—'नलोप प्रातिपदिकान्तस्य' (२५२) राजा । राजानौ, हे राजन् (असम्बुद्धावित्युक्तेर्न दीर्घ) । राजान राजानौ । क्लीबे शेरेव सर्वनामस्थानत्वात् कर्माणि इति दीर्घ ।

(२९६) *इन्हन्पूषार्यम्णां शौ । ६ । ४ । १२ ।

(२९७) सौ च । ६ । ४ । १३ ।

इन्नन्ताना, अन्नन्तेषु हन् पूषन् अर्यमन् इति शब्दाना च नान्तत्वात् प्राप्त उपधादीर्घ शौ सौ चैव, नान्यत्र सर्वनामस्थाने । यथा—

इन्—**भावी** भाविनौ भाविन । भावि भाविनी **भावीनि** ।

हन्—**वृत्रहा** वृत्रहणौ वृत्रहण, वृत्रहणम् । **पूजितवृत्रहाणि** नगराणि ।

पूषन्—**पूषा** पूषणौ पूषण, पूषणम् । **उदितपूषाणि** उदयगिरिशृङ्गाणि ।

अर्यमन्—**अर्यमा** अर्यमणौ अर्यमण । **उदितार्यमाणि** ।

नान्तेषु इन्नन्ता अन्नन्ताश्चैव अकृत्रिमा शब्दा सन्ति । तत्र अन्नन्तानां सर्वनामस्थानमात्रे (असम्बुद्धौ) दीर्घ, इन्नन्तानां सावेव । उन्नन्ताश्च कृत्रिमा सन्ति शौ, तत्र सर्वेषा दीर्घ । हन्पूषार्यम्णा सावेव दीर्घ. इति विशेषविधि ।

पुंस्त्रियो सुट्यनो दीर्घ, इन सौ, शौ, तु सर्वत । इति सक्षेप ।

(२९८) सान्तमहतः संयोगस्य । ६ । ४ । १० ।

सकारान्तसयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने । 'उगिदचा सर्वनामस्थानेऽधातो' (२६२) इति सान्तेषु केषाञ्चित् नुमागमो विधास्यते । ते शब्दा अत्रोदाहरणम् । यथा—

विद्वस + स्-नुम्—विद्वन्स + स्—अनेन सूत्रेण दीर्घ, विद्वान्स् + स्—हल्ङ्यादिलोप, विद्वान्स् इति जाते ।

(२९९) संयोगान्तस्य लोपः । ८ । २ । २३ ।

पदस्येत्यधिकृतम् । सयोगान्तस्य पदस्य लोप स्यात्, अलोऽन्त्यस्येत्यन्त्यवर्णस्य लोप । इत्यसिद्धकाण्डगतेन सूत्रेण 'नस्' इति सयोगे

* सन्दर्भशुद्ध्यर्थं सूत्रद्वयमिद क्रममुपेक्ष्य व्याख्यायते ।

अन्त्यस्य सकारस्य लोप. **विद्वान्** । नकारस्य पदान्तत्वात् झलपरकत्वाभावाच्च 'नश्चापदान्तस्य झलि' (९२) इत्यनुस्वारो नात्र भवति । अन्यत्र तु भवत्येव, **विद्वांसौ विद्वांसः, विद्वांसं विद्वांसौ**। 'महत्' इत्यस्याप्येवमेव — **महान् महान्तौ महान्तः महान्तं महान्तौ** इति रूपाणि । अत्र नुम्नकारस्य 'नश्चापदान्तस्ये'—त्यनुस्वारे कृतेऽपि 'अनुस्वारस्य यथि परसवर्णः' (११५) इति परसवर्णेन नकार एव पुनश्च भवति । 'विद्वान्' 'महान्' इत्यादौ सयोगान्तलोपस्यासिद्धत्वान्न 'नलोप प्रातिपदिकान्तस्य' । असिद्धकाण्डे नलोप एव हि पथम विधीयते । 'राजा (न्)' इत्यादौ तु न सयोगान्तलोप किन्तु हल्ङ्यादिलोप इति नकारो लुप्यते । नपुसके **विद्वांसि, महान्ति** ।

(२१०) **अप्-तृन्-तृच्-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तॄणाम्** । ६ । ४ । ११ ।

अप् इत्यस्य तृन्तृच्प्रत्ययान्ताना स्वस्रादीना च उपधाया दीर्घ स्यात् असम्बुद्धौ सर्वनामस्थाने । तृन्तृचौ प्रत्ययौ, अनयोरर्थ एव भेदो न तु रूपे । सर्वेभ्यो धातुभ्यश्चैतौ भवत. । कृ—कर्त्तृ, भू—भवितृ, दृश्—द्रष्टृ इत्यादि । नप्तृनेष्टृादय शब्दा अव्युत्पन्ना इति पृथगुपात्ता । यथा—

* अप्—आप—'आप स्त्री भूम्नि' इति बहुवचनमात्रेऽस्य प्रयोग ।
तृन्, तृच—कर्त्तारौ कर्त्तार, हे कर्त्त कर्त्तार कर्त्तारौ ।
स्वसृ—स्वसारौ स्वसार, हे स्वस, स्वसार स्वसारौ ।
नप्तृ—नप्ता नप्तारौ नप्तार, हे नप्त नप्तार नप्तारौ ।

सौ एषा कर्त्ता स्वसा इत्यादि रूपमनडादेशेन वक्ष्यते । 'ऋतो ङि सर्वनामस्थानयो' (२२४) इति गुणेन कर्त्तर्+औ इति जाते दीर्घः । सम्बुद्धौ गुणानन्तर हल्ङ्यादिलोपेन 'कर्त्तर्' इति जाते अवसाने रेफस्य

* अस्य प्रक्रियाविशेषोऽन्यत्रोक्त । **अपो भि (त)** ।७।४।४८। अप्शब्दस्य तकारोऽन्तादेश स्यात् भादौ प्रत्यये परे । तेन—आप अप अद्भि अद्भ्य अद्भ्य अपा अप्सु इति रूपाणि ।

विसर्ग । ‡तृन्तृजादिभिन्नाना तु पितरौ पितर , मातरौ मातर इत्यादि ।

(२६१) **अत्वसन्तस्य चाधातोः** (सौ) । ६ । ४ । १४ ।

अत्वन्तस्य असन्तस्य च उपधाया दीर्घोऽसम्बुद्धौ सौ परे न तु धातो । 'अतु' इत्यत्र उकार इत् , तेन 'मतुप्' 'क्तवतु' इत्यादय प्रत्यया गृह्यन्ते, उकारानुबन्धेन पठित प्रातिपदिक च । यथा सर्वादिगणे 'भवतु' इति । असन्त सर्वविधोऽपि गृह्यते । यथा—

अतु—बुद्धिमत् + स्—दीर्घ, बुद्धिमात् स्—'उगिदचा ' (२६२) इति नुम्, बुद्धिमान्त् स्—हल्ङ्यादिलोपसयोगान्तलोपौ, बुद्धिमान् । एव कृतवान् 'भवान्' इत्यादि ।

अस्—वेधस्—वेवस् + स्—वेधास् स् हल्ङ्यादिलोप वेधा । एव महायशा' इत्यादि ।

अथात्र बहुत्रान्यत्रापि परामृष्टो नुम् विधिरुच्यते—

(२६२) **उगिदचां सर्वनामस्थानेऽधातोः** । ७ । १ । ७० ।

धातुवर्जमुगिता लुप्तनकारस्य अञ्चुधातोश्चाङ्गस्य सर्वनामस्थाने परे नुमागम स्यात् । 'उगितश्च' (१४१) इति सूत्रव्याख्याने उगित परिगणिता द्दश्यन्ताम् । मित्त्वादन्त्यादच पर आगम , उकार उच्चारणार्थ, तेन 'न्' इत्येवागमस्वरूपम् । यथा—

बुद्धिमत्—	बुद्धिमान्	बुद्धिमन्तौ	इत्यादि । प्रक्रियोक्ता ।
कृतवत्—	कृतवान्	कृतवन्तौ	,,
तावत्—	तावान्	तावन्तौ	,,
विद्वस्—	विद्वान्	विद्वासौ	,,
महीयस्—	महीयान्	महीयासौ	,,
कुर्वत्—	कुर्वन्	कुर्वन्तौ	अत्वन्तत्त्वाभावान्न दीर्घ ।
सर्वनाम–भवत्	भवान्	भवन्तौ	'भवतु' इति उदित् पठित ।
शतृप्रत्ययान्तस्य तु	भवन्	भवन्तौ	इत्येव ।

अथ अञ्चुधातौ नुमागम उदाहियते । 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चा च' इति सूत्रेण अञ्चुधातो 'क्विन्' इति कृत्प्रत्ययो भवति स च सर्वलोपी प्रत्यय प्रकृ-

‡उद्गातृ शब्दस्याप्यय दीर्घ इष्यते—'होतृपोतृनेष्टोद्गातार ' इति भाष्यकारप्रयोगात् ।

तिगतमनुनासिकमपि लोपयति । तथा च प्रपूर्व अञ्चुधातु क्विन्प्रत्यये प्राच् इति रूपमापद्यते । एव च प्रत्यच्, पराच्, उदच् इत्यादि । प्राच् + स् इति स्थिते नुम्, प्रान्च् + स्—हल्ङ्यादिलोप, प्रानच्—सयोगान्तलोप, प्रान् । एव स्थिते क्विन्प्रत्ययान्तत्वाद्विशेषकार्यम्—

(२६३) **क्विन्प्रत्ययस्य कुः** । ८ । २ । ६२ ।

क्विनप्रत्ययान्तस्य कवर्गोऽन्तादेश पदान्ते । अनेन कुत्वे **प्राङ्** इति रूपसिद्धि । प्राञौ प्राञ, प्राञ प्राञौ । एव प्रत्यङ् प्रत्यञौ, उदङ् उदञौ इत्यादि । क्लीबे—बुद्धिमान्ति, तावन्ति, कृतवन्ति, विद्वासि, महीयासि, कुर्वन्ति, प्राञ्चि, प्रत्यञ्चि इत्यादि ।

'**वर्त्तमाने पृषत्-बृहत्-महत्-जगत्-शतृवच्च**' इत्युणादिसूत्रे 'शतृवच्च' इत्यतिदेशात् नुम्, 'सान्तमहत ' (२५८) इति दीर्घश्च—महान्—महान्तौ—महान्त । क्लीबे महान्ति । स्त्रिया महती इति ङीप् ।

(२६४) **नपुंसकस्य झलचः** । ७ । १ । ७२ ।

झलन्तस्याजन्तस्य च क्लीबस्य नुम् सर्वनामस्थाने । यथा—

बृहत् — बृहन्ति । रुध — रुन्धि । भाज् — भाञ्जि ।
तादृश् — तादृशि—'नश्चापदान्तस्ये'त्यनुस्वार ।
यशस् — यशांसि ,,
धनुस — धनूंषि 'सान्तमहत सयोगस्य' (२५८) इति दीर्घ
महत् — महान्ति ,,
धन — धनन् + इ — नुमागमे नान्तत्वलाभात् 'सर्वनामस्थाने चासम्बुद्धौ' (२५५) इति दीर्घ, धनानि । एव
वारि — वारीणि, मृदु — मृदूनि, कर्तृ — कर्तृणि ।
अत्र—('झलच' कि ?) वार् — वारि, विमलदिव, विमलदिवि ।

(२६५) **इकोऽचि विभक्तौ** । ७ । १ । ७३ ।

इगन्तस्य नपुसकस्य अजादौ विभक्तौ नुम् । यथा—

मृदु—मृदूनी	मृदूना	मृदुने	मृदुन	मृदूनो	मृदूनि
शुचि—शुचिनी	शुचिना	शुचिने	शुचिन	शुचिनो	शुचिनि
कर्तृ—कर्तृणी	कर्तृणा	कर्तृणे	कर्तृण	कर्तृणो	कर्तृणि ।

* अञ्चु, अङ्क, छुण्ट, खस इत्यादिषु धातुषु उपधाभूतोऽनुनासिक सर्वोऽपि नकारस्य विकार एवेति सिद्धान्त ।

(२४७) **षट्चतुर्भ्यश्च** । ७ । १ । ९९ ।

षट्सञ्ज्ञकेभ्य (२१७) चतुरश्च परस्य आमो नुडागम ।

चतुर् + आ = चतुर्ना—चतुर्णाम ।

षष् + आ = षष्ना — 'झला जशोऽन्ते' (६९) — षड्ना — 'न पदान्ताट्टोरनाम्' (१०४) इति ष्टुत्वनिषेधस्य निषेधात् ष्टुत्व, षड्णा—'प्रत्यये भाषाया नित्य' (१०७–वा) इत्यनुनासिकादेश, षण्णाम् ।

पञ्चन्+आ = पञ्चन+ना—'नोपधाया' (२५१) इति दीर्घ — पञ्चान ना —वक्ष्यमाण प्रकृतेर्नलोप — पञ्चानाम् । एव — सप्तानाम्, अष्टानाम्, नवानाम् दशानाम्, कतीनाम् ।

अथ 'रामाणा' इत्यादौ परामृष्टो दीर्घविधिरुच्यते—

दीर्घ इत्यनुवर्तमाने 'अङ्गस्य' । ६ । ४ । १ । इत्यधिकृत्य—

(२४८) **नामि** । ६ । ४ । ३ ।

कृतनुडागमे आमि परे अङ्गस्य दीर्घ स्यात् ।

रामाणा, वनाना, हरीणा, गुरूणा, पितॄणाम ।

(२४९) **न तिसृचतसृ** । ६ । ४ । ४ ।

अनयोर्नामि न दीर्घ । तिसृणा । चतसृणाम् ।

(२५०) **नृ च** (उभयथा) । ६ । ४ । ६ ।

नृशब्दस्य नामि दीर्घस्तदभावश्च स्यात् । नृणा, नृणाम् ।

(२५१) **नोपधायाः** । ६ । ४ । ७ ।

नान्तस्योपधाया दीर्घो नामि परे ।

पञ्चन् + ना — पञ्चान् + नाम ।

अत्र प्रक्रियाप्रदर्शनार्थं नलोपविधिर्मध्ये क्रियते—

(२५२) **नलोपः प्रातिपदिकान्तस्य** । ८ । २ । ७ ।

पदस्येत्यधिकृतम् । तच्च प्रातिपदिकेत्यशस्य विशेषणम् । सापेक्षत्वेऽपि गमकत्वात् समास । यथा 'रतेर्गृहीतानुनयेन' इत्यादौ । प्रातिपदिकान्तस्य नकारलोपो भवति तच्चेत् प्रातिपदिक पदसञ्ज्ञमपि स्यात्, प्रातिपदिकसञ्ज्ञमपि स्यात्, प्राति-

पदिकाभिन्नस्य पदस्यान्त्यवर्णो नकारश्चेल्लुप्यत इति यावत् । प्रातिपदिक रूप च पद सुब्लोपे, हलादौ सुपि परे ('स्वादिष्वसर्वनामस्थाने' १९२) वा सम्भवति । पञ्चान्+ना इति प्रकृते हलादिप्रत्ययस्य परत्वात् 'पञ्चान्' इति प्रातिपदिकाभिन्न पद, तस्यान्त्यनकारलोप, **पञ्चानां** इति रूप सिध्यति । एव राजभ्या, राजभि, राजसु इत्यादिषु नलोप । 'राजा' 'कर्म' इत्यादिप्रथमैकवचनानि हल्ङ्यादिसूत्रेण सुलोपात् प्रत्ययलोपेन प्रातिपदिकाभिन्नस्य पदस्य नलोपोदाहरणानि । नलोपस्यास्य असिद्धकाण्डगतत्वात् 'नामि' इति दीर्घेण इष्टसिद्धिर्न स्यादित्यूर्वो ('नोपधाया इति') विधिरारब्ध । कथ तर्हि 'राजाश्व' इत्यादिसन्धि सिध्यति ? तत्र हि राजन्+अश्व इति स्थिते नलोपेन 'राज+अश्व' इति जाते षष्ठाध्यायविहित सवर्णदीर्घो दृश्यते । इति चेत्—

(२९३) **नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति** ।८।२।२।

प्रातिपदिकान्तस्य नलोपो य उक्त स सुब्विधौ, स्वरविधौ, सज्ञाविधौ, कृत्प्रत्यये परे यन्तुक् तद्विधौ च पर असिद्ध, नान्यत्र । अतो राजाश्व इत्यादि सन्धिविधौ नलोप सिद्ध एव । सुब्विधौ तु असिद्धत्वात् 'राजभ्यां' इत्यादौ 'सुपि च' (२२६) इति दीर्घ, 'राजभि' इत्यादौ अतो भिस ऐस्, 'राजसु' इत्यादौ 'बहुवचने झल्येत्' (२२७) इत्येत्व च न भवति ।

(२९४) **न डिसम्बुद्ध्योः** ।८।२।८।

डौ सम्बुद्धौ च नलोपो न स्यात् । यथा—

राजन् + स्—हल्ङ्यादिलोपे, राजन् ।

अत्र नकारो न लुप्यते । डौ तु छन्दस्येवोदारण—'परमे व्योमन्' । अत्र छान्दासो डिलोप, परमे व्योम्नीत्यर्थ ।

अथ प्रकृतो दीर्घविधिरेवानुबध्यते—

(२९५) **सर्वनामस्थाने चासम्बुद्धौ** ।६।४।८।

(२६६) तृतीयादिषु भाषितपुंस्कं पुवद्गालवस्य । ७ । १ । ७४ ।

तृतीयादिष्वजादिषु विभक्तिषु भाषितपुस्कमिगन्त क्लीव पुल्लिङ्ग इव रूप लभते गालवस्याचार्यस्य मतेन । नुमभावो ह्रस्वाभावश्च पुल्लिङ्गकार्यम् । नुमभावे विसज्ञया आडो नाख्या' 'घेर्डिति' 'अच्च घे' इति नाभाव-गुणादय । नाभावे रूपभेदो न भवती ति नोदाहृियते । यथा—

शुचि—शुचये, शुचे, शुच्यो, शुर्चा
मृदु—मृदवे, मृदो ,, मृद्वो, मृदौ
कर्तृ—कर्त्रे, कर्तु, कर्त्रो, कर्तरि

ह्रस्वाभावमुदाहर्त्तुं ह्रस्वविधिरुच्यते ।

(२६७) ह्रस्वो नपुंसके प्रतिपादिकस्य । १ । २ । ४७ ।

नपुसके दीर्घान्तस्य प्रातिपदिकस्य ह्रस्व स्यात् ।

श्रीपा = श्रीप । श्रीप श्रीपे इत्यादि वनवत्
श्रामणी = श्रामणि । श्रामणि श्रामणिनी ,, वारिवत्
खलपू = खलपु । खलपु खलपुनी ,, मृदुवत्

ह्रस्वरहिताना एचा 'एच इग्घ्रस्वादेशे' (२७) इति ह्रस्वस्थाने इक् भवति । एदन्त शब्दोऽप्रसिद्ध । यथा

सुद्यौ = सुद्यु । सद्यु सद्युनी इत्यादि मधुवत्
सुरै = सुरि । सुरि सुरिणी ,, वारिवत्
सुनौ = सुनु । सुनु सुनुनी ,, मधुवत

अथ पुवद्भावोदाहरणशेष —

श्रामणि { श्रामणिना श्रामणिने श्रामणिन श्रामणिनो श्रामणिनि
श्रामण्या श्रामण्ये श्रामण्य श्रामण्यो श्रामण्याम्

इति रूपाणि। भाषित पुमान् येन स्यात् तत् भाषितपुम्क, समानेऽर्थे पुल्लि-ङ्गप्रयोगार्ह, विशेष्यनिघ्नमित्यर्थ । 'भाषितपुस्क' इत्युक्ते वारि त्रपु इत्या-दीना नित्यक्लीबाना विशेष्याणा नाय विकल्प ।

(२६८) अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः । ७ । १ । ७९ ।

नुमोऽपवाद । अस्थ्यादीनामजादिषु तृतीयादिषु अनङ् आदेश

स्यात् । स च उदात्त इति स्वरविधि । अनेकाल्त्वेऽपि ङित्त्वादन्त्यादेशः अन्' इत्येवादेशस्वरूपम् ।

अस्थि + आ — अस्थन् + आ — 'अल्लोपोऽन' (२९९) इति अन अकारस्य लोपो वक्ष्यते, अस्ना । अस्ने, अस्न, अस्नो अस्नि अस्थनि ।
एव—दध्ना, सक्थ्ना, अक्ष्णा इत्यादान्येषामपि ।

(२६९) **नाभ्यस्ताच्छतुः** । ७ । १ । ७८ ।

अभ्यस्तात् परस्य शतृप्रत्ययस्य नुमागमो न स्यात् । शतृप्रत्ययस्य उगित्त्वात् 'उगिदचा ' (२६२) इति नुम प्राप्ति । अभ्यस्तो नाम द्विरुक्त्या आवृत्ताक्षरो धातु, जक्ष्, जागृ, शास्, ददिद्रा, चकास् इति धातुपञ्चक च ।

दा—ददत् ददतौ ददत ।	शास—शासत् शासतौ शासत ।
भृ—बिभ्रत् बिभ्रतौ बिभ्रत ।	जागृ—जाग्रत् जाग्रतौ जाग्रत ।

(२७०) **वा नपुंसकस्य** । ७ । १ । ७९ ।

अभ्यस्तात् परस्य नपुसकस्य शतृप्रत्ययस्य नुमागमो वा स्यात् ।

दा—ददन्ति, ददति ।	शास्—शासन्ति शासति ।
भृ—बिभ्रन्ति, बिभ्रति ।	जागृ—जाग्रन्ति जाग्रति ।

(२७१) **आच्छीनद्योर्नुम्** । ७ । १ । ७९ ।

अवर्णान्तात् अङ्गात् परस्य शतृप्रत्ययस्य नुम् वा स्यात् शीनद्योः परयो । नदीति स्त्रिया ङीप्रत्ययस्य लक्षकम् । यथा

तुद्—तुद + अत् = तुदत् —तुदन्ती, तुदती (कुले)
तुदन्ती, तुदती (ब्राह्मणी)
या—या + अत् = यात् —यान्ती, याती (कुले)
यान्ती, याती (ब्राह्मणी)
कृ—करिष्य + अत् = करिष्यत् —करिष्यन्ती, करिष्यती (कुले)
करिष्यन्ती, करिष्यती (ब्राह्मणी)

प्रत्यु—('आत्' कि ?) कृ—कुरु + अत् = कुर्वत्—कुर्वती । सु—सुनु + अत = सुन्वत्—सुन्वती । अद्—अद् + अत् = अदत—अदती ।

(२७२) **शप्श्यनोर्नित्यम्** । ७ । १ । ८१ ।

शप् श्यन् इति द्वावपि विकरणप्रत्ययौ अकारयकाररूपौ । आभ्यां

परस्य शतु नित्य नुमागम । भूवादिर्व्युत्पन्नधातुश्च शब्विकरण । दिवादि श्यन्विकरण । यथा—

भू—भव + अत् = भवत्—भवन्ती चिकीर्षन्ती (कुले), भवन्ती चिकीर्षन्ती (ब्राह्मणी) । दिव्—दीव्य + अत् = दीव्यत्—दीव्यन्ती (कले) दीव्यन्ती (ब्राह्मणी) ।

(२७३) **सावनडुहः** । ७ । १ । ८२ ।

सौ परेऽनडुहोऽङ्गस्य नुमागम । इदमुपरि उदाहरिष्याम ।

(२७४) **दिव औत्** । ७ । १ । ८४ ।

दिव् शब्दस्य औदित्यादेश सौ । यथा—दिव् + स् = दिऔ + स् = द्यौ ।

दिव् शब्दस्य प्रक्रियान्तरमन्यप्रकरणोक्तम्—

(२७५) **दिव उत्** । ७ । १ । १३१ ।

दिव अन्तादेश उकार स्यात् पदान्ते । यथा—

दिव् + भ्या = दिउ + भ्या = द्युभ्या—द्युभिरित्यादि ।

(२७६) **पथिमथ्यृभुक्षामात्** । ७ । १ । ८५ ।

पथिन्, मथिन्, ऋभुक्षिन् इत्येतेषामङ्गाना आकारोऽन्तादेश स्यात् सौ ।

(२७७) **इतोऽत् सर्वनामस्थाने** । ७ । १ । ८६ ।

पथ्यादीनामिकारस्य अकारादेश स्यात् सर्वनामस्थाने ।

(२७८) **थो न्थः** । ७ । १ । ८७ ।

पथिमथो थकारस्य न्थादेश स्यात् सर्वनामस्थाने, अथ सूत्रत्रयमुदाहियते—

पथिन् + स्—आत्व—पथिआ + स्—इकारस्य अत्व—पथ + आ + स्—न्थत्व—पन्था + स = पन्था । एव मन्था ऋभुक्षा ।

पथिन् + औ - अत्व—पथन् + औ—थो न्थ—पन्थन + औ—'सर्वनाम-स्थाने चासम्बुद्धौ' (२५५) इत्युपधादीर्घ—पन्थानौ, पन्थान । पन्थान, पन्थानो । एव मन्थानौ, ऋभुक्षाणौ इत्यादि ।

(२७९) **भस्य टेर्लोप.** । ७ । १ । ८८ ।

पथ्यादीना भसज्ञाना टेर्लोप स्यात् । यथा—

पथिन् + अस् = पथ । पथा, पथे, पथ, पथो पथि । प्रातिपदिकान्तलोपेन (२५२) पथिभ्या पथिभ्य, पथिषु । एव— मथ, मथे, मथिभ्या-भ्य । ऋभुक्ष, ऋभुक्षे, ऋभुक्षिभ्या—भ्य इत्यादि ।

(२८०) **पुसोऽसुङ्** । ७ । १ । ८९ ।

पुंसशब्दस्य असुङादेश स्यात् सर्वनामस्थाने । ङित्वात् अन्तादेश , उकार इत् 'उगिदचा ' (२६२) इति नुमर्थ । यथा—

पुंस् + स् = पुंस् + स्—नुम् , पुंनस् + स्—'सान्तमहत संयोगस्य' (२५८) इति दीर्घ , पुमान्स् + स्—सुलोपसयोगान्तलोपौ, पुमान् । 'नश्चापदान्तस्य झलि' (९२) इत्यनुस्वार , पुमांसौ, पुमांस । पुमांस, पुमांसौ, पुंस । पुंसा । संयोगान्तलोप , पुम्भ्या, पुंभि । पुंसे, पुंसु । सबुद्धौ दीर्घाभावात् 'हे पुमन्' ।

(२८१) **गोतोणित्** [ओतो णिदिति वक्तव्यम्] । ७ । १ । ९० ।

ओदन्तात् पर सर्वनामस्थान णिद्वत् स्यात् । णित्त्वप्रयोजन चान्यत्रोक्तम्—

(२८२) **अचो ञ्णिति** । ७ । १ । ११९ ।

अजन्ताङ्गस्य वृद्धि स्यात् ञिति णिति च प्रत्यये परे । यथा—

गो—णिद्वद्भावाद्वृद्धि , गौ गावौ गाव । हे गौ । 'औतोऽशसो' (२०३) इति अशसोराकार एकादेश , गा गावौ गा । 'ङसिङसोश्च' (२००) इति पूर्वरूप, गो । एव द्यौ द्यावौ द्याव । इत्यादि ।

(२८३) **सख्युरसम्बुद्धौ** । ७ । १ । ९६ ।

सखिशब्दात् पर सर्वनामस्थान णिद्वत् स्यात् न तु सम्बुद्धौ । णिद्वद्भावाद्वृद्धि । यथा—

सखायौ सखाय । असम्बुद्धावित्युक्तेर्न णित्त्व, 'ह्रस्वस्य गुण' (२३२) इति गुण , 'एङ् ह्रस्वात्' (२२४) इति सम्बुद्धिलोप, हे सखे, सखाय सखायौ सखीन् । 'असखि' (१८७) इति निषेधेन घिसज्ञाभावान्न तत्कार्याणि नाभावगुणादीनि । सख्या सखिभ्या सखिभि । सख्ये, 'ङ्यङ्यात् परस्य' (२०२) इत्यत्व, सख्यु । सखीना । 'औत्' (२४१) इति डेरौत्व, सख्यौ सख्यो सखिषु । सौ तु विशेष उच्यते—

(२८४) **अनङ् सौ** । ५ । १ । ९३ ।

असम्बुद्धौ सौ परे सखिशब्दस्य अनङादेश स्यात् । अकारस्योच्चारणार्थत्वात 'अन' इत्येवादेशस्वरूपम् ङित्त्वादन्त्यस्य भवति ।

यथा—सखि + स्—सखन् + स् इदानीं नान्तत्वात् 'राजा' इतिवत् उपधा-दीर्घ-सुलोप-नलोपैः **सखा** इति रूपनिष्पत्तिः ।

(२८५) **ऋदुशनस्पुरुदंसोनेहसां च** ।७।१।९४।

ऋकारान्तानाम् उशनस् पुरुदंसस् अनेहस् इति शब्दानां च अनङादेशः असम्बुद्धौ सौ परे । यथा—

कर्तृ—कर्ता सखा इतिवत् । 'ऋतो ङि...' (२३४) इति गुणः, 'अप्तृन्...' (२६०) इति दीर्घश्च, कर्तारौ कर्तारः । हे कर्तः । कर्तारं कर्तारौ कर्तॄन् ; कर्त्रा कर्तृभ्यां कर्तृभिः । कर्त्रे । 'ऋत उत्' (२०१), कर्तुः । कर्त्रोः कर्तॄणां । गुणः, कर्तरि । कर्तृषु । पितृमात्रादीनामव्युत्पन्नशब्दानां तु 'अप्तृन्' इति दीर्घाभावात् पिता पितरौ पितरः इत्यादि ।

उशनस्—उशना । पुरुदंसस्—पुरुदंसा । अनेहस्—अनेहा ।

प्रत्यु—(सम्बुद्धौ तु) हे उशनः; पुरुदंसः, अनेहः ।

॥ * ॥ **उशनसः सम्बुद्धावनङ् नलोपश्च वा वाच्यः** ।

यथा—अनङि हे उशनन् ; नलोपे हे उशन । एवं च उशनस्शब्दस्य रूपाणि—उशना उशनसौ उशनसः; हे उशनन्, उशनः उशन । उशनसं उशनसौ उशनसः; उशनसा—पदान्तत्वात् रुत्वं, उत्वं च, उशनोभ्यां उशनोभिः । उशनसे; उशनसः । उशनसोः । उशनसां । उशनसि । उशनस्सु ।

(२८६) **तृज्वत् क्रोष्टुः** ।७।१।९५।

क्रोष्टुशब्दस्तृजन्तवत् स्यात् असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः । तृज्वद्भावात् कर्तृशब्दवद्रूपाणि—

क्रोष्टा क्रोष्टारौ क्रोष्टारः । सम्बुद्धौ तदभावात् गुरुशब्दवत्—हे क्रोष्टो । क्रोष्टारं क्रोष्टारौ ; शसि क्रोष्टून् ।

(२८७) **स्त्रियां च** ।७।१।९६।

क्रोष्टुशब्दस्तृजन्तवत् स्यात् । तेन 'ऋन्नेभ्य...' (१४०) इति ङीप्—

क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्यः । हे क्रोष्ट्रि ।	क्रोष्ट्र्या क्रोष्ट्रीभ्यां क्रोष्ट्रीभिः ।
क्रोष्ट्रीं क्रोष्ट्र्यौ क्रोष्ट्रीः ।	क्रोष्ट्र्यै । क्रोष्ट्र्याः । क्रोष्ट्रीणां; क्रोष्ट्र्याम् ।

इति गौरीशब्दवन्नदीरूपाणि ।

सुखार्थं नदीकार्याणि संगृह्यन्ते—

सम्बुद्धौ ह्रस्वता, डेराम्,—आङ्योगो ङसि-ङे ङसाम् ।
आमि नुट् चेति चत्वारि नदीकार्याणि सुप्स्विह ॥

(२८८) **विभाषा तृतीयादिष्वचि** । ७ । १ । ९७ ।

अजादिषु तृतीयादिविभक्तिषु क्रोष्टुशब्दो वा तृजन्तवत् स्यात् । तेन—क्रोष्ट्रा, क्रोष्ट्रे, क्रोष्टु, क्रोष्ट्रो, क्रोष्टरि इति कर्तृशब्दवद्रूपाणि । तृज्वद्भावाभावे हलादिविभक्तिषु च गुरुशब्दवत् क्रोष्टुना क्रोष्टुभ्या क्रोष्टुभि, क्रोष्टवे इत्यादिरूपाणि च । आमि प्रथममेव नुडागमकरणेन अजादित्वाभावात् **क्रोष्टूनां** इत्येव ।

(२८९) **चतुरनडुहोरामुदात्तः** । ७ । १ । ९८ ।

चतुर् अनडुह् अनयो सर्वनामस्थाने आमागम । स चोदात्त इति स्वरविधि । मित्त्वादन्त्यादच पर आगम । यथा—

चतुआर् + स् = चत्वार । चतुर । चतुर्भि । चतुर्भ्यं । 'षट्चतुर्भ्यश्च' (२४७) इति नुट्, चतुर्णा । चतुर्षु । अनडुह् + स—आम्, अनड्वाह + स्—'सावनडुह' (२७३) इति नुम्, अनड्वान्ह् + स्—सुलोपसयोगान्तलोपा, अनड्वान् । अनड्वाहौ अनड्वाह । सम्बुद्धौ तु—

(२९०) **अम् सम्बुद्धौ** । ७ । १ । ९९ ।

सम्बुद्धौ अनडुह् इत्यस्य अम् इति ह्रस्व आगम ।

हे अनड्वन् । अनड्वाह अनड्वाहौ अनडुह । अनड्वाहा । पदसज्ञाया 'वसु-स्रंसुध्वंस्वनड्वहा द' (७३) इति दत्व, अनड्वद्भ्या, अनड्वद्भि । अनड्वत्सु ।

अथ प्रकरणान्तरोक्तान्यङ्गकार्याणि ।

(२९१) **अर्वणस्त्रसावनञः** । ६ । ४ । १२७ ।

'अवन्' इत्यङ्गस्य तृ इत्यादेश स्यात् न तु सौ परे, नापि नञ परस्य । ऋकार इत् 'उगिदचा' (२६२) इति नुमर्थ । यथा—

अर्वा अर्वन्तौ अर्वन्त । हे अर्वन् ।
अर्वन्त अर्वन्तौ अर्वत । अर्वता अर्वद्भ्या अर्वत्सु ।
स्त्रिया उगित्वात् ङीप्—अर्वती अर्वत्यौ अर्वत्य ।
अत्यु—('अनञ' कि ?) अनर्वा अनर्वाणौ **यज्ञवत** ।
('अङ्गस्य' कि ?) अर्वरथ—'नलोप प्रातिपदिकान्तस्य' (२७२)

अथ भसञ्ज्ञाकार्याणि ।

(२९२) **भस्य** । ६ । ४ । १२९ ।

अधिकारसूत्रमिदम् ।

(२९३) **वसोः सम्प्रसारणम्** । ६ । ४ । १३१ ।

वसुप्रत्ययान्तस्य भस्य सम्प्रसारण स्यात् । किं नाम सम्प्रसारणम् ?—

(२९४) **इग्यणः सम्प्रसारणम्** । १ । १ । ४५ ।

यण स्थाने आदिश्यमान इक् सम्प्रसाणरसञ्ज्ञ स्यात् । यत्र सम्प्रसारण विधीयते तत्र यवरलानपनीय तत्स्थाने इ-उ ऋ-ऌकारा कर्तव्या इत्यर्थ । अथ सम्प्रसारणकरणे नियमा —'एक पूर्वपरयो ' इत्यधिकारे

(२९५) **सम्प्रसारणाच्च** (अचि पूर्व) । ६ । १ । १०८ ।

सम्सारणादचि परे पूर्वरूपमेकादेश स्यात् । पूर्व सम्प्रसारणस्वर इक् । तथा च यवरलानामुत्तरस्वरसहितानामक्षररूपाणामेव-इ-उ-ऋ-ऌकारा कार्या इति फलितम् ।

(२९६) **न सम्प्रसारणे सम्प्रसारणम्** । ६ । १ । ३७ ।

सम्प्रसारणे परे पूर्वस्य यण सम्प्रसारण न स्यात् । सम्प्रसारणार्हस्य यणोऽनेकत्वे परस्य यण एव सम्प्रसारण, नान्येषामिति भाव । तथा चानुपदमेव विधीयमाने 'युवन्'शब्दस्य सम्प्रसारणे वकारस्यैव सम्प्रसारण, न तु युकारस्य । अथ प्रकृत सूत्रमुदाह्रियते—

विद्वस् इति वसुप्रत्ययान्त शब्द । तस्य शसि विद्वस् + अस् इति स्थिते वसुप्रत्ययवकारस्याक्षरस्यान्तरतम्यात् उकार सम्प्रसारण, विदुस् + अस्—वक्ष्यमाण षत्व, विदुष । विदुषा, विदुषे, विदुष २, विदुषो, विदुषा, विदुषि । पदसञ्ज्ञाया तु 'वसु, स्रन्सु ' (७३) इति दत्व,-विद्वद्भ्या, विद्वद्भि । विद्वद्भ्य । विद्वत्सु । सर्वनामस्थाने 'उगिदचा' (२६२) इति नुम्, 'सान्तमहत ' (१५८) इति दीर्घश्च, विद्वान्, विद्वांसौ, विद्वांस । हे विद्वन्, विद्वांस, विद्वांसौ ।

एवमन्येषामपि शब्दानां सर्वनामस्थानकार्यं, पदकार्यं, भकार्यं च पृथक्पृथग्वेदितव्यम् ।

(२९७) **वाह ऊठ्** । ६ । ४ । १३२ ।

वाह् इत्येतदन्तस्य भस्य 'ऊठ' इत्येवरूप सम्प्रसारण स्यात् । 'ऊठ्' इति रूपनिर्देश 'एत्येधत्यूठ्सु' (५०) इति पृथक्कृत्य निर्देशार्थं । यथा—

विश्व वहतीति विश्ववाह् । तस्य शसि—विश्ववाह् + अस् इति स्थिते वकारस्य ऊकार, विश्व ऊह —'एत्येधत्यूठ्सु' (५०) इति गुणापवादो वृद्धि , विश्वौह् । विश्वौहा विश्वौहे विश्वौह विश्वौहो विश्वौहा विश्वौहि । पदसज्ञाया 'होढ ' (६३) इति ढत्वे जश्त्वे च विश्ववाड्भ्या विश्ववाड्भि इत्यादि । सर्वनामस्थाने विशेषविधेरभावात् विश्ववाट् विश्ववाहौ विश्ववाह इत्यादि ।

(२९८) **श्वयुवमघोनामतद्धिते** । ६ । ४ । १३३ ।

श्वन् युवन् मघवन् इत्येतेषा भसज्ञाना सम्प्रसारण स्यात् न तु तद्धिते । यथा—

श्ववन्—शुन , शुना, शुने, शुन , शुनो शुना शुनि ।
युवन्—यून , यूना इत्यादि ।
मघवन्—मघोन , मघोना इत्यादि ।
प्रत्यु—('अतद्धिते' कि ?) यूनो भावो यौवन (युवन् + अ) तद्धितोऽण् ।

(२९९) **अल्लोपोऽनः** । ६ । ४ । १३४ ।

अन्नन्तस्य भस्य अन अकारलोप स्यात् । यथा—

राजन् + अस्—राज् न् + अस्—श्चुत्व, राज्ञ ।
राज्ञा, राज्ञे, राज्ञ , राज्ञो , राज्ञाम् ।

(३००) **विभाषा ङिश्योः** । ६ । ४ । १३६ ।

ङौ श्यां च परत, उक्त वा । यथा—

ङौ—राज्ञि—राजनि । श्या—(नाम नाम्नी, नामनी (नामानि) ।

(३०१) **न संयोगाद्वमन्तात्** । ६ । ४ । १३७ ।

वान्तान्मान्ताद्वा सयोगात् परस्य अनो भस्याल्लोपो न स्यात् । यथा—

ब्रह्मन्—ब्रह्मणा, । अथर्वन्—अथर्वणा ।

(३०२) **अचः**।६।४।१३८।

'अच्' इति लुप्तनकारस्याञ्चतेर्ग्रहण, तदन्तस्य भस्यालोप· यथा—

प्रति अच् + अस्—अलोप, प्रतिच् + अस् इति स्थिते—

(३०३) **चौ** (दीर्घ)।६।३।१३८।

'अञ्चु' इत्युदिद्धातु,। तस्याकारनकारयोर्लोपे 'चु' इत्यवशिष्यते। तस्य सप्तम्येकवचन 'चौ' इति। अकारनकारयोर्लोपात् 'च्' इत्येवरूपतां प्राप्ते अञ्चतौ परे पूर्वस्य दीर्घ· स्यात् इति दीर्घे-प्रतीच इति रूपसिद्धि। प्रतीचा, प्रतीचे, प्रतीच इत्यादि।

प्रत्यु—('भस्य' कि?) प्रत्यग्भ्या, प्रत्यग्भि, प्रत्यग्भ्य प्रत्यक्षु।

सर्वनामस्थाने 'उगिदचा . . ' इति नुम्—

प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्च। प्रत्यञ्च प्रत्यञ्चौ एव—प्राङ्-प्राञ्चौ . प्राच। प्राचा प्राग्भ्यां प्राक्षु। सम्यञ्च—सम्यङ् . सम्यञ्चौ समीच। समीचा। सम्यग्भ्या सम्यक्षु।

क्लीबे—प्रत्यक् प्रतीची, प्रत्यञ्चि। पुनस्तद्वत्। शेष पुवत्।

प्राक् प्राची प्राञ्चि ,, ,,
सम्यक् समीची सम्यञ्चि ,, ,,

(३०४) **उद ईत्**।६।४।१३९।

उद् इत्युपसर्गात् परस्य भस्य 'अच' अकारस्य लोपापवाद ईदादेश। यथा—

उदच्—उदीच उदीचा उदीचे इत्यादि।

सर्वनामस्थाने पदसज्ञाया च प्रत्यग्वत्।

अञ्चतिप्रकरणादन्यत्र विहितमपि तत्कार्यमुच्यते—

(३०५) **तिरसस्तिर्यलोपे**।६।३।९४।

तिरस् इत्यव्ययस्य तिरि इत्यादेश स्यात् अकारलोपरहिते क्विप्रत्ययान्ते अञ्चतौ परे। अकारलोपो भसज्ञायामेव, अत सर्वनामस्थाने पदसज्ञा च तिर्यादेश। यथा—

तिर्यङ् तिर्यञ्चौ तिर्यञ्च, तिर्यञ्च तिर्यञ्चौ तिरश्च, तिरश्चा तिर्यग्भ्या . . . . तिर्यक्षु।

---

* 'सम समि'।६।३।९३। इति सूत्रेण क्विप्रत्ययान्तेऽञ्चतौ सम् इत्युपसर्गस्य 'समि' इत्यादेशो विधीयते। एव 'सहस्य सध्रि' इति सूत्रमप्यत्रानुसन्धेयम्।

(३०६) **आतो धातोः**। ६।४।१४०।

आकारान्तस्य धातोर्यस्य लोप स्यात्। 'अलोऽन्त्यस्य' इत्यन्त्यवर्णस्य आकारस्यैव लोप । यथा—

विश्वपा—विश्वप—विश्वपा—विश्वपे—विश्वप—विश्वपो—विश्वपा—विश्वपि । पदसज्ञाया—विश्वपाभ्या विश्वपाभि विश्वपाभ्य । विश्वपासु । सर्वनामस्थाने विश्वपा—विश्वपौ—विश्वपा । हे विश्वपा । विश्वपा विश्वपौ । पुंस्त्रियोस्तुल्य रूप, क्लीबे ह्रस्वात् विश्वप-विश्वपे इत्यादि धनवत्। क्विप्प्रत्ययान्तस्य आदन्तधातोर्भाषाया विरळ एव प्रयोग ।

अथान्यतो विहितान्यङ्गकार्याणि—

(३०७) **अष्टन आ विभक्तौ**। ६।२।८४।

अष्टन् शब्दस्य आकारोऽन्तादेश स्यात् विभक्तौ । विभक्तिस्वरविधौ 'अष्टनो दीर्घात्' ६।१।१२७। इति सूत्रे दीर्घग्रहणात् ज्ञायते वैकल्पिकमिदमष्टन आत्वमिति। 'अष्टाभ्य औश्' (२१५) इति जश्शसोरौश्त्वविधौ कृतात्वस्याष्टन्शब्दस्य निर्देशात् आत्वपक्षे जश्शसोरौश्, आत्वाभावपक्षे तु 'षड्भ्यो लुक्' (२१६) इति तयो (जश्शसो) लुक्। तथा च द्विविधा रूपावलि —

आत्वे—अष्टौ अष्टौ अष्टाभि अष्टाभ्य [२] अष्टाना अष्टासु।

तदभावे—अष्ट अष्ट अष्टभि अष्टभ्य [२] अष्टाना अष्टसु।

तत्र आभि परे 'अष्टाना' इति तुल्य रूप* आत्वाभावेऽपि 'नोपधाया' (२५१) इति दीर्घप्रसङ्गात्। 'षट्चतुर्भ्यश्च' (२४७) इति नुट् च विहित । एवम्—

पञ्च पञ्च पञ्चभि पञ्चभ्य पञ्चभ्य पञ्चाना पञ्चसु।

इतिवद् अन्येषामपि षट्सज्ञाना रूपाणि।

(३०८) **रायो हलि**। ७।२।८।

रैशब्दस्यात्व हलादौ विभक्तौ।

युष्मदस्मदो प्रक्रिया पृथग्वर्णयिष्यत इति तत्सम्बद्धानि सूत्राणि मध्यगतान्यत्रोपेक्षितानि।

(३०९) **त्रिचतुरोः स्त्रियां तिसृचतसृ**। ७।२।९९।

स्त्रिया वर्त्तमानयोरनयोरुक्तावादेशौ स्याताम्। जसि—'जसि च' (२३३) इति, 'ऋतो ङि ' (२३४) इति वा गुणे, शसि पूर्वसवर्णदीर्घे च प्राप्ते—

*अष्टन् + आम् इति स्थिते 'अष्टन आ विभक्तौ' इत्यात्व 'षट्चतुर्भ्यश्च' इति नुट् च सम प्राप्तौ। तत्रामि प्रतिपदोक्तत्वान्नित्यादपि दीर्घात् प्रथम नुट्। पश्चाद्विभक्तिसामान्यकार्यमात्वम्। एव निर्वाहे दीर्घविधौ हलीत्यपकर्षण भाषामर्यादायामदृष्टचर कुशकाशावलम्बनमेव।

(३१०) **अचि र ऋतः**। ७।२।१००।

तिसृचतसृ ऋकारस्य रेफादेश स्यादजादौ विभक्तौ। आमि 'ह्रस्वनद्याप्.' (२४६) इति नुडि 'न तिसृचतसृ' (२४९) इति दीर्घनिषेध।

तिस्र, तिस्र, तिसृभि, तिसृभ्य, तिसृभ्य तिसृणा, तिसृषु।

चतस्र, चतस्र, चतसृभ, चतसृभ्य, चतसृभ्य, चतसृणा, चतसृषु।

पुंस्त्रीलिङ्गयो आमि 'त्रेस्त्रय' (२४५) इति त्रयादेशे 'नामी'ति दीर्घ। चतुर 'षट्-चतुर्भ्यश्च' इति नुट्, हलन्तत्वान्न दीर्घ।

पुं—त्रय त्रीन् } त्रिभि, त्रि+य, त्रि+भ्य, त्रयाणा, त्रिषु।
स्त्री—त्रीण त्रीणि }

पुं—चत्वार चतुर } चतुर्भि, चतु+र्य, चतु+र्भ्य, चतुर्णा, चतुर्षु।
स्त्री—चत्वारि चत्वारि }

सर्वनामस्थाने 'चतुरनडुहो' इत्यामागम (२८९)।

(३११) **जराया जरस्यन्यतरस्याम्**। ७।२।१०१।

जराशब्दस्य जरस् इत्यादेशो वा अजादौ विभक्तौ। यथा—

जरा { जरे जरा जरा जरे जरा।
{ जरसौ जरस जरस जरसौ जरस।

{ जरया जरायै जरायाा जरयो जरायाा जरायाम्।
{ जरसा जरसे जरस जरसा जरसा जरसि।

हलादौ तु—जराभि जरा+य जरासु।

अङ्गाधिकारस्थितत्वात् तदन्तविधि—

निर्जर { निर्जरौ निर्जरा
{ निर्जरसो निर्जरस इत्यादि।

(३१२) **त्यदादीनामः**। ७।२।१०२।

त्यदादीनामकारोऽन्तादेश स्याद्विभक्तौ। सर्वादेरन्तर्गणस्त्यदादि। तत्र त्यच्छब्दस्तच्छब्दपर्यायश्छन्दस्येव दृश्यते। अनेन दकारस्य अकारादेश कृते त+अ इति स्थिते सन्धिकार्यविशेष—

(३१३) **अतो गुणे** (पररूपमपदान्तात्)। ६।१।९७।

अपदान्ताद्अकारात् गुणवर्णे (अ, ए, ओ) परे पररूपमेकादेश. स्यात्। इति पररूपेण—

त+अ=त। एव—यद्=य, एतद्=एत, इदम्=इद, अदस्=अद, द्वि=द्व। अदन्तत्वात् य यौ ये इत्यादि सर्वशब्दवत्।

द्विशब्दस्य द्विवाचकत्वाद् द्विवचनमेव—

द्वौ द्वौ द्वाभ्याम् द्वयोः २ ।

अन्येषा प्रक्रियादिशेषा अनुपदमेव वक्ष्यन्ते। अपदान्तसन्धिषु मुख्योऽय परः रूपसन्धिर्बहुत्रोपयोक्ष्यते इति ध्येयम् ।

(३१४) **किमः कः** । ७ । २ । १०३ ।

किशब्दस्य विभक्तौ क इत्यादेश । अदन्तत्वात् सर्ववद्रूपाणि—

क कौ के । क वां कान् । केन काभ्या कै इत्यादि ।

(३१५) **तदोस्सस्सावनन्त्ययोः** । ७ । २ । १०६ ।

त्यदादीनामनन्त्ययोस्तकारदकारयो सकारादेश स्यात् सौ परे । तदेतददसामेव सकारादेशस्यावकाश । यथा—

तद्—तद + स्—अत्व, पररूप, त + स्—सादेश, **सः तौ ते** इत्यादि सर्ववत् ।

एतद—एतद् + स्—अत्व, पररूप, एत + स्—सादेश,—एस —वक्ष्यमाण षत्व **एषः एतौ एते** इत्यादि सर्ववत् ।

स्त्रिया अत्वानन्तर 'अजाद्यत ' इति टापि **या, का, सा, एषा,** इत्यादि सर्ववत् । क्लीबे 'स्वमोर्नपुसकात्' (२१९) इति लुक् । **यत्, ये, यानि, कि, के, कानि, तत् ते तानि, एतत् एते एतानि,** पुनस्तद्वत्, शेष पुवत् ।

(३१६) **अदस औ सुलोपश्च** । ७ । २ । १०७ ।

अदस सौ परे औकारोऽन्तादेश स्यात् सोर्लोपश्च । यथा—

अदस् + स—अद औ + स्—सुलोपे, अदौ—दकारस्य पूर्वसूत्रेण सत्व, **असौ** । अकारान्तत्वाभावात् स्त्रिया न टाप् 'असौ' इति पुसि स्त्रिया च तुल्यमेव रूपम् । क्लीबे तु 'स्वमो ' (२१९) इति लुका सु परो नास्तीति नैतत्प्रवर्त्तते । अदस् + औ इत्यत्र त्यदाद्यत्वेन अदौ इति जाते असिद्धकाण्डे विकार उक्त —

(३१७) **अदसोऽसेर्दादु दो मः** । ८ । २ । १० ।

अदस, असे, दात्, उ, द, म इति पदच्छेद । (असे) *सका-

---

* अदस्शब्द त्यदाद्यत्वेन अकारान्तो भवति । 'विष्वग्देवयोश्च टेरद्रयञ्चतावप्रत्यये' इति सूत्रेण 'अदादि' इति इकारान्तता चास्य स्यात् । इकारान्तत्वे त्यदाद्यत्वाभावे च सुत्व न स्यादित्यर्थ । 'असे' इति पदस्य व्याख्याने पक्षभेदा सन्ति ।

रान्त-इकारान्तभिन्नस्य अदसो दकारात् परस्य स्वरस्य उकार स्यात्, तदा दकारस्य मकारश्च । दस्य मु इति सङ्घातस्यैवादेशमनुक्त्वा 'दादु दो म' इति प्रत्येकमादेशविधान 'अप्रत्यय' (३८) इति निषेध बाधित्वा विधेयकोटौ प्रविष्टस्याप्युकारस्य आन्तरतम्येन ह्रस्वस्य उकार, दीर्घस्य ऊकार इति सवर्णग्रहणार्थम् । अनेन अदौ = अमू ।

बहुवचने अदन्तत्वा 'ज्ञस शी' (२११) इति शीभावेन 'अदे' इति जाते मुत्वस्यापवादो मीत्व विधीयते—

(३१८) **एत ईद् बहुवचने** । ८ । २ । ८१ ।

बहुवचनविषये अदसो दकारात् परस्य एकारस्य 'ई' इत्यादेश, न तु 'इ' इति । अदे = अमी। स्त्रिया तु अदन्तत्वाट्टापि अदा = अमू, एकाराभावादीत्व न ।

पुसि ।	स्त्रियाम् ।
अद = अमु	अदा = अमूम्
अदौ = अमू	अदे = अमू (द्विवचनत्वादीत्व न)
अदान् = अमून्	अदा = अमू ।

तृतीयैकवचने अत्वेन अद + आ इति स्थिते ।

(३१९) **न मु ने** (असिद्धम्) । ८ । २ । ३ ।

(ने) नाभावे कर्तव्ये मुत्व नासिद्ध । मुत्व निमित्तीकृत्य विसर्जनीया 'आडो नास्त्रिया' इति नाभावो भवति इति यावत् । **अमुना** इति रूप सिद्धम् । स्त्रिया तु नाभावविरहात् अदया = अमुया । अदाभ्या = अमूभ्याम् । 'नेदमदसोरकोः' (२०९) इति निषेधात् 'अतो भिस ऐस्' न भवति । 'बहुवचने झल्येत्' (२२७) अदेभि = अमीभि । स्त्रिया, अदाभि = अमूभि ।

पुसि ।	स्त्रियाम् ।
अदस्मै = अमुष्मै	अदस्यै = अमुष्यै
अदाभ्या = अमूभ्याम्	अदाभ्या = अमूभ्याम्

पुंसि ।	स्त्रियाम् ।
अदेभ्य = अमीभ्य	अदाभ्य = अमूभ्य
अदस्मात् = अमुष्मात्	अदस्या = अमुष्या
अदाभ्याम् = अमूभ्याम्	अदाभ्याम् = अमूभ्याम्
अदेभ्य = अमीभ्य	अदाभ्य = अमूभ्य
अदस्य = अमुष्य	अदस्या = अमुष्या
अदयो = अमुयो	अदयो = अमुयो
अदेषा = अमीषाम्	अदासा = अमूषाम्
अदस्मिन् = अमुष्मिन्	अदस्या = अमुष्याम्
अदेषु = अमीषु ।	अदासु = अमूषु ।

क्लीबे—अदस् = अद, स्वमोर्लुप्तत्वात् न किञ्चित् कार्यम्
अदे = अमू, अदानि = अमूनि।

पुनस्तद्वत्, शेष पुंवत्। 'अमुष्मै' इत्यादौ षत्व प्रति मुत्वस्य सिद्धत्वात् इण परस्य आदेशावयवस्य सस्य षत्वम्। ३७९ सूत्र द्रष्टव्यताम्।

'अव्ययसर्वनाम्नामकच्प्राक्टे' इति सूत्रेण सर्वनाम्ना अज्ञाताद्यर्थे अकप्रत्ययो विधीयते, स च टे प्राग्भवति। प्रत्ययस्य गर्भगतत्वाच्चाऽर्थ-भेदो नास्ति। तकद्, यकद्, एतकद्, इदकम्, अदकम्, इत्येवमादि-रूपतामापन्नेभ्य सक तकौ तके इत्यादि रूपाणि। तत्र अदश्शब्दस्यैव साकच्कस्य बहुल प्रयोग। तस्य च किञ्चिदिदमर्थविशेषोऽप्यस्ति। अमु-कस्मिन् वर्षे अमुकस्मिन् मासि अमुकस्मिन् दिने लिखितम् इत्यादिवत् नाम-ग्रहण विना सामान्यनिर्देशार्थमस्योपयोग। अस्य च सौ रूपविशेषमाह कात्यायन —

॥ * ॥ **औत्वप्रतिषेधः साकच्काद्वा वक्तव्यः सादुत्वं च।**

अदस सौ औत्व वा, औत्वाभावपक्षे सात् परस्य स्वरस्य उत्व च इत्यर्थ। तेन असकौ असुक इति रूपद्वयम्।

असकौ—असुक असुकौ असुके। असुक असुकौ असुकान्। असुकेन असुकाभ्या असुकै इत्यादि। 'अको' २०५ इति ऐस्त्वनिषेधस्य निषेधात् ऐस्त्वम्।

(३२०) **इदमो मः**।७।२।१०८।

इदमो मकारोऽन्तादेशः स्यात् सौ परे। त्यदाद्यत्व मा भूदिति मकारस्य मकारो विधीयते।

(३२१) **दश्च**।७।२।१०९।

इदमो दकारस्य मकारादेश स्याद्विभक्तौ।

(३२२) **यः सौ**।७।२।११०।

सौ तु इदमो दकारस्य यकार। सत्वमत्वयोरपवाद।

(३२३) **इदोऽय् पुंसि**।७।२।१११।

पुल्लिङ्गे तु 'इद्' इत्यस्य 'अय्' इत्यादेश सौ।

इदम् + स्—अयम् + स् = अयम्।

स्त्रियाम्—इदम् + स—इयम् + स् = इयम्।

क्लीवे— इदम्। स्वमोरभावान्न कोऽपि विकार।

पुंसि।	स्त्रियाम्।
इदम् = इमम्	इदा = इमाम
इदौ = इमौ	इदे = इमे
इदान् = इमान्	इदा = इमा।

(३२४) **अनाप्यकः**।७।२।११२।

आप् इति तृतीयैकवचनात् प्रभृति सुप पकारेण प्रत्याहार'। आपि परे इदम इद स्थाने अन् इत्यादेश।

(३२५) **हलि लोपः**।७।२।११३।

हलादौ विभक्तौ तु इदम इदो लोप स्यात्। '**नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे**' इति परिभाषया समग्रस्य इदो लोप। ङे-ङसिङस्-ङीना स्यायाद्यादेशै, आम सुडागमेन च हलादित्वादिद् इत्यशस्य लोपे अकार एव शिष्यते। अदन्तत्वात् 'सुपि चे'ति दीर्घो 'बहुवचने झल्येत्' च भवत.। 'नेदमदसो ...'रिति ऐमादेशो न भवति।

अनेन	आभ्या	एभि	अनया	आभ्या	आभि.
अस्मै	,,	एभ्य	अस्यै	,,	आभ्य
अस्मात्	,,	एभ्य	अस्या	,,	,,
अस्य	अनयो	एषा	अस्या	अनयो	आसा
अस्मिन्	,,	एषु।	अस्या	,,	आसु।

कथ अकारस्यैव अदन्तत्वम्? येन स्यायाद्यादेशा, स्त्रियां टाप् च प्रवर्तन्ते इति चेत्—

(३२६) **आद्यन्तवदेकस्मिन्।१।१।२१।**

एकस्मिन् वर्णे क्रियमाण कार्य तदादाविव तदन्त इव च स्यात्। तेन अदादेरदन्तस्य च विहित कार्यमकारमात्रस्यापि भवति।

त्यदादिष्वेनत्तदोरन्योऽप्यस्ति विशेष —

(३२७) **एतत्तदोः सुलोपोऽकोरनञ्समासे हलि।६।१।१३२।**

(अको) अकच्प्रत्ययरहितयो एतत्तदो 'सु'-प्रत्ययलोप स्यात् सहिताया हलि परे, नञ्समासे तूक्त न। यथा—

एषस् + ददाति = एष ददाति। | सस् + ददाति = स ददाति।

प्रत्यु – (अको कि?) एषको ददाति, सको ददाति।

(अनञ्समासे कि) अनेषो ददाति।

एष न भवतीत्यनेष, स न भवतीत्यस।

(हलि कि) एषोऽत्र, सोऽत्र।

(३२८) **सोऽचि लोपे चेत् पादपूरणम्।६।१।१२४।**

अचि परेऽपि 'स' इति तद सुलोप स्यात्, लोपेन पादपूरण प्रयोजन लभ्यते चेत्। यथा–

"सैष दाशरथी राम, सैष राजा युधिष्ठिर।
सैष कर्णो महात्यागी, सैष भीमो महाबल॥"

प्रयोजनापेक्षोऽय विधिस्तस्यान्यथैव सिद्धत्वे न प्रवर्तते। अत.

"सोऽहमाजन्मशुद्धानाम्"

इत्यादौ विनैव लोप पादपूरणाल्लोपो न भवति।

अत्रेद चोद्य---ननु नपुसके स्वमोर्विषये त्यदाद्यत्व कुतो न भवति? तत्र हि 'स्वमोर्नपुसकात्' इति प्रत्ययो लुप्यते, ततो विभक्ते: परत्वाभावादत्वस्य न प्रसक्तिरिति चेत्, नेद समाधानम्। तर्हि 'राजा' इत्यादावपि हल्ङ्यादिलोपेन सुप्रत्ययस्यादर्शनात् 'सुप्तिङन्त पद' इति पदसज्ञा न स्यात्। ततश्च पदान्तत्वाभावात् 'न लोप प्रातिपदिकान्तस्य' इति नलोप कथ प्रवर्तते? इति दुर्घटमापतेत्। अत्रोच्यते—सर्वो लोपो न तुल्य, लोपस्यापि प्रकारभेदा सन्ति। तथा हि—

(३२९) **अदर्शनं लोपः**। १।१।६०।

वर्णानामदर्शन, अश्रवण, अनुच्चारण, अनुपलब्धि लोप इत्युच्यते।

(३३०) **प्रत्ययस्य लुक्श्लुलुपः**। १।१।६१।

लुक् श्लु लुप् एतैरपि शब्दै प्रत्ययस्यादर्शन क्रियते। प्रत्ययविषये एतेऽपि शब्दा लोपपर्याया इत्यर्थ।

(३३१) **प्रत्ययलोपे प्रत्ययलक्षणम्**। १।१।६२।

प्रत्यये लुप्तेऽपि प्रत्ययनिमित्तक कार्य स्यात्। तथा च 'राजा' इत्यादौ हल्ङ्यादिलोपेन सौ लुप्तेऽपि तन्निमित्तका पदसज्ञा भवत्येव।

(३३२) **न लुमताङ्गस्य**। १।१।६३।

लुमता शब्देन (लुक्, श्लु लुप् इत्येभि, त्रिष्वपि 'लु' इत्यक्षरं साधारण हि) प्रत्ययलोपे कृते लुप्तप्रत्ययानमित्तकमङ्गकार्य न स्यात्।

अनेन प्रकृते इष्टसिद्धि। स्वमोरदर्शन लुक्शब्देन कृतम्, त्यदाद्यत्व चाङ्गकार्यम्, अतस्त्यदाद्यत्व स्वमोर्लुकि न स्यात्। पदसज्ञा तु अङ्गकार्यत्वाभावात् भवत्येव। एव च क्लीबे प्रथमाद्वितीयैकवचनयो प्रत्ययविरहादङ्गकार्याभावाच्च विरळा एव प्रकृतेर्विकारा।

सत्यमुक्तविधया पूर्वपक्षस्य समाधानमासीत्, तथाप्याशङ्का हृदयान्निश्शेषमनिर्मृष्टा किञ्चिदिव कालुष्यमवशेषयति। तथा हि---स्वमोर्हि लुप्तयोस्त्यदाद्यत्वस्य नावसर, प्रथमसत्वमेव प्रवर्तता, लोप प्रथम कर्तव्य

इत्यत्र किं मानम् ' इति । अत्रोच्यते — यत्र तुल्यबला अनेके विधयो युगपत् समाविशन्ति तत्र बलपरीक्षा कर्तव्या। सा चैव — सूत्रानुक्रमे पूर्वात् पर बलीय । परादप्यनित्यात् नित्य बलीय । नित्यादपि बहिरङ्गादन्तरङ्ग बलीय । अन्तरङ्गादप्युत्सर्गादपवादो बलीयान् । एष्वपवाद पूर्वमेवोक्तलक्षण । कृताकृतप्रसङ्गि नित्य, अल्पाश्रयमन्तरङ्ग, बह्वाश्रय बहिरङ्ग इत्यन्ययो प्रायिक लक्षणम् । लक्षणान्तराण्यपि क्वचिदाश्रीयन्ते । अनया रीत्या प्रकृते बलपरीक्षाया कृताया सूत्रानुक्रमे परमप्यत्र नित्येन लोपेन बाध्यते । लोपो हि कृतेऽकृतेऽप्यते सावकाश । ननु कथमत्वे कृते लोपस्य प्रसङ्ग ' 'अतोऽम्' इति अमादेशस्य अपवादस्य सद्भावात् इति चेत्, नैष दोष । प्रसक्त एव किलोत्सर्गोऽपवादेन बाध्यते । अत कृतेऽप्यत्वे अत्येव लोपस्य प्रसङ्ग । यदि पुनरत्व लब्धप्रतिष्ठम् अभविष्यत् तदैव हि लोपामादेशयो उत्सर्गापवादचिन्ता प्रासक्ष्यत, इत्यल प्रसक्तानुप्रसक्तया सिद्धान्तचिन्तया, प्रकृतमनुसराम. ।

अत्र इदमदसो प्रक्रियाजटिलतया रूपनिष्पत्ति कष्टा सवृत्ता। युष्मदस्मदोस्त्वतोऽपि कष्टतरा दृश्यते । यत्र व्यापक सामान्यविधेर्न सुकर, तत्र सिद्धरूपपाठ एव वरीयान् । अभिमतश्चाय मार्ग आचार्यस्यापि, यत स ' सद्य परुत्परार्यैषम ' इत्यादीन् शब्दान् प्रक्रिया विनैवानुशास्ति । योऽय निपात इत्युच्यते । अतो बाला युष्मदस्मदो सिद्धा रूपावलिमेव पठन्तु । व्यत्यस्तबहुलस्यापि शब्दस्य रूपाणि प्रक्रियाव्यसनी पाणिनिरलुगभ्यम एवानायासमिव कथ निष्पादयतीति प्रदर्शयितुं पर कथ्यते

युष्मदस्मत्प्रक्रिया ।

(३३३) **युष्मदस्मद्भ्यां ङसोऽश्** । ७ । १ । २७ ।

युष्मदस्मद्भ्या परस्य षष्ठ्येकवचनस्य अश् इत्यादेश । शित्त्वात् सर्वादेश ।

(३३४) **ङेप्रथमयोरम्** । ७ । १ । २८ ।

आभ्या चतुर्थ्येकवचनस्य प्रथमाद्वितीययोश्च अम् इत्यादेश ।

(३३५) **शसो न** । ७ । १ । २९ ।

आभ्या शसो नकारोऽन्तादेश. । अमोऽपवाद ।

(३३६) **भ्यसो भ्यम्** । ७ । १ । ३० ।

आभ्यां भ्यसो भ्य, चतुर्थीबहुवचनस्यायमादेश । पञ्चमीबहुवचनस्य तु—

(३३७) **पञ्चम्या अत्** । ७ । १ । ३१ ।

आभ्या पञ्चम्या भ्यस अत् इत्यादेश ।

(३३८) **एकवचनस्य च** । ७ । १ । ३२ ।

आभ्यां पञ्चम्या एकवचनस्य (ङसे) च अत् इत्यादेश ।

(३३९) **साम आकम्** । ७ । १ । ३३ ।

साम् इति कृतसुट्कस्य आमो निर्देश । सुटो निवृत्त्यर्थं ससुट्कस्य आदेशविधानम् । एव प्रत्ययानामादेशा ।

अथ प्रकृतेर्विकाराः—

(३४०) **युष्मदस्मदोरनादेशे** (आ) । ७ । २ । ८६ ।

युष्मदस्मदो अनादेशरूपाया विभक्तौ परत आकारोऽन्तादेश स्यात् ।

(३४१) **द्वितीयायां च** । ७ । २ । ८७ ।

युष्मदस्मदोराकारोऽन्तादेश ।

(३४२) **प्रथमायाश्च द्विवचने भाषायाम्** । ७ । २ । ८८ ।

प्रथमाद्विवचने च अनयोराकारोऽन्तादेश । भाषायामेव न तु छन्दसि ।

(३४३) **योऽचि** । ७ । २ । ८९ ।

अजादौ अनादेशरूपाया विभक्तौ युष्मदस्मदोर्यकारोऽन्तादेश स्यात् ।

(३४४) **शेषे लोपः** । ७ । २ । ९० ।

उक्तादन्य शेष । आकारयकारादेशयोरविषये युष्मदस्मदोरन्त्यस्य लोप स्यात् ।

"पञ्चम्याश्च चतुर्थ्याश्च षष्ठीप्रथमयोरपि ।
यान्यद्विवचनान्यत्र तेषु लोपो विधीयते ॥"

(३४५) **मपर्यन्तस्य** । ७ । २ । ९१ ।

अधिकारोऽयम् इत परं वक्ष्यमाणा युष्मदस्मदोरादेशा युष्म्, अस्म् इति मपर्यन्तांशस्य बोध्या ।

(३४६) **युवावौ द्विवचने** । ७ । २ । ९२ ।

द्विवचने युष्म इत्यशस्य 'युव' इति, अस्म् इत्यशस्य 'आव' इति चादेश स्यात् ।

(३४७) **यूयवयौ जसि** । ७ । २ । ९३ ।

युष्मदस्मदोर्मपर्यन्तस्य जसि 'यूय'-'वय' इत्यादेशौ स्त ।

(३४८) **त्वाहौ सौ** । ७ । २ । ९४ ।

(३४९) **तुभ्यमह्यौ ङयि** । ७ । २ । ९५ ।

(३५०) **तवममौ ङसि** । ७ । २ । ९६ ।

युष्मदस्मदोर्मपर्य तस्य उक्तेषु प्रत्ययेषु उक्ता आदेशा स्यु ।

(३५१) **त्वमावेकवचने** । ७ । २ । ९७ ।

अनयोरेकवचने 'त्व', 'म' इत्यादेशौ ।

(३५२) **प्रत्ययोत्तरपदयोश्च** । ७ । २ । ९८ ।

तद्धितादिषु प्रत्ययेषु (समासे) उत्तरपदे च परत एकत्ववाचिनोर्युष्मदस्मदो मपर्यन्तस्य त्व, म इत्यादेशौ । यथा—

ईय इति तद्धितप्रत्यय । युष्मद् + ईय, अस्मद् + ईय इति स्थिते मपर्यन्तस्य त्वमादेशाभ्यां (त्व + अद् = त्वद्), (म + अद् = मद्) त्वदीय, मदीयम् । तवेद ममेद इत्यर्थ । द्विबहुवचनयोस्तु त्वमादेशाभावात् 'युवयोर्युष्माक वा इद', युष्मदीय 'आवयोरस्माक वा इद' अस्मदीयम् । एव उत्तरपदेऽपि तव पुत्र त्वत्पुत्र, मम पुत्र मत्पुत्र ।

अथ रूपाणि निष्पाद्यन्ते—

युष्मद् + सु, अस्मद् + सु—'ङे प्रथमयोरम्'—युष्मद् + अ, अस्मद् + अ मपर्यन्तस्य 'त्वाहौ सौ'—त्व + अद् + अ, अह + अद् + अ—'शेषे लोप त्व + अ + अ, अह + अ + अ—'अतो गुणे' (३१३) 'अमि पूर्व' (१९९) **त्वाऽहम्** ।

युष्मद् + औ, अस्मद् + औ—युष्मद् + अ, अस्मद् + अ—'युवावौ द्विवचने' युवद् + अ, आवद् + अ,—'प्रथमायाश्च द्विवचने भाषायां' इति आत्व, युव + आ + अम्, आव + आ + अम् सवर्णदीर्घपूर्वरूपे **युवां आवाम्** ।

युष्मद् + अस, अस्मद् + अस्—'यूयवयौ जसि', शेषे लोप —**यूय, वयम्** ।

युष्मद + अ अस्मद् + अ—'त्वमावेकवचने' द्वितीयाया च' इति आत्वम् । **त्वां, माम्** ।

युवा आवा प्रथमाद्विवचनवत् ।

युष्मद् + अस्, अस्मद् + अस्—'शसो न 'युष्मद + अन्, अस्मद् + अन्, 'द्वितीयाया च' इत्यात्व—युष्मा + अन्, अस्मा + अन् - **युष्मान्, अस्मान्** ।

युष्मद् + आ, अस्मद् + आ 'त्वमावेकवचने', 'योऽचि—**त्वया, मया** ।

युष्मद् + भ्याम्, अस्मद् + भ्याम्—'युवावौ द्विवचने', 'युष्मदस्मदोरनादेशे' इत्यात्व—**युवाभ्याम्, आवाभ्याम्** ।

युष्मद् + भिस्, अस्मद् + भिस्—'युष्मदस्मदोरनादेशे' इत्यात्व—**युष्माभिः, अस्माभिः** ।

युष्मद् + ए, अस्मद् + ए—'डेरम्', 'तु-ममह्यौ ङयि', 'शेषे लोप'—**तुभ्यं, मह्यम्** ।

युवाभ्याम्, आवाभ्याम्—तृतीयाद्विवचनवत् ।

युष्मद् + भ्यस्, अस्मद् + भ्यस्—'भ्यसो भ्यम्' 'शेषे लोप' **युष्मभ्यं, अस्मभ्यम्** ।

युष्मद् + अस्, अस्मद् + अस्—'एकवचनस्य च' इति इयेरत्, 'त्वमावेकवचने', 'शेषे लोपः', 'अतो गुणे' **त्वत्, मत्** ।

युवाभ्याम्, आवाभ्याम्—पूर्ववत् ।

युष्मद् + भ्यस्, अस्मद् + भ्यस्—'पञ्चम्या अत्', 'शेषे लोप' 'अतो गुणे'—**युष्मत्, अस्मत्** ।

युष्मद् + अस्, अस्मद् + अस्—'युष्मदस्मद्भ्यां ङसोऽश्', 'तवममौ ङसि', 'शेषे लोप', 'अतो गुणे'—**तव, मम** ।

युष्मद् + ओस्, अस्मद् + ओस्—'युवावौ द्विवचने', 'योऽचि' इति यत्व, **युवयोः, आवयोः** ।

युष्मद् + आम्, अस्मद् + आम्—'साम आक', 'शेषे लोप,' **युष्माकं, अस्माकम्** ।

युष्मद् + इ, अस्मद् + इ—'त्वमावेकवचने' 'योऽचि' **त्वयि, मयि** ।

युवयोः, आवयोः—पूर्ववत् ।

युष्मद् + सु, अस्मद् + सु—'युष्मदस्मदोरनादेशे' इति आत्व—**युष्मासु, अस्मासु** ।

अथान्वादेशरूपाणि—

किञ्चित् कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः । नाम्नामन्वादेशे सर्वनामान्युपयुज्यन्ते । सर्वनाम्नामप्यन्वादेशे क्वचित् सर्वनामान्तराणि सन्ति, किन्त्वेतानि स्खलित्वात् कासुचिदेव विभक्तिषु । तत्र युष्मदस्मदोरन्वादेशरूपाणि प्रथममुच्यन्ते—

(३९३) **पदस्य**।८।१।१६।

(३९४) **पदात्**।८।१।१७।

(३९५) **अनुदात्तं सर्वमपादादौ**।८।१।१८।

इद सूत्रत्रयमविक्रियते। वक्ष्यमाण पदस्यैव। तच्च पदात् पर अपादादिस्थ च भवितुमर्हति। वाक्यादौ पादादौ च न भवतीत्यर्थ ।

(३९६) **युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ**।८।१।२०।

श्रूयमाणषष्ठीचतुर्थीद्वितीयान्तयो (अत एव पदयो) युष्मदस्मदो वा नौ इति यथासङ्ख्यमादेशौ ।

(३५७) **बहुवचनस्य वस्नसौ**।८।२।२१।

षष्ठीचतुर्थीद्वितीयाबहुवचनान्तयोरनयो वस् नस् इत्यादेशौ।

(३५८) **तेमयावेकवचनस्य**।८।२।२२।

उक्तविभक्त्येकवचनान्तयो ते मे इत्यादेशौ। एव च पारिशेष्यात् वांनावादेशौ द्विवचनस्यैव ।

(३९९) **त्वामौ द्वितीयायाः**।८।२।२३।

द्वितीयैकवचनान्तयो तेमयोरपवादौ त्वा मा इत्यादेशौ । अथो दाह्रियते—

"श्रीशस्त्वावतु मापीह दत्तात्ते मेऽपि शर्म स ।
स्वामी ते मेऽपि स हरि पातु वामपि नौ विभु ॥
सुख वा नौ ददात्वीश पतिर्वामपि नौ हरि ।
सोऽव्यादृद्धो न शिव वो नो दद्यात् सेव्योऽत्र च स न ॥"

प्रत्यु—('पदात्' किं?) युष्मान् पातु हरि ।
('अपादादौ' किं?) युष्मान् पातु हरिर्नित्यमस्मानपि महेश्वर ।

॥ * ॥ **युष्मदस्मदादेशा अनन्वादेशे वा वक्तव्याः**।

अन्वादेशे तु नित्य स्यु । यथा—

'त्व मद्गृहमागच्छ, पुस्तक ते दास्यामि'। अत्र तुभ्य दास्यामि इति न भवति।

(३९०) **न च-वा-हा-हैवयुक्ते**।८।२।२४।

एषां निपातानां योगे युष्मदस्मदादेशा न स्युः । यथा—

हरिस्त्वां मा च रक्षतु । कथं त्वां, मां वा न रक्षेत् इत्यादि । अत्र त्वामादेशौ न भवतः ।

पदात् परयोरेव युष्मदस्मदोरादेशा विहिताः । तत्र पदात् परत्वे नियममाह—

(३६१) **आमन्त्रितं पूर्वमविद्यमानवत्**। ८ । १ । ७२ ।

आमन्त्रितमिति सम्बोधनप्रथमायाः सञ्ज्ञा । आमन्त्रितात्मकं पूर्वपदं असदिव स्यात् । पदात् परत्वस्य विचारणायां आमन्त्रितं पूर्वपदत्वेन न गण्यत इत्यर्थः । यथा—

हरे मां पाहि, हरे तुभ्यं नमः ।

अत्र हरे इत्यस्य आमन्त्रितत्वात् तन्निमित्तकं पदात् परत्वमादाय मां तुभ्यमित्यनयोः मा ते इत्यादेशौ न भवतः ।

(३६२) **नामन्त्रिते समानाधिकरणे सामान्यवचनम्**। ८ । १ । ७३ ।

समानाधिकरणे विशेषणे परे सामान्यवचनस्य (विशेष्यस्य) आमन्त्रितस्य अविद्यमानवद्भावो न स्यात् । यथा—

हरे दयालो न पाहि ।

निर्बन्धा एते कालक्रमाच्छिथिलीभूताः ।

अथ इदमेतदोरन्वादेशरूपाणि—'पदस्य' 'पदात्' इत्यादयोऽधिकारा नात्र सन्ति, प्रातिपदिकस्यैवादेशो विधीयते । 'इदमोऽन्वादेशे एतद' इत्यनुवर्तमाने—

(३६३) **द्वितीयाटौस्स्वेनः** । २ । ४ । ३४ ।

द्वितीयायां टौसोश्च परत इदमेतदोरन्वादेशविषये एन इत्यादेशः स्यात् । स्त्रियामदन्तत्वाट्टाप् । क्लीबे तु—

॥ * ॥ **एनदिति नपुंसकैकवचनं वक्तव्यम्** ।

इति वार्तिकेन एनत् । अमो ङतरादिवत् अदादेशोऽपि भवतीत्यर्थः ।

पुंसि —एन	एनौ	एनान्	एनेन	एनयोः	एनयोः
स्त्रियां—एनां	एने	एनाः	एनया	,,	,,
क्लीबे —एनत्	एने	एनानि	एनेन	,,	,,

अन्वादेशप्रदर्शनार्थमुदाहरणम्—

देवदत्त पठ, अनेन व्याकरणमिति, एन न्यायम आपय । देवदत्तयज्ञदत्तौ भ्रातरौ, एतयोरिति कुल, एनाव आपय ।

अथ इदुदन्तानां धातूनां क्विबन्तत्वे धातुत्वस्य क्षति विनैव प्रातिपदिकत्वमापन्नानां रूपसिद्धिरवशिष्यत इति सा प्रारभ्यते—

(३६४) **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** । ६ । ४ । ७७ ।

य्वो = इवर्ण-उवर्णयो । इद च धातोर्विशेषण, इतरयोरव्यभिचारात् । श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तधातोर्भ्रूशब्दस्य च इयङ् उवङ् इत्यादेशौ स्त अजादौ प्रत्यये परे । आन्तरतम्यादिवर्णस्य इयङ्, उवर्णस्य उवङ् इति विवेक । ङित्त्वादनेकाल्त्वेऽप्यन्त्यादेश । यथा—

* सुधी, सुधियौ सुधिय । हे सुधी । अमि पूर्वात् पूर्वसवर्णदीर्घाच्च परत्वादियङ्, सुधिय सुधिय । सुधिया सुधीभ्या सुधिया । सुधीषु ।

स्वभू स्वभुवौ स्वभुव । स्वभुव स्वभुव इत्यादि सुधीवत् ।

स्त्रिया नदीकार्य निशेष । ङ्यन्तत्वाभावान्न सुलोप । नम्वुद्रो 'नेयङुवङ्स्थानावस्त्री' (१८४) इति नदीत्वनिषेधान्न ह्रस्व, ङित्सु-'ङिति ह्रस्वश्च' (१८६) इति, आमि—'वामि' (१८५) इति च विकल्पेन नदीकार्याणि ।

श्री	श्रियौ	श्रिय	श्रियै, श्रिये	श्रीभ्या	श्रीभ्य
हे श्री	,,	,,	श्रिया, श्रिय	,,	,,
श्रीय	,,	,,	,,	श्रियो	श्रीणा, श्रियाम्
श्रीया	श्रीभ्या	श्रीभि	श्रिया, श्रियि	,,	श्रीषु ।

भ्रू भ्रुवौ भ्रुव, हे भ्रू इत्यादि श्रीवदेव । एव भूरपि ।

(३६५) **स्त्रियाः** । ६ । ४ । ७९ ।

स्त्रीशब्दस्य च अजादौ प्रत्यये परे इयङ् ।

(३६६) **वाम्शसोः** । ६ । ४ । ८० ।

अमि शसि च स्त्रिया इयङ् वा । निषेधे विकल्पे च 'अस्त्री' इति निषेधात् नित्या नदीसज्ञा—ङीअन्तत्वात् सुलोप ।

---

* सुष्ठु ध्यायतीति सुध्यै + क्विप् = सुधी ।

स्त्री	स्त्रियौ	स्त्रिय	स्त्रियै स्त्रीभ्या स्त्री+य
हे स्त्रि	,,	,,	स्त्रिया ,, ,,
स्त्रिय, स्त्री	,,	स्त्रिय, स्त्री	स्त्रिया स्त्रियो स्त्रीणा
स्त्रिया स्त्रीभ्या स्त्रीभि			स्त्रिया ,, स्त्रीषु ।

(३६७) **एरनेकाचोऽसंयोगपूर्वस्य** । ६ । ४ । ८२ ।

असंयोगपूर्वो य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे । इयङोऽपवाद । यथा—

ग्रामणी (ग्राम + नी) ग्रामण्यौ, ग्रामण्य , ग्रामण्य, ग्रामण्यौ, ग्रामण्य , ग्रामण्या, ग्रामणी+भ्याम् इत्यादि । 'डेरामन्त्रान्नीभ्य ' (२७९) इति विशेषविधानात् डे-राम्, ग्रामण्याम् । तथा च षष्ठीबहुवचने सप्तम्येकवचने च तुल्य रूपम् ।

प्रत्यु—('अनेकाच ' कि ?) नी, नियौ, निय , नियम् इत्यादि ।

('असंयोगपूर्वस्य ' कि ?) श्री , श्रियौ, श्रिय ।

धात्ववयवभूत एव संयोगोऽत्र गृह्यते, तेन—

उन्नी (उत् + नी) उन्न्यौ, उन्न्य , उन्न्य इत्यादौ यण् भवत्येव ।

॥ ' ॥ **गतिकारकेतरपूर्वपदस्य यण्नेष्यते** ।

यथा—शुद्धा बीर्यस्य स शुद्धबी शुद्धबियौ, शुद्धबिय ।

इयङुवङौ यण् च नपुंसके न भवति, परेण 'नपुंसकस्य झलच ' (७ । १ । ७२ ।) 'इकोऽचि विभक्तौ' (७ । १ । ७३ ।) इति नुमा बाधात् । तेन क्लीबे—

सुधी—सुधि सुधिनी सुधीनि, सुधिना सुधिने
स्वभू—स्वभु स्वभुनी स्वभूनि, स्वभुना स्वभुने
ग्रामणी—ग्रामणि ग्रामणिनी ग्रामणीनि, ग्रामणिना

इत्यादीन्येव रूपाणि । तृतीयादौ गालवमतेन पुवद्भावविकल्पस्तु स्यादेव । तेन—सुधिया सुधिये इत्याद्यपि ।

(३६८) **ओः सुपि** । ६ । ४ । ८३ ।

अनेकाचोऽसंयोगपूर्वो य उवर्णस्तदन्तधातोर्यण् स्यादजादौ सुपि प्रत्यये परे । उवङोऽपवाद ।

खलु पुनातीति खलपू , खलप्वौ, खलप्व । प्रभू , प्रभ्वौ, प्रभ्व ।

प्रत्यु—('अनेकाच ' कि ?) पू, पुवौ, पुव । भू, भुवौ, भुव ।

('अव्ययोगपूर्वस्य' किं?) कटम् , कटप्रुवौ, कटप्रुव ।
('सुपि प्रत्यये' किं?) लुलु + अनु = लुलुवनु —लिट् ।

(३६९) **वर्षाभ्वश्च** । ६ । ४ । ८४ । पुनर्भ्वश्चेति वक्तव्यम् ।

उत्तरसूत्रेण निषेध बाधित्वा यण् विधीयते । यथा —
वर्षाभ्वौ, वर्षाभ्व , पुनर्भ्वौ, पुनर्भ्व ।

(३७०) **न भसुधियो** । ६ । ४ । ८५ ।

भ्रातृ सुधीशब्दस्य च यण् न स्यात् । यथा—
स्वभ्रू, स्वभ्रुवौ, स्वभ्रुव इत्यादि । । सुधी सुधियौ, सुधिय , इत्यादि ।

उक्ता सुपां प्रक्रिया । अथ षत्वणत्वयोर्विधिरारभ्यते, योऽयं सुपीव तिङ्कृतद्धितसमासेष्वपि तत्र तत्रोपयुक्त । तयो प्रथम

षत्वप्रकरणम् ।

(३७१) **अपदान्तस्य मूर्द्धन्यः** । ८ । ३ । ५५ ।

वक्ष्यमाणो मूर्द्धन्यविधिरपदान्तस्य स्थानिनो भवतीत्यधिक्रियते । ऋटुरषा मूर्द्धन्या , तेषु षकारढकारावेव विधीयेते, यत सकारयकारावेव स्थानिनौ गृहीतौ । सस्य षत्व, धस्य ढत्व च विधीयत इति फलितम् । । तत्रापि ढत्वविधिर्विरळ इति प्रकरणस्य 'षत्वप्रकरण' इति नाम कृतम् ।

(३७२) **सहेः साड सः** । ८ । ३ । ५६ ।

साडूपस्य सहधातो सकारस्य मूर्द्धन्य ष स्यात् । यथा—
तुराषाट्, तुराषाड्, तुरासाहौ तुरासाह , तुरासाहा, तुराषाड्भ्या तुरासाट्सु । पदान्ते 'हो ढ' (६३) इति ढत्वे जश्त्वे च साडूपता सम्भवति, ततस्तत्रैव षत्वम् । 'वावसाने' (८ । ४ । ५६ ।) (११३) इति चर्त्वेत्यासिद्धत्वात् 'तुराषाट्' इत्यत्रापि षत्वम् ।

(३७३) **इण्कोः** । ८ । ३ । ५७ ।

अधिकारोऽयम् । इण् च कुश्च इण्कु इति समाहारद्वन्द्व । तस्य

पञ्चम्यन्त 'इण्कोरि'ति । इतोऽनुक्रमिष्यमाण षत्वविधि विशेषवचनाभावे इण्कवर्गाभ्या परस्य सस्य बोध्य ।

(३७४) **नुम्विसर्जनीयशर्व्यवायेऽपि । ८ । ३ । ९८ ।**

अयमप्यधिकार । व्यवायो व्यवधान, नुम् इत्यनुस्वारोपलक्षणम् । सकार इण्कुभ्या साक्षात्परो भवितुमर्हतीति न निर्बन्ध । इण्कवर्गयोः सस्य च, मध्यपतितैरनुस्वारविसर्गशषसैर्व्यवधान न गण्यत इत्यर्थ । एव परिकरबन्ध कृत्वा विधिमारभते—

(३७५) **आदेशप्रत्यययोः । ८ । ३ । ५९ ।**

इण्कुभ्या परस्यापदान्तस्य मस्य ष स्यात्, यदि स सकार आदेश प्रत्ययावयवो वा भवति, नुम्विसर्गशर्व्यवायेऽपि चाय स्यात् । यथा—

एस = एष —'तदो सस्सौ ' (३१५) इत्यादेश सकार ।
सुवुवे —वात्वादे ष स ,, ,,
हरिसु = हरिषु—सुप्प्रत्ययावयव ,,
गुरुषु, पितृषु, रामेषु, गीर्षु इण पर ,,
वाक्षु, कुट्षु कवर्गात् ,,
प्रत्यु—('इण् कु-भ्या' कि?) नामसु, राजसु, सम्पत्सु ।
('अपदान्तस्य' कि?) हविस्,–हवि, हविर्भि, धनुस्,–धनु, धनुर्भि. ।
('आदेशप्रत्यययो ' कि?) विसम् ।

नुमादिव्यवधानेऽपि षत्व यथा—

हवींषि, धनूषि —नुमा व्यवधानम् ।
हवि षु, धनु षु —विसर्गेण ।
हविष्षु, धनुष्षु —सकारेण ।

अत्र हविस्+सु इति स्थिते प्रकृतिसकारस्य पदान्तत्वात् षत्व न भवति, प्रत्ययसकारस्य प्रकृतिसकारव्यवधानेऽपि 'शर्व्यवायेऽपी'ति षत्व, तत. ष्टुत्वेन प्रकृतिसकारस्य ष, हविष्षु इति रूपसिद्धि । * एतदर्थमेव श-

---

शर् = श-ष-सा । एषु शस्य ब्रश्चभ्रस्जेति षत्व, झल्ला जशीति जश्त्व वा, षस्य षढोरिति कत्व च सकारे परेऽवश्य भावि । परिशेषात् सकारव्यवधान एव उदाहरणसम्भव । इत्थ च प्रत्याहारग्रहण चिन्त्यप्रयोजनमित्यभिमान्वि ।

र्व्यवायेऽपीत्युक्तम् । अन्यथा सकारस्य सकारेण व्यवधान धूर्तप्रलाप स्यात् । 'त्रिचतुरो स्त्रिया तिसृचतसृ' इति तिस्रादेशस्य षत्व मा भूदिति 'आदेश. प्रत्ययावयवो वा' इति भेदेन व्याख्यातम् । आगमाना प्रत्ययावयवत्वेन ग्रहणात् 'सर्वेषा' इत्यादौ सुट षत्वम् ।

[(३७६) **शासेवसिघसीनां च** । ८ । ३ । ६० ।

एषामिण्कु-भ्या परस्य सस्य ष । वात्ववयवत्वेनाप्राप्तो वचनम् । यथा—

शास — शिष्ट, अशिषत्, शिष्य ।

वस् — उषितम्, उषित्वा ।

घस् — जक्षतु, जक्षु ।

प्रत्यु—('इण्को' कि ।) शास्ति, वसति, जघास ।

(३७७) **स्तौतिण्योरेव षण्यभ्यासात्** । ८ । ३ । ६१ ।

अभ्यासगतादिण षत्व कृतषत्वे सनि स्तुद्वातोर्ण्यन्तानां चैव नान्येषाम । यथा—

स्तु — तुष्टूषति —, ण्यन्तम — सिषेवयिषते ।

प्रत्यु—(अन्येषा तु) सिच् — सिसिक्षति, सू — सुसूषते ।

(३७८) **सः स्विदिस्वदिसहीनां च** । ८ । ३ । ६२ ।

एषा कृतषत्वे सनि सस्य स एव । ष वचिषेधार्थ वचनम् । यथा—

सिस्वेदयिषति, सिस्वादयिषति, सिसाहयिषति ।

(३७९) **प्राक्सितादड्व्यवायेऽपि** । ८ । ३ । ६३ ।

'परिनिविभ्य सेवसित.' इति ७० तमसूत्रे सितशब्दात् प्राक् विधय अडागमेन व्यवधानेऽपि स्यु । यथा—

अभ्यषुणोत्, अभ्यषिचत्, न्यषेवत्, न्यषीदत् इत्यादि । 'उपसर्गात् सुनोति.' (३८१) 'सदिरप्रते' (३८२) इति वक्ष्यमाण षत्वम् ।

(३८०) **स्थादिष्वभ्यासेन चाभ्यासस्य** । ८ । ३ । ६४ ।

'उपसर्गात् सुनोति' इति उत्तरसूत्रे स्थाशब्दात् प्रभृति 'परिनिविभ्य' (३८६) इति सूत्रे 'सित' इत्यत प्राचीनाना अभ्यासस्थसकारस्य अभ्यासव्यवधानेऽपि प्रकृतिसकारस्य च षत्व स्यात् । यथा—

स्था — अधितष्ठौ — अभ्यासव्यवधाने । सेन — अभिषिषेणयिषति ।

अभ्यासस्येति वचन नियमार्थम् । स्थादिष्वेव अभ्यासस्थसकारस्य षत्व इति, नान्यत्र 'अभिसुसूषति' इत्यादौ ।

(३८१) **उपसर्गात् सुनोति-सुवति-स्यति-स्तौति-स्तोभति-स्था-सेनय-सेध-सिच-सञ्ज-स्वञ्जाम** । ८ । ३ । ६५ ।

उपसर्गस्थान्निमित्तात् (इण् कु-या) परस्य सुनोत्यादीनां सस्य ष । यथा—
सु — अभिषुणोति — अभ्यषुणोत् । सु — अभिषुवति — अभ्यषुवत् । इत्यादि ।

(३८२) **सदिरप्रतेः** । ८ । ३ । ६६ ।

उपसर्गस्थान्निमित्तात् परस्य सस्य ष । न तु प्रते परस्य । यथा—
निषीदति — न्यषीदत् (३७९) निषसाद (३८०) । प्रत्यु — प्रतिसीदति ।

(३८३) **स्तम्भेः** । ८ । ३ । ६७ ।

पूर्ववत् । यथा— अभिष्टभ्नाति, अभ्यष्टभ्नात् ।

(३८४) **अवाच्चालम्बनाविदूर्ययोः** । ८ । ३ । ६८ ।

स्तम्भे ष स्यात् उक्तयोरर्थयो । यथा—
अवष्टभ्यास्ते — आलम्बने । अवष्टब्धा सेना — अविदूर्ये (सामीप्ये) ।

(३८५) **वेश्च स्वनो भोजने** । ८ । ३ । ६९ ।

विपूर्वस्य स्वनते भोजनेऽर्थे षत्वम् । यथा —विष्वणति — सशब्द भुङ्क्ते इत्यर्थ ।
प्रत्यु—('भोजने' किं?) विस्वनति मृदङ्ग ।

(३८६) **परिनिविभ्य सेव-सित-सय-सिवु-सह-सुट्-स्तु-स्वञ्जाम्** । ८ । ३ । ७० ।

परि नि वि इत्युपसर्गेभ्य सेवादीनां सस्य ष । यथा—
परिषेवते — निषेवते — विषेवते । परिषहते — निषहते — विषहते ।
सुट् — परिष्करोति — पर्यष्करोत इत्यादि ।
'उपसर्गात् सुनोति' इत्येव सिद्धे स्तुस्वञ्जोर्ग्रहणम् उत्तरसूत्रेण अव्यवाये विकल्पार्थम् ।

(३८७) **सिवादीनां वाऽव्यवायेऽपि** । ८ । ३ । ७१ ।

पूर्वसूत्रोक्तेषु सिवादीनां अव्यवायेऽपि विकल्पेन षत्व, सितात् प्राक् तु नित्यमुक्त (३७९) तथा च सितात् पर अव्यवाये कथञ्चिदपि न षत्वम् । यथा—
व्यसहत, व्यषहत । पर्यसहत, पर्यषहत इत्यादि ।

(३८८) **इण षीध्वंलुङ्लिटां धोऽङ्गात्** । ८ । ३ । ७८ ।

अत्र व इति वकारस्य स्थानिनो ग्रहणात् मूर्धन्यो ढकार । इणन्तादङ्गात् परेषां षीध्वंलुङ्लिटां वकारस्य ढ स्यात् । 'षी व' इति आत्मनेपदाशीर्लिङ्म यमवहच्चनप्रत्ययरूपम् । यथा—
स्थ — न्योषीढ्वम — षीढ् वम । स्यु — अन्योढ्वम् — लुङ ।
कृ — चकृढ्वे — लिट ।

इण्कोरि 'ल्यधिकारे 'इण ' इति पुनर्ग्रहण कोनिवृत्त्यर्थम् । तेन पच् — पक्षी व, यज् — यक्षी व इत्यादौ न मूर्द्धन्य ।

(३८९) **विभाषेट** । ८ । ३ । ७९ ।

इण परात् इट उत्तरेषा षी वलुड्लिटा ढो वा । यथा —
लु—लविषी-व, लविषीड्वम् । लुलुविन्वे, लुलुविढ्वे ।

(३९०) **सुषामादिषु च** । ८ । ३ । ९८ ।

सुषामादय शब्दा कृतषत्वा निपात्यन्ते । यथा—
सु + सामन् = सुषामन् । दुष्वन्वि , सुष्वन्वि । सुष्ठु, दुष्ठु इत्यादि ।

(३९१) **ह्रस्वात् तादौ तद्धिते** । ८ । ३ । १०१ ।

ह्रस्वात् परस्य सस्य ष तकारादौ तद्धित परे । यथा—
चतुस् + तय = चतुष्टयम् । पदान्तेऽपि आदेशप्रत्ययमिश्रस्यापि षत्वार्थ वचनम् ।

(३९२) **सात्पदाद्यो** (न) । ३ । ३ । १११ ।

सात् इति तद्धितप्रत्ययस्य पदादिसकारस्य च न षत्वम् । यथा—
अग्निसात्, गुरुसात्, पितृसात् । दधि सिञ्चति, मधु सिञ्चति ।

णत्वप्रकरणम् ।

(३९३) **रषाभ्यां नो णः समानपदे** । ८ । ४ । १ ।

रेफषकाराभ्या परस्य नस्य ण स्यात्, रेफषकारौ नकारश्च एकस्मिन्नेव पदे वर्त्तन्ते चेत् । यथा—

चतुर्णा, वितीर्ण, पुष्णाति, मुष्णाति ।
अत्र—('समानपदे' कि ?) अग्निर्नयति ।

॥ ^ ॥ **ऋवर्णादिति वक्तव्यम्** । यथा—तिसृणा, पितृणाम् ।

(३९४) **अट्कुप्वाङ् नुम्व्यवायेऽपि** । ८ । ४ । २ ।

अट्प्रत्याहारः, कवर्ग , पवर्ग , आङ् उपसर्ग , नुमागम एभिर्व्यस्तै यथासम्भव समस्तैर्वा व्यवधानेऽपि रेफषकारऋकारेभ्य परस्य नस्य ण स्यात् समानपदे । यथा—

अङ्व्यवाये — करिणा, गुरुणा, चोरेण पुरुषेण,
कवर्ग — अट् — अर्केण, मूर्खेण मृगाणाम्।
पवर्ग ,, — दर्पेण, चर्मणा, पुष्पेण।
आङ् ,, — पर्याणद्धम्।
नुम् ,, — बृहणम्।
अटपवर्ग ,, — ब्रह्मणा, रामेण।
प्रत्यु—('समानपदे' कि?) वारिनिधि।

(३९५) **प्रातिपदिकान्तनुमविभक्तिषु च** (वा पूर्वपदात्)।८।४।११।

प्रातिपदिकान्ते नुमि विभक्तौ च यो नकार तस्य पूर्वपदस्थान्निमित्तात् परस्य वा णत्व—असमानपदे णत्वमिदमिति स्वरूपेण सिध्यति।

यथा— प्रातिपदिकान्ते — मापवापिणौ — मापवापिनौ।
नुमि — मापवापाणि — मापवापानि।
विभक्तौ — मापवापेण — मापवापेन।

(३९६) **एकाजुत्तरपदे णः**।८।४।१२।

एकाच् उत्तरपद यस्य स एकाजुत्तरपद तस्मिन् समासे प्रातिपदिकान्तनुम्विभक्तिनकारस्य पूर्वपदस्थ निमित्तमादाय नित्य णत्वम्। विकल्पनिवृत्त्यर्थ ण इति पुनर्ग्रहणम्। यथा—

प्रातिपदिकान्ते — वृत्रहणौ, वृत्रहण।
नुमि — क्षीरपाणि।
विभक्तौ — क्षीरपेण।

(३९७) **कुमति च**।८।४।१३।

कवर्गवत्युत्तरपदेऽपि नस्य पूर्ववण्णत्वम्। यथा—

प्रातिपदिकान्ते — वस्त्रयुगिणौ स्वर्गकामिणौ।
नुमि — वस्त्रयुगाणि स्वर्गकामाणि।
विभक्तौ — वस्त्रयुगेण स्वर्गकामेण।

[(३९८) **उपसर्गादसमासेऽपि णोपदेशस्य**।८।४।१४।

णोपदेशस्य धातो नकारस्य उपसर्गस्थ निमित्तमादाय णत्व स्यात् समासे असमासेऽपि। यथा—

प्रणाम — प्रणमति — परिणाम —परिणमति ।
प्रत्यु—('णोपदेशस्य' कि ?) —प्रनर्दति ।

(३९९) **हिनुमीना** । ८ । ४ । १५ ।

अनयोर्नस्य उपसर्गस्थ निमित्तमादाय णत्वम् । यथा—

प्रहिणोति — प्रमीणाति ।

(४००) **आनि लोट्** । ८ । ४ । १६ ।

आनि इति लोडुतमस्य नकारस्य उपसर्गस्थ निमित्तमादाय णत्वम् । यथा—

प्रभवाणि, प्रवपाणि, परिवाणि ।

(४०१) **नेर्गद-नद-पत-पद-घु-मा-स्यति-हन्ति-याति-वाति-द्राति-प्साति-वपति-वहति-शाम्यति-चिनोति-देग्धिषु च** । ८ । ४ । १७ ।

नि इत्युपसर्गस्य नस्य उपसर्गस्थ निमित्तमादाय णत्वम् । गदनदादिषु परेषु । यथा—

प्रणिगदति, प्रणिनदति, परिणिनदति इत्यादि ।

(४०२) **शेषे विभाषाऽकखादावषान्त उपदेशे** । ८ । ४ । १७ ।

अककारखकारादि अषकारान्तश्च यो धातुरुपदेशे तस्मिन् शेषे परे उपसर्गस्थ निमित्तमादाय नेर्णत्व वा । यथा—

प्रणिपचति, प्रनिपचति, प्रणिभिनत्ति, प्रनिभिनत्ति ।
प्रत्यु—('अककादौ' कि ?) प्रनिकरोति—प्रनिखादति ।
('अषान्ते' कि ?) प्रनिषिनष्टि ।

(४०३) **अनिते** । ८ । ४ । १९ ।

उपसर्गस्थ निमित्तमादाय अनवातोर्नस्य णत्वम् । यथा—प्राणिति — प्राण ।

(४०४) **हन्तेरत् पूर्वस्य** । ८ । ४ । २२ ।

अकारपूर्वस्य हन्तेर्नकारस्य उपसर्गस्थ निमित्तमादाय णत्वम् । यथा—

प्रहणन, परिहणनम् । प्रत्यु—('अत्पूर्वस्य' कि ?) प्रघ्नन्ति, परिघ्नन्ति ।

(४०५) **कृत्यचः** । ८ । ४ । २९ ।

कृत्प्रत्ययस्थो यो नकारोऽच उत्तर तस्य उपसर्गस्थ निमित्तमादाय णत्वम् । अन, मान, अनीय, अनि, निष्ठा एते कृत्प्रत्यया अत्रोदाहरणम् ।

यथा— प्रयाण, प्रयाणीयम् इत्यादि ।
प्रत्यु—('अच' कि ?) प्रभग्न ।

(४०६) **णेर्विभाषा** । ८ । ४ । २० ।

ण्यन्तात् यो विहित कृत्प्रत्यय तत्स्थस्य नकारस्य उपसर्गस्थ निमित्तमादाय वा णत्वम् । यथा— प्रयापण, प्रयापनम् ।

(४०७) **हलश्चेजुपधात्** । ८ । ४ । २१ ।

हलादिर्यो धातुरिजुपध तस्मात् परो य कृत्प्रत्यय तत्स्थस्य नस्य उपसर्गस्थ निमित्तमादाय वा णत्वम् । यथा— प्रकोपन, प्रकोपणम् ।

(४०८) **इजादेः सनुमः** । ८ । ४ । २२ ।

इजादेः सनुमो हलन्तात् धातोर्विहितो य कृत्प्रत्यय तत्स्थस्य नस्य उपसर्गस्थ निमित्तमादाय णत्वम् । यथा— प्रेङ्खणम् ।
सनुमश्चेत् इजादेरेवेति नियमार्थमिदम् ।

(४०९) **न भाभूपूकमिगमिप्यायीवेपाम्** । ८ । ४ । ३४ ।

एषा उपसर्गस्थ निमित्तमादाय कृत्नकारस्य न णत्वम् । यथा—
प्रभान, परिभवन इत्यादि ।

(४१०) **षात् पदान्तात्** । ८ । ४ । ३५ ।

पदान्तात् षकारात् परस्य न णत्वम् । यथा—
निष्पादन, दुष्पादन इत्यादि ।
अत्र—('षात्' कि ?) निर्णय । ('पदान्तात्' कि ?) पुष्णाति ।

(४११) **पदान्तस्य** । ८ । ४ । ३७ ।

पदान्तस्य नकरस्य न णत्वम् । यथा—
रामान्, वृक्षान्, पितॄन्, कुर्वन् ।

(४१२) **पदव्यवायेऽपि** । ८ । ४ । ३८ ।

पदव्यवधानेऽपि न णत्वम् । 'प्रातिपदिकान्त' (९९) इत्यादिना प्राप्ति । यथा—
माषकुम्भवापेन, चतुरङ्गयोगेन, पर्यवनद्धम् ।

(४१३) **क्षुभ्नादिषु च** । ८ । ४ । ३९ ।

न णत्वम् । यथा—क्षुभ्नाति, तृप्नोति इत्यादि ।

नामरूपावलि ।

अत्र सुपां प्रक्रियाकथने प्रत्ययाना प्रकृतीना च विकारा पृथक् निरूपिता । रूपाणि तु उभयेषा युगपत् प्रवर्तनेनैव सिध्यन्ति, अत स्वार्थे तत्तत्प्रक्रियानुसन्धानपुरस्सर सामान्यशब्दाना रूपावलिर्विलिख्यते । विशेषशब्दाना तु रूपाणि तत्र तत्रैव प्रायशो दर्शितानि ।

अकारान्तः पुल्लिंगो रामशब्दः—

	एक	द्वि	बहु	
प्र—राम	(हल्विसर्गौ)	रामौ (वृद्धिरेचि)	रामा	{ प्रथमयो पूर्वसवर्ण }
स—हे राम	{ एङह्रस्वात्सम्बु- द्धेरिति लोप }	रामौ	,, रामा	,,
द्वि—रामं	(अमि पूर्व)	रामौ	,, रामान्	{ तस्माच्छसो न पुसि }
तृ—रामेण	{ टाङसिङसामिना स्या, णत्व }	रामाभ्यां (सुपि चेति दीर्घ)	रामै	(अतो भिस ऐस्)
च—रामाय	(ङेर्य, सुपि च)	रामाभ्यां ,,	रामेभ्य	(बहुवचने झल्येत्)
प—रामात्	(ङसेरात्)	रामाभ्यां ,,	रामेभ्य	,,
ष—रामस्य	(ङस स्य)	रामयो (ओसि चेत्येत्व)	रामाणां	{ ह्रस्वनद्यापो नुट, नामीति दीर्घ, णत्वम् }
स—रामे	(आङ्ङ)	रामयो ,,	रामेषु	{ बहुवचने झल्येत्, षत्वम् }

स्त्रिया इयाङ्वा विशेषाद्यत् अकारान्तो नास्त्येव ।

नपुंसके धनशब्दः—

प्र { द्वि }	—धनं (अतोऽम, अमि पूर्व)	धने लोट शी-	धनानि	{ अष्टाभ्यो शि, नपुसकस्य झलच, इति प्रकृतेर्नुम, नान्तत्वात् सर्व आमन्द्व्यचिति दीर्घ । }

पुंसि सर्वशब्द —

सर्वः	**सर्वौ**	**सर्वे** (जस शी)
हे सर्व	**सर्वौ**	**सर्वे**
सर्वं	**सर्वौ**	**सर्वान्**
सर्वेण	**सर्वाभ्यां**	**सर्वैः**
सर्वस्मै (ङे स्मै)	**सर्वाभ्यां**	**सर्वेभ्यः**
सर्वस्मात् (ङस स्मात्)	**सर्वाभ्यां**	**सर्वेभ्यः**
सर्वस्य	**सर्वयोः**	**सर्वेषां** { आमि सर्वनाम्न सुट् / बहुवचने झल्येत् षत्व }
सर्वस्मिन् (ङि स्मिन्)	**सर्वयोः**	**सर्वेषु** ।

क्लीबे—सर्व सर्वे सर्वाणि । पुनस्तद्वत्, शेष पुवत् ।

जस शी, स्मात्-स्मिनौ, ङे स्मै. सुट्चाम सर्वनाममु ।
शीस्मात्स्मिनस्तु पूर्वादिनवकस्य विकल्पिता ॥

आकारान्त ।

आकारान्ता शब्दा पुंसि न सुप्रसिद्धा । स्त्रिया अकारान्ता आप्प्रत्ययेन आकारान्ता भवन्ति तादृशा एव प्राय सर्वेऽप्याकारान्ता । क्लीबे तु 'ह्रस्वो नपुंसके प्रातिपदिकस्ये'ति ह्रस्वविधानाद्दीर्घान्ता सर्वे ह्रस्वान्ता भवन्ति । ततो ह्रस्वतुल्यमेव रूप च । क्विबन्तत्वेन धात्वात्मका आदन्ताः (विरलप्रयोगा) पुंस्त्रियोस्तुल्यरूपा । तेषा मसज्ञाया 'आतो धातो'-रित्याकारलोप एव प्रक्रिया ।

विश्वपा	विश्वपौ	विश्वपा	विश्वपे	विश्वपाभ्या	विश्वपाभ्य ।
हे ,,	,,	,,	विश्वप	,	, ।
विश्वपा	,	विश्वप	,,	विश्वपो	विश्वपाम् ।
विश्वपा	विश्वपाभ्या	विश्वपाभि	विश्वपि	,	विश्वपासु ।

स्त्रियां आवन्ता ।

रमा	(हल्ङ्यादिलोप)	**रमे** (औड आप इति शी)	**रमाः** (सवर्णदीर्घे)
हे रमे	{ सम्बुद्धौ चेत्येत्व, एङ ह्रस्वात् स- म्बुद्धेरिति लोप, }	**रमे**	**रमाः**
रमां	(अमि पूर्व)	**रमे**	**रमाः**
रमया	(आङि चाप इत्येत्व)	**रमाभ्यां**	**रमाभि**

रमाये रमाया रमाया रमायां	(आडादय) (याडाप टेराम)	रमाभ्यां रमाभ्यां रमयो रमयो	रमाभ्य रमाभ्य (हस्वनद्याप इति नुट्, णत्वम्, रमासु ।

आबन्त सर्वनाम ।

सर्वा		सर्वे	सर्वा
हे सर्वे		सर्वे	सर्वा
सर्वा		सर्व	सर्वा
सर्वया		सर्वाभ्या	सर्वाभि
सर्वस्ये	(सर्वनाम्न स्याडटश्चश्च)	सर्वाभ्या	सर्वाभ्य
सर्वस्या	(,,)	सर्वाभ्या	सर्वाभ्य
सर्वस्या	(,,)	सर्वयो	सर्वासा (आमि सर्वनाम्न सुट्)
सर्वस्या	(,,)	सर्वयो	सर्वासु ।

इदुदन्तौ (धिसंज्ञौ) —पुसि—हरि—गुरुशब्दौ—

हरि गुरु	(रुत्वविसर्गौ)	हरी गुरू	(प्रथमयो पूर्वसवर्ण)	हरय गुरव	(जसिचेति गुणः ।
हे हरे	(ह्रस्वस्य गुण, एङ् ह्रस्वात् सम्बुद्धेरिति सुलोप)	हरी		हरय	
हे गुरो		गुरू	,,	गुरव	
हरि गुरु	(अमि पूर्व)	हरी गुरू		हरीन् गुरून्	(तस्माच्छसो न पुसि)
हरिणा गुरुणा	(आडो नाच्रिया णत्व)	हरिभ्या गुरुभ्या		हरिभि गुरुभि	
हरये गुरवे	(घेर्डितीति गुण)	हरिभ्या गुरुभ्या		हरिभ्य गुरुभ्य	
हरे गुरो	(घेर्डितीति गुण, ङसिङसोश्चेति पूर्वरूपम्)	हरिभ्या गुरुभ्या		हरिभ्य गुरुभ्य	
हरे गुरो	,,	हर्यो गुर्वो	(सन्धि यण्)	हरीणा गुरूणा	(ह्रस्वनद्यापोनुट्, नामाति दीर्घ, णत्वम्)
हरौ गुरौ	(अच्च घेरिति प्रकृतेरत्व, ङेरौत्त्व च)	हर्यो गुर्वो		हरिषु गुरुषु	(आदेशप्रत्यययोरिति षत्व)

स्त्रियां मतितनुशब्दौ—

अनयो चतुर्थ्यादावेकवचनेषु 'डिति ह्रस्वश्च' इति नदीकार्यमात्रं विशेष । नदीकार्यं चात्र ङे-ङसि-ङस्सु 'आण्नद्या' इति प्रत्ययस्य आडागम, ङौ 'ङेराम्नद्याम्नीभ्य' इत्यामादेशश्च । तेन मत्यै तन्वै; मत्या, तन्वा, २ मत्या, तन्वा, इति च वैकल्पिकानि रूपाणि ।

द्वीबे वारित्रपुशब्दौ—

प्र–	वारि	{स्वमोर्नपुंस कादिति लुक्}	वारिणी	{नपुंसकाच्चौङ शी. इकोऽचि विभक्तावि-ति प्रकृत्यैनम्, णत्व}	वारीणि	{अशसो ह्रिं, नपुंसक-स्यझलच इति नुम्, सर्वनाम इति दीर्घ, णत्वम्}
द्वि–	त्रपु		त्रपुणी		त्रपूणि	
तृ–	वारि, वारे त्रपु, त्रपो		वारिणा		वाराणि	
	वारिणा		त्रपुणा		त्रपूणि	
चतु–	त्रपुणे	{गुणाविकल्प}	वारिणे		वारिभ्याम्	
	वारिणे		त्रपुणे		त्रपूभ्याम्	
पं–	त्रपुणे	{इकोऽचि वि-भक्तौनिति}	वारिभ्याम्		वारिभ्य	
	वारिणः		त्रपुभ्याम्		त्रपूभ्य	
ष–	त्रपुणः	{नुम्, णत्व}	वारीणाम्	{नुम्, णत्व}	वारीणाम्	{ह्रस्वनद्यापनुट्, ना-मीति दीर्घ णत्व}
	वारिणि		त्रपुणाम्		त्रपूणाम्	
स–	त्रपुणि	{नुम्, णत्व}	वारिषु	{नुम्, णत्व}	वारिषु	{णत्व}
	वारिणि		त्रपुषु		त्रपुषु	

सम्बुद्धौ 'स्वमोर्नपुसकादिति,' सोर्लुका लुप्तत्वेन प्रत्ययलक्षणाभावात् 'ह्रस्वस्य गुणो' न प्राप्नोति । तथापि तस्य गुणस्य विकल्प इष्यते । सचैव सिध्यति—'ह्रस्वस्य गुण सम्बुद्धौ' इत्यनुवृत्तिसस्कृते सूत्रे 'सम्बुद्धौ' इति सप्तमी परसप्तमीति पक्षे सम्बुद्धौ परतो विहितत्वादङ्गकार्य गुणो 'न लुमताङ्गस्य' इति प्रत्ययलक्षणनिषेधान्न प्रवर्त्तते । 'सम्बुद्धौ' इति विषयार्थे सप्तमीति चेत् व्याख्यायते, तर्हि अङ्गकार्यत्वाभावात् स्यादेव प्रत्ययलक्षणेन गुण । उभयो पक्षयो प्रामाण्याद्विकल्प फलति । अन्ये त्वभीष्टमिदमन्यथा साधयन्ति । यथा—*'इकोऽचि विभक्तौ' इति सूत्रे 'अचि'-ग्रहणमत्र ज्ञापकम् । तथाहि—सूत्रे तस्मिन् 'अचि' इति किमर्थमुक्त ? हलि मा भूदिति । हल्यपि काम प्रवर्त्तता, को दोष -'वारिन् भ्या,' 'वारिन् भि' इत्यानिष्ट रूपमापतेत् । नैष दोष -'नलोप प्रातिपदिकान्तस्य' इति 'राजभ्या' इत्यादिष्विव नलोपो भविष्यति । भवतु, तथापि सम्बुद्धौ दोष स्यात्, 'न डिसम्बुद्ध्यो' इति तत्र नलोपस्य निषेधात् । नायमपि दोष, सम्बुद्धेर्लुका लुप्तत्वेन प्रत्ययलक्षणनिषेधान्न सम्बुद्धि परास्ति । एव 'अचि'-ग्रहण व्यर्थ सत् ज्ञापयति प्रत्ययलक्षणनिषेधोऽनित्य इति । प्रत्ययलक्षण-निषेध सम्बुद्धौ कदाचिन्न प्रवर्त्तेतेति भीत्यैव किलाचार्य 'अची'त्युक्तवान् । इति । व्याख्यातृवक्तृताद्दृष्टान्ततया प्रपञ्चोऽयमत्रास्माभिरादृत ।

तथा च सम्बुद्धौ वारे, वारि; त्रपो, त्रपु, कर्त्त, कर्त्तृ इति सर्वत्र गुणविकल्प इष्यते । वारिणे वारिण इत्यादौ 'वेर्डिती'ति गुण परत्वान्नुमा बाध्यते । आमि तु—**'नुमचिरतृज्वद्भावेभ्योनुट् पूर्वविप्रतिषेधेन'** इति भाष्यवचनात् परमपि नुमम् बाधित्वा नुट् भवति । नुटि च कृते 'नामी'ति दीर्घ । पूर्वविप्रतिषेधो नाम विप्रतिषेधे पूर्व कार्य इति विपरीता

* इकोऽचि व्यञ्जने माभूदस्तु लोप स्वर कथम् ।
स्वरो वै श्रूयमाणोऽपि लुप्ते किन्न भविष्यति ।
रायात्व तिसृभावश्च व्यवधानान्नुमा अपि ।
गुड्वाच्च उत्तरार्थं तु इह किंचित् त्रपो इति ।

व्यवस्था । 'इकोऽची' 'ति नुम्, 'अचि र ऋत,' 'तृज्वत्क्रोष्टु' इति तृज्वद्भाव एतान् परानपि बाधित्वा नुट् भवेदिति भाष्यवाक्यार्थः ।

ईकारान्त ।

(१) अव्युत्पन्ना (उणादिनिष्पन्ना वा), (२) क्विबन्तधात्वात्मका, (३) ङ्यन्ताश्चेति त्रिविधा ईकारान्ता । तत्राव्युत्पन्नेषु यवीपपी—वातप्रम्यादय पुसि, लक्ष्मी—तरी—तन्त्र्यादय स्त्रिया च त्रिचतुरा एव । क्विबन्तेषु पञ्चषा प्रसिद्धा पुस्त्रियोस्तुल्यरूपाश्च । ते च इयङादेशिनो यणादेशिनश्चेति द्विविधा । ङ्यन्ता एव भूयिष्ठा । यद्यपि ते नित्यस्त्रीलिङ्गास्तथापि पुम्यपि उपसर्जनीभूता द्वित्रा ङ्यन्तकार्यं (सुलोपं) लभन्ते । त्रिविधानामपि नित्यस्त्रीलिङ्गानाम्

सम्बुद्धौ ह्रस्वता ङेराम्, आङ्योगो ङसिङोस्ताम् ।
आमि नुट् चेति चत्वारि नदीकार्याणि सुष्विह ॥

इति परिगणितानि नदीकार्याणि भवन्ति । पुसि प्रथमलिङ्गग्रहणान्नदीत्वम् । क्लीबे तु सर्वेऽपि ह्रस्वादिकारान्ता भवन्ति ।

(१) **अव्युत्पन्न पुसि पपीशब्द** —(पाति लोकमिति पपी सूर्य)

पपी	पप्यौ	पप्य	पप्ये	पपीभ्यां	पपीभ्यः
हे पपी	पप्यौ	पप्य	पप्य	पपीभ्यां	पपीभ्यः
पपी (अमि पूर्व)	पप्यौ	पपीन् (तस्माच्छसो न पुसि)	पप्य	पप्योः	पप्याम्
पप्या	पपीभ्यां	पपीभिः	पपी (सवर्णे दीर्घे)	पप्योः	पपीषु ।

(२) **क्विबन्त पुंसि सुधीशब्द** —(इयङादेशी)

सुधीः	सुधियौ	सुधियः	सुधिये	सुधीभ्यां	सुधीभ्यः
हे सुधीः	,,	,,	सुधियः	,,	,,
सुधियम्	,,	,,	,,	सुधियोः	सुधियाम्
सुधिया	सुधीभ्यां	सुधीभिः	सुधियि	,,	सुधीषु ।

ग्रामणीशब्द —(यणादेशौ)

ग्रामणी	ग्रामण्यौ	ग्रामण्य	ग्रामण्ये	ग्रामणीभ्या	ग्रामणीभ्य
हे ,,	,,	,,	ग्रामण्य	,,	,,
ग्रामण्य	,,	,,	,,	ग्रामण्या	ग्रामण्या
ग्रामण्या	ग्रामणीभ्या	ग्रामणीभि	ग्रामण्या (डेराम्)	,,	ग्रामणीषु ।

अमि शसि च परत्वादियङ्यणौ, न तु पूर्वरूपपूर्वसवर्णदीर्घौ ।

(१) अव्युत्पन्न स्त्रियां लक्ष्मीशब्द —

लक्ष्मा	लक्ष्म्यौ	लक्ष्म्य	लक्ष्म्यै (आणनद्या)	लक्ष्मीभ्या	लक्ष्मीभ्य
हे लक्ष्मि (नदीह्रस्व)	,	,,	लक्ष्म्या	,,	,,
लक्ष्मी	,, { लक्ष्मी / पूर्वसवर्णदीर्घ }		,,	लक्ष्मीभ्यो	लक्ष्मीणा (नदात्वाभ्रुट)
लक्ष्म्या	लक्ष्मीभ्या	लक्ष्मीभि	लक्ष्म्या (डेराम्)	,,	लक्ष्मीषु ।

(२) क्विबन्ता स्त्रियाम्—

एषु विशेष्यनिघ्ना पुवत् । नित्यस्त्रीलिङ्गानामियङादेशिना स्त्रीशब्दवर्जं सम्बुद्धौ न नदीह्रस्वम्, अन्यत्र नदीकार्याणि वा । यणादेशिना तु नित्यस्त्रीलिङ्गाना (सन्ति चेत्) नित्य नदीकार्यम् ।

(३) ङ्यन्त स्त्रियां गौरीशब्द —

सो ह्रस्वाद्विलोपो विशेष शेष लक्ष्मीवत् ।

ऊकारान्त —

ईकारान्तवत्, ङयन्त इति विभागो नास्तीत्येव भेद ।

ऋकारान्ता पुंसि कर्तृशब्द —

कर्ता { अनङ, उपधा-दीर्घ, ह्रस्वादि-लोप, नलोप, }	कर्तारौ { ऋतो ङीति गुण अट्- ञिति दीर्घश्च }	कर्तार (गुणदीर्घौ)	
हे कर्तः { गुण, ह्रस्वादि लोपश्च }	,,	,,	
कर्तार (गुणदीर्घौ)		कर्तॄन् (पूर्वसवर्णदीर्घ)	
कर्त्रा (सन्धि यण)	कर्तृभ्या	कर्तृभि	
कर्त्रे (,,)		कर्तृभ्य	
कर्तुः (ऋत उत्)	,,	,,	
,, ,,	कर्त्रो	कर्तॄणा (नुटदीर्घौ)	
कर्तरि (गुण)	,,	कर्तृषु (षत्व)	

पितृप्रभृतीनामव्युत्पन्नाना सर्वनामस्थाने दीर्घाभावो भेद ।

स्त्रियां मातृशब्द —

शसि मातॄ शेष पितृवत् । स्वसृशब्दस्य शसि स्वसॄ , शेष कर्तृवत् । स्त्रिया ऋकारादिसमकमेव ऋकारान्तम् , अन्येषा ऋवेदेभ्य इति डाप्विधानात् ।

क्लीबे कर्तृशब्द —

इदुदन्तवदनुभागमेन रूपसिद्धि । क्लीबे इगन्ताना विशेष्यनिघ्नाना गालवमतेन तृतीयादिषु पुवद्भावे पुल्लिङ्गरूपाणि च ।

एजन्ता विरळा एव शब्दा , तेषूपलभ्यमाना प्रागेव दर्शित-प्रक्रियाश्च । हलन्तेष्वप्येवमेवोन्नेया रूपसिद्धि । तेषु प्राय प्रत्ययानाम-देशाभावत् सुगमतरा प्रक्रिया । सर्वनामस्थानकार्य, भकार्य इति विभाग पुरस्कृत्य प्रकुर्यात् । हलसन्धावुक्ता कुत्व-टुत्व-षत्व जश्त्व-चर्त्व-रुत्वादय पदान्तविकारा अप्यनुसन्धेया ।

तिङन्तप्रक्रिया ।

फलानुकूलो व्यापार , व्यापारजन्य फल वा क्रिया । यथा—पचन-क्रियाया पात्राधिश्रयणाग्निज्वालनादिर्व्यापार , तण्डुलादिषु विक्लेद फल ; यथा च गमनक्रियाया चलन व्यापरो देशान्तरसयोगश्च फलम् । एवम-न्यत्रापि फलव्यापारावूह्यौ । क्रिया तावत् शौर्यसौन्दर्यवैदुष्यादिगुणवत् द्र-व्यमाश्रित्यैव तिष्ठति, न तु स्वयमेव स्थातु शक्नोति । क्रियाया आश्रयभूत द्रव्य कारकमित्युच्यते । तथा च क्रियाजनक कारक इति कारकलक्षणम् । तच्च—

अपादान, सम्प्रदान, करण, तदधे. परम् ।
कर्म, कर्तेति षोढैव पाणिन्युक्तमनुक्रमात् ॥

तत्र व्यापाराश्रस्याश्रय कर्त्ता, फलाश्रस्याश्रय कर्म, क्रियासिद्धौ साधकी-भूय कर्तुर्यदुपकरोति तत्करण, कर्तृकर्मान्यतरद्वारा क्रियाया आधारभूत अधि-करणम् इत्यादि । यथा—देवदत्तस्तण्डुल पचतीत्यत्र पात्राधिश्रयणाग्निज्वाल-नादिरूपो व्यापारो देवदत्तमाश्रित्य तिष्ठतीति देवदत्त कर्त्ता, विक्लेदरू-पस्य फलस्याश्रयस्तण्डुल इति तण्डुल कर्म । दण्डेन हन्तीत्यादौ हनन-

क्रियासाधने कर्त्तुर्दण्डोऽत्यन्तमुपकरोतीति दण्ड करणम् । तथा स्थाल्या तण्डुल पचतीति पचनक्रियाया कर्मतण्डुलद्वारा आधारभूता स्थाली अधिकरण इत्यादि । यत्र व्यापार फलञ्चैकमेव द्रव्यमाश्रित्यावतिष्ठते सा क्रिया अकर्मिका । यथा निद्रातीति । निद्राक्रियाया हि देवदत्तो निद्रातीत्यादौ विषयेभ्यो मनोव्यावर्त्तनरूपो व्यापार, विश्रमजन्यनवीभावप्रतिपत्तिरूप फल च देवदत्त कर्त्तारमेवाश्रयत । फलव्यापारयोर्वैयधिकरण्ये (आश्रयभेदे) एव क्रियाया कर्मसम्भव । एव कारकेषु कर्त्ता प्रधानम् । किञ्च स एव हि क्रियाया मुख्याशस्य व्यापारस्याश्रय । कर्त्तुरनन्तर कर्मण प्राधान्य. क्रियाया अप्रधानाशस्य फलस्याश्रयत्वात् । अन्यानि तु कारकाणि करणादीनि परिकरमात्रम् ।

क्रिया किल द्रव्यमाश्रित्यैव तिष्ठतीत्युक्त, तथा च वृक्षावलम्बिन्या लताया इव आश्रयभूतद्रव्यप्रतीतिपूर्वमेव क्रियाया प्रतीतिर्जायते । आश्रयेषु च कर्त्ता कर्म च धातुवाच्याशस्य समवायीति प्रधानम् । इतराणि तु प्रकृतधातुवाच्यव्यापाराक्षिप्तानामवान्तरव्यापाराणामाश्रया इत्यप्रधानम् । अत कर्त्तृकर्मविनाभावेनैव क्रियाया बोधो जायते । यत्र कर्त्तारं पुरस्कृत्य क्रिया भासते तत्र कर्त्तरि प्रयोग, यत्र कर्म पुरस्कृत्य क्रिया भासते तत्र कर्मणि प्रयोग । यदा पुन कारकसंसर्ग पदान्तरबोध्यत्वेन विवक्षित्वा केवला क्रिया धातुना विवक्ष्यते तदा भावे प्रयोग । भावो नाम केवला क्रियैव । समानाधिकरणफलव्यापारवाचकाना धातूना कर्त्ता कर्म च वस्तुत एकमेव । एवञ्जातीयकानामितरानधीनत्वलक्षण प्राधान्यं पुरस्कृत्य जायमानो व्यपदेश कर्त्तेत्येव युज्यते । यथा—मण्डलेश्वरोऽपि सम्राट् सम्राडित्येव व्यवह्रियते । इत्थमकर्मकाणा कर्म पुरस्कृत्य प्रयोगो न सम्भवति । यासा क्रियाणा कारकरूपा उपाधयो विरळास्तासामेव निरुपाधिक प्रतिभान स्वारसिक युज्यत इति अकर्मकाणा भावे, कर्त्तरि च प्रयोग, सकर्मकाणा तूक्तयुक्त्यैव कर्मणि कर्त्तरि च प्रयोग. । तदेतदभिसन्धायाचार्य सूत्रयति—

(४१४) **लः कर्मणि च भावे चाकर्मकेभ्यः** । ३ । ४ । ४६ ।

कर्त्तरीत्यनुवर्त्तते । लकारः कर्त्तरि कर्मणि च स्यात् । अकर्मकेभ्यस्तु कर्त्तरि, भावे च । अथ लस्यादेशानाह—

(४१५) **लस्य** । ३ । ४ । ४७ ।

इत्यधिकृत्य

(४१६) **तिप्तस्झि-सिप्थस्थ-मिब्वस्मस्-तातांझ-थासाथांध्वम्-इट्वहिमहिङ्** । ३ । ४ । ४८ ।

एतेऽष्टादश प्रत्यया लस्यादेशाः स्युः । एषां विभाग उच्यते—

(४१७) **लः परस्मैपदम्** । १ । ४ । ९९ ।

लादेशाः परस्मैपदसंज्ञाः स्युः ।

(४१८) **तङानावात्मनेपदम्** । १ । ४ । १०० ।

तङ्प्रत्याहार 'आन' इत्ययं प्रत्ययश्चात्मनेपदसंज्ञः । तङ् इति त आतां इत्यादीनां महिङ्पर्यन्तानां प्रत्याहारः । तिङ् इति च सर्वेषाम् । तथा च तिप्तस् इत्यारभ्य मस्पर्यन्तानामेव परस्मैपदसंज्ञा । तिङस्तावदेवं द्विविधाः, परस्मैपदमात्मनेपदं चेति । प्रत्ययानां श्लोकेन संग्रहः—

तिप्तस्झिसिप्थस्थमिपश्च वस्मसौ क्रमात्परस्मैपदसंज्ञका अमी ।
तातांझथासः पुनरात्मनेपदे भवेयुराथांध्वमिटो वहिर्महिङ् ॥

अनयोर्विषयं विभजति—

(४१९) **अनुदात्तङित आत्मनेपदम्** । १ । ३ । १२ ।

(४२०) **स्वरितञितः कर्त्रभिप्राये क्रियाफले** । १ । ३ । ७२ ।

(४२१) **शेषात् कर्त्तरि परस्मैपदम्** । १ । ३ । ७८ ।

उदात्तेतां धातूनां परस्मैपदं; अनुदात्तेतां आत्मनेपदं; स्वरितेतामुभयमिति व्यवस्था । तत्राजन्तधातूनामञ्जूपेत्करणस्यासौकर्यात् ङित आत्मनेपदिनः, ञित उभयपदिनः, निरनुबन्धाः शेषत्वात् परस्मैपदिन इति नियमः कृतः । अत्रोभयपदिनां पदभेदे अर्थभेदोऽप्यस्तीतिकृत्वा;

'कर्त्रभिप्राये क्रियाफले' इत्युक्तम् । कर्तृगामिनि क्रियाफले इत्यर्थ । अत्र क्रियाफल लौकिकमुपयोगरूपमेव विवक्षित, न तु शास्त्रीय व्यापारसहजन्य फलम् । यथा, पचनक्रिया परार्थमात्मार्थमपि भवति । यत्र परार्था क्रिया तत्र परस्मैपद, यत्र त्वात्मोपयोगायैव तत्रात्मनेपदमित्यन्वर्थे सज्ञे । इय व्यवस्था प्रयोक्तृणामश्रद्धया कालाद्लुप्तप्रचारा विकल्पमात्र इदानी पर्यवसिता । 'अग्निष्टोमेन स्वर्गकामो यजेत' इत्यादिविधिवाक्येषु 'गयाश्राद्ध करिष्ये' इत्यादिसङ्कल्पेषु च परमनुष्ठीयते । स्वरसस्कार विना यत सस्कृतभाषेदानीन्तनैरेकश्रुत्यैव भाष्यते तत उदात्तत्वानुदात्तत्वस्वरितैस्त्वैर्लक्षित पदविवेकोऽपि सङ्केतमात्र सवृत्त , न तूपयोगाय कल्पते । अतो नाम्ना लिङ्व्यवस्येव धातूना पदव्यवस्थापि पृथग्यत्नेनैवावगन्तव्या वर्तते । अथोभे अपि पदे त्रिभि पुरुषैर्विभज्येते—

(४२२) **तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः** । १ । ४ । १०१ ।

तिङ उभयो पदयोरेव त्रिका क्रमादुक्तसज्ञा स्यु ।

(४२३) **तान्येकवचनद्विवचनबहुवचनान्येकशः** । १ । ४ । १०२ ।

प्रथमादिपुरुषत्रय क्रमात् प्रत्येकमेकवचनादिसज्ञ स्यात् । 'द्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचन' इति वचनाना विनियोग पूर्वमेवोक्त । पुरुषाणा तु विनियोगमाह—

(४१४) **युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः** । १ । ४ । १०९ ।

(४२५) **अस्मद्युत्तमः** । १ । ४ । १०७ ।

(४२६) **शेषे प्रथमः** । १ । ४ । १०८ ।

समानमधिकरण प्रवृत्तिनिमित्ताश्रयो येषा ते समानाधिकरणा । यथा 'नीलमुत्पल' इत्यत्र नीलत्वमुत्पलत्व च एकमेव वस्तु उत्पलरूपमाश्रित्य तिष्ठति, अतो नीलपद उत्पलपदस्य समानाधिकरण विशेषणम् । यत्र त्वाश्रयभेदस्तत्र व्यधिकरण विशेषणम् । यथा—राज्ञ पुरुष इति । अत्र

यद्यपि राजपद पुरुष विशिनष्टि तथापि राजत्व पुरुषत्व च भिन्नवस्तुनिष्ठम् । एकस्यामेव विभक्तौ प्रयुक्तयो विशेषणविशेष्ययो *सम्बन्ध सामानाधिकरण्यमिति फलितम् । केन सह सामानाधिकरण्यमित्याकाङ्क्षाया लकारवाच्यकारकेणेत्यर्थादायाति । स्थानी=स्थानवान्, प्रसक्त, अप्रयुज्यमानोऽर्थसिद्ध इति यावत् । उपपद नाम साकाङ्क्ष सहप्रयुज्यमान पदम् । एव परिकरबन्ध कृत्वा सूत्रार्थो व्याख्यायते—लकारवाच्यभूतेन कारकेण (कर्त्रा, कर्मणा वा) समानाधिकरणे युष्मच्छब्दे प्रयुज्यमाने अर्थसिद्धे वा मध्यम प्रयोक्तव्य, एव भूते अस्मच्छब्दे उत्तम, मध्यमोत्तमयोरविषये प्रथम । कर्त्तरि प्रयोगे कर्तु, कर्मणि प्रयोगे कर्मणश्च युष्मदा अस्मदा नामान्तरेण वा सामानाधिकरण्य विमृश्य पुरुषनिर्णय । वचननिर्णयोऽप्येवमेव । कर्तु कर्मणो वा एकत्वे एकवचन, द्वित्वे द्विवचन, बहुत्वे बहुवचनमिति । एव च पुरुषद्वारा क्रियायामपि सख्यायोग । लकारार्थभूत कारक पुरुषवचननियामक इति सक्षेप । अथ कथ भावे प्रयोगे पुरुषवचनविभाग, तत्र लकारवाच्यस्य कारकस्यैवाभावात् ? इति चेत्, नास्त्येवेत्युत्तरम् । प्रथमपुरुष एवैकवचन च सामान्यमिति कृत्वा प्रथमपुरुषैकवचनप्रत्यय एव भावे प्रयोगे सर्वत्र प्रयुज्यते । पदयोरुभयोरपि पुरुषवचनप्रत्यया यथायथ विभज्यादौ दर्शिता —

परस्मैपदम्

	सानुबन्धा			निरनुबन्धा		
	ए	द्वि	बहु	एक.	द्वि	बहु.
प्रथम	—तिप्	तस्	झि	ति	तस्	झि
मध्यम	—सिप्	थस्	थ	सि	थस्	थ
उत्तम	—मिप	वस्	मस	मि	वस्	मस

आत्मनेपदम्

प्रथम	—त	आताम्	झ	त	आताम्	झ
मध्यम	—थास्	आथाम्	ध्वम्	थास	आथाम	ध्वम
उत्तम	—इट्	वहि	महिङ्	इ	वहि	महि

* भिन्नप्रवृत्तिनिमित्तयो पदयोरेकस्मिन धर्मिणि वृत्ति ।

परस्मैपदैकवचनेषु पकार , आत्मनेपदोत्तमैकवचने टकार , तद्बहुवचने डकारश्च इत् । तसादौ सकारस्य, आतामादौ मकारस्य च 'न विभक्तौ तुस्मा' इति नेत्सज्ञा । ञि ञ इत्यनयो 'चुटू' इत्यनेन प्राप्तापीत्सज्ञा नात्र विवक्षिता, 'ङोऽन्त' (४६४) इति तस्यादेशविधानात् ।

अथ कोऽसौ 'ल' ? यस्य तिबादय आदेशा विधीयन्ते । 'ल' इति लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् इति प्रत्ययदशकस्य सामान्यग्रहणम् । एषु लेडेकश्छन्दस्येव प्रयुज्यते अन्ये नव साधारणा । ननु लट् लिट् इत्यादीन् कुत्राप्यदृष्टश्रुतान् प्रत्ययान् प्रकल्प्य पारमार्षिका दृष्टश्रुता इति तस् इत्यादयस्तेषामादेशा इति किमर्थं गण्यन्ते ? किं नाथ शिरोवेष्टनेन प्राणायाम ? इति चेत्, नैवम् । कालमसर्ग विना क्रियाया अन्वयपूर्त्तिर्न स्यात् । कालश्च भूतो, भावी, वर्त्तमान इति त्रिविध । तत्र भूतभाविनौ पुनर्दूरासन्नश्चेति द्विविधौ । तयोरासन्न अद्यतन इति, दूरोऽनद्यतन इति चोच्यते । भूतस्य पुन परोक्षभूतमिति तृतीयोऽप्यस्ति प्रभेद । वर्त्तमानस्त्ववधिभूतत्वादेकविध एव । एवम्—

(१)	अद्यतनभूत	(४)	अद्यतन भावि
(२)	अनद्यतनभूत	(५)	अनद्यतन भावि
(३)	परोक्षभूत	(६)	वर्त्तमान

चेति भेदप्रभेदै षड्विध काल । किञ्च विधिनियोगप्रार्थनादिभि प्रकारैर्विशिष्टाया क्रियाया प्रत्यायनमावश्यकम् । उक्तान् कालभेदान् प्रकारभेदाश्च दर्शयितु कल्पिता लडादय । ननु कथमिद घटते ? लकाराणां हि कर्तृकर्मभावेष्वन्यतम एव वाच्योऽर्थ उक्त । सत्य लडादय कर्त्रादीनेवाभिदधति, किन्तु लट्त्वलिट्त्वादिविशेषेण कालप्रकारावपि द्योतयन्ति । तथा हि—यदा धातुर्वर्त्तमानकालावच्छिन्नाया क्रियायां वर्त्तते तदा लडाख्यो लकार , यदा भूतकालावच्छिन्नाया, तदा लुङाख्य , अन्यदा अन्य

इति । तथा च लत्वसामान्येन कर्त्रादीन्, लट्त्वलिट्त्वादिविशेषै कालप्रकारौ च बोधयन्ति लकारा इति तेषामुभयप्रकाशकत्वम् ।

अथ लकाराणा कालप्रकारविवेक —लोट् लिङ् लृङ् प्रकारबोधका, अन्ये षट् कालबोधका । तत्र—

(४२७) **वर्त्तमाने लट्** । ३ । २ । १२३ ।

वर्त्तमानकालससृष्टक्रियावृत्तेर्धातो (कर्त्तृकर्मभावेषु) लट् स्यात् ।

(४२८) **लुङ् (भूते)** । ३ । २ । ११० ।

भूतसामान्यवृत्तेर्द्धातोर्लुङ् स्यात् ।

(४२९) **अनद्यतने लङ्** । ३ । २ । १११ ।

अनद्यतनभूतार्थवृत्तेर्द्धातोर्लङ् ।

(४३०) **परोक्षे लिट्** । ३ । २ । ११५ ।

परोक्षमप्रत्यक्ष, वक्तु साक्षात्कारायोग्यकालिकम् । परोक्षभूतार्थवृत्तेर्द्धातोर्लिट् ।

(४३१) **अनद्यतने लुट् (भविष्यति)** । ३ । २ । १५ ।

अनद्यतनभविष्यदर्थवृत्तेर्द्धातोर्लुट् ।

(४३२) **लृट्च्छेषे च** । ३ । ३ । १३ ।

अद्यतनभविष्यति सामान्यभविष्यति च वर्त्तमानाद्धातोर्लृट् । अथ प्रकारबोधका लकारा —

(४३३) **विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्न-**
प्रार्थनेषु लिङ् । ३ । ३ । १६२ ।

(४३४) **लोट् च** । ३ । ३ । १६२ ।

विध्याद्यर्थविषयार्थकाद्धातोर्लिङ्लोटौ स्त । विधिश्चोदना, भृत्यादेर्नियुक्तस्य प्रवर्त्तनम्, अन्येऽपि चोदनाभेदा एव ।

(४३५) **आशिषि लिङ्लोटौ** । ३ । ३ । १७३ ।

आशीर्विषयार्थवृत्तेर्द्धातोर्लिङ्लोटौ स्त । अर्थान्तराण्यप्यनयोर्लिङ्का-र्यप्रकरणे वक्ष्यन्ते ।

(४३६) **लिङ्निमित्ते लृङ् क्रियातिपत्तौ** । ३ । ३ । १३९ ।

क्रियातिपत्तेरधिकस्यार्थस्य प्रतीतौ हेतुहेतुमद्भावादौ लिङर्थे वर्त्त-मानाद्धातोर्भविष्यति काले लृङ् ।

कालप्रकारयो प्राचीनैरन्वर्थानि नामानि कृतान्यासन् । तानि मा-त्रालाभव्यसनी पाणिनिरुपेक्ष्य 'ल' इति वर्णस्याक्षरमालामालब्ध्य कृत्रिमा सज्ञा कृतवान्, ताश्च प्रक्रियासाम्योपलम्भात् टितो ङितश्चेति द्विधा वि-भक्तवान् । प्राचीनसज्ञास्त्वेता —

काल	प्रकार
भवन्ती = लट्	अतिसर्गि = लोट्
परोक्षा = लिट्	विधायिका = लिङ
(भूत) अनद्यतना = लङ्	अतिपातिका = लृङ्
(भूत) अद्यतनी = लुङ्	
भविष्यन्ती = लृट्	
(भावि) अनद्यतनी = लुट्	

सर्वेषामपि लकाराणा तिबादय एव प्रत्यया , भेदप्रतीतिस्तु आ-गमैरादेशैर्विकरणप्रत्ययैश्च । अथ के नाम विकरणप्रत्यया ? —इह यथा सुप प्रातिपदिकेभ्योऽङ्गसैवोत्पद्यन्ते तथा तिङो धातुभ्यो विना व्यवधान-मुत्तरे न प्रवर्त्तन्ते , किन्तु मध्ये तयोर्निरर्थका प्रत्यया प्रक्षिप्यन्ते । रू-पनिष्पादनादन्यत् नास्त्येषा प्रयोजनम् । त एते प्रत्यया विकरणसज्ञा । विकरण = विकारहेतुरित्यन्वर्था सज्ञा । धातुभ्य एव द्विगुणा प्रत्यया — प्रथम रूपनिष्पादका विकरणसज्ञा ; तत पुरुषवचनबोधकास्तिङ इति । अत्र उपर्युपरिप्रत्ययोत्पत्तौ विकरण प्रति केवलो धातु प्रकृति , तिङ्प्रत्यय प्रति विकरणविशिष्टो धातुरिति व्यवस्था । विशिष्टप्रकृतेरप्येव प्रकृतित्व-सम्पादनार्थं किल प्रकृतेरङ्गसज्ञा विधाय ता च 'यस्मात् प्रत्ययविधिस्तदादि

* प्रकारस्योक्तास्त इमा सज्ञा ऊहिता एव अन्या पुनर्यास्कादिभिर्व्यवहृता ।

प्रत्ययेऽङ्ग' (१८९) इति आदिशब्दघटिता मध्यपातिप्रत्ययान्तरग्राहिणी लक्षितवानाचार्य । उक्तसूत्रव्याख्या द्रष्टव्यताम् ।

नव सन्ति विकरणप्रत्यया असाधारणा । शप्, लुक्, श्लु श्यन्, श्नु, श, श्नम्, उ, श्ना इति। एषु लुक् श्लु इति द्वौ लोपरूपौ। अन्येषु अन्त्यो हल् आदि शकारश्चानुबन्ध । अमुकस्य धातोरमुक विकरणमिति विवेचन तु गणकरणेन । अत्र पाणिनिरादिम विकरणमुत्सर्ग प्रकल्प्य शेषानष्टौ तस्यापवादान् करोति । यथा—

(४३७) **कर्तरि शप्** (सार्वधातुके) । ३ । १ । ६८ ।

कर्तरि प्रयुक्ते सार्वधातुके परे धातो शप्प्रत्यय स्यात् । प्रत्ययाना सार्वधातुकार्द्धधातुकभेद यथाप्रदेश वक्ष्याम । अथ शपोऽपवादा उच्यन्ते—

(४३८) **दिवादिभ्यः श्यन्** । ३ । १ । ६९ ।

दिवादिगणपठितेभ्यो धातुभ्य श्यन् प्रत्यय शपोऽपवाद ।

(४३९) **वा भ्राशम्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः** । ३ । १ । ७० ।

एभ्यो धातुभ्य श्यन् वा, श्यनभावपक्षे औत्सर्गिक शप् ।

(४४०) **स्वादिभ्यः श्नुः** । ३ । १ । ७३ ।

(४४१) **श्रुवः शृ च** । ३ । १ । ७४ ।

श्नुधातो श्नुप्रत्ययस्तत्सन्नियोगेन धातो 'शृ' इत्यादेशश्च ।

(४४२) **तुदादिभ्यः शः** । ३ । १ । ७७ ।

(४४३) **रुधादिभ्यः श्नम्** । ३ । १ । ७८ ।

(४४४) **तनादिकृञ्भ्य उः** । ३ । १ । ७९ ।

(४४५) **क्र्यादिभ्यः श्ना** । ३ । १ । ८१ ।

(४४६) **स्तनम्नु-स्तुनम्नु-स्कनम्नु स्कुनम्नु-स्कुञ्भ्यः-श्नुश्च** । ३ । १ । ८२ ।

एभ्य श्ना श्नुश्च स्त ।

(४४७) **अदिप्रभृतिभ्यः शपः** (लुक्) । २ । ४ । ७२ ।

अदादिभ्य. शपो लुक् स्यात् ।

(४४८) **जुहोत्यादिभ्यः श्लुः** । २ । ४ । ७५ ।

एभ्य शप श्लु । श्लुरपि लोपपर्याय इत्युक्तम् (२३०) । इह किल भूवादिरदादिर्दिवादिरित्यादिर्देशगणात्मको धातुपाठ । तत्राष्टानामदादिप्रभृतीना लुगाद्यपवादविधानाद् भूवादिचुराद्यो परिशिष्टयो सनाद्यन्ताना चौत्सर्गिक शप् । तत्र चुरादीना 'णिच्' इत्यन्योऽप्यस्ति स्वार्थिक प्रत्यय इति विशेष । विकरणप्रत्ययास्ततद्गणनिर्देशपूर्व शार्दूलविक्रीडितेन सगृह्णाति प्रक्रियासर्वस्वकारो भट्टनारायण —

"भूवादौ शबदादिकेषु लुगपि, श्लु स्याज्जुहोत्यादिषु,
श्यन् दैवादिकधातुषु, श्नुरपिच स्वादौ, तुदादौ तु श ,
रुध्यादौ श्न,-मथो तनादिषु भवेदुप्रत्यय , कर्यादिषु
श्ना स्यात् स्वार्थिकणिच्चुरादिषु, पुनस्तत्रापि शब्नायते ॥"

विकरणप्रत्ययथोग न सर्वे धातुभ्य उत्पद्यमाना प्रत्यया अपेक्षन्ते । इह हि प्रातिपदिकेभ्यो यथा सुपस्तद्धिताश्चेति द्विविधा प्रत्यया भवन्ति, तथा धातुभ्योऽपि तिङ कृतश्चेति द्विविधा प्रत्यया । तेषु येषा विकरणमपेक्षित ते सार्वधातुकसज्ञा कृता , येषा तु विकरणमनपेक्षित ते आर्द्धधातुकसज्ञा । लिडाशीर्लिङौ वर्जयित्वा तिङ सर्वेऽपि सार्वधातुका । कृत्सु भूयिष्ठा आर्द्धधातुका , विरळास्तु सार्वधातुका शकारेण अनुबन्धेन चिह्निता । प्रक्रियार्थ पुनराचार्यो विकरणेष्वपि सार्वधातुकार्द्धधातुकभेद करोति । तथा चात्र सूत्राणि —

(४४९) **तिङ् शित् सार्वधातुकम्** । ३ । ४ । ११३ ।

धातोर्विहितेषु प्रत्ययेषु तिङशितश्च सार्वधातुकसज्ञा ।

(४५०) **आर्द्धधातुकं शेषः** । ३ । ४ । ११४ ।

तिङ्शिद्भ्योऽन्ये धातोर्विहिता प्रत्यया आर्द्धधातुकसज्ञा ।

(४५१) **लिट् च** । ३ । ४ । ११५ ।

लिट् तिङप्यार्द्धधातुक एव ।

(४९२) **लिङाशिषि** । ३ । ४ । ११९ ।

आशीरर्थको लिङपि तथा । 'कर्त्तरि शप्' इति कर्त्तरि प्रयोग एव शबादीन्युक्तानि विकरणानि । भावकर्मप्रयोगयोस्तु —

(४९३) **सार्वधातुके यक्** । ३ । १ । ६७ ।

भावकर्मार्थयो प्रयुक्ते सार्वधातुके परे धातोर्यक् प्रत्यय स्यात् । शप इव यक्कोऽपवादविधानाभावात् भावकर्मणोर्न विकरणभेद । दशानामपि गणाना यगेक एव विकरणम् ।

अथ केषुचिल्लकारेषु प्रयोगभेदेऽपि गणभेदेऽप्यभिन्नानि सन्ति विकरणानि । तथाहि—

(४९४) **स्यतासी लृलुटोः** । ३ । १ । ३३ ।

लृ इति लृङ्लृट्योर्ग्रहणम् । धातोर्लृङ्लृटो परयो स्यप्रत्यय, लुटि तासिप्रत्ययश्च । कर्त्तरि शबादिना भावकर्मणोर्यकश्चायमपवाद ।

(४९५) **च्लि लुङि** । ३ । १ । ४३ ।

लुङ्येव च्लिप्रत्यय स्यात् ।

(४९६) **च्लेः सिच्** । ३ । १ । ४४ ।

च्ले सिजादेश स्यात् ।

(४९७) **शल इगुपधादनिटः क्सः** । ३ । १ । ४५ ।

शलन्तादिगुपधादनिटस्तु धातोश्च्ले क्स इत्यादेश, न तु सिच् ।

(४९८) **णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्** । ३ । १ । ४८ ।

णिप्रत्ययान्तेभ्यो धातुभ्य श्रिद्रुस्रुभ्यश्च चङ्, अय कर्त्तरिप्रयोग एव, न तु भावकर्मणोरिति विशेष । अतो भावकर्मणोरौत्सर्गिक सिच्, तदपवाद क्सश्चैव ।

(४९९) **अस्यतिवक्तिख्यातिभ्योऽङ्** । ३ । १ । ५२ ।

एभ्य. कर्त्तर्यङ् । भावकर्मणोस्तु सिजेव ।

(४६०) **लिपिसिचिह्श्च** । ३ । १ । ५३ ।

एभ्योऽपि कर्त्तर्यङ् ।

(४६१) **पुषादिद्युताद्यृलृदितः परस्मैपदेषु** । ३ । १ । ५५ ।

पुषादिभ्य (दिवाद्यन्तर्गणभूतेभ्य), द्युतादिभ्य (भूवाद्यन्तर्गणभूतेभ्य) ऋदिद्भ्यश्च धातुभ्य परस्मैपदलुङि अङ् स्यात् । 'परस्मैपदेष्वि'त्युक्ते कर्त्तर्येवेति स्पष्टम् ।

(४६२) **इरितो वा** । ३ । १ । ५७ ।

इरितो धातो परस्मैपदे लुङश्चङ्वा ।

लुङ्येव चत्वारि विकरणानि—सिच्, क्स, चङ्, अङ् चेति । तत्र क्ससिचौ सार्वत्रिकौ, चङडौ कर्त्तर्येव । लिट आर्द्धधातुकत्वान्न तत्र विकरणप्रत्यय ।

लकाराणा विकरणव्यवस्थामधो लिखिता पट्टिका दर्शयति—

लकार	कर्तरि प्रत्यय		भावकर्मणो प्रत्यय.	
लट लङ् लोट् लिङ्	सामान्य	शप्	यक्	
	अदादौ	लुक्		
	जुहोत्यादौ	श्लु		
	दिवादौ	श्यन्		
	स्वादौ	श्नु		
	तुदादौ	श		
	रुधादौ	श्नम्		
	तनादौ	उ		
	क्रयादौ	श्ना		
लृट लृङ	स्य		स्य	
लुट्	तासि		तासि	
लुङ्	शल इगुपधादनिट	क्स	शल इगुपधादनिट	क्स.
	पुषादिद्युता द्यृदित	अङ्	शेषात्	सिच्
	ण्यन्तात्	चङ		
	शेषात्	सिच्		

श्लोकेनापि सग्रह —

लङ्लोटोरपि लङ्लिङोर्विकरण शप् सापवादाष्टक
स्यात् कर्त्तर्यथ भावकर्मविषये त्वेको यगेवात्र हि ।
स्यस्तासिर्ल्रुयुगे च लुट्यपि भवेत् कर्त्रादिभेद विना
लुङ्येव क्ससिचावुभौ. पुनरिमौ चङ्ङड्युतौ कर्त्तरि ॥

उपकरणैरेभिर्बद्धपरिकरास्तिङन्तप्रक्रिया दर्शयिष्याम । तत्र प्रथम कर्त्तरि लकाराणा—तत्राप्यादौ विकरणभेदवन्तो लट्—लङ्—लोट्—लिङ आदीयन्ते—

I भूवादिगण ।

१ भू सत्तायाम् ।

ङित्त्वानुदात्तेत्त्वयोरभावाच्छेषत्वेन 'शेषात् कर्त्तरि ' (४२१) इति परस्मैपदम् । वर्त्तमानकालावच्छिन्नाया भवनक्रियाया विवक्षाया 'वर्त्तमाने लट्' (४२७) इति लट् । भू+लट् इति स्थिते अकारटकारयोरितोर्लोपेन भू+ल् इति जायते । तत कर्त्तुर्युष्मदोऽस्मदस्तद्विशिष्टस्य वा एकत्वादिविवक्षाया ल् इत्यस्य यथायथ तिप्तसादय आदेशा प्रवर्त्तन्ते । भू+ति इति स्थिते 'कर्त्तरि शप्, (४३७) इति शप् विकरणप्रत्ययो मध्ये परापतति, भू+अति इति जातम् । शप शित्वेन सार्वधातुकत्वात् ।

(४६३) **सार्वधातुकार्द्धधातुकयोः** (गुण) । ७ । ३ । ८४ ।

सार्वधातुकार्द्धधातुकयो *परयोरिगन्तस्याङ्गस्य गुण' । इति 'भू' इतीगन्ताङ्गस्य गुणे भो+अ+ति—सन्धिकार्येण अवादेशेन भवति इति रूपसिद्धि । एवमेव भवतः इति च । बहुवचने भू+अन्ति इति स्थितम् ।

(४६४) **झोऽन्तः** (प्रत्ययादे) । ७ । १ । ३ ।

प्रत्ययादिभूतस्य झस्य 'अन्त्' इत्यादेश' स्यात् ।

---

* इक एव हि गुणवृद्धयोर्योग्यता । अतो गुणवृद्धिविधौ विशेषानिर्देशाभावे 'इक' इति स्थाना योग्यतया स्वयमुपतिष्ठते । परिभाषित चाचार्येण—'इको गुणवृद्धी' ॥ १ । १ । ३ । इति । एव इक इति लब्धम्

(४६५) **अदभ्यस्तात्** । ७ । १ । ४ ।

अभ्यस्तात्तु धातो परस्य झस्य अत् इत्येवादेश ।

(४६६) **आत्मनेपदेष्वनतः** । ७ । १ । ५ ।

आत्मनेपदेषु (अनत) अकारभिन्नात् वर्णात् परस्य च अत् इत्येवादेश, अकारात्तु अन्त् इति । एव च झकारोच्चारण अन्त् अत् इत्यनयोरन्यतरस्य श्रवणार्थम् । अनेन प्रकृते झित्यय 'अन्ति' इति रूपमापद्यते । भव+अन्ति इति स्थिते 'अतो गुणे' (३१३) इत्यनेन पररूपे कृते भवन्ति । भवसि, भवथः, भवथ; 'भवामि' इति स्थिते—

(४६७) **अतो दीर्घो यञि** (सार्वधातुके) । ७ । ३ । १०१ ।

अदन्ताङ्गस्य दीर्घ स्यात् यञादौ सार्वधातुके परे । इति दीर्घ, **भवामि भवावः भवामः** इति रूपाणि ।

स	भवति	त्व	भवसि	अह	भवामि
तौ	भवत	युवा	भवथ	आवा	भवाव
ते	भवन्ति	यूय	भवथ	वय	भवाम

इति समानाधिकरणस्य कर्तुरनुरोधेन प्रयोग ।

अथ लङ्—

पूर्ववल्लस्य तिबादय, पूर्ववदेव शपि कृते भवति इत्येव रूपमपि प्राप्नोति । तत्र विशेष—

(४६८) **लुङ्लङ्लृङ्क्ष्वडुदात्तः** । ६ । ४ । ७१ ।

एषु लकारेषु परेष्वङ्गस्य अडागम स्यात् । अङ्गस्येत्यधिकारालब्धम् ।

(४६९) **आडजादीनाम्** । ६ । ४ । ७२ ।

अजादीना धातूना आट् इत्यागम, न तु अट् इति ।

(४७०) **न माङ्योगे** । ६ । ४ । ७४ ।

माङ् इति निपातस्य योगे तु अडाटौ न । इति प्रकृते धातोरडागम; स च टित्त्वादाद्यावयव । अभवति इति जातम् ।

इह हि लकारागा तिबादय प्रत्यया साधारण्येनोक्ता। सर्वेषा-मप्येकरूपाश्चेत् प्रत्यया कथ भेदप्रतीति स्यात्? अतस्तेषु तेषु लकारेषु ते ते भेदा आदिष्टा। प्रकरणपूरणार्थं सूत्रक्रमानुरोधार्थं च तानादेशान् सर्वान् मध्ये प्रदर्श्य प्रकृता लड्प्रक्रिया पूरयिष्याम। उक्ता हि सुप्स्वपि 'अतो भिस ऐस्' 'जश्शसो शि' इत्यादय आदेशा, तद्वदिह तिङ्-ष्वपि।

तिङामादेशा

(४७१) **टित आत्मनेपदानां टेरे**। ३। ४। ७९।

टितो लकारस्य यान्यात्मनेपदानि तेषा टेरेकारादेश स्यात्। यथा—

त	= ते		(थास्	= से)	इ = ए
आताम्	= आते		आथाम	= आथे	वहि = वहे
झ	= झे		वम	= वे	महि = महे

(४७२) **थासः से**। ३। ४। ८९।

टितो लकारस्य य थास् तस्य से इत्यादेश। तथैव दर्शितं चेदमुपरि।

(४७३) **लिटस्तझयोरिरेच्**। ३। ४। ८१।

स्पष्ट सूत्रम्। शित्त्वादनेकाल्त्वाच्च सर्वादेशौ। तथा च आत्मने-पदलिट ए आते इरे इति प्रथमपुरुष, मध्यमोत्तमौ तु टित्सामान्यस्यैव।

(४७४) **परस्मैपदानां णलतु, सुस्-थ लथुस,-णल्वमाः**। ३। ४। ८२।

लिट परस्मैपदानाम्—

णल् अतुस् उस्। थल् अथुस् अ। णल् व म इत्यादेशा।

एषु णकारो लकारश्च इतौ।

(४७५) **विदो लटो वा**। ३। ४। ७३।

'विद ज्ञाने' इति धातोर्लिटोऽपि णलादय आदेशा वा स्यु'। पर-स्मैपदानामित्येव।

(४७६) **अवः पञ्चानामादित आहो अवः**। ३। ४। ८४।

ब्रूव्यक्तायां वाचीति वातोर्लट परस्मैपदानामादित पञ्चाना वचनानामपि णलादय आदेशा वा स्यु , तत्सन्नियोगेन ब्रूधातो 'आह' इत्यादेशश्च ।

(४७७) **लोटो लङ्वत्** । ३ । ४ । ८५ ।

लोटो लड इव कार्याणि भवन्ति । तामाद्यादेशा सलोपश्च लङ्कार्य वक्ष्यते , तद्वय लोटोऽपि स्यादित्यर्थ । विशेषमप्याह—

(४७८) **एरुः** । ३ । ४ । ८६ ।

लोट इकारस्य उकार आदेश स्यात् । यथा-तिप् = तुप् , झि = ।

(४७९) **सेर्ह्यपिच्च** । ३ । ४ । ८७ ।

लोट से (सिप) हि इत्यादेश स्यात् , अपिच्चायमादेश स्यात् इह हि स्थानिधर्मा आदेशमपि सक्रामन्ति , तस्मात् सिप पित्त्वेन हिरपि पित्कार्य लभेतेति तन्निषिध्यते । अपित्कार्य च ङिद्भद्भावो गुणनिषेधफलको वक्ष्यते ।

(४८०) **मेर्निः** । ३ । ४ । ८९ ।

लोटो मे (मिप) नि इत्यादेश । 'सेर्हि ' इति 'मेर्नि' इति च इकारान्तयोरादेशयोर्विधानात् 'एरु ' (४७८) इत्युकारादेशोऽनयोर्न भवति । यद्युत्वमनयोरपि विवक्षितमभविष्यत्तर्हि सु नु इत्युकारान्तावेवाकरिष्यदिमावाचार्य । इकारान्तौ पठित्वा पुनरुकारान्तकरण हि वृथा क्लेश स्यात् ।

(४८१) **आमेतः** । ३ । ४ । ९० ।

लोट एकारस्य आम् आदेश । पूर्वसूत्रेषु परस्मैपदा स्थानिन , अत्रोत्तरसूत्रे चात्मनेपदा । आत्मनेपदे हि लोटष्टित्त्वकारत्वात् 'टित आत्मनेपदाना टेरे '-(४७१) इति सर्वे प्रत्यया एकारान्ता भवन्ति, तस्यैकारस्येदानीं लोटि पर आमादेशो विधीयते । अस्याप्यपवादमाह—

(४८२) **सवाभ्यां वामौ** । ३ । ४ । ९१ ।

लोट् सकारवकाराभ्या परस्य एकारस्य तु 'व' 'अम्' इति

यथासङ्ख्यमादेशौ । 'से' इति प्रत्यय एव सकार, तथा 'ध्वे' इत्यत्रैव वात् पर । एवञ्च लोट से=स्व, ध्वे=ध्व च भवतीति सिद्धम् ।

(४८३) **आडुत्तमस्य पिच्च** । ३ । ४ । ९२ ।

लोडुत्तमस्य 'आट्' इत्यागम, स पिच्च स्यात् । आडागमी पित्त्वधर्मं गुणनिषेधनिमित्तत्वाभावरूप लभेतेत्यर्थ । विशेषकथनात्सामान्यादथमागम उभयोरपि पदयोर्भवति ।

(४८४) **एत ऐ** । ३ । ४ । ९३ ।

लोडुत्तमस्य एकारस्य ऐकार आदेश । अयमात्मनेपद एव सम्भवति । एवञ्च 'आमेत' इत्यादिभिश्चतुर्भि सूत्रै आत्मनेपदलोट एते आदेशा साधिता—

ताम् आताम् झाम् । स्व आथाम् ध्वम् । ऐ आवहै आमहै ।

सुखार्थमत्र कारिका—

तामाता झा लोट्प्रथम, स्वाथाध्वमिति मध्यम ।
ऐ आवहै आमहै इत्युत्तमश्चात्मनेपदे ॥

परस्मैपदेऽपि लडादेशानुक्त्वा कारिका करिष्यामः ।

(४८५) ***नित्यं ङितः** (स उत्तमस्य लोप) । ३ । ४ । ९९ ।

ङिल्लकारस्य य उत्तमपुरुषस्तस्य लोप स्यात् । तथा च वस्=व, मस्=म ।

(४८६) **इतश्च** । ३ । ४ । १०० ।

ङिल्लकाराणा इकारस्य च लोप । तथा च ति=त्, झि=झ्, सि=स् । मिपस्त्वादेशो वक्ष्यते—

(४८७) **तस्थस्थमिपां तां-तं-त-आमः** । ३ । ४ । १०१ ।

ङिल्लकारस्यैव । तस्=ताम्, थस्=त, थ=त, मि=अम् । एव च परस्मैपदे लङ्लिङ्लुङ्लृङामादेशा एते—

ति=त्, तस=ताम्, झि=झ्, सि=स्, थस्=तम्, थ=त, मि=अम्, वस=व, मस=म ।

---

* म ये सूत्रपक्षक लेटकार्यविधायकमित्युपेक्षितम् ।

* अदतामन् प्रथम म्यादसतमतेत्यत्र म-यम पुरुष ।
अमवामोत्तम एव ङित्सु परस्मैपदऽत्वूर्वा ॥

'लोटो लङ्वत्' (४७७) इत्युक्तेरुत्तमसकारलोप, तान्तन्तामादेशाश्च लोटोऽपि भवन्ति 'एरु सेर्ह्यपिच्च' 'मेल्ले' 'आडुत्तमस्य पिच्च' इति विशेषाश्च तस्य । एनिर्विविभि सम्पन्ना लोडादेशा —

ति = तु, तस् = ताम्, झि = झु, सि = हि, थस् = तम्, थ = त, मि = आनि, वस् = आव, मस् = आम ।

तु ताम् अन्तु, हि-त त, आनि लोट्यावाम परे पदे ।

(४८८) **लिङः सीयुट्** । ३ । ४ । १०२ ।

लिङादेशाना सीयुडागम स्यात् । अयमात्मनेपदस्यैव । परस्मैपदस्य तु अन्यो विधीयते—

(४८९) **यासुट् परस्मैपदेषूदात्तो ङिच्च** । ३ । ४ । १०३ ।

परस्मैपदलिङादेशाना यासुट् इत्यागम, स च ङित्स्यात् । ङित्त्वस्य गुणनिषेधादि फल वक्ष्यते—आदेशानप्युक्त्वा रूपाणि दर्शयिष्याम ।

(४९०) **किदाशिषि** । ३ । ४ । १९० ।

आशीरर्थकस्य लिङो यासुटागम कित् स्यात्, न तु ङित् । 'वचिस्वपियजादीना किति' (९१९) इति सम्प्रसारण, 'जाग्रोऽविचिण्णल्ङित्सु' (७९४) इति गुणश्च कित्त्वस्य विशेषत्रयोजनम् । आगमस्य कित्त्वङित्त्वादिरतिदिष्ट आगमिन प्रत्ययस्योपकरोति । आगमा हि प्रत्यायानामवयवभूता ।

(४९१) **झस्य रन्** । ३ । ४ । १०५ ।

(४९२) **इटोऽत्** । ३ । ४ । १०६ ।

उभयमपि लिङ एव ।

---

* अदन्तविकरणस्थल एव विकरणेन सह श्रूयत इत्येव । परमार्थतस्तु आयमकार विना आदेशा इति पूर्वपद्धत्या सिद्धम् ।

(४९३) **सुट् तिथोः** । ३ । ४ । १०६ ।

'ति' *इतीकार उच्चारणार्थः । लिङ्सम्बन्धिनोस्तकारथकारयोः सुट् इत्यागम स्यात् । त, आताम, थास्, आथाम् इति चतुर्ष्वादिमनेपदेषु तथौ विधेते । तौ सुडागमेन स्त, आस्ता, स्थास्, आस्थाम् इति रूपमापद्येते । सुडागमस्तथयोर्वर्णयो सीयुडागम समग्रस्य प्रत्ययस्येति विषयभेदात् सुट्सीयुटोर्नोत्सर्गापवादभाव । एव च उभयमपि युगपत् समाविशति । आगमादेशाभ्या विकृता आत्मनेपदलिङादेशा अधो दर्शिता —

सीयस्त सीयास्ताम् सीयरन् । सीयस्थास् सीयास्थाम् सीयध्वम् । सीय सीवहि सीमहि ।

अत्र यकारादे सयोगस्यासावात् व्यञ्जनादिप्रत्ययेषु तस्य लोपो भवति । तथा च सूत्रम्—

(४९४) **लोपो व्योर्वलि** । ६ । १ । ६६ ।

वकारयकारयोर्लोप स्यात् वलि परे । वल्प्रत्याहारश्च यकारवर्जितानि व्यञ्जनानि क्रोडीकरोति । अनेन यकारवकारादि सयोगो यकारेण सहैवेत्यायाति । यलोपेऽस्मिन् कृते पूर्वोक्ता प्रत्यया —

सीस्त सीयास्ता सीरन् । सीस्यास् सीयास्थाम् सीध्वम् । सीय सीवहि सीमहि ।

इति रूपाणि प्रतिपद्यन्ते ।

परस्मैपदे तु यासुडागमस्य सकारेणैव कार्यनिर्वाहात् सुडागमो नापेक्ष्यते । यासुडागमे कृते परस्मैपदलिङ प्रत्यया —

यास त् = (यात्)	यास्स् = यास्	यासम्
यास्ता	यास्तम्	यास्व
यासुस्	यास्त	यास्म

* उच्चारणार्थे तावदकार आसज्यत इतीयमाचार्यस्य शैली । सेह किमिति परित्यक्तेति विचारणाया, यदीह तयोरिति सूत्रयेत् 'न इति विशिष्टस्य ग्रहणमित्यपि सम्भाव्येत । तदा चात्मनेपदप्रथमैकवचनस्य परस्मैपदमध्यमबहुवचनस्य च सुडिति स्यात् । निशेरिति सूत्रणे तु यद्यपि तिपो ग्रहण किं न स्यादित्यापादनापतति तथापि तस्य ग्रहणे भूयादल्यत्र स्कोरिति लोपेनाश्रवणमेव सुट स्यादिति पर्यालोचनया सा निवर्त्तयितु शक्येति भगवतो हृदयमिति प्रतिभातीति दिक् ।

लिङो ङित्त्वात् 'तस्थस्थमिपा तान्तन्ताम', उत्तमस्य सलोपश्च । झेर्जुसादेश उत्तरसूत्रेण । अत्र 'यास्त्' इत्यत्र सयोगान्तलोपस्यापवाद सयोगादिलोपो भवति । तथा च सूत्रम्—

(४९५) **स्कोः संयोगाद्योरन्ते च** । (झलि लोप) । ८ । २ । २९ ।

झलि परे पदान्ते च सयोगादिभूतयो सकारककारयोर्लोप स्यात् । इति *सकारलोपेन 'यात्' इत्येव प्रथमपुरुषैकवचनम् ।

उभयोरपि पदयोरुक्ता प्रत्यया आशीर्लिङ एव; विधिलिङस्तु आगमाना सकारलोप कथित । तथा हि—

(४९६) **लिङः सलोपोऽनन्त्यस्य** । (सार्वधातुके) । ७ । २ । ७९ ।

सार्वधातुकलिङ सकारस्य लोप स्यात्. न तु अन्त्यस्य (सकारस्य) अनेन †सार्वधातुकलिङि यासुट्सीयुट्सुटा सकारा लुप्यन्ते । लुप्तसकारा विधिलिङ्प्रत्यया —

परस्मैपदे			आत्मनेपदे		
यात्	यास्	या	ईत	ईथास्	ईय
याताम्	यातम्	याव	ईयाताम्	ईयाथाम्	ईवहि
¶युस्	यात	याम	ईरन्	ईध्वम्	ईमहि

याद्याता युस् प्रथमे यास्यात यात मध्यमे पुरुषे।
या याव याम चान्त्ये विधिलिङ आशीर्लिङस्तु ससकारा ॥

इटोऽकारो झस्य रश्च भेदो लिङ्यात्मनेपदे ।
सीयुट्सुटावागमौ च सलोपश्चानयोर्विधौ ॥

अथ तिङादेशेषु क्रमप्राप्त प्रसङ्गादनुकृष्टश्च झेर्जुसादेश —

---

* अत्र यास्त् इति स्थिते हल परत्वात् हल्ङ्यादिलोपो नाशङ्क्य । आगम-सकारस्य प्रत्ययाङ्गत्वेन तिपोऽपृक्तत्वाभावात् ।

† विधिलिङेव सार्वधातुकलिङित्युच्यते । 'लिङाशिषि' (४७२) इति आशीर्लिङ आर्द्धधातुकत्व विहितम । विध्याद्यर्थेषु तु लिङ् 'तिङ्शित्सार्वधातुक' इति सार्वधातुकमेव ।

¶ (५०२)— तस सूत्रेणात्र पररूपे आकारलोप ।

(४९७) **झेर्जुस्** । ३।४।१०८।

लिङो झेर्जुसादेश स्यात्। जकार इत्, सकारस्तु 'न विभक्तौ तुस्मा' इति नेत्।

(४९८) **सिजभ्यस्तविदिभ्यश्च** । ४।४।१०९।

अलिङर्थमारम्भ। सिच् इति लुङो विकरणम्, अभ्यस्त द्विरुक्तो धातु, विद ज्ञाने इत्यय धातु, एभ्यश्च झेर्जुस्। ङित इत्येव। तेन लङ्लुङोरेवायम्।

(४९९) **आतः** । ३।२।११०।

आदन्ताद्धातो परस्य ङिता झेर्जुस्। लङ्लुङोरेव आकारात् परो झिस्समभवति। तत्र 'गातिस्थाघुपाभूभ्य ' इति सिचो लुग्विधानात् लुङि झेरनेन जुस् भवति। लङि तु उत्तरसूत्रेण विकल्प्यते।

(५००) **लङः शाकटायनस्यैव** । ३।४।१११।

आदन्तात् झेर्जुस् पूर्वसूत्रोक्तो लङि शाकटायनस्यैव मते, नान्येषा, तथा च विकल्प।

(५०१) **द्विषश्च** । ३।४।११२।

द्विष परस्य लङो झेर्जुस् शाकटायनमते।

जुस्प्रस्तावाज्जुसि परे विहित सन्धिविशेषोऽप्यत्रोच्यते॥

(५०२) **उस्यपदान्तात्** (आत् पररूपम्) । ६।१।९६।

अपदान्तादवर्णादुसि परे पररूपमेकादेश स्यात्। यथा—

या + उस् = युस्। दर्शित च तथा (४९६) तमसूत्रे।

अत्र लङ्प्रक्रिया दर्शयितु प्रवृत्ता वय लङादेशाना तिबादीना विकारवर्णनप्रस्तावेन लकारान्तरेष्वपि तादृशान् विकारान् कथयन्तो मध्ये सुदूर विक्षिप्ताः स्म। अथ प्रसक्तानुप्रसक्तान्निवृत्त्य मार्गमनुसराम। धातोरडागमेन मध्ये शपो विकरणप्रत्ययस्य प्रक्षेपेण च 'अभवति' इत्यवस्थामारूढाया रूपनिष्पत्तौ लुङ्प्रक्रियामुज्झितवन्तो वयम्। 'नित्यं ङित' (४८९) 'इतश्च' 'तस्थस्थमिपा तान्तन्ताम' इति त्रिभिः सूत्रै-

रुक्षेषु सलोप-इलोप-तान्तन्तामादेशेषु कृतेष्विष्टरूपसिद्धि —**अभवत् अभवतां अभवन्; अभवः अभवतं अभवत; अभवं अभवाव अभवाम** । प्रथमपुरुषबहुवचने अभवन्ति = **अभवन्त्** = **अभवन्** इति इलोपानन्तर संयोगान्तलोप । 'न माङ्योगे' (४७०) अडागमप्रतिषेधात् मास्म भवत् मास्म भवता इत्यादीनि रूपाणि ।

लोट्—शप्गुणावादेशौ 'भव' इति जाते अङ्गे, ४८७ तमसूत्रनिरूपिताना तुतामन्तु इति प्रत्ययाना योगेन प्रथमपुरुषे रूपसिद्धि — **भवतु भवतां भवन्तु**, मध्यमे तु भव हि इति स्थिते अनुपदमुच्यमानेन सूत्रेण हिलोपे—**भव भवतं भवत। भवानि भवाव भवाम** । अथ हिलोप विदधाति —

(५०३) **अतो हेः** (लुक्) ।६।४।१०५।

अदन्तादङ्गात् परस्य हेर्लुक्स्यात् ।

(५०४) **उतश्च प्रत्ययादसंयोगपूर्वात्** ।६।४।१०६।

असंयोगपूर्वो य उकारस्तदन्तात् प्रत्ययात् परस्य च हेर्लुक् । श्नुविकरणा उविकरणाश्च धातवोऽत्रोदाहरणम् । सुनुहि=सुनु, कुरुहि=कुरु इति । पूर्वसूत्रस्य शप्—श्यन्—शविकरणा उदाहरणम् एव च हे पञ्चसु विकरणेषु हिलोपस्य प्रसक्तिरस्ति । हिप्रसङ्गादन्योऽपि तस्य विकार उच्यते ।

(५०५) **हुझल्भ्यो होर्धिः** ।६।४।१०१।

जुहोतेर्झलन्तेभ्यश्च धातुभ्यो हेर्धिरादेश । जुहुधि, अद्धि, रुन्धि इति लुक्—श्लु-श्नविकरणा अस्योदाहरणम् । एव च हे लुक् धि इत्यादेशश्च भवत ।

अथ प्रकृतस्य लोट प्रथममध्यमैकवचनयोरर्थविशेषे रूपाविशेष उच्यते । 'आशिषि लिङ्लोटौ' (४३९) इति लिङ्लोटोराशीरर्थेऽपि प्रयोग उक्त । तत्र आशिषि लिङ् आर्धधातुकत्वात् (४५२) लकारान्तरमिव सर्वत्र भिन्नरूप , आशिषि लोटस्तु परस्मैपदे तुह्यो. पर रूपभेद. । तथा च सूत्रम्—

(५०६) **तुह्योस्तातङाशिष्यन्यतरस्याम्** । ७ । १ । ३५ ।

आशिषि 'तु' 'हि' इति लोट्प्रथममध्यमैकवचनयोस्तातङ् इत्यादेशो वा । अनेकाल्त्वात् सर्वादेश । ङित्त्व तु गुणवृद्धिप्रतिषेधादिकार्यान्तरविधानार्थकम् । "यद्यपि 'ङिच्च' (३२) इत्ययमपवादस्तथाप्यनन्यार्थङित्त्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनङकारे तातङि मन्यर प्रवृत्त परेण 'अनेकाल्शित्सर्वस्य' (३४) इत्यनेन बाध्यते । इहोत्सर्गापवादयोरपि समबलत्वात्" । तातङि अकारो ङकारयोजनार्थक, 'तात्' इत्येवादेशस्वरूपम् । अनेन **भवतु भवतात् भव भवतात्** इत्याशिषि रूपद्वयम् ।

लिङ्—इलोप तान्तन्तामादेश-यासुडागम-सलोपै 'यात्' 'याता' इत्यादय प्रत्यया । शप्-गुणावादेशा 'भव' इति प्रकृति । **भव+यात्** इति स्थिते—

(५०७) **अतो येयः** (सार्वधातुकस्य) । ७ । २ । ८० ।

अदन्ताङ्गात् पर सार्वधातुकावयवो 'या' इत्यय 'इय्' इति भवति, 'या' इत्यस्य इय् इत्यादेश इत्यर्थ । 'इय' इत्यकार उच्चारणार्थ । **भव+इयत्** इति जाते 'लोपो व्योर्वलि' (४९४) इति यलोपे **भवेत्** इति रूपसिद्धि । उसि अमि च पर यकार श्रूयते, अन्यत्र लुप्यते । **भवेतां भवेयुः । भवेः भवेतं भवेत । भवेयं भवेव भवेम ।**

(१) एध वृद्धौ, अनुदात्तेत् ।

लट्—'अनुदात्तङित' इत्यात्मनेपदम् । 'टित आत्मनेपदानां टेरे' (४७१) इत्येत्वेन ते आते अन्ते इत्यादय प्रत्यया, शप् विकरणप्रत्यय । एध्+अ+ते=एधते । एध+आते इति स्थिते—

(५०८) **सार्वधातुकमपित्** (ङित्) । १ । २ । ४ ।

अपित् सार्वधातुक ङित्स्यात् । यस्मिन् सार्वधातुके पकार इत् न दृश्यते स सर्वोऽपि ङिद्वेदित्तन्य । ङित्त्वप्रयोजनानि गुणवृद्धिप्रतिषेध-

सम्प्रसारणादीनि बहुविधानि । अत एव 'सेर्ह्यपिच्च' (४७९) इत्यत्र सिप आदेशत्वेन सिद्ध हे पित्त्व निषिद्धम् । पित्त्वाभावे च अपित्सार्वधातुकत्वेन हि ङित्त्वति । एवमेव लोडुत्तमस्य अपित्त्वेन प्राप्त ङित्त्व निषेद्धु 'आडुत्तमस्य पिच्च' (४८३) इत्यपूर्व पित्त्व विहितम् । इत्थ च सार्वधातुकेषु पित्त्वङित्त्वे विरुद्धधर्मौ । तथा च भाष्यवचन—'पिच्च ङित्च, ङित्च पित्च' इति । अनेन लोटि पितस्तिप आदेशोऽपि तातङ् ङित्कार्यमेव लभते, न पित्कार्यम् । पित्त्वस्यैवमतीव कार्यकारित्वात् पितसार्वधातुकाना वसन्ततिलकेन सग्रह —

लिङ् ही विनैकवचनानि पदे परार्थे
लोडुत्तमो विकरण प्रथम च पित्स्यात् ।
लोडुत्तमान्य इह नास्ति पिदन्यवर्गे
ङित्स्यान्न पित्, पिडपि नैव ङिदित्यवेहि ॥

एवमात्मनेपदे लोडुत्तमवर्ज सर्वेऽपि लादेशा ङित । ङित्त्वेन च 'आता' आथाम्' इति द्विवचनयोराद्याकारस्य इयादेशो भवति । तथा च 'अतो येय' (५०७) इत्यत उत्तर सूत्रम्—

(५०९) **आतो ङितः** । ७ । २ । ८१ ।

अत परस्य ङित्प्रत्ययसम्बन्धिन आकारस्य इयादेश । 'लोपो व्योर्वलि' इति यलोप । आते = इते । अनेन अकारान्तेषु विकरणेषु आताम् = इताम्; आथाम् = इथाम् । अनयोरेव हि प्रत्यययोरकारोऽस्ति ।

प्रकृते **एध + आते = एध + इते = एधेते** । 'झोऽन्त.' 'अतो गुणे', **एधन्ते** । **एधसे एधेथे एधध्वे**। **एध + ए** इत्यत्रापि 'अतो गुणे' (३१३) इति पररूप वृद्धेरपवाद । **एधे एधावहे एधामहे** ।

लङ्—धातोरजादित्वात् अडागमस्यापवाद आडागम । आडागमे च—

(५१०) **आटश्च** (अचि वृद्धि) । ६ । १ । ९० ।

आटोऽचि परे वृद्धिरेकादेश. । इति गुणापवादो वृद्धि· । प्रकृते

धातोरेजादित्वेन 'वृद्धिरेचि' इत्येव यद्यपि वृद्धिर्भवति तथापि आ+इच्छत् =ऐच्छत् इत्यादिवत् इगादिषु धातुषु वृद्ध प्रयोजनम्। **ऐधत ऐधेतां ऐधन्त। ऐधथाः ऐधेथां ऐधध्वं। ऐधे ऐधावहि ऐधामहि।**

लोट्—**एधतां एधेतां एधन्तां। एधस्व एधेथां एधध्वं। एधै एधावहै एधामहै।**

लिङ्—४९६-तमसूत्रे निरूपितानां लुप्तसकारसीयुडागमयुक्ताना प्रत्ययाना योगे कृतशपो धातोर्यथायथ रूपाणि—**एधेत एधेयातां एधेरन्। एधेथाः एधेयाथां एधेध्वम्। एधेय एधेवहि एधेमहि।**

(३) **शुच शोके। उदात्तेत्**

अत्र हि 'सार्वधातुकार्द्धधातुकयो' (४६३) इति सूत्रेण इगन्तस्य गुण उक्त, इगुपधस्यापि स उच्यते उत्तरसूत्रेण—

(५११) **पुगन्तलघूपधस्य च। ७।३।८६।**

पुगन्तस्य लघूपधस्य चाङ्गस्य इको गुण स्यात् सार्वधातुकार्द्धधातुकयो। 'अर्त्तिह्री' इति पुगागमो णौ विधीयते, तत्प्रकरणे पुगन्तमुदाहरिष्याम। पूर्वसूत्रेण इगन्तस्य प्रकृतसूत्रेण लघूपधस्य (अर्थाद्ह्रस्वेगुपधस्यैव) च गुणो विधीयते, सार्वधातुकार्द्धधातुकाभ्या च धातोर्विहिता कृत्स्ना प्रत्यया व्याप्ता। अतश्च इगन्तस्य ह्रस्वेगुपान्त्यस्य च धातो प्रत्ययमात्रे गुण इत्यायात लघूपधस्येत्युक्तेरिगुपान्त्यस्य गुणस्तु दीर्घोपधस्य नेति भेद।

लट्—शोचति	शोचत	शोचन्ति	इत्यादि।
लङ्—अशोचत	अशोचता	अशोचन्	,,
लोट्—शोचतु शोचतात्	शोचता	शोचन्तु	,,
लिङ्—शोचेत्	शोचेता	शोचेयु	,,

(४) **स्मृ स्मरणे। परस्मैपदी।**

स्मरति—अस्मरत्—स्मरतु—स्मरेत्।

(५) **वृतु वर्त्तने। अनुदात्तेत्।**

वर्त्तते—अवर्त्तत—वर्त्तता—वर्त्तेत।

(६) राज दीप्तौ । स्वरितेत् ।

स्वरितत्वादुभयपदी । राजति—राजते । अराजत्—अराजत । राजतु—राजता । राजेत्—राजेत ।

(७) यह मर्षणे । अनुदात्तेत् ।

(५१२) धात्वादेः षः सः । ६ । १ । ६४ ।

धात्वादेः षकारस्य स स्यात् ।

(५१३) णो नः । ६ । १ । ६५ ।

धात्वादेर्णकारस्य नकार स्यात् । इह धात्वादिसकारस्य उपसर्गस्थ निमित्तमादाय षत्वसाधनार्थं कैश्चिद्धातव षकारादय पठ्यन्ते । षत्व हि 'आदेशप्रत्यययो' इत्यधिकारात् आदेशस्य प्रत्ययावयवस्य वा परं भवतीत्यादेशत्वसम्पादनाय षोपदेशतया पठित्वा पुन षस्य सत्व विधीयते । एवमेव 'उपसर्गादसमासेऽपि णोपदेशस्य' (३९८) इति व्यवस्थार्थ णकारादि पाठ । एवञ्च षादिर्णादिश्च पाठो निमित्तसद्भावे षत्वणत्वयोर्ज्ञापनाय । उच्चारणशैथिल्येन धातुपाठस्याविश्वास्यत्वात् णोपदेशषोपदेशयोर्विवेक क्रियते—

षोपदेशा स्युरेकाच स्वरदन्त्यान्तसादय ।
स्वदति-स्विद्यति स्वञ्ज-ष्वक्ष स्रि-स्वपयोऽपि च ॥
वर्जयेत् सेक्सृपौ स्तृस्तृस्त्यायतीन् सूसूजावपि ।
णोपदेशास्त्वनर्द् नाटि-नाथ्-नाध्-नन्द्-नक्ष-नृ नृत ॥

अत्र स्वरान्त इति दन्त्यान्त इति च सकारस्य विशेषण, न तु धातो । आद्यसकारस्य परो वर्णो यदि स्वरस्तवर्ग्यो वा भवति तर्हि स धातु षोपदेश इत्यर्थ । निषेवते, विषहते, अभिष्टौति इत्यादीन्युदाहरणानि षत्वप्रकरणे द्रष्टव्यन्ताम् ।

सहते—असहत—सहता—सहेत—इत्यादिरूपाणि ।

(८) णीञ् प्रापणे ।

त्रित्वादुभयपदी । णस्य नत्व-नयति-ते । अनयत्-त । नयतु-ता । नयेत्-त इत्यादि ।

(2) VI तुदादिगणः, शविकरणः ।

अत्र धातुपाठे दृष्ट गणक्रममुल्लङ्घ्य प्रक्रियानुरोधान्नव कोऽपि क्रम आदृत । इह हि 'अतो येय' 'आतो ङित' 'अतो हे' 'आत्मनेपदेष्वनत' इति इयादेश हिलोप-अतादेशा अद्न्ताङ्गस्य विशेषा दृष्टा । अतोऽकारान्तविकरणका गणा प्रथममुपात्ता ।

(१) तुद व्यथने । स्वरितेत् ।

'श' इति विकरणस्य शित्त्वेन सार्वधातुकत्वात् पित्त्वाभावाच्च 'सार्वधातुकमपित्' (५०८) इति ङित्त्वम् । ङित्त्वाच्च ।

(५१४) ङिच्च (इको न गुणवृद्धी) । १ । १ । ५ ।

किति ङिति च प्रत्यये परे इको गुणवृद्धी न स्त । इति सूत्रेण गुणनिषेध । वस्तुत इह अकारात्मकस्य विकरणद्वयस्य कल्पन अनुबन्धभेदेन प्रक्रियाभेदसम्पादनार्थमेव । पित्त्वेन ङित्त्वाभावादेकत्र गुण, पित्त्वाभावेन ङित्त्वादन्यत्र न गुण । येषु गुण इष्ट ते भूवादिरिति, येषु नापेक्षितो गुणस्ते तुदादिरिति च अकारविकरणकान् धातून् द्विधा विभज्य 'शप्' 'श' इति सार्वधातुक विकरणप्रत्यय पितमपित च कृतवानाचार्य इति सारम् ।

तुदति–ते । अतुदत्–त । तुदतु–ताम् । तुदेत्–त ।

(२) ओ व्रश्चू छेदने ।

ओकार ऊकारश्चेतौ । धातुषु बहुविधा अनुबन्धा प्राक्परस्ताच्च तत्तत्कार्यार्थमायोज्यन्ते, ते तत्र तत्र वक्ष्यन्ते धातुप्रकरणान्ते च सग्रहीष्यन्ते । अत्र सम्प्रसारणकरणार्थं तद्विधायकानि सूत्राणि व्याख्यायन्ते—

(५१९) वचिस्वपियजादीनां किति (सम्प्रसारणम्) । १ । २ । १९ ।

वच परिभाषणे, ष्वञो वच, स्वप शयने, भूवाद्यन्तर्गणो यजादि इत्येतेषा किति प्रत्यये परे सम्प्रसारण स्यात् । यथा—क्तप्रत्यये—

वच–उक्त, स्वप–सुप्त, यज–इष्ट, वप–उप्त, वेञ्–उत, ह्वे हूत, वद–उदित इत्यादि ।

(५१६) ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च ।६।१।१६।

ग्रहादीना नवाना किति ङिति च प्रत्यये सम्प्रसारणम् । यथा—

धातुः—किति-(क्त)	ङिति (श्ना)	वश —उशित	उशन्ति (झि)
ग्रह —गृहीत	गृह्णाति	व्यच—विचित	विचति (श)
ज्या —जीन	जिनाति	वश्च —वृक्ण	वृश्चति (श)
वय —ऊयतु (लिटि)		प्रच्छ—पृष्ट	पृच्छति (श)
व्यध —विद्ध	विध्यति (श्यन्)	भ्रज्ज—भृष्ट	भृज्जति (श)

(५१७) लिट्यभ्यासस्योभयेषाम् ।६।१।१७।

वच्यादीनां ग्रह्यादीनां च लिटि अभ्यासस्य सम्प्रसारणम् । यथा—

वच —उवाच	यज —इयाज	ग्रह —जग्राह	वयि —उवाय
स्वप—सुष्वाप	वप —उवाप	ज्या —जिज्यौ	व्यच—विव्याच
इत्यादि		इत्यादि	

प्रकृते शप्रत्ययस्य ङित्त्वात् 'ग्रहि ....' इति सम्प्रसारणम् । 'न सम्प्रसारणे सम्प्रसारणम्' (२९६) इति नियमात् परस्य रेफस्यैव तत्, न तु वकारस्य । रेफस्य च ऋकारः सम्प्रसारणम् ।

वृश्चति वृश्चत वृश्चन्ति । अवृश्चत् । वृश्चतु । वृश्चेत् इत्यादि ।

(३) मुच्लृ मोक्षणे । स्वरितेत् ।

मुचादीनां नुमागमविधानात् नुम्प्रकरणमारभ्यते—

(५१८) इदितो नुम् धातोः ।७।१।५८।

इदितो धातो प्रत्ययमात्रे नुमागम स्यात् । यथा—

टु णदि समृद्धौ (शप्) — नन्दति, नन्दत इत्यादि ।
लुटि स्तेये (शप्) — लुण्टति, लुण्टित ,,

(५१९) शे मुचादीनाम् ।७।१।५९।

मुचादीनां शप्रत्यये परे नुमागम । यथा—

मुच् — मुञ्चति	लिप — लिम्पति
सिच — सिञ्चति	कृत — कृन्तति
विद्लृ— विन्दति	खिद — खिन्दते

प्रत्यु—('शे' किं?) मुक्त, सिक्त, विण्ण, लिप्त, कृत्त, खिन्न ।
मुचसिचलिपलुम्पतय खिदविद, कृतपिंशती मुचादि स्यात् ।

(५२०) **मस्जिनशोर्झलि** ।७।१।६०।

इह श्रुत्वादिभिरिष्टरूपसिद्धिर्भविष्यतीति कृत्वा मस्जभ्रस्जब्रस्ज इत्यादिवत् धातवः सोपधाः पठ्यन्ते; संयोगादिलोपसपादनार्थश्चाय क्रैश. । मज्ज नश इत्यनयो. झलादौ प्रत्यये नुम् । यथा—

तुमुन् प्रत्यये — मङ्क्तु नङ्क्तु

(५२१) **रभेरशब्लिटोः** (अचि) ।७।१।६३।

रभधातोरजादौ प्रत्यये नुम्, न तु शपि लिटि च । यथा—
(धञि) आरभ ; (अनीयरि) आरभणीयम्; (ल्युटि) आरभणम् ।
प्रत्यु—(शपि) आरभते , (लिटि) आरेभे ।

(५२२) **लभेश्च** ।७।१।६४।

पूर्ववदशब्लिटोरचि नुम् । यथा—
(ण्वुलि) लम्भक । शपि तु लभते । लिटि च लेभे ।

(५२३) **आङो यि** ।७।१।६५।

आङुपसृष्टस्य लभेर्यादौ प्रत्यये नुम् । यथा— आलम्भ्या बडवा ।

(५२४) **उपसर्गात् खल्घञोः** ।७।१।६७।

यथा—(खलि) सुप्रलभ, दुष्प्रलभ । (घञि) प्रलम्भ , विप्रलम्भ ।
उपसर्गाभावे तु लाभ ।

(५२५) **न सुदुर्भ्यां केवलाभ्यां**।७।१।६८।

यथा—सुलभ, दुर्लभम् । 'केवलाभ्या' इत्युक्ते सुप्रलम्भम् ।

(४) **कॄ विक्षेपे** । परस्मैपदी ।

कॄ+अ+ति इति स्थिते विशेषविधिः—

(५२६) **ऋत इद्धातोः** ।७।१।१०।

ऋकारान्तस्य धातोरङ्गस्य इकारादेशः स्यात् । 'उरण् रपरः' इति रपरोऽयं 'इर्' इति भवति । 'सार्वधातुकार्द्धधातुकयो'-रिति गुणः परत्वादिदं बाधते; अतः किङ्त्वेवास्यावकाशः । अनेन किरति, किरतः, किरन्ति इत्यादि ।

(५२७) **उपधायाश्च** । ७ । १ । १०१ ।

उपधायाश्च ऋकारस्य इत् । यथा—

कृत—कीर्तयति ।

(५२८) **उदोष्ठ्यपूर्वस्य** । ७ । १ । १०२ ।

ओष्ठ्यवर्ण पूर्वो यस्मात् स ओष्ठ्यपूर्व । ओष्ठ्यपूर्व—ऋकारान्तस्य तु धातोरङ्गस्य उत् । यथा—

पॄ—पिपर्त्ति पिपूर्त्त पिपुरति । (श्नविकरणम्)

मॄ—सुमूर्वति (सनि दीर्घेण मॄ इति भवति धातु)

(५) **पृङ् व्यायामे** । प्रायेण व्याङ्पूर्वः ।

(५२९) **रिङ् शयग्लिङ्क्षु** (ऋत) । ७ । ४ । २८ ।

श, यक्, लिङ्, एषु परेषु ऋदन्ताङ्गस्य रिङ्, ङित्त्वादन्त्यादेश । व्यापृ + अ + ते = व्यापि + अ + ते, 'अचि श्नुधातु ' (२६४) इतीयङि, **व्यापियते** । **व्यापियत—व्यापियेताम्** इत्यादि । एव दृङ्धातोराङ्पूर्वस्य **आद्रियते आद्रियेते** इत्यादि ।

(४) **IV दिवादिगणः, श्यन्विकरणः** ।

१. **दिवु क्रीडाविजिगीषादिषु** । परस्मैपदी ।

दिव् + य + ति इति स्थिते दीर्घो विधीयते—

(५३०) * **र्वोरुपधाया दीर्घ इकः** (धातो पदस्य) । ८ । २ । ७६ ।

रेफान्तस्य वकारान्तस्य च धातो उपधाया इक दीर्घ स्यात् पदान्ते । यथा—

गॄ—गी गिरौ गिर । गीर्भ्यां गीर्भि गीर्षु ।

धुर्वी—धू धुरौ धुर । धूर्भ्यां धूर्भि धूर्षु ।

पॄ—पू पुरौ पुर । पूर्भ्यां पूर्भि पूर्षु ।

आशास्—आशीः आशिषौ आशिष, आशीर्भ्यां आशी षु ।

वकारान्तो धातुरुदाहार्यो नास्ति, तद्ग्रहणमुत्तरार्थम् ।

---

* इद सूत्रकरणे व्याख्येय सूत्र सौकर्यादत्रैवोपात्तम् ।

(५३१) **हलि च** । ८ । २ । ७७ ।

हलि च परे रेफवान्तस्य धातोरुपधाया इको दीर्घ । यथा—

स्तृ—स्तीर्ण. शॄ—शीर्ण. गॄ—गीर्ण. दिव्—दीव्यति सिव्—सीव्यति अपदान्तार्थं सूत्रमिदम् ।

(५३२) **उपधायां च** । ८ । २ । ७८ ।

धातोरुपधाभूतौ यौ रेफवकारौ हल्परौ तयोरुपधाया इको दीर्घ. ।

यथा—मुर्च्छ—मूर्च्छत । धुर्व धूर्वति ।

वोपध उदाहार्यो नास्ति । इत्थ च वकारस्य हलि चेति सूत्रे एव फलम् ।

(५३३) **न भकुर्छुराम्** । ८ । २ । ७९ ।

रेफवकारान्तस्य भस्य कुर् छुर् इत्येतयोश्च दीर्घो न । यथा—

धुर् + य = धुर्य । कुर् + यात् = कुर्यात् । छुर् + यात् = छुर्यात् ।

हलि चेति दीर्घेण प्राप्ते

दीव्यति दीव्यन दीव्यन्ति, अदीव्यत्—दीव्यतु—दीव्येत् ।

२ **शमु उपशमे । परस्मैपदी ।**

शम्यति इति स्थिते दीर्घविधि —

(५३४) **शमामष्टानां दीर्घः श्यनि** । ७ । ३ । ७४ ।

शमादीना अष्टाना धातूना दीर्घ श्यनि । यथा—

शमु—शाम्यति	दमु—दाम्यति	भ्रमु—भ्राम्यति	क्रमु—क्राम्यति
तमु—ताम्यति	श्रमु—श्राम्यति	क्षमु—क्षाम्यति	मदी—माद्यति

(५३५) **ष्ठिवुक्लम्याचमां शिति** । ७ । ३ । ७४ ।

एषा शित्प्रत्यये परे दीर्घ· । यथा—

ष्ठिवु—ष्ठीव्यति । (शप्) क्लमु—क्लामति । (शप्) आचमु—आचामति (आडोऽभावे तु चमति)

क्रमधातोरनेनैव श्यन्यपि दीर्घे सिद्धे शमादौ पाठ· कार्यान्तरार्थः ।

(५३६) **क्रमः परस्मैपदेषु** (शिति) । ७ । ३ । ७६ ।

क्रमधातो. परस्मैपदे शिति प्रत्यये दीर्घः यथा—

---

(१) शमित्यष्टान्यो घिनुणिति घिनुण् कार्यान्तरम् ।

क्रामति—(शप्) अक्रामत्—क्रामतु ।
प्रत्यु—('परस्मैपदेषु' किं ?) आक्रमते सूर्य ।

(९३७) **इषुगमियमां छः । ७ । ३ । ७७ ।**

एषां छकारोऽन्तादेश स्यात् शिति प्रत्यये । यथा—

इष—इच्छाया (श) इच्छति—ऐच्छत् ।
गमॢ—गतौ (शप्) गच्छति—अगच्छत् ।
यम— यच्छति—अयच्छत् ।

शितोऽन्यत्र तु गमिष्यति इत्यादि ।

(९३८) **पा-घ्रा-ध्मा-स्था-म्ना-दाण-दृश्य-र्त्ति-सर्त्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः । ७ । ३ । ७८ ।**

एषा एते आदेशा. शिति प्रत्यये । तत्र सर्त्ते· धौ इत्यादेशो वेगितायां गतावेव इति नियमः । पा इति पा पाने इत्यस्यैव ग्रहणम् । न तु पा रक्षण इत्यस्य । यथा—

धातु.	आदेशः	उदा.	धातु·	आदेशः	उदा.
पा	— पिब	— पिबति	दृशिर्	— पश्य	— पश्यति ।
घ्रा	— जिघ्र	— जिघ्रति	ऋ	— ऋच्छ	— ऋच्छति ।
ध्मा	— धम	— धमति	सृ	— धौ	— धावति ।
स्था	— तिष्ठ	— तिष्ठति	शद	— शीय	— शीयते ।
म्ना	— मन	— मनति	षदॢ	— सीद	— सीदति ।
दाण्	— यच्छ	— यच्छति			

प्रत्यु—('शिति' किं ?) पान, घ्राण, ध्मान इत्यादि ।

अस्य सूत्रस्य श्लोकेनाप्युदाहरणम्—

व्याघ्रो जिघ्रति, सीदतीह सदन धावन् वनान्निस्सरन्
ऋत्वा प्राच्छति निर्भय, विधमति ध्मातेषु शङ्खेष्वयम् ।
स्थाने तिष्ठत, पेयमाशु पिबत, म्नाय मनन्तु द्विजा
शस्त्र यच्छत दत्तलक्ष्यमिह भो., शादोऽस्य सशीयताम् ॥

वस्तुतः पाघ्रादय. पिबजिघ्रादयश्च खिलधातवः । एके आर्द्धधातुकमात्रविषयाः, अन्ये सार्वधातुकमात्रविषया इति । नष्टाश्वदग्धरथन्यायेन पाणिनिरेषां स्थान्यादेशभाव कल्पयति ।

(५३९) **ज्ञाजनोर्जा ।७।३।७९।**

ज्ञा–अवबोधने (श्ना) जनी प्रादुर्भावे (श्यन्) इत्यनयोः जा इत्यादेश शिति प्रत्यये । यथा—

ज्ञा–जानाति–जानीते । | जन–जायते–अजायत–जायता–जायेत ।

(५४०) **प्वादीनां ह्रस्वः ।७।३।८०।**

क्र्यादे. अन्तर्गणभूताना प्वादीना शिति परे ह्रस्व । यथा—

पू — पुनाति । अन्यत्र पूतम् ।
लू — लुनाति । ,, लूनम् ।
स्तृ — स्तृणाति । ,, स्तृतम् ।

पूञ्-लूञ्-स्तॄञ्-कॄञ्-वॄञ्-धूञ्-शॄ-कॄ-भॄ-मॄ-दॄ-जॄ-ऋ-गॄ-ज्या-री-ली-व्ली-ह्री. एते प्वादय ।

(३) **सो अन्तकर्मणि । परस्मैपदी ।**

सो+य+ति इति स्थिते–

(५४१) **ओतः श्यनि ।७।३।७१।**

ओकारान्तस्याङ्गस्य लोप श्यनि; 'अलोऽन्त्यस्य' इत्योकारस्यैव लोप ।

स्यति स्यत स्यन्ति । अस्यत्–स्यतु–स्येत् ।

एवं 'दो अवखण्डने' इत्यस्य

यति — अयत् — यतु — येत् ।

(4) V **स्वादिगणः, श्नुविकरणः ।**

श्नुप्रत्ययस्य विकरणस्य ङित्त्वात् प्रकृतेर्द्धातोर्न्व गुण ; परस्मैपदैकवचनाना पित्त्वेन ङित्त्वाभावात् तेषु श्नुप्रत्ययान्तस्याङ्गस्य गुण । **सुनोति सुनुतः । सुनु+अन्ति** इत्यत्र 'अचिश्नु ....' इतीयङ् प्राप्ते तदपवादो यण् विधीयते । तथाहि—'एरनेकाचोऽसयोगपूर्वस्य' इति प्रकरणे—

(५४२) **हुश्नुवोः सार्वधातुके ।६।४।८७।**

हुधातो श्नुप्रत्ययान्तस्यानेकाचोऽसयोगपूर्वस्याङ्गस्य च यण् स्याद् जादौ सार्वधातुके। **सुन्वन्ति । सुनोषि सुनुथः सुनुथ । सुनोमि।**

(९४३) **लोपश्चास्यान्यतरस्यां म्वोः ।६।४।१०७।**

अस्येत्यनेन 'उतश्च प्रत्ययादसयोगपूर्वात्' इति पूर्वसूत्रोक्त परामृश्यते । असयोगपूर्वो य प्रत्ययोकार. तदन्तस्याङ्गस्य लोपो वा मकारवकारयो परयो । अनेन **सुन्वः, सुनुवः--सुन्मः, सुनुमः** इति रूपद्वयम् । **सुनुते सुन्वाते** । अदन्ताङ्गस्याभावात् झस्य अतादेश । (४६६) **सुन्वते। सुनुषे सुन्वाथे, सुनुध्वे । सुन्वे सुन्वहे, सुनुवहे सुन्महे, सुनुमहे ।**

उक्त उकारलोप करोतौ नित्यो विधीयते--

(९४४) **नित्यं करोतेः ।६।४।१०८।**

उत प्रत्ययस्य असयोगपूर्वस्य म्वोर्लोप उक्त, करोतेर्विषये नित्य स्यात् । यथा--

कुर्वः, कुर्मः । कुर्वहे, कुर्महे ।

(९४५) **ये च ।६।४।१०९।**

यकारादौ प्रत्यये परे च करोतेरुक्तो लोप· । यथा--**कुर्यात् ।**

(५४६) **अत उत् सार्वधातुके ।६।४।११०।**

उप्रत्ययान्तस्य करोतेरकारस्य स्थान उकार. स्यात् ङिति सार्वधातुके।

यथा--कुरुत, कुर्वन्ति, कुर्यात् ।

अथ प्रकृतो धातुरुदाह्रियते --

लङ्--असुनोत्, असुनुताम्, असुन्वन् ।
असुनुत असुन्वाताम् असुन्वत ।
लोट्--सुनोतु सुनुताम्, सुनुताम्, सुन्वन्तु
सुनु । सुनवानि सुनुताम्, सुन्वाताम्, सुन्वताम्,
सुनुध्व । सुनवै, सुनवावहै ।
लिङ्--अदन्ताङ्गस्याभावात् इयादेशो न ।
सुनुयात्, सुनुयाताम्, सुनुयुः । सुन्वीत.

(२) आप्लृ व्याप्तौ । परस्मैपदी ।

आप्नोति आप्नुत । सयोगपूर्वत्वात् उवङेव । आप्नवानि । आप्नव , आप्नुम । सयोगपूर्वत्वात् अत्रापि न विकल्प । अत एव न हिलोपश्च, आप्नुहि ।

(३) अशू व्याप्तौ । आत्मनेपदी ।

अश्नुते अश्नवाते अश्नवते आश्नुत आश्नवाता आश्नवत अश्नुता अश्नुवीत ।

(4) V तनोत्यादिगणः, उविकरणः ।

(१) तनु विस्तारे करणे च । उभयपदी ।

पूर्ववत् उप्रत्ययान्तस्याङ्गस्य पित्त्वात् गुण ।

तनोति तनुत तन्वन्ति । तनोषि तनुथ तनुथ । तनोमि तन्व , तनुव । तन्म , तनुम । तनुते तन्वाते तन्वते । अतनोत् अतनुता अतन्वन् । अतनुत अतन्वाता अतन्वत । तनोतु तनुतात् । तनु तनुतात् । तनवानि । तनुता तन्वाता तन्वताम् । तनुष्व । तनवै , तनवावहै । तनुयात् तनुयाता । तन्वीत तन्वीयताम् ।

(२) डुकृञ् करणे । उभयपदी ।

शित्त्वाभावात् उप्रत्यय आर्द्धधातुकम् । अतश्च तस्य न ङित्त्व । ङित्त्वाभावाच्च धातोर्गुण । तिप्सिप्मिप्सु उप्रत्ययस्य च गुण , करोति । 'अत उत्सार्वधातुके' (५४६) इति ङित्सु द्विबहुवचनेषु गुणाकारस्य उदादेश , कुरुत कुर्वन्ति । करोषि कुरुथः कुरुथ । करोमि कुर्वः कुर्म । 'नित्य करोते' (५४४) इति नित्य उकारप्रत्ययस्य लोप । कुरुते कुर्वाते कुर्वते । कुरुषे कुर्वाथे कुरुध्वे । कुर्वे कुर्वहे कुर्महे । अकरोत् अकुरुत । करोतु । कुरु । करवाणि । कुरुतां कुर्वातां कुर्वतां । कुरुष्व । करवै करवावहै । 'ये च' (५४५) इत्युलोप । कुर्यात् कुर्यातां कुर्यु । कुर्वीत कुर्वीयातां कुर्वीरन् ।

(5) IX क्र्यादिगणः श्नाविकरणः ।

(१) क्रीञ् द्रव्यविनिमये । उभयपदी ।

क्रीणाति । क्रीणा + तस् इत्यत्र आकारस्य ईकारो विधीयते— अत्र 'अत उत्सार्वधातुके' इति हि सूत्र व्याख्यातेष्वन्तिम, व्याख्येयं च

सूत्र तस्मादेकेनैव सूत्रेणान्तरितम्। अतो मध्यगतमप्रकृतमपि तत् व्याख्यायैव प्रस्तुतोपयोगि सूत्र व्याख्यास्याम ।

(५४७) **श्नसोरल्लोपः** । ६ । ४ । १११ ।

श्नम् इति विकरणप्रत्ययस्य असधातोश्च अकारस्य लोप सार्वधातुके क्ङिति। **भिनत्ति भिन्तः। अस्ति स्तः** इति तत्तत्प्रकरणयोरुदाहरिष्याम ।

(५४८) **श्नाभ्यस्तयोरातः**। ६ । ४ । ११२ ।

श्ना इति विकरणप्रत्ययस्य अभ्यस्तानामङ्गानां च आकारस्य लोप स्यात् सार्वधातुके क्ङिति। अनेन प्रकृते (क्रीणा + तस् इत्यत्र) लोपे प्राप्ते तस्यापवाद —

(५४९) **ई हल्यघोः** । ६ । ४ । ११३ ।

हलादौ तु सार्वधातुके क्ङिति श्नाभ्यस्तयोरात ईत् स्यात्। घुसंज्ञस्य त्वभ्यस्तस्य नेदमिति निषेध । अतश्च श्नाभ्यस्तयोराकारस्य अजादौ क्ङिति सार्वधातुके लोप, हलादौ तु ईत्वमिति व्यवस्था। अनेन प्रकृते **क्रीणीतः** इति रूपासिद्धि । अन्तीत्यजादौ प्रत्यये लोप, **क्रीणन्ति। क्रीणासि क्रीणीथः क्रीणीथ। क्रीणामि क्रीणीवः क्रीणीमः**। एकवचनेषु तु ङित्त्वाभावादुभयमपि नास्ति। आत्मनेपदलटि सर्वत्र ङित्त्वाद्यथायथम् ईत्वलोपौ—**क्रीणीते क्रीणाते क्रीणते; क्रीणीषे क्रीणाथे क्रीणीध्वे। क्रीणे क्रीणीवहे क्रीणीमहे। अक्रीणात् अक्रीणीताम् अक्रीणन्। अक्रीणीत अक्रीणाताम् अक्रीणत। क्रीणातु, क्रीणीतात् क्रीणीतां क्रीणन्तु। क्रीणीहि। क्रीणानि क्रीणीतां क्रीणातां क्रीणताम्। क्रीणीष्व। क्रीणै क्रीणावहै। क्रीणीयात् क्रीणीयातां क्रीणीयुः।**

यासुटो ङित्त्वात् सर्वत्र ईत्त्वम्। **क्रीणीत क्रीणीयातां क्रीणीरन्।**

प्रसङ्गवशात् हलि सार्वधातुके ङिदित्यनुशिष्टा अन्येऽपि विशेषविधयोऽत्रैव कथ्यन्ते---

(५५०) **इदरिद्रस्य** । ६ । ४ । ११४ ।

हलादौ ङिदति सार्वधातुके दरिद्रातेरिदादेश । **दरिद्राति दरिद्रितः** । अभ्यस्तत्वात् प्राप्तस्य ईत्वस्यापवाद ।

(५५१) **भियोऽन्यतरस्याम्** । ६ । ४ । ११५ ।

भीधातोरुक्तनिमित्ते इत्व वा । तेन **बिभेति बिभीत** इति रूपद्वयम् ।

(५५२) **जहातेश्च** । ६ । ४ ११५ ।

ओ हाक् त्यागे इति धातोश्च इत्व वा । तेन **जहिहि जहीहि** इति रूपद्वयम् ।

(५५३) **आ च हौ** । ६ । ४ । ११६ ।

जहातेर्हौ परे इत्व ईत्व आत्व च वा स्यात् । तेन **जहिहि जहीहि जहाहि** इति रूपत्रयम् ।

(५५३) **लोपो यि** । ६ । ४ ११७ ।

यादौ ङिदति सार्वधातुके जहातेराकारस्य लोपः । तेन यासुटि **जह्यात्** इति रूपम् ।

(२) मृद क्षोदे । परस्मैपदी ।

विकरणस्य ङित्त्वान्न गुण , **मृद्नाति मृद्नीतः मृद्नन्ति** । लोटि **मृद्नीहि** इति रूपे प्राप्ते–

(५५५) **हलः श्नः शानज्झौ** । ३ । १ । ८३ ।

हल परस्य श्नाप्रत्ययस्य शानच् इत्यादेश हौ परे । अनेन **मृद्नाहि** = **मृदानहि** । 'अतो हे ' (५०३) इति हिलोपेन **मृदान** इति रूप सिध्यति । एव **बध–बधान । मुष–मुषाण । स्तभ–स्तभान** इत्यादिषु हलन्तेषूह्यम् ।

(३) पूञ् पवने । उभयपदी ।

'क्र्यादीना ह्रस्व ' (५४०) इति ह्रस्व । **पुनाति-पुनीते** ।

(४) ग्रहू ग्रहणे । उभयपदी ।

'ग्रहिज्या ' (५१६) इति सम्प्रसारण । **गृह्णाति, गृह्णीत गृह्णीते । अगृह्णात् । अगृह्णीत । गृह्णातु, गृह्णीतां । गृह्णीयात्, गृह्णीत ।**

(6) VII रुधादिगणः । श्नम्विकरणः ।

(१) रुधिर् आवरणे । उभयपदी ।

'प्रत्यय' 'परश्च' इत्यधिकारेऽपि वर्त्तमाने मित्त्वस्य प्रयोजनान्तराभावात् 'मिदचोऽन्त्यात्' इत्यन्त्यादच पर क्रियते श्नम् प्रत्यय । रुनध् + ति इति स्थिते–

(५९६) झषस्तथोर्धोऽधः । ७ । २ । ४० ।

झष परयोस्तकारथकारयोर्धकार आदेश स्यात्, न तु दधाते । इति तकारस्य धकार –रुनध् + धि इति जातम् । 'झला जश् झशि' इति जश्त्वं, णत्व, **रुणद्धि** । रुनध्थस् इति जाते 'श्नसोरल्लोप' (५४७) इति डित्सु अल्लोप, **रुन्धः** * **रुन्धन्ति** । **रुणत्सि रुन्धः रुन्ध** । तथोर्द्धत्वविधानात् प्रथममध्यमयोर्द्विवचने तुल्य रूपम् । **रुणद्धि रुन्ध्वः रुन्ध्मः** ।

डित्सु श्नसोरल्लोपविधानात् पित्स्वेव श्नमोऽकारस्य श्रवणम् । पितश्च तिप्सिप्मिपो लोडुत्तमश्चेति परिगणिता ।

रुन्धे रुन्धाते रुन्धते । (वर्त्त्व,) रुन्त्से रुन्धाथे रुन्ध्वे, रुन्वे रुन्ध्वहे रुन्ध्महे ।

अरुणध् + त् इत्यत्र हल्ङ्यादिलोप (२२२), जश्त्वचर्त्वे, **अरुणद् अरुणत् अरुन्धाम् अरुन्धन्** । दध्नोति वा रु । **अरुणः अरुणत् अरुन्धम् अरुन्ध । अरुणधम् अरुन्ध्व अरुन्ध्म । अरुन्ध अरुन्धाताम् अरुन्धत । अरुन्धाः । अरुन्धि ।**

रुणद्धु, रुन्धात् रुन्धा रुन्धन्तु । ('हझल्भ्यो हेर्धि' (५०५)) रुन्धि–रुन्धात्, रुन्ध रुन्ध, रुणधानि रुणधाव रुणधाम ।

रुन्धा रुन्धाता रुन्धता । रुन्त्स्व, रुणधै रुणधावहै रुणधामहै ।

रुन्ध्यात् रुन्धीयाता रुन्ध्यु । रुन्धीत रुन्धीयाता रुन्धीरन् ।

एवमेव भिदिर् विदारणे, छिदिर् द्वैधीकरणे इत्यादय ।

---

* 'रुन्ध् ध' इति धकारद्वयमत्र वर्त्तते, तथाप्युच्चारणे न भेद । 'झरो झरि सवर्णे' (लोपो वा-८-४-६५) इत्येकस्य धकारस्य वैकल्पिको लोप ।

(२) पिष्लृ सञ्चूर्णने । परस्मैपदी ।

ष्टुत्व, **पिनष्टि** । अलोपे 'नश्चापदान्तस्य झलि' (९२) इत्यनुस्वार, **पिंष्टः पिंषन्ति** । पिनष् + सि इत्यत्र—

(५१७) **षढोः कः सि** । ८ । २ । ४१ ।

षकारढकारयो ककार आदेश सकारे परे । इति षकारस्य कत्वम् । पिनक्सि । सस्य कवर्गात् परत्वात् षत्व, पिनक्षि । **पिंष्टः पिंष्ठ** । **पिनष्मि पिंष्व पिंष्मः** । हल्ङ्यादिलोप, जश्त्वचर्त्वे, **अपिनट्, अपिनड् अपिंष्टां अपिषन्** । **अपिनट्-अपिनड्, अपिंष्टं अपिंष्ट** । **अपिनषं अपिंष्व अपिष्म** । **पिनष्टु, पिंष्टात् पिंष्टां पिषन्तु** । पिनष् + हि इत्यत्र हेर्धि, **पिनष् + धि**—ष्टुत्व,—**पिनष् + ढि**—'झला जश् झशि' इति जश्त्व, **पिनड् + ढि**—अनुस्वारपरसवर्णौ, **पिण्ढि** 'झरो झरि' इति वा लोप, **पिण्ढि** । **पिनषाणि पिनषाव पिनषाम** । **पिष्यात् पिष्यातां पिंष्यु** इत्यादि ।

(३) उन्दी क्लेदने । परस्मैपदी ।

उनन्द्+ति इति स्थिते

(५९८) **श्नान्नलोप** । ६ । ४ । २३ ।

श्नम परस्य नस्य लोप स्यात् । इति नलोपे **उनद् + ति=उनत्ति, उन्तः उन्दन्ति** । लङि **औनत् औनद्** । एव अञ्जूव्यक्तिमर्षणकान्तिगतिषु इत्यस्य **अनक्ति अङ्क्तः अञ्जन्ति** । लङि **आनक् आनग्** इत्यादि ।

(7) VIII **अदादिगणः** । **लुग्विकरणः** ।

(१) अद भक्षणे । परस्मैपदी ।

अत्ति अत्तः अदन्ति, अत्सि अत्थ अत्थ । अद्मि अद्व अद्म । लडि आद् + त् इति स्थिते वक्ष्यमाणेन 'अदः सर्वेषा' (५७८) इति सूत्रेण प्रत्ययस्य अडागमे—**आदत् आत्तां आदन्** । पूर्ववदाडागमे **आदः, आत्त आत्त । आदं आद्व आद्म** । लोटि **अत्तु, अत्तात् अत्तां अदन्तु, हद्धि**—**अद्धि । अदानि अदाव अदाम** । लिङि **अद्यात् अद्याताम् अद्यु** ।

(२) हन हिंसागत्यो । परस्मैपदी ।

हन्ति । हत इति रूपसिद्ध्यर्थमनुनासिकलोप उच्यते–

(५५९) **अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति** । ६ । ४ । ३७ ।

अनुदात्तोपदेशाना वनतेस्तनोत्यादीना चानुनासिकलोप स्यात् क्ङिति झलादौ प्रत्यये परे । अनुदात्तोपदेशेषु यम-रम-नम-गम हन मन्यतय एवानुनासिकान्ता । तनु क्षणु-क्षिणु ऋणु-तृणु-घृणु-वनु-मनु-इत्येते तनोत्यादय । तस्यस्थाना ङित्त्वात् झलादित्वाच्चानेन नकारलोप, **हत हथः हथ**। सिपि लोपस्यावकाशाभावान्नकारस्यानुस्वार, **हंसि** । उत्तमे तु न किञ्चित्, **हन्मि हन्वः हन्मः** । औ उपधालोप उच्यते—

(५६०) **गमहनजनखनघसां लोप क्ङित्यनङि** । ६ । ४ । ९८ ।

अचि उपधाया इति चानुवर्त्तते । गमादीनामुपधाया लोपः स्यात् क्ङित्यजादौ प्रत्यये न त्वङि । यथा—

धातु –लिटि	अतुस्	उस्	धातु –लिटि	अतुस्	उस्
गम —	जग्मतु	जग्मु	खन —	चख्नतु	चख्नु
हन —	जघ्नतु	जघ्नु	घस —	जक्षतु	जक्षु
जन —	जज्ञे	जज्ञाते			

प्रत्यु —अङि तु अगमत्—अघसत् ।

अनेन उपधालोपेन ह्नन्ति इति जाते कुत्वम् । तद्यथा—

(५६१) **हो हन्तेर्ञ्णिन्नेषु** (कु) । ७ । ३ । ५४ ।

हन्तेर्हस्य कुत्व स्यात् ञिति णिति च प्रत्यये नकारे च । अत्र नकारस्य परत्वात् कुत्व, हकारस्य चान्तरतम्यात् कवर्गो घकार । **घ्नन्ति** इति रूपम् । अनेन सूत्रेण वृत्रहन् शब्दस्य भसज्ञायामल्लोपेऽचि कुत्वेन **वृत्रघ्न वृत्रघ्ना वृत्रघ्ने** इत्यादि रूपाणि ।

(५६२) **अभ्यासाच्च** । ७ । ३ । ५५ ।

हन्तेर्हस्य कुत्वम् । तेन जघान जिघांसति इत्यादि सिध्यति ।

लङि तिप्सिपोर्हेर्ङ्यादिलोप । **अहन् अहताम् अघ्नन् । अहन् अहतम् अहत । अहनम् अहन्व अहन्म ।**

लोटि हौ हहि इति प्राप्ते

(५६२) **हन्तेर्जः** (हौ) । ६ । ४ । ३६ ।

इति जादेशेन **जहि** इति रूपम् । उत्तमे **हनानि हनाव हनाम ।**

लिङि यासुटो ङित्त्वेऽपि अजादित्वाभावान्नोपधालोप । झलादित्वाभावान्नापि नलोप । **हन्यात् हन्याताम्** इत्यादि ।

(३) द्विष अप्रीतौ । उभयपदी ।

द्वेष्टि-द्विष्ट , अद्वेट्-अद्विष्ट । क्ष्नौ 'द्विषश्च' (५०१) इति वा जुसादेश', अद्विषुः अद्विषन् । द्वेक्षि द्विष्ठः द्विष्मः द्वेषाणि-द्विष्टां द्विक्ष्व (षढो क सि) द्वेक्षि । द्विष्यात्-द्विषीत

(४) चक्षिङ् व्यक्तायां वाचि ।

चक्ष् + ते इत्यत्र सयोगादिलोपेन (४९५) ककारे छत्वे ष्टुत्वे च कृते **चष्टे चक्षाते चक्षते । अचष्ट ! चक्षां । चक्षीत ।**

(५) रुदिर् अश्रुमोचने । परस्मैपदी ।

(५६४) **रुदादिभ्यः सार्वधातुके** (वलादेरिट्) । ७ । २ । ७६ ।

रुद्, स्वप्, श्वस् अन्, जक्ष् एभ्य पञ्चभ्य परस्य वलादे सार्वधातुकस्य इडागम स्यात् ।

रोदिति रुदितः रुदन्ति । रोदिषि रुदिथः इत्यादि । लङि प्रक्रिया परस्ताद्-र्शयिष्याम ।

एव **स्वपिति, श्वसिति, अनिति, जक्षिति** । 'जक्षित्यादय षट्' इत्य-भ्यस्तत्वात् 'अदभ्यस्तात्' (४६५) इति झेरतादेश , **जक्षति** इति बहुवचनम् ।

(६) ईड स्तुतौ । (७) ईश ऐश्वर्ये । आत्मनेपदिनौ ।

(५६७) **ईशः से** । ७ । २ । ७७ ।

(५६६) **ईडजनोर्ध्वे च** । ७ । २ । ७८ ।

ईड ईश जन एषा से ध्वे इति सार्वधातुकयोरिडागमः स्यात् ।

यथा—

इश— ईष्टे ईशाते ईशते ईशिषे ईशिध्वे ।
इड—† ईट्टे ईडाते ईडते ईडिषे ईडिध्वे ।

जनधातोर्लिङ्गिकरणाभावात् छन्दस्येवोदाहरणम् । से ध्वे इति विकृतनिर्देशात् लङ्लोटोरेव इडागम । ईशधातोरपि ध्वे प्रत्यये इट इष्टत्वात् 'ईशीडजना सेध्वयो' इति सूत्रकरणमुचिततरमभावष्यत् ।

(८) यु मिश्रणामिश्रणयो । परस्मैपदी ।

(५६७) उतो वृद्धिर्लुकि हलि (सार्वधातुके पिति) । ७ । ३ । ८९ ।

उकारान्तस्याङ्गस्य वृद्धि स्यालुकि सति हलादौ पिति सार्वधातुके परे ।

यौति युत युवन्ति । यौषि । यौमि । अयौत् । यौतु । युयात् । एव णु स्तुतौ इत्यादय ।

(९) ऊर्णुञ आच्छादने । उभयपदी ।

(५६८) ऊर्णोतेर्विभाषा । ७ । ३ । ९० ।

ऊर्णोतेर्हलि पिति सार्वधातुके वा वृद्धि ।

ऊर्णौति, ऊर्णोति ऊर्णुत ऊर्णुवति, ऊर्णौषि ऊर्णोषि, ऊर्णौमि ऊर्णोमि ।

(५६९) गुणोऽपृक्ते । ७ । ३ । ९१ ।

अपृक्ते हलि पिति सार्वधातुके ऊर्णोतेर्गुण, न तु वृद्धि ।

और्णोत् और्णुताम् और्णुवन् । और्णो । ऊर्णौतु, ऊर्णोतु । ऊर्णुहि । ऊर्णवानि । ऊर्णुयात् । तद्धि ऊर्णुते । और्णुत ऊर्णुताम् ऊर्णुवीत ।

(५७०) तृणह इम् । ७ । ३ । ९२ ।

तृणह इति तृह हिंसायामिति रोधादिकस्य कृतश्नमो ग्रहणम् । तृणह् इत्यङ्गस्य इमागमो हलि पिति सार्वधातुके ।

तृह्+ति—श्नप्, तृणह्+ति—इमागम, तृणेह्+ति—ढत्व, तृणेद्+ति 'झषस्तथोर्धोऽध' (५९६), तृणेद्+धि—ष्टुत्व, तृणेद्+ढि—'ढो ढे लोप' (७९) तृणेद्धि । तृण्दः तृंदन्ति । तृणेक्षि । तृणोल्हि तृंद्धः तृंद्धः । अतृणेट् । तृणेदु, तृण्दात् । तृण्धि । तृणहानि तृणहाव

* 'ब्रश्चभ्रस्ज छशा प' (८७) इति षत्वे कृते ष्टुत्वम् ।

† 'खरि च' इति चर्त्वानन्तर ष्टुत्वम् । लडि ऐट् ऐशाता ऐशत, ऐट् ऐडाता

तृंह्यात् तृंह्याताम् इत्यादि । रुधादावुदाहर्तव्यो धातु सूत्रक्रमानुरोधादत्रोपात्त

(१०) ब्रूञ् व्यक्तायां वाचि । उभयपदी ।

(५७१) ब्रुव ईट् । ७ । २ । ८३ ।

ब्रू इत्यस्य हलादे पित सार्वधातुकस्य ईडागम ।

ब्रवीति ब्रूत ब्रुवन्ति । ब्रवीषि । ब्रवीमि ।

'ब्रुव पञ्चाना .' (४७६) इति प्रथमत पञ्चाना वचनानाम् आहादेशसान्नियोगेन णलतुसुस्थलथुसादेशा उक्ता । तेन

आह आहतु आहु । यलि—

(५७२) आहस्थः (झलि) । ८ । २ । ३५ ।

इति सूत्रेण थकारेऽन्तादेशे कृते चर्त्वेन तकार । आत्थ आहथु । शेषे ब्रथ । ब्रवीमि ब्रव ब्रम इत्येकमेव रूपम् । तङि ब्रते ब्रवाते ब्रवते इत्यादि । लङि अब्रवीत् अब्रूत । लोटि ब्रवीतु ब्रूताम् । 'हलादे. पित ' इत्युक्ते ब्रवाणि ब्रवाव । ब्रवै ब्रवावहै । लिङि ब्रूयात् ब्रुवीत ।

[(५७३) यङो वा । ७ । ३ । ९४ ।

यङ. परस्य हलादे पित सार्वधातुकस्य ईडागमो वा । उदाहरण -यङन्तप्रक्रियाम् ।]

(११) तु गतिवृद्धिहिंसासु । परस्मैपदी (सौत्र)

(१२) रु शब्दे ,

(१३) ष्टुञ् स्तुतौ उभयपदी ।

(५७४) तुरुस्तुशम्यमः सार्वधातुके । ७ । ३ । ९५ ।

सार्वधातुके इत्यनुवर्त्तमाने पुनस्तद्ग्रहण 'पिति' इत्यस्य निवृत्त्यर्थम् । एभ्य परस्य हलादे *सार्वधातुकस्य ईडागमो वा ।

---

* हलादौ पिति सार्वधातुके ईडागमो योज्य इत्यन्वय । एवमन्यत्रापि यागमविधिषु स्वसम्बन्धस्यान्वयो बोध्य । ऐकरूप्यार्थं षष्ठ्यन्तत्व कृत्वा व्याख्यान भविष्यति ।

स्तवीति / स्तोति	स्तुवीत / स्तुत	स्तुवन्ति ।	स्तवीषि / स्तोषि	स्तुवीय / स्तुथ	स्तवाय / स्तुथ
स्तवीमि / स्तौमि	स्तुवीव / स्तुव	स्तुवीम / स्तुम ।		अस्तावीत् / अस्तौत्	
स्तवीतु / स्तौतु	स्तुवीयात् / स्तुयात्	। तडयप्येव-	स्तुवीते / स्तुते	स्तुवाते स्तुवते ।	

इत्यादिरूपद्वय हलादिप्रत्ययेषूह्यम् । तु रु इत्यनयोरपि स्तुधातोरिव रूपाणि । शम्यमोस्तु आदादिकत्वाभावाच्छन्दस्येवोदाहरणम् ।

(१४) अस भुवि । परस्मैपदी ।

(५७५) **अस्तिसिचोऽपृक्ते** । ७ । ३ । ९६ ।

अस्ते सिजन्ताच्च परस्यापृक्तस्य हलादे सार्वधातुकस्य ईडागम । यथा—

अस—आसात् । आसी (लङ्) । कृ—अकार्षीत् (लुङ) ।

अस्ते शेषाणि रूपाणि प्रकृतगणान्ते दर्शयिष्याम । सिच उदाहरणान्तराणि च लुडि व्याख्यास्याम ।

(५७६) **रुदश्च पञ्चभ्यः** । ७ । ३ । ९८ ।

रुदादिभ्यो हलादेरपृक्तस्य सार्वधातुकस्य ईडागम । रुदादिपञ्चक (५६४) तमे सूत्रे परिगणितम् । पञ्चापि ते आदादिका । लटि रूपाणि च तेषा तत्रोक्तानि । लडि प्रस्तुतसूत्रेण तिप्सिपोरपृक्तयोरीडागम —

अरोदीत्	अरुदिताम्	अरुदन् ।	अरोदी	अरुदितम	इत्यादि ।
* अस्वर्पीत्	अस्वपिताम्	अस्वपन् ।	अस्वपी	अस्वपितम	,,
अश्वसीत्	अश्वसिताम्	अश्वसन् ।	अश्वसी	अश्वसितम	,,
आनात्	आनिताम्	आनन् ।	आनी	आनितम	,,
अजक्षात्	अजक्षिताम्	अजक्षु । अत्र 'सिजभ्यस्तविदिभ्यश्च' (४९८) इति झेर्जुस् । 'जक्षित्यादय षट्' इत्यभ्यस्तत्वम ।			

(५७७) **अद् गार्ग्यगालवयोः** । ७ । ३ । ९९ ।

रुदादिभ्यो हलादे सार्वधातुकस्य अडागमो गार्ग्यगालवयोर्मते ।

* जिष्वप शये । श्वस प्राणने । अन च । जक्ष भक्षहसनयो इति धातुपाठ । झेर्जुसि परस्मैपदिनश्च ।

अरोदत्।	अरोद	अश्वसत्।	अश्वस	अजक्षत्।	अजक्ष।
अस्वपत्।	अस्वप	आनत्।	आन		

लोटि हौ परत्वादिडागमे कृते निर्दिश्यमानस्य झल. परत्वाभावात् न 'हु-झल्भ्यो हेर्द्धि'। **रुदिहि। स्वपिहि। श्वासिहि। आनिहि। जक्षिहि** इति रूपाणि।

(५७८) **अदः सर्वेषाम्**। ७।४।१००।

अत्तेरपृक्तस्य हल सार्वधातुकस्य अडागम सर्वेषामाचार्याणां मते। उदाहृत च गणप्रारम्भे। **आदत् आदः**।

जक्ष, जागृ, दरिद्रा, चकास्, शास् इति पञ्चधातवो लौकिकेष्वभ्यस्ता। तत्र जक्षितेरुक्तानि रूपाणि।

(१९) जागृ निद्राक्षये। परस्मैपदी।

जागर्त्ति, जागृतः अभ्यस्तत्वात् 'झस्यात्' **जाग्रति**। लङि—**अजागः अजागृतां** 'सिजभ्यस्तविदिभ्यश्च' (४९८) इति झेर्जुसि कृते—

(५७९) **जुसि च**। (गुण)।७।३।८३।

इगन्ताङ्गस्य गुण जुसि। इति गुणेन **अजागरुः। अजागः अजागृतम्** इत्यादि। लोटि—**जागर्त्तु, जागृतात् जागृतां जाग्रतु। जागृहि। जागराणि। जागराव**। लिङि—**जागृयात् जागृयातां जागृयुः**। अत्र 'जुसि च' इति विहितो गुणो यासुटो ङित्त्वान्न भवति। इह हि 'सार्वधातुकमपित्' इति ङित्त्वेन निषिद्ध गुण विधातु किल 'जुसि चे'ति गुण आरभ्यते। लिङो झेर्जुसस्तु अपित्सार्वधातुकत्वेन यासुड्योगेन च द्विगुणमस्ति ङित्त्वम्। अत प्रथममेव ङित्त्व बाधितु अपवादो 'जुसि चे'ति गुण शक्नोति, न तु यासुट्प्रयुक्त द्वितीयमपि। एव 'जाग्रोऽविचिण्णल्ङित्सु' इति विशेषविहितो जागर्त्तेर्गुणोऽपि यासुटो ङित्त्वात् लिङि न भवति।

(१६) दरिद्रा दुर्गतौ। परस्मैपदी।

दरिद्रानि 'इदरिद्रस्य' (५५०) इति हलादौ ङिति सार्वधातुके इदादेश ॥

श्नाभ्यस्तयोरात ' (५४८) इति आदौ लोप, **दरिद्रित दरिद्रितः**। लङि—**अदरिद्रात् अदरिद्रिताम् अदरिद्रु** । लिङि—**दरिद्रियात्**।

(१७) चकासृ दीप्तौ । परस्मैपदी ।

चकास्ति चकास्तः चकासति। **चकास्सि चकास्थ** इत्यादि। लङि—हरदत्तादिलोपे **अचका** इति रूपे प्राप्ते दत्व विधीयते—

(५८०) **तिप्यनस्तेः** । (दस्) । ८ । २ । ७३ ।

तिपि परे पदान्तस्य सस्य द स्यात् न त्वस्ते ।

अचकात्, अचकाद । अचकास्ताम् अचकासु ।

(५८१) **सिपि धातो रुर्वा** । ८ । २ । ७४ ।

सिपि परे पदान्तस्य सस्य वा रु । पक्षे द ।

अचकात्, अचकाद् अचका ।

(५८२) **दश्च** । २ । २ । ७५ ।

मिपि परे पदान्तस्य दस्य रुर्वा यथा—

विद ज्ञाने—अवे अवेत् त्वम् । भिद—अभिन अभिनत् त्वम् ।

(१८) शासु अनुशिष्टौ । परस्मैपदी ।

शास्ति । हलादौ ङिति विशेषो विधीयते—

(५८३) **शास इदङ्हलोः** (ङिति) । ६ । ४ । ३४ ।

शास्तेरुपधाया इत् स्यात् अङि हलादौ ङिति च । इति इत्वे निमित्तसद्भावात् 'शासिवसि ' (३७६) इति षत्वम् । **शिष्टः** । **शासति, शास्सि शिष्टः** इत्यादि । लङि—'तिप्यनस्तेः' (५८०) इति दत्व—

अशात् अशिष्टाम् अशिषु । अशा अशात् अशिष्टम् इत्यादि । लोटि—शास्तु शिष्टात् शिष्टा शासतु ।

(५८४) **शा हौ** । ६ । ४ । ३५ ।

शास्तेः शादेशो हौ परे । शादेशस्यास्य असिद्धत्वेन झलन्तत्वस्य अक्षते 'हुझल्भ्यो हेर्धि' इति धि । **शाधि** इति रूप सिद्ध्यति ।

शासानि शासाव शासाम । (लिङि) शिष्यात् शिष्यास्ता शिष्यु इत्यादि ।

अथ षष्ठाध्यायगतस्यास्य शादेशस्य कीदृशमसिद्धत्वम्—

(५८५) **असिद्धवदत्राभात्** । ६ । ४ । २२ ।

(आ भात्) 'भस्य' (६ । ४ । १२९) इति सूत्रपर्यन्तम् । तदन्तर्गतो विधिरिति यावत् । स असिद्ध इव स्यात् । कुत्रेत्युच्यते—अत्रेति । अत्र—इत प्रभृति भस्येत्यवध्यन्तर्गतेष्वेव विधिषु कर्त्तव्येषु । आभादित्यवधिनिर्देशमवष्टभ्य तत्र भवा विनय आभीया उच्यन्ते । एवञ्च आभीयो विधिरभीय विधिमुद्दिश्यासिद्ध इति फलितम् । असिद्धवद्भावश्च विधीना विषयसाम्य एव सप्रयोजन स्यात् । अत आभीयो विधि· समानाश्रये आभीय एव विधौ कर्त्तव्ये असिद्ध स्यादिति सङ्केतस्वरूपम् । आभीयविधीना परस्परमसिद्धत्वात् कृतेऽप्यादेशे स्थानिप्रयुक्तो विधि· प्रवर्त्तते, न प्रवर्त्तते चादेशप्रयुक्तो विधि । सङ्केतस्यास्य प्रधानप्रयोजनान्युदाहरिष्याम·—

(१) आदेशेषु स्थानिप्रयुक्तविधेरुदाहरणानि—

(१) { एधि / शाधि } —एत्व,-शाभावयो कृतयोरपि झलन्तलक्षण धित्वम् ।

(२) { आयन् / आसन् } —इणो यणि अस्तेरल्लोपे च कृतेऽपि अजादित्वलक्षण आट् ।

(३) कारिष्यते —इटि कृतेऽपि 'णेरनिटी'ति लोप ।

(४) कुरु —कृतेऽपि हिलोपे सार्वधातुकनिमित्तकमुत्वम् ।

(२) आदेशेषु स्वप्रयुक्तविध्यप्रवृत्तेरुदाहरणानि—

(१) जहि —जादेशे कृते 'अतो हे' रिति हेर्न लुक् ।

(२) गत —अनुनासिकलोपे कृते 'अतो लोप' इति नाल्लोप ।

(३) अपाचितरा —प्रथम चिणो लुकि प्रवृत्ते पुन तरपो न लुक् ।

असमानाश्रय तु नासिद्धम् । यथा—प्रशमय्य । ण्याश्रयो मिता ह्रस्व, ल्यबाश्रयोऽयादेशश्च भवत ।

(१९) शीङ् स्वप्ने । आत्मनेपदी ।

(५८६) **शीङ सार्वधातुके गुण** । ७ । ४ । २१ ।

शीङ सार्वधातुके परे गुण । शेते शयाते ।

(५८७) **शीङो रुट् (म)** । ७ । १ । ६ ।

शीङो झादेशस्य अनो रुडागम । इति रुट् ।

शेरते । शेषे । शय ये इत्यादि । अशेत अशयाता, अशेरत । शेता शयाता शेरता । शर्यात शर्यायाता शर्यीरन् ।

(२०) विद ज्ञाने । परस्मैपदी ।

वेत्ति वित्तः विदन्ति । वेत्सि वित्थः वित्थ । वेद्धि विद्वः विद्मः । 'विदो लटो वा' (४७९) इति णलाद्यादेशेषु—**वेद विदतु विदुः । वेत्थ विदथु विद वेद विद्व विद्म** इत्यपि लटि रूपाणि । लङि—'दश्चे'ति (९८) सिपि वा रु । **अवे अवेत् अवित्तम् अवित्त ।** लोटि—**वेत्तु, विद्धि, वेदानि ।** अत्र **विदाङ्करोतु, विदाङ्करुतात्, विदाङ्करुतां, विदाङ्कुर्वन्तु** इत्यादीनि, अनुप्रयोगरूपाण्यपि लिट्याम्यकरणे वक्ष्यन्ते । लिङि—**विद्यात् विद्यातां विद्यु** इत्यादि ।

सम्पूर्वकस्यास्य आत्मनेपदित्वात् आत्मनेपदे विशेष उच्यते—

(९८८) **वेत्तेर्विभाषा ।७।१।७।**

वेत्तेर्झादेशस्य अतो वा रुडागम । यथा—

सविते सविदाते सविद्रते । (लङि) समविद्रत । (लोटि) सविद्रताम् । इत्यपि रूपाणि ।

(२१) इण् गतौ । परस्मैपदी ।

एति, इत अनेकाच्त्वाभावात् अप्राप्तो यण् विधीयते—

(९८९) **इणो यण् (अचि) ।६।४।८१।**

अजादौ प्रत्यये परे इण्धातोर्यण् ।

यन्ति । एषि इथ इथ । एमि इव इम । ऐत् ऐताम् आयन् ।

एतु इतात् इता यन्तु । इहि अयानि । इयात् इयाताम् ।

(२२) इङ् अध्ययने । आत्मनेपदी ।

अयम् अधिपूर्व एव प्रयुज्यते ।

अधीते अधीयाते अधीयते । अध्यैत । (परत्वात् पूर्वमियङि इयाताम् इति जाते आट् वृद्धिश्च) । अध्येयाताम् । अध्यैयत । अध्यैथा, अध्यैयाथाम् अध्यैध्वम् । अध्यैयि । अधीताम् । अधीयीत । अधीयीयाताम् अधीयीय ।

(२३) या प्रापणे । परस्मैपदी ।

याति, यात यान्ति । अयात् अयाताम्—

'लङ शाकटायनस्यैव' (५००) इति झेर्वा जुस् । **अयुः अयान्** । एवमन्येषामपि आदन्तानाम् ।

ला–अलु अलान् । मा–अभु अभान् । वा–अवु अवान् ।

(२४) मृजू शुद्धौ । परस्मैपदी ।

(५८०) **मृजेर्वृद्धिः** ।७।२।११४।

मृजधातोरिको वृद्धि प्रत्यये परे ।

मार्ज् + ति–'व्रश्चभ्रस्जसृजमृज ' (६७) इति ष । ष्टुत्व **मार्ष्टि, मृष्टः** । 'ङित्यजादौ वेप्यते' इति भाष्यात् **मृजन्ति, मार्जन्ति** । 'षढो कस्मि' **मार्क्षि, मृष्टः, मृष्ठ । मार्ज्मि मृज्वः मृज्मः** ।

लङि—हलङ्यादिलोपेन अमार्ज् इति स्थिते ।

(५९१) **रात्सस्य** (सयोगान्तस्य लोप) ।८।२।२४।

रेफात् परस्य सस्यैव सयोगान्तलोप । इति नियमात् सयोगान्तलोपो न भवति । जश्त्वचर्त्वे—

अमार्ट् अमृष्टाम् अमृजन्, अमार्जीन् इत्यादि । (लोटि) मार्ष्टु । मृष्टि । मार्जानि मार्जाव मार्जाम । मृज्यात् ।

(२५) वश इच्छायाम् । परस्मैपदी ।

व्रश्चादिषत्व, 'ग्रहिज्यावयि ' (५१६) इति ङित्सु सम्प्रसारण च ।

वष्टि उष्ट उशति । वक्षि । अवट् औष्टाम् औशन् अवशम् । वष्टु । उड्ढि । वशानि ।

(२६) लिह आस्वादने । उभयपदी ।

लेह् + ति–ढत्व, लेट् + ति–'झषस्तथोर्धोऽध' लेढ् + धि–ष्टुत्व लेट् + ढि–ढलोप,–**लेढि** । ढलोपे दीर्घ,–**लीढः लिहन्ति** । 'षढो कस्मि' **लेक्षि** । तङि–**लीढे,** लिहाते लिहते । लिक्षे । अलेट्–अलाट । लेढु । लीटि, लेहानि । लाढाम् । लिक्ष्व । लेह्यै । लिप्यात्-लिहात ।

(२७) दुह प्रपूरणे । उभयपदी ।

'दादेर्धातोर्घः' (९४) 'झषस्तथोर्धोऽध', 'झलां जश्झशि' इति घत्व-धत्व-जश्त्वानि ।

दोग्धि दुग्धः दुह्न्ति । 'झष्भाव' (६८) धोक्षि दुग्धः दुग्ध । दोह्मि दुह्वः दुह्मः । दुग्धे दुहाते दुहते । धुक्षे दुहाथे धुग्ध्वे । अधोक्-अदुग्ध दुग्धाम् । दुह्यात्-दुहीत ।

'अस्तिसिचोऽपृक्ते' (९७९) इति सूत्रस्य व्याख्याने असधातोर्लेडि तिप्सिपोरेव रूपाण्युक्तानि । रूपशेषकथन तत्र व्याप्तिसमधुना क्रियते—

'झसोरल्लोपः' (९४७) इति डित्स्वल्लोपः । अस्ति स्त सन्ति । अस्सि इति स्थिते सलोपः । तथा हि—

(९९२) **तासस्त्योर्लोपः** (सस्य) ।७।९।९०।

तासेरस्तेश्च सकारस्य लोपः स्यात् सकारादौ प्रत्यये परे । तास् इति लुट शाश्वतो विकरणप्रत्ययः । यथा—

तास्—भवितास्सि = भवितासि । अस्—अस्+सि = अत्सि ।

(९९३) **रि च** ।७।४।९१।

रेफादौ प्रत्यये च तासस्त्योः सलोपः । यथा—

तास्—भवितास्+रौ = भवितारौ । अस्तेश्छन्दस्येवोदाहरणम् ।

(९९४) **ह एति** ।७।४।९२।

एति तु परे तासस्त्योः सस्य हः । यथा—

तास्—एधितास्+ए = एधिताहे । अस्—व्यतिस्+ए = व्यतिहे । प्रकरणपूर्त्यर्थं सूत्रद्वयमत्रैव व्याख्यातम् ।

आसि स्थः स्थ । आस्मि स्व स्म । लङि—**आसीत्** । झसोरल्लोपस्याभीयत्वेनासिद्धत्वात् अजादित्वस्य न हानिरित्याडागमः, **आस्ताम् आसन्** । **आसीः आस्तम् आस्त** । **आसम् आस्व आस्म** । लोटि—**अस्तु, स्तात् स्तां सन्तु** अस+हि इत्यत्र हेर्डित्त्वादल्लोपे सकारस्य एत्वमुच्यते—

(५९५) **घ्वसोरेद्धावभ्यासलोपश्च** । ६ । ४ । ११९ ।

घु इति दा-धा रूपयोर्वर्तनो सज्ञा । दाधावर्तोरस्तेश्च एकारोऽन्तादेशो हौ परे अभ्यासस्य सत्वे तल्लोपश्च । इति सकारस्य एकार । तस्य चाभीयत्वेनासिद्धत्वात् 'हुझल्भ्यो हेर्धि', **एधि, स्तात् स्तं स्त । असानि असाव असाम** । लिङि यासुटो ङित्त्वात् सर्वत्राल्लोप, **स्यात् स्यातां स्युः । स्याः स्यातं स्यात । स्यां स्याव स्याम** ।

(७) III जुहोत्यादिगणः । श्लुविकरणः ।

(१) हु हवि प्रक्षेपे । परस्मैपदी ।

श्लुरिते लोपपर्याय इत्युक्तम् । तस्मिन् कृते प्रकृतेर्द्वित्व विशेष इति सपरिवारो द्वित्वविधिरारभ्यते—

(५९६) **एकाचो द्वे प्रथमस्य** । ६ । १ । १ ।

एकोऽच् यस्मिन् स वर्णसमुदाय एकाच् इति पूर्वमेव व्याख्यातम् । यथायोग द्वयोरपि पार्श्वयोर्हल्भिर्मिळितो मध्यगत एक स्वर एकाच्शब्देन गृह्यते । तथा च द्वितीयस्वरपर्यन्तो वर्णराशि प्रथम एकाच् भवति । तस्य द्वित्वम् (आवृत्ति) स्यात् इत्यधिकार । यथा—हुधातोर्ह्लिटि द्वित्वम् । हुहु + अ । वृद्धि, **हुहाव** ।

(५९७) **अजादेर्द्वितीयस्य** । ६ । १ । २ ।

अजादि चेद् द्विर्वाच्य शब्दरूप तर्हि द्वितीयस्यैकाचो द्वित्व, न तु प्रथमस्य । यथा—अशधातो सन्प्रत्यये अशि + स इति स्थिते धातोः सन्निमित्तके द्वित्वे अशिशिषति इति द्वितीयस्यैकाचो द्वित्वम् । द्वितीयस्यैकाचोऽभावे तु प्रथमस्यैव ।

(५९८) **न न्द्राः संयोगादय** । ६ । १ । ३ ।

द्वितीयस्यैकाचो द्वित्वप्रसक्तौ सयोगस्यादिभूता नकार-दकार-रेफाः न द्विरुच्यन्ते । इमान् वर्णान् वर्जयित्वा शेषस्य द्वित्व कार्यम् । यथा—

अईते सनि द्वित्वे **आर्द्विदिषति** इति रभिन्नस्य 'दि' इत्यस्य द्वित्वम् ।
अञ्चेत ,, **अञ्चिच्चिषति** इति नभिन्नस्य 'चि' इत्यस्य द्वित्वम् ।

॥ * ॥ **यथेष्ट नामधातुष्विति वक्तव्यम् ।**

नामोत्पन्नेषु धातुषु प्रथमस्य द्वितीयस्य तृतीयादेर्वा यथेष्टमेकाचो द्वित्व स्यात् । यथा—

पुत्र इवाचरति पुत्रायते । पुत्रायितुमिच्छति 'पुत्रायेष' इति सन्नन्तनामधातो **पुपुत्रायिषति, पुतित्रायिषति । पुत्रायियिषति, पुत्रायिषषति ।**

(९९९) **पूर्वोऽभ्यासः । ६ । १ । ४ ।**

द्विरुक्तस्य पूर्व रूपमभ्याससज्ञ स्यात् । यथा—

पच पच् इत्यत्र पूर्व पच इत्ययमभ्यास ।

(१००) **उभे अभ्यस्तम् । ६ । १ । ५ ।**

द्विरुक्त समुदायोऽभ्यस्तसज्ञ । यथा—

ददति इत्यत्र दद् इति प्रकृतिरभ्यस्तम् ।

(१०२) **जक्षित्यादय षट् । ६ । १ । ६ ।**

अदादिगणे 'जक्ष भक्षहरानयो' इत्यत आरभ्य षट् धातवोऽभ्यस्तसज्ञा स्यु । तेषु च जक्ष्, जागृ, दरिद्रा, चकास्, शास्, इति पञ्चैव लौकिका इति पूर्वमेवोक्तम् । वस्तुत एतेऽपि द्विरुक्ता एव । तथाहि—'कास्' इत्यय द्वित्वे साधारणेनाभ्यासकार्येण 'चकास्' इति सम्पद्यते । 'गृ इत्यस्याभ्यासदीर्घे' 'जागृ' इति रूप सुलभम् । 'द्रा' इत्यस्य 'दरिद्रा' इति रूपमात्रमभ्यासस्य रिगागम एवापेक्ष्यते । अभ्यासकार्यैरीदृशैर्जक्षिशास्ती अपि द्विरुक्ताविति साधयितु शक्यते । दीधी वेवी इत्युत्तरयोश्छान्दसयोर्द्विरुक्तिनिष्पन्नत्व स्पष्टमेव । एव च सप्त धातवोऽभ्यस्ता इत्यायाति । पाणिनिस्तु षडित्येवाह । सख्याविषम्य परिहर्तुं जक्षितिस्तत पर षट् चेति सूत्र व्याचक्षते पूर्वाचार्या । जक्षीत्यादीना सार्वत्रिक द्वित्वमस्तीति, अभ्यासकार्याणि च बहूनि स्युरिति, 'जजागार' 'ददरिद्रौ' इत्यादिवत् पुनर्द्वित्वमेते सहन्त इति च कृत्वा पाणिनिरेतान् कृतद्वित्वानेव केवलधातुत्वेन पठितवानिति मन्यामहे । अन्यथा 'गुतिजकिद्भ्य सन्' 'मानुबधदानुशा-

नृभ्यो दीर्घश्चाभ्यासस्य' इति स्वार्थे सन्प्रत्ययमिव गृध्रभृतीनां द्वित्वमप्यवक्ष्यदाचार्यः। इत्यलमतिप्रसङ्गेन।

एवं द्वित्वस्य देशनियमं सङ्ख्याव्यवस्थां च कृत्वा तस्य निमित्तान्याह—

(६०२) **लिटि धातोरनभ्यासस्य**।६।१।८।

लिटि परे अनभ्यासधात्ववयवस्य प्रथमस्यैकाचो द्वे स्तः, अजादेस्तु द्वितीयस्य। यथा—

जप्—जजाप। दह्—ददाह। सद्—ससाद।

एकं निमित्तमाश्रित्य सकृत् कृतद्वित्वस्य धातोः अन्यं निमित्तमाश्रित्य पुनर्द्वित्वं मा भूदिति 'अनभ्यासस्य' इति चाधिक्रियते। अतश्च जुगुप्सते, चिकित्सति इति स्वार्थसन्नन्ताभ्यां गुपकितधातुभ्यां पुनरिच्छार्थके सनि द्वित्वं न स्यात्। जुगुप्सिषते, चिकित्सिषतीत्येव रूपम्। एवं सन्नन्ताद्यङन्ताद्वा णिचि चङि कृतेऽपि पुनर्द्वित्वस्यावकाशोऽस्ति।

(६०३) **सन्यङोः**।६।१।९।

षष्ठ्यन्तमेतत्। सन्नन्तस्य यङन्तस्य चानभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वे स्तः, अजादेस्तु द्वितीयस्य। यथा—

पच—सन—पिपक्षति। यङ—पापच्यते।

(६०४) **ण्वुल्तृचौ**।६।१।९।

ण्वुल्तृचौ कृते च पूर्ववद्वे स्तः। यथा—

हु—जुहोति। दा—ददाति।

(६०५) **चङि**।६।१।११।

चङि परेऽपि पूर्ववद्वे स्तः। यथा—

चुर—अचूचुरत्। दह—अदीदहत्।

अथाभ्यासविकारा उच्यन्ते—

(६०६) **ह्रस्वः** (अभ्यासस्य)।७।४।५९।

अभ्यासस्यावयवस्य ह्रस्वः स्यात्। यथा—

दा—ददाति। नी—निनाय। सु—सुषुवे।

(६०७) हलादिः शेषः । ७ । ४ । ६० ।

अभ्यासस्यादिर्हल् चेत् स शिष्यते । अन्ये लुप्यन्ते ।

पठ्—पपाठ । अत्र ठकारस्य लोप । व्रज-वव्राज । रेफजकारयोर्लोप ।
व्रश्च—वव्रश्च । अत्र रेफशकारचकाराणा लोप ।

अजादेरेकाचो धातोर्द्वितीयस्यैकाचोऽभावात् प्रथमस्यैव द्वित्वम् । आदेर्हलोऽसम्भवात् सर्वे हलो लुप्यन्ते । तथा च अटधातोर्लिटि परे द्वित्वे अ अट्=आट । अडन्तत्वेन द्वित्वे तु द्वितीयस्यैकाच सत्वात् अट्य=अट्यट्य । आदिहल् टकार. शिष्यते, अट्य(=अट्या) ।

(६०८) शर्पूर्वाः खयः । ७ । ४ । ६१ ।

शर् पूर्वो येभ्य ते खय एव शिष्यन्ते, न तु शर् । खरातिखराभ्यामनुगतेन ऊष्मणा चेद्धातुरारभते तर्हि खरातिखरावेव शिष्येते, न तु आदिरूष्मा इत्यर्थ । यथा—

स्तन्—तस्तान । श्च्युत्—चुश्च्युते । स्पन्द्—पस्पन्दे । ष्ठिव्—ठिष्ठीव (टिष्ठीव) ।

(६०९) कुहोश्चुः । ७ । ४ । ६२ ।

अभ्यासस्य कवर्गहकारयोश्चवर्ग आदेश स्यात् । यथा—

गम्—जगाम । कम्—चकमे । हु—जुहोति ।

'अभ्यासे चर्च' (१११) इति पूर्वमेव व्याख्यातम् । तेन अभ्यासे झशां जश, खरा चरश्च भवन्ति । यथा—

भूव = बभूव । धौ = दधौ । फल = पफाल । स्थौ = तस्थौ । धान = जघान ।

हकारस्यान्तरतम्यात् अकार चवर्ग. । तस्य जश्त्वेन जकार· जुहोति ।

(६१०) उरत् । ७ । ४ । ६६ ।

अभ्यास—ऋवर्णस्य अकार स्यात् । अकारादेशस्य रपरत्वेऽपि हलादिशेषेण अकार एव शिष्यते । यथा—

वृत्—ववृते । कृ-चक्रे = चक्रे । तृ-ततार ।

(६११) द्युतिस्वाप्योः सम्प्रसारणम् ।

अनयोरभ्यासस्य सम्प्रसारणम् । यथा—द्युत-दिद्युते । स्वापि-सुष्वापयिषति ।

(६१२) **व्यथो लिटि** । ७ । ४ । ६८ ।

व्यथेर्लिण्निमित्तकाभ्यासे सम्प्रसारणम् । यथा—व्यथ–विव्यथे । यदि तु, या व्यथ्यते ।

(६१३) **दीर्घ इण किति** । ७ । ४ । ६९ ।

इण्धातोरभ्यासस्य दीर्घ किति लिटि । यथा—[इयाय] ईयतु ईयु ।

(६१४) **अत आदेः** । ७ । ४ । ७० ।

अभ्यासस्याऽऽदेरकारस्य दीर्घ. स्याल्लिटि । 'अतो गुणे' इति पररूपस्यायमपवाद । यथा—

अट—अ अट = आट ।

(६१५) **तस्मान्नुड् द्विहलः** । ७ । ४ । ७१ ।

कृतदीर्घात् अभ्यासाकारात् परस्य द्विहलोऽङ्गस्य नुडागम । यथा—

अर्च्—अ अर्च्—आ अर्च् = आनर्च् । अञ्ज—अ अञ्ज—आ अञ्ज = आनञ्ज ।

प्रत्यु—('द्विहल कि ?) अट्—आट ।

(६१६) **अश्नोतेश्च** । ७ । ४ । ७२ ।

अश्नोतेश्च दीर्घीभूतादकारात् परस्याङ्गस्य नुट् । यथा—

अशू व्याप्तौ—आनशे । 'अश्नोते'रिति श्नुविकरणग्रहणादक्ष्णाते, 'अश भक्षणे इत्यस्य आश आशतु इत्येव ।

(६१७) **भवतेरः** । ७ । ४ । ७३ ।

भवतेरभ्यासस्य अकार स्याल्लिटि । यथा—बभूव–अन्यत्र बुभूषति, बोभूयते ।

(६१८) **निजां त्रयाणां गुणः श्लौ** । ७ । ४ । ७५ ।

निजिर्, विजिर्, विश् एषामभ्यासस्य गुण श्लौ । यथा—

नेनेक्ति, वेवेक्ति, वेवेष्टि । अन्यत्र निनेज ।

(६१९) **भृञामित्** । ७ । ४ । ७६ ।

भृञा त्रयाणा—भृञ् भरणे, मीङ् माने ओ हाङ् गतौ इत्येतेषामभ्यासस्य इकारः श्लौ । यथा—

बिभर्त्ति, मिमीते, जिहीते । अन्यत्र बभार इत्यादि ।

(६२०) **ऋच्छिपिपर्त्योश्च** । ७ । ४ । ७७ ।

श्लावित्येव । ऋ—इयर्त्ति । पृ—पिपर्त्ति ।

[(६२१) **सन्यतः** । ७ । ४ । ७९ ।

सनि परे अडन्तस्याभ्यासस्य इकार । यथा—

पच-पिपक्षति । यज-यियक्षति । स्था-तिष्ठासति । पा-पिपासति ।
अन्यत्र, पपाच, तस्थौ, पपौ इत्यादि ।

(६२२) **ओः पुयण्ज्यपरे** ।७।४।८०।

पु यण् ज् एषा समाहारद्वन्द्वात् सप्तम्यन्त 'पुयण्जि' इति । अवर्णानुगतेषु पवर्ग-मध्यम जकारेषु परेषु उवर्णान्तस्याभ्यासस्य इकार सन्-निमित्तके द्वित्वे । यथा—

पू पिपावयिषति । लू-लिलावयिषति । भू-बिभावयिषति । जु-जिजावयिषति । यु-यियावयिषति ।

अकारपरकत्वसम्पादनाय णिजन्तेभ्य सन् ।

(६२३) **गुणो यङ्लुकोः** ।७।४।८२।

यङि यङ्लुकि च इगन्तस्याभ्यासस्य गुण । यथा—

चि—चेचीयते । ल—लोलूयते । —(यङि ।)
हु—जोहवीति । कुशि—चोकुशीति । —(यङ्लुकि ।)

(६२४) **दीर्घोऽकितः** ।७।४।८४।

अकितोऽभ्यासस्य दीर्घो यङ्चङ्लुकौ । यथा—

पच—पापच्यते, पापचीति । यज—यायज्यते, यायजाति ।

अत्र अकित्शब्दो विशेषार्थे प्रयुक्त । यङ्चङ्लुकौ रुक्, रिक्, रीक्, नुक्, नीक् इति कित आगमा विधीयन्ते । एत एव अत्र कित । रुगाद्यागमाभावे अभ्यासस्य दीर्घ इत्यर्थ ।

(६२५) **नीग्वञ्चु-स्रंसु-ध्वंसु-कस-पत-पद स्कन्दाम्** ।७।४।८४।

एषां अभ्यासस्य नीगागमो यङ्चङ्लुकौ । यथा—

वच—वनीवच्यते । वनीवक्तीत्यादि ।

(६२६) **नुगतोऽनुनासिकान्तस्य** ।७।४।८५।

अनुनासिकान्तस्याङ्गस्य योऽभ्यास, तस्याकारान्तस्य नुगागमो यङ्चङ्लुकौ । यथा—

रम्—ररम्यते । ररमीति ।

(६२७) **जप-जभ दह-दश-भञ्ज-पशाञ्च** । ७ । ४ । ८६ ।

एषामपि नुक् । यथा—जप—जञ्जप्यते । जञ्जपीति इत्यादि ।

(६२८) **चरफलोश्च** । ७ । ४ । ८७ ।

नुक । यथा—चञ्चर्यते । चञ्चरीति । पम्फुल्यते । पम्फुलीति ।

(६२९) **उत् परस्यात.** । ७ । ४ । ८८ ।

चरफलोरभ्यासात् परस्य अत उत यङ्यङ्लुकौ । तथैवोदाहृत च ।

(६३०) **ति च** । ७ । ४ । ८९ ।

तकारादौ प्रत्यये परे चरफलोरकारस्य उत् । यथा—

क्तिन्प्रत्यये—चूर्त्ति, फुल्लि ।

(६३१) **रीगृदुपधस्य च** । ७ । ४ । ९० ।

ऋदुपधस्याङ्गस्य योऽभ्यास तस्य रीगागमो यङ्चङ्लुकौ । यथा—

वृत्—वरीवृत्यते । वरावृतीति ।

(६३२) **रुग्रिकौ च लुकि** । ७ । ४ । ९१ ।

यङ्लुकि ऋदुपधाभ्यासस्य रुक्, रिक्, रीक् च स्यु । यथा—

नृत्—नर्नर्त्ति । नरिनर्त्ति । नरीनर्त्ति ।

रुगागमे उकार इत् । रिग्रीकोस्तु इकार-ईकारौ नेतौ ।

(६३३) **ऋतश्च** । ७ । ४ । ९२ ।

ऋकारान्तस्य चाङ्गस्य योऽभ्यासस्तस्य रिग्रीकौ रुक् च यङ्लुकि ।

यथा—कृ—चर्कर्त्ति । चरिकर्त्ति । चरीकर्त्ति ।

(६३४) **सन्वल्लघुनि चङ्परेऽनग्लोपे** । ७ । ४ । ९३ ।

लघुनि धात्वक्षरे परे योऽभ्यास तस्य चङ्परे, णौ परे सनीव कार्य स्यात् अग्लोपाभावे । सन्यत (६२१) 'ओ पुयण्ज्यपरे' (६२२) इति अकार-उवर्णयो विहित च कार्य इत्वम् । तत् चङ्परे णावपि भवतीत्यर्थ । यथा—

कृ—अचीकरत् । पू—अपीपवत् । पच—अपीपचत् । लू—अलीलवत् ।

प्रथु—('लघुनि' किं ?) रक्ष—अररक्षत् । जागृ—अजीजागर्त् ।

('अनग्लोपे' किं ?) कथ—अचकथत् ।

इदमुत्तरसूत्र च चङ्प्रकरणे स्पष्टीभविष्यति ।

(६३५) **दीर्घो लघोः** । ७ । ४ । ९४ ।

लघोरभ्यासस्य दीर्घ स्यात् सन्वद्भावविषये । सदीर्घमेवोदाहृतम् ।

(६३६) **अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशाम्** । ७ । ४ । ९५ ।

एषामभ्यासस्य अत इत्यादेश स्यात् चङपरे णौ परे । यथा—

स्मृ—असस्मरत् । त्वर—अतत्वरत् इत्यादि ।

इत्वबाधनार्थं अत्त्व विधीयते ।

(६३७) **विभाषा वेष्टिचेष्ट्योः** । ७ । ४ । ९६ ।

यथा—अविवेटत्, अववेटत् । अचिचेष्टत्, अचचेष्टत् ।

(६३७) **इ च गण** । ७ । ४ । ९८ ।

यथा—अजीगणत्, अजगणत् ।]

श्लौ द्वित्वप्रसङ्गात् द्वित्वप्रकरणमत्रोपक्षिप्तम् । अथ प्रकृतानि हुधातेर्लङादिषु रूपाण्युच्यन्ते—

शप श्लौ द्वित्वमभ्यासकार्यं (चुत्वजशत्वे) च, जुहु इति प्रकृतिर्जायते । पित्सु गुण, **जुहोति जुहुतः** । 'अदभ्यस्तात्' (४५६) इत्यदादेश, 'हुश्नुवो सार्वधातुके' (५४२) इति यण्, **जुह्वति जुहोषि** इत्यादि । **अजुहोत् अजुहुताम्** । 'सिजभ्यस्तविदिभ्यश्च' (४९८) इति झेर्जुस्, 'जुसि च' (५७९) इति गुण, **अजुहवुः । अजुहोः** इत्यादि । **जुहोतु जुहुतात् जुहुतां जुह्वतु** । 'हुझल्भ्यो हेर्धि', **जुहुधि । जुहवानि । जुहुयात्, जुहुयाताम्** ।

(२) डु भृञ् धारणपोषणयो. । उभयपदी ।

(३) माङ् माने । आत्मनेपदी ।

(४) ओ हाङ् गतौ । ,, ।

'भृञामित्' (६१९) इत्यभ्यासाकारस्य इत्वम् ।

बिभर्त्ति बिभृत बिभ्रति । अबिभ, अबिभृताम् अबिभरु । अबिभ । बिभर्तु । बिभृहि । बिभराणि । बिभृयात् ।

('ईहल्यघो' (५४९) इति ईत्व) मिमीते । ('श्नाभ्यस्तयोरात' (५४८) इत्याकार) मिमाते, मिमते । अमिमीत । मिमीताम् । मिमीत ।

जिहीते जिहाते जिहते । अजिहीत । जिहीता । जिहीयात् ।

(५) ओ हाक् त्यागे । परस्मैपदी ।

जहाति । ('जहातेश्च' (५५२) इति इत्वमीत्वं च ।) जहीत जहित जहति । अजहात् अजहिताम् अजहीताम् अजहु । जहातु, जहितात् जहीतात्, जहिता जहीता जहतु । ('आ च हौ' (५५३) इति आत्वम् इत्वं ईत्वं च ।) जहाहि, जहिहि, जहीहि । ('लोपो यि' (५५४) इति आलोप) जह्यात् जह्याताम् ।

(६) पॄ पालनपूरणयो । परस्मैपदी ।

('अर्त्तिपिपर्त्योश्च' (६२०) इत्यभ्यास-अकारस्य इत्वं,) पिपर्त्ति । ('उदोष्ठ्यपूर्वस्य' (५२८) इत्युत्वम् । रपरत्वम् । 'हलि च' (५३०) इति दीर्घः), पिपूर्त्तः पिपुरति । पिपर्षि । अपिपः अपिपूर्त्ताम् अपिपरुः । पिपूर्यात् ।

(७) भॄ भी भये । परस्मैपदी ।

बिभेति । ('भियोऽन्यतरस्याम्' (५५१) इति वा इत्वम् ।) बिभित बिभीत बिभ्यति । अबिभेत् अबिभिताम् अबिभीताम् अबिभयुः । बिभेतु बिभितात् बिभीतात् । बिभिता बिभीता, बिभ्यतु । बिभिहि बिभीहि । बिभयानि । बिभीयात् बिभियात् ।

(८) डु दाञ् दाने । उभयपदी ।

(९) डु धाञ् धारणपोषणयो । उभयपदी ।

(६३९) दाधा घ्वदाप् । १ । १ । २० ।

दारूपा धारूपाश्च धातवो घुसञ्ज्ञा स्यु । 'दाप् लवने', 'दैप् शोधने' इत्येतौ वर्जयित्वा । डु दाञ् दाने, दाण् दाने, दो अवखण्डने, देड् प्रणिदाने इति चत्वारो दारूपा । डुधाञ्धारणपोषणयो, धेट् पाने इत्येतौ धारूपौ । अनेन प्रकृतौ धातू घुसञ्ज्ञौ ।

ददाति । 'श्नाभ्यस्तयोरातः' (५४८) इत्यालोप । दत्तः । 'अघो' इति निषेधात् अत्र 'ई हल्यघोः' (५४९) इति ईत्वं न । ददति ददासीत्यादि । अददात् अदत्ताम् अददुः । ददातु । 'घ्वसोरेद्धावभ्यासलोपश्च' (५९५) इत्येत्वमभ्यासलोपश्च । देहि । दद्यात् । तडि— दत्ते ददाते ददते । दत्से । अदत्त । दत्ताम् दत्स्व । ददै । ददीत ।

दधाति । आलोपे दध् + तस् इति स्थिते ।

(६४०) दधस्तथोश्च । ८ । २ । ३८ ।

'एकाचो बशो भष् झषन्तस्य स्ध्वो' (६८) इत्यस्मात् उत्तर सूत्रमिदम् । द्विरुक्तस्य झषन्तस्य धा-धातोर्बशो भष् स्यात् तथयो स्ध्वोश्च परत इति भष्भावेन धध् + तम् । 'झषस्तथोर्द्धोऽध' इति धादेशस्तु न भवति, अध इति निषेधात् । चर्त्तव्यम्—

वत्त दवत्ति । दवासि वत्थ वत्थ । अदवात् अवत्ताम् अदधु । दवातु । धेहि । दद्यात् । (तडि) वत्ते दवाते दवते (भष्भाव) वत्से वद्वे । अधत्त अधत्ताम् । वत्ता धत्स्व । दवै । दधीत ।

(१०) णिजिर् शौचपोषणयो । उभयपदी ।

(११) विजिर् पृथग्भावे— ,,

(११) विष्लृ व्याप्तौ— ,,

'णिजां त्रयाणा गुण श्नौ' (६१८) इत्यभ्यासस्य गुण । नेनेक्ति नेनिक्त नेनिजति । अनेनेक् । नेनिक्तु । नेनिग्धि ।

(६८१) **नाभ्यस्तस्याचि पिति सार्वधातुके** (गुण) । ७ । ३ । ८७ ।

अभ्यस्तस्याङ्गस्य अजादौ पिति सार्वधातुके लघूपधगुणो न इति गुणनिषेध । **नेनिजानि नेनिजाव नेनिजाम** । एव विज् विष् इत्येतावपि ।

विकरणभेदवतां लट्—लङ्—लोट्—लिङा प्रक्रियैव परिसमापिता । अथ शाश्वतविकरणका लकारा प्रारभ्यन्ते । शप्श्यनादयो यथा लडादिषु तथा स्यतासादयो लृङ्लृडादिषु च धातुतिङोर्मध्ये स्थित्वा इष्ट रूपं निष्पादयन्ति । शप्श्यनादयश्च विकरणप्रत्यया इति व्यवह्रियन्ते । अतः स्यतासादयोऽपि त व्यपदेशमर्हन्त्येव । श्यनादिवत्ते गणभेदेन न प्रवर्त्तन्त इत्येव विशेष । तान्येतानि शाश्वतानि विकरणानि श्यनादिभ्यो भेदप्रत्यायनाय संस्करणमिति नवेन नामधेयेन व्यवहारिष्याम । पूर्वाचार्यास्तु स्यतासादीन् तत्तन्नाम्नैव व्यपदिष्टवन्त, न तु कयापि सामान्यसंज्ञया ।

तत्र प्रथमं-लृट्-लृङौ स्यसस्करणकौ ।

(१) दाञ् दाने—'स्यतासी लृलुटो' (४९४) इति स्यप्रत्ययः सस्करणम् । तिबादिप्रत्ययययोगेन रूपनिष्पत्तिः—

दास्यति	दास्यत	दास्यन्ति ।	दास्यते	दास्येते	दास्यन्ते ।
दास्यसि	दास्यथ	दास्यथ ।	दास्यसे	दास्येथे	दास्यध्वे ।
दास्यामि	दास्याव	दास्याम ।	दास्ये	दास्यावहे	दास्यामहे ।

स्यप्रत्ययस्य अदन्तत्वात् 'अतो दीर्घो यञि' (४६७) इति दीर्घे, 'आतो ङित·' (५०९) इति इयादेशश्च भवत· ।

लृङ्च्लृडागम·—

अदास्यत्	अदास्यताम्	अदास्यन् ।	अदास्यत	अदास्येताम्	अदास्यन्त ।
अदास्य	अदास्यत	अदास्यत ।	अदास्यथा	अदास्येथाम्	अदास्यध्वम् ।
अदास्य	अदास्याव	अदास्याम ।	अदास्ये	अदास्यावहि	अदास्यामहि ।

विकरणभेदाभावात् 'दाण् दाने' इति भौवादिकस्य 'दो (=दा) अवखण्डने' इति दैवादिकस्य 'दाप् लवने' इत्यादीनामन्येषा च तुल्यमेव लृट्–लृङो रूपम् ।

(२) जि जये —इगन्तत्वात् गुण ।

जेष्यति जेष्यत जेष्यन्ति । अजेष्यत् अजेष्यताम् इत्यादि ।

(३) विद विचारणे—इगुपधत्वात् गुण ।

वेत्स्यति वेत्स्यत वेत्स्यन्ति । अवेत्स्यत् अवेत्स्यताम् इत्यादि ।

" सत्ताया विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ श्यन्–लुक्–श्न–शेप्विद क्रमात् ॥"

इति चतुर्षु विकरणेष्वय धातुरर्थभेदेन पदभेदेन च पठ्यते । लृट्–लृङोस्तु विकरणभेदाभावात्तुल्यरूपतैव स्यात् । तथापि 'विद विचारणे' इति रौधादिकस्य विदसत्ताया इति दैवादिकस्य च पर रूपभेदोऽस्ति । तत्र च स्यप्रत्ययो हि निमित्तमिडागम । शित्त्वाभावादार्धधातुक । आर्द्धधातुकस्य धातुविशेषेण इडागमो भवति । तत्र तौदादिकस्यादादिकस्य च विदधातो-रिडागमोऽस्ति, अन्ययोस्तु नास्तीति रूपभेद । स्यप्रत्यय इडागमेन 'इस्य' इति, तत 'आदेशप्रत्यययो' (३७९) इति षत्वेन 'इष्य' इति च रूपमापद्यते । तेन **वेदिष्यते वेदिष्येते वेदिष्यन्ते** इत्यादि रूपाणि । अन्येषा तु **'वेत्स्यति' 'वेत्स्यते'** इति वा पदमात्रे भेदः ।

इह ह्यार्द्धधातुकेषु इडागमस्य सत्त्वासत्त्वविकल्पे सेट, अनिटः, वेटश्चेति त्रिविधा धातव समद्यन्ते । अत इड्व्यवस्था तावद्वक्ष्याम —

इड्व्यवस्था

(६४२) **आर्धधातुकस्येड्वलादेः** ।७।२।३५।

वलादेरार्धधातुकस्य इडागम स्यात् । वल्प्रत्याहारश्च यकारमिन्नानि व्यञ्जनानि क्रोडीकरोति । यथा—

धातु		स्य	तासि	तव्य	तुमुन्
भू	—	भविष्यति	भविता	भवितव्य	भवितुम्
शीङ	—	शयिष्यते	शयिता	शयितव्य	शयितुम्
एध	—	एधिष्यते	एधिता	एधितव्यम्	एधितुम्

वक्ष्यमाणान् निषेधान् बाधितु विशेषविधय आरभ्यन्ते—

(६४३) **स्नुक्रमोरनात्मनेपदनिमित्ते** ।७।२।३६।

अनयोर्वलादेरार्धधातुकस्य इट्, एतौ चेत् आत्मनेपदस्य निमित्त न भवत. । भावकर्मकर्मव्यतीहारादीनि आत्मनेपदनिमित्तानि वक्ष्यन्ते । यथा—

प्रस्नविष्यति	प्रस्नविता	प्रस्नवितव्यम्	प्रस्नवितुम्
क्रमिष्यति	क्रमिता	क्रमितव्यम्	क्रमितुम्

अनात्मनेपदनिमित्ते एवानयोरिडागम इति नियमार्थं सूत्रम् । तथा च आत्मनेपदनिमित्तेषु प्रस्नोष्यते, उपक्रस्यते इति इट् नास्त्येव ।

(६४४) **ग्रहोऽलिटि दीर्घः** ।७।२।३७।

ग्रह परस्य इटो दीर्घो न तु लिटि । यथा—

ग्रहीष्यति ग्रहीता ग्रहीतव्य ग्रहीतुम् । लिटि तु जगृहिव जगृहिम ।

(६४५) **वृतो वा** ।७।२।३७।

वृङ् वृञो ऋदन्तानां च इटो वा दीर्घ न तु लिटि । यथा—

वृञ्—वरीष्यति वरिष्यति वरीता वरिता इत्यादि ।

तॄ—तरीष्यति तरिष्यति तरीता तरिता इत्यादि ।

लिटि तु ववरिथ तेरिथ ।

(६४६) **न लिङि** ।८।२।३९।

'वृतो वा' इति दीर्घो लिङि न स्यात् । यथा—

वृ—वरिषीष्ट । तॄ—तरिषीष्ट ।

(६४७) **सिचि च परस्मैपदेषु** । ७ । २ । ४० ।

न दीर्घ । यथा--

अवारिष्टा अवारिषु । अतारिष्टा अतारिषु ।

(६४८) **इट् सनि वा** । ७ । २ । ४० ।

वृतोरिडागमो वा सनि । यथा--

विवरिषति विवरीषति (वुवूर्षति) । तितरिषति तितरीषति (तितीर्षति)

(६४९) **लिङ्सिचोरात्मनेपदेषु** । ७ । २ । ४२ ।

वृतोरिड्वा । यथा--

वृषीष्ट वरिषीष्ट । अवृत अवरिष्ट अवरीष्ट ।
स्तरिषीष्ट स्तीषाष्ट । अस्तीर्ष्ट अस्तरिष्ट अस्तरीष्ट ।

(६५०) **ऋतश्च संयोगादेः** । ७ । २ । ४३ ।

ऋदन्ताद्धातो संयोगादे परयो लिङ्सिचोरात्मनेपदेषु वा इट् । यथा—

स्मृषीष्ट स्मरिषाष्ट । अस्मृषाताम् अस्मरिषाताम् ।

(६५१) **स्वरतिसूतिसूयतिधूञूदितो वा** । ७ । २ । ४४ ।

स्वरत्यादिभ्य ऊदिद्भ्यश्च धातुभ्यो वलादेरार्धधातुकस्य इड्वा । यथा—

षूङ् प्राणिप्रसवे	—	प्रसविष्यति	प्रसोष्यति ।
धूञ् कम्पने	—	धविष्यति	धोष्यति ।
क्षमूष् सहने	—	क्षमिष्यति	क्षस्यति ।
गुपू रक्षणे	—	गोपिष्यति	गोप्स्यति (गोपायिष्यति) ।

(६५२) **रधादिभ्यश्च** । ७ । २ । ४५ ।

वलादेरार्द्धधातुकस्य इड्वा । यथा--

रधिष्यति रत्स्यति । नाशिष्यति नङ्क्ष्यति ।

(६५३) **तीषसहलुभरुषिषः** । ७ । २ । ४८ ।

तकारादावार्द्धधातुके इषादीनाम् इड्वा । यथा—

इष्—एष्ट एष्टव्यम् । सह—सोढा सहिता ।

(६५४) **सनीवन्तर्द्धभ्रस्जदंभुश्रीस्वृयूर्णुभरज्ञपिसनाम्** । ७ । २ । ४९ ।

इवन्तानां धातूनां ऋधूभ्रस्ज इत्यादीनां च इड्वा सनि । यथा—

इवन्तानां—दिदेविषति, दुद्यूषति ।
„ —सिसेविषति, सुस्यूषति ।
ऋध —अर्द्धिधिषति, ईर्त्सति ।

(६५५) **वसतिक्षुधोरिट्** (क्त्वानिष्ठयो) ।७।२।५२।

वसते: क्षुधेश्च क्त्वानिष्ठयोरिट् । यथा—उषित, उषित्वा । क्षुधित, क्षुधित्वा ।

(६५६) **उदितो वा** (क्ति) ।७।२।५३।

उदितो धातो क्त्वाप्रत्यये वा इट् । यथा—

शमु—शमित्वा, शान्त्वा । असु क्षेपे—असित्वा, अस्त्वा ।

(६५७) **गमेरिट् परस्मैपदेषु** (से) ।७।२।५८।

गमे सकारादेरार्धधातुकस्य परस्मैपदेष्विट् यथा—

गमिष्यति, जिगमिषति । प्रत्यु—('सादे' कि?) गन्ता । ('परस्मैपदेषु' कि?) सगस्यते ।

(६५८) **न वृद्भ्यश्चतुर्भ्यः** ।७।२।५९।

वृतु, श्रधू, स्यन्दू, वृञ् एभ्यश्चतुर्भ्यः सकारादेरार्धधातुकस्य परस्मैपदेषु इट् न । यथा—वृत्—वर्त्स्यति, वर्त्तिष्यते ।

(६५९) **तासि च कॢपः** ।७।२।६०।

यथा— कल्प्ता, कल्प्स्यति । आत्मनेपदे तु—कल्पितासे, कल्पिष्यते ।

(६६०) **अचस्तास्वत्थल्यनिटो नित्यम्** ।७।२।६१।

(तास्वत्) तासाविव ये नित्यमनिटोऽजन्ता धातव तेभ्यस्थलि (लिङ्मध्यमैकवचने) इडागमो न स्यात् । यथा—

	तास्	थल्		तास्	थल्
या —	याता	ययाथ	चि —	चेता	चिचेथ
नी —	नेता	निनेथ	हु —	होता	जुहोथ

प्रत्यु—('अच' कि?) भिद् — भेत्ता बिभेदिथ । ('तास्वत्' कि?) लू—लूत्वा (त्त्वा) लुलविथ । ('नित्य' कि?) धू—धोता, धविता दुधविथ ।

तासौ धूधातोर्वेट्त्वात् स न नित्यानिट् । अतश्च थलि इण्निषेधो न । अत्र तावदिड्विधौ विधिरूपो निषेधरूपो विकल्परूपो वा विशेषविधिस्तासौ

न क्रियत इति तासि सेटत्वानिट्त्वपरीक्षायां मूर्धाभिषिक्तोदाहरणत्वेनोपात्त । अत उक्त 'तास्वदनिटो नित्य' मिति ।

(६६१) **उपदेशेऽत्वत** । ७ । २ । ६२ ।

(हलन्तस्यापि) उपदेशे अकारवतस्तासीव नित्यानिटो धातोस्थल इण्न ।

(६६२) **ऋतो भारद्वाजस्य** । ७ । २ । ६३ ।

तासीव नित्यानिट ऋदन्तस्यैव धातोस्थल इण्न भारद्वाजस्य मते ।

अनेन सूत्रत्रयेण किमायातमिति पश्याम —तासावनिट्सु धातुषु अजन्ताना अकारवता च थल्यपि नेट् । भारद्वाजस्त्वाचार्य ऋदन्तानामेव तासावनिटा थलि इण्निषेधमिच्छति । तथा च तासावनिट्सु ऋदन्तः थलि सर्वमतेऽप्यनिट् । ऋद्भिन्नाजन्त अकारवाश्च भारद्वाजमते सेट्, अन्येषा मते अनिडिति विरोधाद्वेट् इति फलितम् । अथ किमित्ययमास्थीयते यत्न, तासावनिट् चेद्धातुस्थल्यप्यनिडेव हि स्यात्—इति चेत्, उच्यते अनिट्यामपि लिटि क्रादिनियमाद्विट् प्राप्नोतीति । स चायम्—

(६६३) **कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रवो लिटि** (इण् न) । ७ । २ । १३ ।

क्रादिभ्योऽष्टभ्य एव लिटीण्निषेध इति । अनेन क्रादिवर्जमनिटां लिटि सर्वत्र इटि प्राप्ते थल्प्रत्ययमात्रे व्यवस्था क्रियते—'अचस्तास्वत् ..' इत्यादि सूत्रत्रयेण । सूत्रचतुष्टयेन चाय फलितोऽर्थ —क्रादयोऽष्टौ लिड्यनिट । अन्येषु प्रकृत्या सेटा प्रवर्त्तमानमिडागम को निवारयति ? अनिटां पर विशेष. कथ्यते—स च थल्येकस्मिन्नेव । ऋदन्ता अनिट । शेषस्वरान्ता अकारवन्तश्च वेट इति । शेषस्वरान्तेषु पुन लृदन्ता न सन्त्येव धातव । एजन्ता 'आदेच उपदेशेऽशिति' इति सूत्रेण लिटि आदन्ता भवन्तीति अणन्ता एव परिशिष्यन्ते । तथा च लिट इण्नियमस्तावदयम्—

लिटि सेट कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रवन्यधातव. ।
सेट्केषु तासावनिटा थल्यनिट् स्याद्दन्तकः ॥
अकारवानणन्तश्च वेट् स्यादिति विनिर्णय. ।

(६६४) **ऋद्धनोः स्ये** (इट्) ।७।२।७०।

ऋकारान्तानां हन्तेश्च स्यप्रत्यये इट् स्यात् । यथा—

स्मृ—स्मरिष्यति । कृ—करिष्यति । हन—हनिष्यति ।

(६६५) **अञ्जेः सिचि** ।७।२।७१।

यथा—आञ्जीत् आञ्जिष्टाम् आञ्जिषु ।

(६६६) **स्तुसुधूञ्भ्यः परस्मैपदेषु** ।७।२।७२।

एभ्य परस्मैपदे सिचि इट् । यथा—अस्ताविष्टाम् । असाविष्टाम् । अधाविष्टाम् । तडि तु—अस्तोषाताम् । असोषाताम् । अधोषाताम् । अधविषाताम् ।

(६६७) **यमरमनमातां सक् च** ।७।२।७३।

यमरमनम इत्येतेषाम् आदन्ताना च परस्मैपदे सिचि सगागम. स्यात् इडागमश्च । सिच इट्, धातो सक् इति विवेक । यथा—

यम् + स् + ता—यम् + स् + इस् + ता—यसिष्टाम्, अडागमेन अयसिष्टाम् । एव व्यरसिष्टाम्, अनसिष्टाम्, अयासिष्टाम्, अभासिष्टाम् इत्यादि ।

(६६८) **स्मिपूङ्रञ्ज्वशां सनि** ।७।२।७४।

(६६९) **किरश्च पञ्चभ्यः** ।७।२।७५।

स्मिङ्, पूङ्, ऋ, अञ्जू, अशू, कृ, गृ, दृङ्, वृङ्, प्रच्छ, एभ्य सन इट् ।

अथ इडागमो निषिध्यते—

(६७०) **नेड्वशिकृति** ।७।२।८।

वशादौ कृत्प्रत्यये इडागमो न । यथा—

ईश्—ईश्वर । भस्—भस्म । याच्—याच्ञा । प्रत्यु—तिडि तु—स्तुदि—स्तुदिव

(६७१) **तितुत्रतथसरकसेषु च** ।७।२।९।

एषु कृत्प्रत्ययेष्विडागमो न । यथा—

तन् + ति = तन्ति (=तति) । दीप् + ति = दीप्ति । सच् + तु = सक्तु ।

तन् + त्र = तत्रम् । हस् + त = हस्त । इत्यादि ।

एषु 'ति' इति क्तिन्क्तिचोः सामान्यग्रहणम् । तयो तिन् सर्वधातुभ्यो भवति भूति, वृतिः, युति, वृद्धि, गुप्ति इत्यादि । अन्ये प्रत्ययास्त्वौणादिकत्वादकिञ्चित्कराः । क्तिन्प्रत्यये च—

॥ * ॥ अग्रहादीनामिति वक्तव्यम्।

इति वार्त्तिकात् गृह्णीति उपस्निहीति, निकुञ्चिति इत्यादिष्विडागमो द्रष्टव्य।

(६७२) **एकाच उपदेशेऽनुदात्तात्** ।७।२।१०।

अयमेव मुख्य इण्निषेध । उपदेशे यो धातुरेकाच्, अनुदात्तश्च तस्मादिडागमो न स्यात्। इह धातुपाठे धातव उदात्ता अनुदात्ताश्चेति द्विधा विभक्ता । अनुदात्तेष्वेकाचोऽनिट । अनेकाच उदात्ताश्च सेट इति व्यवस्थेत्यर्थ । अथोदात्तानुदात्तयो कथ विवेक इति चेत्, परिगणनेनैव। परिगणन च कारिकाभि —

"ऊदृदन्तैर्यौति-रु-क्ष्णु शीङ्-स्नु-नु-क्षु श्वि-डीङ्-श्रिमि ।
वृङ्-वृञ्भ्या च विनाजन्तेष्वेकाचो निहता स्मृता ॥"

शक्नोति पच मुञ्चती रिच-वचौ विच् सिच्-(च) पृच्छि त्यजी
नेनेक्ति भज-भञ्ज्-भुजोऽथ यजति भ्रस्जि (श्च) मस्जिस्तत ।
युज्-रुज् रञ्जति-सञ्जय सृज विजिर्-ष्वञ्ज क्षुद पद्यति
च्छिन्दत्यत्ति-खिद-स्तुदिर्नुद-भिदौ शद्-विद्यति स्विद्यति ॥ १ ॥

स्कन्दि (किच्च) विनत्ति-सीदति-हदो बन्धि· क्रुधि-क्षुध्यती-
राधि बुध्यति-युध्यती व्यध-रुधौ साधि शुधि सिध्यति ।
हन्ति-मन्यति-राप्-क्षिप-च्छुप लिप-स्तप्-तिप्-सृपो- हृष्यति-
र्वप्-शप्-तृप्यति-लुम्पति स्वापितयो भान्तेषु यब्-रब्-लभ ॥ २ ॥

गम् यम्-नम्-रमि-दशय क्रुश-दिशौ रिश्-रुश् लिश पश्यति-
र्मृश् विश्-स्पृश् कृषयस्त्विष द्विष-दुषस्तुष् पुष्यति श्लिष्यति ।
(पश्चात्) पिष्-विष-शिष्-शुषो वसति-घस् दह्-दिह् दुहो नह्यति-
र्मिह्-रिह् लुह्-वहय शत द्व्यधिकमित्युक्ता हलन्ता. पुन. ॥ ३ ॥

(६७३) **श्युकः किति** ।७।२।११।

श्रिधातो उपदेशे उगन्ताना च किति प्रत्यये इण् न। यथा —

श्रि + क्त = श्रित । श्रि + क्त्वा = श्रित्वा ।
भू + क्त = भूत । भू + क्त्वा = भूत्वा ।
तॄ + क्त = तीर्ण । तॄ + क्त्वा = तीर्त्वा ।

प्रत्यु—('किति' कि ?) श्रयिष्यति, भावयिष्यति, तरिष्यति ।

(६७४) **सनि ग्रहगुहोश्च** ।७।२।१२।

ग्रहगुहोरुगन्तानां च सनि इण् न । यथा—

ग्रह—जिघृक्षति । गुह—जुघुक्षति । भू—बुभूषति । बुबूर्षति । तितीर्षति ।

(६६३) 'कृ-सृ-भृ वृ . ' ।७।२।१३। व्याख्यातम् ।

(६७५) **श्वीदितो निष्ठायाम्** ।७।२।१४।

श्वयतेरीदितश्च निष्ठायाम् इण् न । यथा—

श्वि—शून-शूनवत् । दीपी—दीप्त, दीप्तवत् ।

(६७६) **यस्य विभाषा** ।७।२।१५।

यस्य धातोर्विकल्पेन यत्र क्वापि इडुक्त तस्य निष्ठायाम् इण् न । यथा—

धू —धूत, धूतवत् । 'स्वरति सूति सूयति ' (६५१) इति विकल्प ।
गुह्—गूढ, गूढवत् " " "
वृधु—वृद्ध, वृद्धवत्—'उदितो वा' (६५६) " "

(६७७) **आदितश्च** ।७।२।१६।

आदितश्च धातो निष्ठायाम् इण् न । यथा—

ष्विष्विदा—स्विन्न स्विन्नवत् । ष्विदा—ष्विण्ण, ष्विण्णवत् ।

(६७८) **विभाषा भावादिकर्मणोः** ।७।२।१७।

भावे आदिकर्मणि च या निष्ठा तत्र आदितो धातोर्वा इण् न । यथा—

मिदा—मिन्नमनेन, मेदितमनेन । प्रमिन्न, प्रमेदित ।

लुट्—तासिसंस्करणकः ।

'स्यतासी लृलुटो' (४९४) इति तास् संस्करणप्रत्यय', 'तास-स्त्योर्लोप' (५९२) 'रि च' (५९३) इति तास लोप, 'ह एति' (५९४) इति सस्य हादेशश्च पूर्वमेवोक्त । सेटावितौ च भवति ।

(१) भू सत्तायां, सेट्—तासौ तन्निमित्तके गुणे इडागमे अवादेशे च कृते भवितास् + ति इति जायते—

(६७९) **लुटः प्रथमस्य डारौरसः** । २ । ४ । ८५ ।

लुट प्रथमपुरुषप्रत्ययाना डा रौ रस् इत्यादेशा स्यु । विशेषकथनाभावात् उभयोरपि पदयो । ततश्च तिप्तस्झीना तातामानां च लुटि डा रौ रस् इति प्रत्यया । तत्र डा इति डित्करण पूर्वस्य टेर्लोपनार्थम् । भवितृ + आ = **भविता** । 'रि चे'ति 'तासस्त्यो ' इति च सलोप—

भविता भवितारौ भवितार । भवितासि भवितास्थ भवितास्थ । भवितास्मि भवितास्व भवितास्म ।

(२) **एध वृद्धौ, सेट्**—एधिता एधितारौ एधितार । एधितासे एधितासाथे एधिताध्वे ।

अन्—

(६८०) **धि च** (सस्य लोप) । ८ । २ । २५ ।

धकारादौ प्रत्यये परे सकारस्य लोप स्यात् इति सूत्रेण सलोप । 'ह एति' इति तासुसकारस्य हत्वम्—

एधिताहे एधितास्वहे एधितास्महे ।

(३) **दुह**—('दादेर्धातोर्घ' (६४) धत्व,)—दोग्धा दोग्धारौ ।

(४) **लिह**—'हो ढ' (६३) धत्व, ष्टुत्व 'ढ्रलोपे ' दीर्घ', (८१) लीढा, लीढारौ ।

(५) **वह**—ढत्वधत्वष्टुत्वेषु कृतेषु दीर्घापवाद । ओत्वम् । यथा—

(६८१) **सहिवहोरोदवर्णस्य** । ६ । ३ । ११२ ।

सह वह इत्यनयोरवर्णस्य ओत्स्यात् ढ्रलोपे ।

सोढा सोढारौ । एव वोढा वोढारौ ।

(६) **सृज-विसर्गे**, (७) **दृशिर् प्रेक्षणे** । अनयोर्लघूपधगुणापवाद अमागम उच्यते—

(६८२) **मृजिदृशोर्झल्यमकिति** । ६ । १ । ५८ ।

अनयोर्झलादावकिति प्रत्यये परे अमागम । त्रश्चादिषत्व—

स्रष्टा स्रष्टारौ । द्रष्टा द्रष्टारौ ।

(६८३) **अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्** । ६ । १ । ५९ ।

अनुदात्तेषु ऋदुपधस्य धातोश्च झलादावकित्यमागमो वा—

तृप प्रीणने—रथादित्वाद्वेट्—इडभावे तासिर्झलादिर्भवति । तदा अम्, त्रप्ता त्रप्तारौ । इट्पक्षे तु झलादित्वाभावात् अम् न । गुण —तर्पिता तर्पितारौ । तर्प्ता तर्प्तारौ ।

स्यप्रत्ययेऽप्येते विशेषा यथासम्भव उदाहार्या । यथा—

स्रक्ष्यति, द्रक्ष्यति, त्रप्स्यति, तर्प्स्यति, तर्पिष्यति इत्यादि ।

(१०) **मस्ज**—(११) **नश** । सयोगादिलोपादिप्रक्रियार्थं मस्ज इति सोपधपाठः । 'झला जश् झशि' इति जश्त्वेन जकारे च मज्ज इत्येव श्रूयते । 'मस्जिनशोर्झलि' (५२०) इति नुम्, मनज् + ता—'झरो झरि सवर्णे' इति एकस्य जस्य लोप, कुत्व, अनुस्वारपरसवर्णौ, **मङ्क्ता** । एव **मङ्क्ष्यति** इति लृटि । **न ष्टा नङ्क्ष्यति** । रथादित्वेन वेट्त्वात् **नशिता नशिष्यति**तीत्यपि ।

लुङ्—सिजादिसंस्करणकः ।

लुडि (१) सिच् (२) सिज्लुक् (३) क्स (५) अङ् (५) चङ् इति च्लेरादेशभेदै पञ्च सस्करणानि भवन्ति । तत्रौत्सर्गिकत्वात् शप्स्थानीय सिच् । अन्ये श्यनादिवत् अपवादरूपा ।

(१) सिच् सस्करणम्—

चकार इत्, इकार उच्चारणार्थ इत्यनयोर्लोपे स् इत्येव प्रत्यय । आर्द्धधातुकत्वात् सेट्केषु धातुष्विट् । इडागमे च इणपूर्वत्वात् षत्वम् । 'धि च' (६८०) इत्युक्तेन सूत्रेण सिचो ध्वमि लोपो भवति । अन्येऽपि लोपा उच्यन्ते—

(६८४) **झलो झलि** । (सस्य लोप) । ८ । २ । २६ ।

झल परस्य सस्य लोपो झलि परे । अनेन अनिटा झलन्तानां धातूनां ता—त—त—त—थास् प्रत्ययेषु सिज्लोपो भवति ।

(६८५) **ह्रस्वादङ्गात्** । ८ । २ । २७ ।

ह्रस्वादङ्गात् परस्य सस्य लोपो झलि परे । अनेन ह्रस्वान्तधातूनां * तथामो सिज्लोपस्थावकाश ।

(६८६) **इट ईटि** । ८ । २ । २८ ।

इट परस्य सस्य लोप ईटि परे । 'आर्तिसिचोऽपृक्ते' (५७५) इत्यपृक्तप्रत्ययस्य ईड्विधानात् सेट्धातूना तिप्सिपोरनेन सिज्लोप प्रसज्यते । सूत्रत्रयेणोक्त सलोप सिच्सकारस्यैवेष्यते ।

(१) दिवु क्रीडादौ, सेट्—धातोरट्, सिच इट् च । अदिव्+इस्+त्—इति स्थिते सिज्निमित्तको लघूपधगुण, अदेव्+इस्+त्—'अर्तिसिचोऽपृक्ते' (५७५) इति तिप ईट्, अदेव्+इस्+ईत्—सकारस्य इडीटोर्मध्यगतत्वात् 'इट ईटि' (६८६) इति लोप, तस्य च—

॥ ॥ **सिज्लोप एकादेशे सिद्धो वाच्यः** ।

इति वार्त्तिकेन सिद्धत्वात् सवर्णदीर्घ, **अदेवीत्** इति रूपसिद्धि । अपृक्तप्रत्ययविरहादलुप्तस्य सिच षत्व, **अदेविष्टां** । 'सिजभ्यस्तविदिभ्यश्च' (५९८) इति झेर्जुस्—

अदेविषु । अदेवीः अदेविष्ट अदेविष्टं । अदेविष्व अदेविष्व अदेविष्म ।

(२) शुभ दीप्तौ सेट्, आत्मनेपदी-सिच इट्, लघूपधगुण —

अशोभिष्ट अशोभिषातां अशोभिषत । अशोभिष्ठा अशोभिषाथां अशोभिढ्वम् । ('ढ्रलोपे'ति सलोप) । अशोभिषि अशोभिष्वहि अशोभिष्महि ।

(३) क्षिप क्षेपे, अनिट्, परस्मैपदी—हलन्तस्यानिटो वक्ष्यमाणो गुणापवादो वृद्धि, **अक्षैप्सीत्** । 'झलो झलि' (६८४) इति सलोप—

अक्षैप्ताम् अक्षैप्षु । अक्षैप्सीः अक्षैप्तं अक्षैप्त । अक्षैप्सं अक्षैप्स्व अक्षैप्स्म ।

(४) कृञ् करणे, अनिट्, उभयपदी—आत्मनेपदे वक्ष्यमाणेन

---

* ता त त इति परस्मैपदेषु गुणवृद्धिभ्यां ह्रस्वान्ताङ्गस्यासम्भवात्र तत्र प्रसक्तिः । आत्मनेपदे तु सिच किरवविधानान्न गुणवृद्धी । अतस्तथोरित्युक्तम् ।

सिच कित्त्वेन गुणनिषेध, तथासो 'ह्रस्वादङ्गात्' (६८९) इति, ध्वमि 'धि च' (६८०) इति च सलोप --

अकृत अकृषाता अकृषत । अकृथा अकृषाथा अकृढ्वम् । अकृषि अकृष्वहि अकृष्महि । (परस्मैपदे वक्ष्यमाणा वृद्धि,) अकार्षात् अकार्ष्टाम् अकार्षुः । अकार्षीः अकार्ष्टम् अकार्ष्ट । अकार्षम् अकार्ष्व अकार्ष्म ।

वृद्ध्या ह्रस्वाङ्गस्याभावान्न सलोप ।

अत्र परस्मैपदे सिचि वृद्धि, आत्मनेपदे सिच कित्त्व च वक्तव्य वर्त्तते । तयो प्रथम कित्त्व वक्ष्याम --तत्र चानुवृत्तिप्रदर्शनाय कित्त्व-प्रकरणमेवोच्यते--

---

कित्त्वप्रकरणम्--

[(६८७) **असंयोगाल्लिट् कित्**। (अपित्)।१।२।५।

असयोगान्तात् (केवलहलन्तात् अजन्ताद्वा) धातो परोऽपिल्लिट् कित् स्यात् । कित्त्वाद्गुणनिषेधादय । यथा--

भिद्--बिभेद	बिभिदतु	बिभिदुः	बिभिदे	}	कित्त्वात् गुणो न ।
नी --निनाय	निन्यतु	निन्युः	निन्ये		
यज--इयाज	ईजतु	ईजुः	ईजे । सम्प्रसारणम् ।		

(६८८) **इन्धिभवतिभ्यां च**।१।२।६।

आभ्या परो लिट् कित् स्यात् । यथा--

बभूव बभूवतु बभूवुः । कित्त्वात् गुणाभाव ।

इन्धे छन्दस्युदाहरणम् ।

(६८९) **मृडमृदगुधकुषक्लिशवदवसः क्त्वा**।१।२।७।

एभ्य क्त्वा कित् स्यात् । क्त्व कित्त्ववचन, 'न क्त्वा सेट्' इति कित्त्वनिषेधस्य बाधनार्थम् । यथा--

मृडित्वा, मुदित्वा, क्लिशित्वा, उदित्वा, उषित्वा इत्यादि ।

(६९०) **रुदविदमुषग्रहिस्वपिप्रच्छः सश्च**।१।२।८।

एभ्य सन् क्त्वा च कितौ स्याताम् । यथा--

रुदित्वा,	रुरुदिषति	गृहीत्वा,	जिघृक्षति ।
विदित्वा,	विविदिषति	सुप्त्वा,	सुषुप्सति ।
मुषित्वा,	मुमुषिषति	पृष्ट्वा,	पिपृच्छिषति ।

(६९१) इको झल् । १ । २ । ९ ।

इगन्तात् परो झलादि सन् कित् स्यात् । अनिट सनो ग्रहणार्थं झलादिरिति । यथा—

चि–चिचीषति, स्तु–तुष्टूषति, कृ–चिकीर्षति ।
नी–निनीषति, भू–बुभूषति, तॄ–तितीर्षति ।

(६९२) हलन्ताच्च । १ । २ । १० ।

इक इति पञ्चम्यन्तमनुवर्त्तते । तच्च हलो विशेषणम् । इक परो यो हल् तदन्तादित्यर्थ । इक्पूर्वकहलन्ताद्धातो झलादिस्सन् कित् स्यात् । यथा—

भिद्—बिभित्सति, बुध्—बुभुत्सते, दृश्—दिदृक्षते ।
प्रत्यु—('झलादि' किं ?) वृत्—विवर्त्तिषते, शुभ—शुशोभिषते ।]

(६९३) लिङ्सिचावात्मनेपदेषु । १ । २ । ११ ।

इक्पूर्वकहलन्ताद्धातो परौ झलादी लिङ्सिचावात्मनेपदेषु कितौ स्त । यथा—

(लिङि) भिद्—भित्सीष्ट, बुध्—भुत्सीष्ट ।
(लुङि) ,, —अभित्त, अभित्साताम् । बुध—अबुद्ध, अभुत्साताम् ।
प्रत्यु—('झलादि' किं ?) वर्त्तिषीष्ट, अवर्त्तिष्ट ।
('आत्मनेपदेषु' किं ?) अद्राक्षीत्, अब्राक्षीत् ।

अत्र अकित्त्वात् 'सृजिदृशोर्झल्यमकिति' (६८२) इति अमागम ।

(६९४) ऋश्च । १ । १ । १२ ।

ऋवर्णान्ताद्धातो परौ झलादी लिङ्सिचौ आत्मनेपदेषु कितौ स्त ।
यथा—

कृ—कृषीष्ट, अकृत अकृषाताम् । गृ—गृषीष्ट, अगृषाताम् ।
प्रत्यु ('झलादी' किं ?) वृ–वरिषीष्ट, अवरिष्ट अवरीष्ट ।

(६९५) वा गमः । १ । २ । १४ ।

गम परौ लिङ्सिचावात्मनेपदेषु वा कितौ । गमे परस्मैपदित्वेऽप्युपसर्गवशात्

आत्मनेपदम् । कित्त्वे 'अनुदात्तोपदेश ' (५५९) इत्यनुनासिकलोप । यथा—

सङ्गसीष्ट, सङ्गसाष्ट । समगत समगस्त ।

(६९६) **हनः सिच्** । १ । २ । १४ ।

हन्ते पर आत्मनेपदसिच् कित् स्यात् । 'आङो यमहन' इति आत्मनेपदम् । यथा— आहत आहसाताम्, आहसत । अत्रापि नलोप कित्त्वप्रयोजनम् ।

(६९७) **यमो गन्धने** । १ । २ । १५ ।

(६९८) **विभाषोपयमने** । १ । ५ । १६ ।

यमधातोरात्मनेपदे सिच् गन्धनार्थे नित्यम्, उपयमनार्थे विकल्पेन च कित् स्यात् । गन्धन सूचन परेण प्रच्छाद्यमानस्य दोषस्याविष्करणम् । उपयमन विवाह । यथा— उदायत उदायसाताम् उदायसत । सूचनार्थे । अन्यत्र उदायस्त पाद उत्क्षेपणमर्थे । उपायस्त उपायत वा कन्याम् ।

अनुनासिकलोपे ह्रस्वादङ्गादिति सलोप ।

(६९९) **स्थाघ्वोरिच्च** । १ । २ । १७ ।

स्थाधातो घुसञ्ज्ञकाना च आत्मनेपदे सिच् कित् स्यात् । तत्सन्नियोगेन धातोरिकारोऽन्तादेशश्च । यथा—

स्था—प्रास्थित प्रास्थिषाता प्रास्थिषत । दा—अदित अदिषाताम् अदिषत । धा—अधित अधिषाताम् अधिषत ।

सिचि वृद्धिः ।

(७००) **सिचि वृद्धिः परस्मैपदेषु** । ७ । २ । १ ।

इगन्ताङ्गस्य वृद्धि, सिचि परस्मैपदेषु । यथा—

जि—अजैषीत्, अजैष्टाम् ।	लू—अलावीत् अलाविष्टाम् ।
नी—अनैषीत्, अनैष्टाम् ।	कृ—अकार्षात् अकार्ष्टाम् ।
हु—अहौषीत्, अहौष्टाम् ।	तृ—अतारीत् अतारिष्टाम् ।

(७०१) **अतो ल्रान्तस्य** । ७ । २ । २ ।

लकारान्तस्य रेफान्तस्य च धातोरवयवस्याकारस्य परस्मैपदे सिचि वृद्धि । 'नेटि' इति निषेधस्य, 'अतो हलादेर्लघो' इति विकल्पस्य च वक्ष्यमाणस्यापवाद । यथा—

ज्वल—अज्वालीत् अज्वालिष्टाम् । अर—अक्षारीत् अक्षारिष्टाम् ।

(७०२) **वदव्रजहलन्तस्याचः** ।७।२।३।

वदव्रजोर्हलन्तानां च अचो वृद्धि परस्मैपदे सिचि । 'अतो हलादे' रिति विकल्प बाधितु वदव्रजोर्ग्रहणम् । यथा—

वद—अवादीत्, अवादिष्टाम् । व्रज—अव्राजीत् अव्राजिष्टाम् । हलन्त—च्छिद—अच्छैत्सीत् अच्छैत्ताम् । रुध—अरौत्सीत् अरौद्धाम् । तृप—अताप्सीत् अतार्ष्टाम् ।

(७०३) **नेटि** ।७।२।४।

इडादौ सिचि हलन्तस्य धातोर्वृद्धिर्न स्यात् । यथा—

चित—अचेनीत्, अचेतिष्टाम् । मुष्—अमोषीत्, अमोषिष्टाम् ।
प्र-यु—('हलन्तस्य' किं?) लृ-अलावीत् अलाविष्टाम् ।

(७०४) **ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम्** । ७।२।५।

ह्-म-यान्तानां क्षणादीनां एदितां च धातूनां इडादौ परस्मैपदे सिचि वृद्धिर्न स्यात् । ह्-म यान्तानां एदितां च 'अतो हलादेरि'ति प्राप्तो विकल्प जागृणिश्व्योना 'सिचि वृद्धि . ' इति प्राप्तो नित्यविधिश्च अनेन प्रतिषिध्यते । यथा—

ह—अग्रह—अग्रहीत् अग्रहीष्टाम् ।	क्षण—अक्षणीत् अक्षणिष्टाम्
म—स्यम—अस्यमीत् अस्यमिष्टाम्	श्वस—अश्वसात् अश्वसिष्टाम्
य—व्यय—अव्ययीत् अव्ययिष्टाम्	जागृ—अजागरीत् अजागरिष्टाम् ।

णेरुदाहरण छन्दस्येव ।

(७०५) **ऊर्णोतेर्विभाषा** । ७।२।६।

वा वृद्धि । यथा—ओर्णावीत् और्णवीत् ।

(७०६) **अतो हलादेर्लघोः** ।७।२।७।

हलादेर्लघोरकारस्य इडादौ परस्मैपदे सिचि वृद्धिर्वा । यथा—

रण—अराणात् अरणीत् ।	भण—अभाणात्	अभणीत् ।
प्रत्यु—('अत' किं?)	दिव—अदेवीत्	अदेविष्टाम् ।
('हलादे' किं?)	अट—मा भवान्	अटीत् ।
('लघो' किं?)	रक्ष—अरक्षीत्	अरक्षिष्टाम् ।
('सेटि' किं?)	पच—अपाक्षात्	अपाक्ताम् ।

इह सङ्ग्रह —

सिचि वृद्धिरिगन्तानाम् हलन्तानामचोऽनिटि ।
सेटि तु स्याद्व्रजवदोररन्तालन्तयोरपि ॥
सेट्स्वन्येषु हलन्तेषु वा हलादेर्लघोरत ।
जागृक्षणश्वसश्वीनां हमयान्तैदिता च न ॥

(९) वस निवासे,–अनिट्,–परस्मैपदी ।

अनिट्त्वात् 'वदव्रजहलन्तस्याच.' (७०२) इति नित्यं वृद्धि, अवात्सीत् इति जायते ।

(७०७) **सः स्यार्धधातुके** । (त) । ७ । ४ । ४९ ।

सस्य तः स्यात् सादावार्धधातुके । 'आस्से', 'चकास्से' इत्यादौ मा भूदिति आर्धधातुकग्रहणम् । अनेन तादेश, **अवात्सीत् अवात्ताम् अवात्सुः** । एव–वत्स्यति, अवत्स्यत्, जिघत्सति, दित्सति इत्यादावपि तादेशो बोध्य ।

(१) या प्रापणे—अनिट्, परस्मैपदी ।

'यमरमनमाता सक्च' (६६७) इति धातो सक्, सिचश्चेट् । **अयासीत् अयासिष्टाम् अयासिषुः** इत्यादि । एव 'स्तु सु धूञ्भ्य ..' (६६६) इति इड्विधिरन्ये च प्रक्रियाविशेषा सिचस्तत्र तत्रोक्ता अत्रानुसन्धेयाः ।

2. सिचो लुक् ।

(७०८) **गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु (लुक्)** । २ । ४ । ७९ ।

गा, ('इणो गा लुङि' इति) स्था, घु, पा (पाने), भू एभ्य. परस्मैपदेषु सिचो लुक् । सिचो लुकि 'आत.' (४९९) इति झेर्जुस् । यथा–

गा—अगात् अगाताम् अगु । अगा अगातम् अगात । अगाम् अगाव अगाम ।

स्था—अस्थात्	अस्थाताम्	अस्थु	धा—अधात्	अधाताम्	अधु.
दा—अदात्	अदाताम्	अदु	पा—अपात्	अपाताम्	अपु

भू—अभूत् ।

अस्य विशेषौ कथ्येते—

(७०९) **भूसुवोस्तिङि** (सार्वधातुके न गुण) ।७।६।८८।

भू इत्यस्य, षूङ् प्राणिप्रसवे इत्यादादिकस्य च सार्वधातुके तिङि न गुण । अनेन भूधातो सिज्लुकि न गुण । सू इत्यस्य लोडुत्तमे न गुण ।

(७१०) **भुवो वुग्लुङ्लिटोः** (अचि) ।६।४।८८।

भूधातोर्वुगागमो लुङ्लिटोरचि । उवङादेशस्यापवाद । सिचो लुप्तत्वात् आदन्तत्वाभावाच्च झेर्न जुस्, 'झोऽन्त' ।

अभूत् अभूताम् अभूवन् । अभूः अभूतम् अभूत । अभूवम् अभूव अभूम ।

'गातिस्था . ' इति प्रकृतसूत्रे 'परस्मैपदेषु इत्युक्तेरात्मनेपदे सिच्लूयत एव—

स्था—अस्थित	अस्थिषाताम्	अस्थिषत ।	अस्थिथाः ।
दा —अदित	अदिषाताम्	अदिषत ।	अदिथाः ।
धा —अधित	अधिषाताम्	अधिषत ।	अधिथाः ।

एषु 'स्थाध्वोरिच्च' (६९९) इति इत्व सिच कित्त्व च ।

गा गाने पा रक्षण इत्यनयोरत्राग्रहणात् ।

अगासीत्, अगासिष्टाम् । अपासीत् अपासिष्टाम् ।

इति सगिडागमावेव ।

(७११) **विभाषा घ्रा-धेट्-शा-छा-सः** ।२।४।७८।

एभ्य परस्मैपदेषु वा सिचो लुक् । एषु धेट 'आदेच उपदेशेऽशिति,' इति वक्ष्यमाणेन आत्वेन आदन्तत्वे धारूपत्वात् घुसंज्ञाया पूर्वसूत्रेणैव सिज्लुकि सिद्धे विकल्पार्थमारम्भ । यथा—

घ्रा—अघ्रात्	अघ्राताम् ।	अघ्रासीत्	अघ्रासिष्टाम् ।
धे —अधात्	अधाताम् ।	अधासीत्	अधासिष्टाम् ।
शा—अशात्	अशाताम् ।	अशासीत्	अशासिष्टाम् ।

एवमन्येषामपि ।

(७१२) **तनादिभ्यस्तथासोः** । २ । ४ । ७९ ।

तनादिभ्यः सिचो वा लुक् तथासोः परयोः । सिज्लोपे 'अनुदात्तोपदेश.....' (४४९) इति नलोपः ।

तन—अतत, अतनिष्ट अतनिषाताम् अतनिषत ।
अतथाः, अतनिष्ठाः अतनिषाथाम् अतनिढ्वम् ।

एवमन्येषामपि तनादीनां ।

3. क्सः संस्करणम् ।

'शल इगुपधादनिटः क्सः' (४९७) इति शलन्तस्य इगुपधस्यानिटो धातोः क्सो विहितः ।

ईदृशश्च कुश दिश दृश मृश रिश रुश लिश विश स्पृश इति शान्तेषु नव । कृष त्विष तुष द्विष दुष विष शुष श्लिष पुष् शिष् इति षान्तेषु दश । दिह दुह मिह रुह लिह इति हान्तेषु पञ्च । इत्येवमाहत्य चतुर्विंशतिर्धातवः सन्ति । तेषु—

(७१३) **श्लिष आलिङ्गने** । २ । १ । ४६ ।

श्लिष आलिङ्गनार्थे एव क्सनियमात्

(७१४) **न दृशः** । ३ । १ । ४७ ।

इति दृशेर्निषेधाच्च द्वार्विंशतेर्धातुभ्यो नित्यं च्लेः क्सादेशः । ककार एव इत् । स इति अकारान्तः प्रत्ययः । क्सस्य चैतौ विशेषावुक्तौ—

(७१५) **क्सस्याचि** (लोपः) । ७ । ३ । ७२ ।

क्सस्य अजादौ प्रत्यये परे अन्त्यलोपः स्यात् । अनेन आताम् आथामित्यनयोः 'आतो ङितः' (५०९) इति इयादेशो न भवति । झप्रत्यये तु 'अन्त' इत्यादेशादनन्तरमेव प्रत्ययस्याजादित्वलाभ इति 'अत' इत्यादेशस्य न प्रसक्तिः ।

(७१६) **लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये** । ७ । ३ । ७३ ।

एषां दन्त्यादावात्मनेपदे परे क्सस्य वा लुक् । दन्त्यादयश्च तथाम्

ध्व वहि इति चत्वार. प्रत्यया । अथोदाहरामः —

(१) क्रुश, परस्मैपदी ।

'छशा ष' इति ष्टुत्व, 'पढो क सि' इति कत्व, तस्य मूर्धन्यादेशश्च भवन्ति । कित्त्वात् गुणनिषेध ।

अक्रक्षत् अक्रक्षताम् अक्रक्षन् । अक्रक्ष अक्रक्षतम् अक्रक्षत । अक्रक्षम् अक्रक्षाव अक्रक्षाम ।

(२) लिह—अलिक्षत् अलिक्षतामित्यादि क्रुशादिवदेव ।

तद्धि तु—अलिक्षत, अलीढ अलिक्षाताम् अलिक्षन्त ।
अलिक्षथा, अलिढा अलिक्षायाम् अलिक्षाध्वम् अलीढ्वम् ।
अलिक्षि अलिक्षावहि, अलिक्षिहि अलिक्षामहि

एवमेव दिह दुह गुहामपि, षत्वादमात्र विशेष ।

अदुक्षत अदुग्ध अदुक्षाताम अदुक्षन्त इत्यादि ।

एषु गुहवर्जितानामादादिकत्वाल्लुङि शपो लुकि क्सस्य च लुकि तुल्यमेव रूपम् । गुहस्त्वन्यत्रान्यो विशेष —

(७१७) **ऊदुपधाया गोहः** ।६।४।८९।

गोह इति कृतगुणस्य निर्देश । गुहधातोर्गुणनिमित्ते अजादौ प्रत्यये तदपवाद ऊकारादेश । शब्विकरणोऽय धातु गुहू इत्यूदित्त्व । यथा—

गूहति, अगूहत् । अजादावित्युक्तेस्तासि गोढा, इटपक्षे त्वजादित्वात् गूहिता । एव गूहिष्यति धोक्ष्यति इत्यादि ।

4 अङ्संस्करणम् ।

'अस्यतिवक्तिख्यातिभ्योऽङ्' (४२९) इत्यादिभिश्चतुर्भि सूत्रै अङ्विहित । 'लिपिसिचिह्नश्च' (४६०) इत्यस्मादनन्तरम् ।

(७१८) **आत्मनेपदेष्वन्यतरस्याम्** ।३।१।९४।

इति लिपिसिचिह्नेभ्याम् तङि विकल्प ।

(७१९) **सत्तिशास्त्यर्तिभ्यश्च** ।३।१।९६।

इति परस्मैपदेषु नित्यविधिश्च तत्र विशेषविधिरित्युपेक्षितावत्रोपक्षिप्येते । अत्र अस्यतिवक्तिख्यातिभ्यो नित्य, लिपिसिचिह्नम्यो वा चैवात्मनेपदेष्वद् । अन्येभ्यस्तु परस्मैपदेष्वेवेति विवेक । 'वक्ति' इत्यनेन वच परिभाषणे इत्यय 'ब्रुवो वचि'-रादेशश्च गृह्यते । तथा 'ख्या प्रकथने' इत्यय 'चक्षिङ ख्याञ्' च 'ख्याति इत्यनेन । पुषादि दिवादेरन्तर्गण, द्युतादिर्भ्वादे । लृदितस्तु गन्लृ गतौ, शक्लृ शक्तौ, मुच्लृ मोक्षणे इत्यादयस्तत्र तत्र विक्षिप्ता । इरितोऽप्येवमेव ।

अथ केचन धातव उपलक्षणार्थमुदाह्रियन्ते—

पुष—अपुषत् अपुषताम् अपुषन् । अपुष अपुषतम् अपुषत ।
अपुषम् अपुषाव अपुषाम ।
द्युत—अद्युतत् अद्युतताम् अद्युतन् । रुच—अरुचत् अरुचताम् अरुचन् ।

रुचद्युतोरात्मनेपदित्वेऽपि 'द्युद्भ्यो लुङि' इति वा परस्मैपदम् । आत्मनेपदपक्षे अरोचिष्ट अरोचिषाताम् । अद्योतिष्ट अद्योतिषाताम् इत्यादीनि रूपाणि ।

गम्लृ-अगमत् अगमताम् अगमन् । | रुधिर्-अरुधत् अरुधताम् अरुधन् ।
शक्लृ-अशकत् अशकताम् अशकन् । | भिदिर्-अभिदत् अभिदताम् अभिदन् ।

अङभावे सिचि अरौत्सीत् अरौद्धाम् । अरुद्ध अरुत्साताम् । अभैत्सीत् अभैत्ताम्, अभैत्सु इति च रूपाणि ।

शास—'शास इदङ्हलो' (५८३) अशिषत् अशिषताम् । क्या—

(७२०) **आतो लोप इटि च** । ६ । ४ । ६४ ।

अचि क्ङित्यार्धधातुके इति पदत्रयमनुवर्त्तते । आकारस्य लोप स्यात् अजादौ क्ङित्यार्धधातुके इटि च इत्याकारलोप.—

अख्यत् अख्यताम् अख्यन् । अख्य इत्यादि ।
अख्यत अख्येताम् अख्यन्त । अख्यथा ,,

अनन्तरमङि विशेषविधय.—

(७२१) **अङशोऽङि गुणः** । ७ । ४ । १६ ।

ऋवर्णान्तस्य दृशेश्चाङि गुण । यथा—अदर्शत् अदर्शताम् अदर्शन् । ऋवर्णान्तादङ् च्छन्दस्येवास्ति ।

(७२२) **अस्यतेस्थुक्** । ७ । ४ । १७ ।

अङि थुगागम । आस्थत् आस्थताम् आस्थन् । पर्यास्थत ।

(७२३) **श्वयतेरः** । ७ । ४ । १८ ।

श्वि इत्यस्य अकारोऽन्तादेश । अश्वत् अश्वताम् ।

(७२४) **पतः पुम्** । ७ । ४ । १९ ।

पुम् आगमोऽङि । अपप्तत् अपप्तताम् अपप्तन् ।

(७२५) **वच उम्** । ७ । ४ । २० ।

उमागमोऽङि । अवोचत्—अवोचत ।

5. चङ् संस्करणम् ।

अथ 'णिश्रिद्रुस्रुभ्य ' (४५८) इति सूत्रेण विधीयते । श्रि द्रु स्रु इति केवलधातुभ्यो णिजन्तेभ्यश्च भवति । 'चङि' इति द्वित्व चोक्तम् । चकारस्य इत्त्वात् 'अ' इत्येव प्रत्ययः ।

श्रि—द्वित्वम्, अभ्यासकार्य, गुणाभावादियङ्—

अशिश्रियत् । अशिश्रियताम् अशिश्रियन् । अशिश्रिय इत्यादि ।

एवमेव—

द्रु—अदुद्रुवत् अदुद्रुवताम् । स्रु—असुस्रुवत् असुस्रुवताम् इत्यादि ।

ण्यन्तानां—याच्-णिचि कृते (याच्+इ) याचि इति णिजन्तो धातु । चङि कृते द्वित्वे अययाचि+अत् इति जाते 'णेरनिटि' (७८१) इति वक्ष्यमाणो णेर्लोप—

अययाचत् । एव शास्—अशशासत्, राज्—अरराजत् इत्यादि ।

अथ चङि केषाचिण्णिजन्तानाम् उपधाह्रस्वो विधीयते—

(७२६) **णौ चङ्युपधाया ह्रस्वः** । ७ । ४ । १ ।

'अङ्गस्ये'—त्यधिकारो वर्त्तते । णौ परे तस्माच्च चङि परे यदङ्गं (णि प्रयुक्त) तस्योपधाया ह्रस्व स्यात् । णौ हि परे लघूपधगुणेन, णित्वप्रयु-

क्ताभ्या 'अचो ञ्णिति' (२८२) 'अत उपधाया' (७३४) इति वृद्धि-भ्या च अङ्गस्य उपधाया दीर्घता भवति। तस्यानेन ह्रस्वो विधीयते। यथा—

चुर्---णिचि लघूपधगुणे चोरि—प्रस्तुतसूत्रेण चङि ह्रस्व। चुरि + अ—द्वित्वे, चुचुरि + अ—णिलोप, चुचुर्—'सन्वद्भावात्' (६३४), 'दीर्घो लघो' (६३५) इत्यभ्यासदीर्घ।

अचूचुरत् अचूचुरताम् अचूचुरन्। अचूचुर अचूचुरतम् इत्यादि।

कृ—णिचि 'अचो ञ्णिति' इति वृद्धि—कारि-चङि ह्रस्व, करि + अ—द्वित्वम-भ्यासकार्यं च—चकरि + अ—णिलोप, चकर्—सन्वद्भावादित्व, दीर्घश्च—**अचीकरत् अचीकरत**। पच—णिचि 'अत उपधाया' इति **वृद्धि**, पाचि—णौ चङ्युपधाया ह्रस्व—पचि + अ—द्वित्व—पपचि + अ—णिलोप—पपच्। सन्वद्भावे इत्वदीर्घौ—**अपीपचत्—त**।

(७२७) **नाग्लोपिशास्वृदिताम्**। ७। ४। २।

अग्लोपिनामङ्गाना शास्तेर्ऋदिता च णौ चङ्युपधाया ह्रस्वो न। अक् प्रत्याहार, तल्लोपवन्त अग्लोपिन। इह हि चुरादौ कथादिरन्तर्गण तत्र पठिता धातव अकारान्ता। अकारस्य च णिचि कृते 'अतो लोप' इति लोपो भवति। एव कथादयोऽग्लोपिन। किं च 'प्रातिपदिकाद्धात्वर्थे ' इति चुराद्यन्तर्गतगणसूत्रेण प्रातिपदिकेभ्योऽपि णिच् विधीयते। तत्र च टिलोपवचनात् अगन्ताना अग्लोपो भवति। ईदृशान्यङ्गान्यत्र 'अग्लोपि'—शब्देन ग्राह्याणि। सन्वल्लघुनि चङ्परेऽनग्लोप' इति निषेधश्च ईदृशाना धातूनामेव। तथा च अगन्तनामधातूना कथादीना ऋदिता च णौ चङ्युपधाया ह्रस्वः, सन्वद्भाव, लघोरभ्यासस्य दीर्घ इति त्रय न भवति। इद्धपस्य तु अको लोपो न पर्याप्त। अत एव 'ऋदिता' पृथङ्निषेध आरभ्यते। यथा—

अग्लोपिषु (१) कथादि —सूच—असुसूचत्। केत—अचिकेतत्।
(२) नामधातु —माला—अममालत्। मातृ—अममातरत्।
शास्—अशशासत्।
ऋदित् नाथृ—अननाथत्। ढौक्—अडुढौकत्।

(७२८) **भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम्**। ७। ४। ३।

एषा वा णौ चङ्युपधाया ह्रस्व । यथा—
भ्राज—अबिभ्रजत्, अबभ्राजत् । भास—अबीभसत्, अबभासत् ।
भाष —अबीभषत्, अबभाषत् । इत्यादि ।

(७२९) **लोपः पिबतेरीच्चाभ्यासस्य** । ७ । ४ । ४ ।

पिबतेर्णौ चङ्युपधाया लोप, अभ्यासस्य इत्त्व च । यथा—
पापि—पीप् य + अत्—अपीप्यत् ।

(७३०) **तिष्ठतेरित्** । ७ । ४ । ५ ।

णौ चङ्युपधाया इत् । स्था—स्थापि—अतिष्ठिपत् ।

(७३१) **जिघ्रतेर्वा** । ७ । ४ । ६ ।

जिघ्रतेरिद्वा । घ्रा—घ्रापि—अजिघ्रिपत्, अजिघ्रपत् ।

(७३२) **उर्ऋत्** । ७ । ४ । ७ ।

णौ चङ्युपधाया ऋवर्णस्य ऋकारादेशो वा । 'ऋत इद्धातो उपधाया च' इति इदादेशस्य, लघूपधगुणस्य मृजेर्वृद्धेश्चायमपवाद । अत उच्यते इररारामपवाद इति । यथा—

इर् — कृत — कीर्त्ति — अचिकीर्तत्, अचीकृतत् ।
अर — वृत — वर्त्ति — अववर्त्तत्, अवीवृतत् ।
आर् — मृज — मार्ज — अममार्जत्, अमीमृजत् ।

लिट्

अयमार्धधातुको लकार । नास्त्यत्र ततो विकरणम् । नापि सस्करण विध्यभावात् । 'अत्र परस्मैपदाना णलतुसुस्थलथुसणल्वमा.' (४७४) 'लिटस्तझयोरेशिरेच्' (४७३) इत्यादेशा । 'लिटि धातोरनभ्यासस्य' (६०२) इति द्वित्वमभ्यासकार्यसबलितम् । 'असयोगाल्लिट् कित्' (६८७) इति कित्त्वम् । तन्निमित्तक 'आतो लोप इटि च' (७२०) इत्याल्लोप., 'वचिस्वपि ' (५१५) इति सम्प्रसारण, गुणनिषेधश्च । क्रादिनियमात् (६६३) कृता इड्व्यवस्था इत्यादयोऽन्ये विशेषविधयश्चानुसन्धेया ।

कृञ् करणे—द्वित्व, अभ्यास-ककारस्य अत्व, कोश्चुत्व च, 'अचो ञ्णिति' (२८२) इति वृद्धि, **चकार**। द्विबहुवचनयो णिच्चाभावेन कित्त्वात् गुणप्रतिषेधे सन्धि-कार्यम्। थण्, **चक्रतुः चक्रुः**। 'कृसृभृ . ' (६६३) इति सर्वत्र इण्निषेध, **चकर्थ चक्रथु चक्र**।

(७३३) **णलुत्तमो वा** ।७।१।९१।

इति णित्त्वस्य विकल्पनात् णित्त्वपक्षे वृद्धि, तदभावे गुण'—**चकार, चकर चकृव चकृम**। तडि—**चक्रे चक्राते चक्रिरे। चकृषे चक्राथे चकृढ्वे** ['इण षीध्वंलुङ्लिटां धोऽङ्गात्' (३८८) इति मूर्धन्यो ढ्]। **चक्रे चकृवहे चकृमहे**।

गद व्यक्तायां वाचि—

(७३४) **अत उपधायाः** ।७।२।११३।

'अचो ञ्णिति' इत्यतोऽनन्तर सूत्रमिदम्। उपधाया अकारस्य वृद्धि' स्यात् ञिति णिति च प्रत्यये परे।

इत्यनेन वृद्धि – **जगाद् जगदतु जगदु** सेट्त्वात् क्रादिनियमस्य नावकाश, **जगदिथ जगदथुः जगद**। **जगाद जगद जगदिव जगदिम**।

णीञ् प्रापणे—**निनाय**। 'एरनेकाच ' (३६७) इति यण्, **निन्यतुः निन्युः**। भारद्वाजनियमादिड्वा। **निनयिथ, निनेथ निन्यथुः निन्य**। **निनाय निनय**। क्रादिनियमानित्यमिट्, **निन्यिव निन्यिम**। तडि—**निन्ये निन्याते निन्यिरे**। **निन्यिषे निन्याथे निन्यिध्वे, निन्यिढ्वे**, 'विभाषेट (३८९) इति वा मूर्धन्यो ढ। **निन्ये निन्यिवहे निन्यिमहे**।

इष इच्छायां—द्वितीयस्यैकाचोऽभावात् प्रथमस्यैव द्वित्व, इ+इष-गुण, इ+एष। अत्र अभ्यासस्याङ्गत्वाभावादप्राप्त इयङ् विधीयते—'अचि श्नुधातु. . ' इत्यतोऽनन्तर सूत्रम्—

(७३५) **अभ्यासस्यासवर्णे** ।६।४।७८।

अभ्यासस्य इवर्णोवर्णयोरियङुवङौ स्तः असवर्णे अचि परे।

अनेन एकवचनेषु इयङ् **इयेष ईषतुः ईषुः**। **इयेषिथ**।

ऋच्छ गतौ–द्वित्वे–'उरत्' (६१०), 'अत आदे' (६१४) दीर्घ, 'तस्मा-नुड द्विहल', **आनर्च्छ 'आनर्च्छतुः**। 'ऋच्छत्यृताम् (७३८) इति वक्ष्यमाणो गुण।

द्युत-दिद्युते। स्वप-सुष्वाप। किस्वात् 'वचिस्वपि ' इति सम्प्रसारण **सुषुपतु, सुषुपु । व्यथ-विव्यथे**। इण्-द्वित्व-वृद्धघायादेशौ अभ्यासस्येयङ् **इयाथ**। इ + यतुस् इति स्थिते 'दीर्घ इण किति' (६१३) इत्यभ्यासदीर्घ., **ईयतु ईयु । इयेथ, इयथिथ ईयथु ईय। इयाय, इयथ ईयिव ईयिम**।

गम्लृ गतौ—(५६०) **जगाम जग्मतु जग्मु। जगमिथ जगन्थ**।

हन—(५६०-१-२) **जघान जघ्नतु. जघ्नु । जघनिथ जघन्थ**।

भू—'भवतेर ' (६१७) 'भुवो वुग्लुङ्लिटो ' (७१०) **बभूव बभूवतु बभूवु। बभूविथ**।

या—यया + अ इति स्थिते–

(७३६) **आत औ णलः**। ७। १। ३४।

आकारान्ताद्धातो परस्य णल औ इत्यादेश ।

ययौ। यया + अतुस् इत्यत्र 'आतो लोप इटि च' (७२०) इत्याल्लोप — **ययतु ययु** । इटि परे आल्लोप, **ययिथ, ययाथ ययथु यय। ययौ ययिव ययिम**।

(७३७) **ऋतश्च संयोगादेर्गुणः** (लिटि)। ७। ४। १०।

सयोगादेर्ऋदन्तस्याङ्गस्य गुणो लिटि। किस्वेन प्रतिषिद्धस्य गुण-स्यावसरप्रदानमात्रमेतत्। अतो णलि णित्त्वप्रयुक्ता वृद्धिरेव। गुणानन्तर 'अत उपधाया' इति वृद्धिर्वा।

स्मृ—सस्मार सस्मरतु सस्मरु । सस्मर्थ।

(७३८) **ऋच्छत्यृताम्**। ७। ४। ११।

ऋच्छते ऋधातो ऋकारान्तानां च लिटि गुण ।

ऋच्छ—आनर्च्छ आनर्च्छतु आनर्च्छु । आनर्च्छिथ ।

ऋ-कृ—चकार चकरतु चकरु । चकरिथ ।

(७६९) **अत एकहल्मध्येऽनादेशादेर्लिटि**। ६। ४। १२०।

एदभ्यासलोप किति इति पदत्रयमनुवर्त्तते। आदेश आदिर्यस्य न भवति सोऽनादेशादिः। इह लिटि द्वित्व अभ्यासस्य जश्त्वचर्त्वे चुत्व

च आदेशा भवन्ति । यस्य जश्त्वचर्त्वचुत्वानामवकाश सोऽत्रादेशादि । जश्त्वचर्त्वयोश्च अशा जश खरा चर इति व्यवस्था कृता । तत्र जश एव स्थाने जश् चय एव स्थाने चय् प्रवर्तमानस्तु आदेशत्वेन न गृह्यते । 'न शशददवादिगुणाना' इति शसददोन्निषेधारम्भ एव अत्र ज्ञापक । अतोऽत्र रूपभेदकारी प्रतिनिधिरेव आदेशशब्देन गृह्यते । एव च घोष-अतिखर-कवर्ग-हकारादयो धातव. अनादेशादेरिति पदस्य व्यावर्त्या । 'धात्वादे ष स' 'णो न' इत्येतौ प्रयोजनान्तरमुद्दिश्य कृतावादेशौ च नात्र गृह्येते। लिट्प्रयोज्य आदेश एवात्रादेश इति फलितम्। असयुक्तहल्लोर्मध्ये स्थितस्य अनादेशादेरकारस्य एत्वमभ्यासलोपश्च किति लिटि। यथा—

पच—पेचतु पेचु । पेचे पेचाते पेचिरे । रण—रेणतु रेणु । मन—मेने मेनाते मेनिरे । तन—तेनतु तेनु । तेने तेनाते तेनिरे ।

प्रत्यु—('एकहल्म ध्ये' कि?) रक्ष—ररक्षतु ररक्षु ।
श्रम—शश्रमतु शश्रमु ।

('अनादेशादे' कि?) खन—चख्नतु चख्नु (चर्त्वम्)।
गद—जगदतु. जगदु (चुत्वम्)।

(७४०) थलि च सेटि ।६।४।१२१।

थल कित्त्वाभावादप्राप्ते वचनम् । सेटि थलि च एकहल्मध्यस्थस्यानादेशादेरत एदभ्यासलोपश्च । यथा—

पच—पेचिथ पपक्थ । रण—रेणिथ । तन—तेनिथ । जप—जेपिथ ।

(७४१) तृफलभजत्रपश्च ।६।४।१२२।

एषामप्यत एत्, अभ्यासलोपश्च किति लिटि, सेटि थलि च । तृधातोरकारस्य गुणनिष्पन्नत्वात्, फलभजोरादेशादित्वात्, त्रपते. सयोगादित्वाच्च निषेध. प्राप्त । यथा—

तृ—ततार तेरतु तेरु । तेरिथ । फल—पफाल फेलतु फेलु । फेलिथ । भज—बभाज भेजतु भेजु । भेजिथ । भेजे । त्रप—त्रेपे त्रेपाते त्रेपिरे ।

(७४२) राधो हिंसायाम् ।६।४।१२३।

हिंसार्थकस्य राधधातोरवर्णस्य एत्वमभ्यासलोपश्च किति लिटि सेटि थलि च । राध—अपराध अपरेधतु अपरेधु ।

(७४३) **वा जॄ-भ्रमु-त्रसाम्** । ६ । ४ । १२४ ।

एषां अत एदभ्यासलोपश्च वा किति लिटि सेटि थलि च । यथा—

जजार	जेरतु	जजरतु	जेरु	जजरु ।	जेरिथ जजरिथ ।
बभ्राम	भ्रेमतु	बभ्रमतु	भ्रेमु.	बभ्रमु ।	भ्रेमिथ बभ्रमिथ ।
तत्रास	त्रेसतु	तत्रसतु	त्रेसु	तत्रसु ।	त्रेसिथ तत्रसिथ ।

(७४४) **फणां च सप्तानाम्** । ६ । ४ । १२५ ।

एषामप्यवर्णस्य एदभ्यासलोपश्च वा उक्तनिमित्ते । यथा—

फण—पफाण फेणतु फेणु । फेणिथ । राज—रराज रेजतु रेजु । रेजे ।

पक्षे—पफणतु, रराजतु, रराजे इत्यादि । फण, राज, भ्राज, भ्राश, भ्लाश, स्यम, स्वन, फणादि ।

(७४५) **न शसददवादिगुणानाम्** । ६ । ४ । १२६ ।

शसददोर्वकारादीनां चाकारस्य, गुणनिष्पन्नस्य अकारस्य च एत्वमभ्यासलोपश्च न उक्तनिमित्ते । यथा—

शस—	(वि) शशसतु	(वि) शशसु ।	(वि) शशसिथ ।	
दद—	ददे	ददाते	ददिरे ।	
वादि—वम	वव्रमतु	वव्रमु ।	वव्रमिथ ।	
गुण—शॄ	शशरतु	शशरु ।	कॄ—चकरतु	चकरु ।

अथ आम्विधि—

(७४६) **कास्प्रत्ययादाममन्त्रे लिटि** । ३ । १ । ३५ ।

कासृ शब्दकुत्सायाम्—इत्यस्मात् प्रत्ययान्तेभ्यश्च धातुभ्यो लिटि आम्प्रत्ययः स्यात् । न तु मन्त्रे (छन्दसि) । अत्र वार्त्तिकम्—

॥ * ॥ **कास्यनेकाच आम्वक्तव्यः चुलुम्पाद्यर्थम्** ।

इति । 'प्रत्ययात्' इत्यस्य स्थाने 'अनेकाच' इति वक्तव्यम् । यथा 'चुलुम्प पाने' इत्यादिभ्योऽपि आम् स्यादित्यर्थः । आमो मकारस्य आस्कासोरन्विधानात् ज्ञापकान्नेत्सञ्ज्ञा क्रियते । 'विदाकुर्वन्तु' इत्यादि निपातनेषु

मकार श्रूयते च। आम्प्रत्ययोऽय लिटि विकरणस्थान वहति। आम्-विधायकसूत्राणि व्याख्याय प्रक्रिया दर्शयिष्याम ।

इजादेश्च गुरुमतोऽनृच्छः । ३ । १ । ३६ ।

इजादिर्यो धातुर्गुरुमान् ऋच्छतिवर्जितस्तस्माच्च लिट्याम् ।

(७४८) दयायासश्च । ३ । १ । ३७ ।

दय दानगतिरक्षणेषु, अय गतौ, आस उपवेशने एभ्यश्च लिट्याम् ।

(७४९) उषविदजागृभ्योऽन्यतरस्याम् । ३ । १ । ३८ ।

उष दाहे । विद ज्ञाने, जागृ निद्राक्षये एभ्यो लिट्याम् वा ।

(७५०) भीह्रीभृहुवां श्लुवच्च । ३ । १ । ३९ ।

एभ्यो लिट्याम् वा । तदा श्लाविव कार्य च । आमि धातोर्द्वित्वमपि स्यादित्यर्थ ।

आमि कृते लिट एव लोप उक्त । यथा—

(७९१) आम (लेर्लुक्) । १ । ४ । ७१ ।

आम परस्य ले (लिट) लुक् स्यात् । लिटि लुप्ते आमन्त मान्त-कृदन्तमित्यव्ययम् । तस्मात् सुपि लुकि पदसज्ञा । अथ कथमस्य पुरुषवच-नव्यक्तिरित्यत आह—

(७९२) कृञ्चानुप्रयुज्यते लिटि । ३ । १ । ४० १ ।

लिटि कृञ् = लिट्परः कृञ् = लिडन्त कृञ् इत्यर्थ । पुरुषवचन-विवेचनाय आमन्तात् पराणि कृञ्धातोर्लिटि रूपाण्यनुप्रयुज्यन्ते । कृञ उभयपदित्वात् कतरत्पद ग्राह्यमित्याकाङ्क्षायाम्

(७९३) आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य । १ । ३ । ६३ ।

आम्प्रत्यय आम्प्रत्ययान्त । तस्येव तद्वत् । आम्प्रत्ययान्तस्य धा-तोरिवानुप्रयोगस्य कृञ पद बोध्यम् । इति पदव्यवस्थोक्ता । इह कृञ्-ग्रहणादनुप्रयोगोऽन्यस्याप्यस्तीति ज्ञायते । कस्यान्यस्येति पर्यालोचनाया 'कृञ्च' इति चकारादनुक्तसमुच्चयार्थकात्, यथा कृञ् तथा सामान्यवाची धातुरन्योऽपि अनुप्रयुज्यत इति गम्यते । सामान्यवाचिषु च कृम्वस्तय.

प्रधानम् । 'कृभ्वस्तियोगे सम्पद्यकर्तरि च्वि·' इति सूत्रे तेषां साहचर्यं च दृश्यते । अत आमन्तात् कृभ्वस्तीना लिङन्तरूपाण्यनुप्रयोज्यानि । सामान्यवाचिनामनुप्रयोगाणा विशेषवाचिभिरामन्तैः सहाभेदेनान्वय· ।

अथ सूत्राण्युदाहियन्ते—

कास् + आम् + लिट्—लिटो लुक्, कासा—कृभ्वस्तीनामनुप्रयोग,
कासाञ्चक्रे कासाञ्चक्राते इत्यादि ।
कासाम्बभूव कासाम्बभूवतुः ,,
कासामास कासामासतु ,,

अनेकाच्—चकास्—चकासाञ्चकार, —आस—बभूव ।
कारि —कारयाञ्चकार —(णेरयादेशो विधास्यते)
जिगमिष—जिगमिषाञ्चकार — ,, ,,
एध—एध —एधाञ्चक्रे — ,, ,,
ईह —ईहाञ्चक्रे — ,, ,,
उज्झ —उज्झाञ्चकार — ,, ,,
दय—दयाञ्चक्रे — आस — बभूव ।
अय—अयाञ्चक्रे — ,, — ,,
आस—आसाञ्चक्रे — ,, — ,,
उष—ओषाञ्चकार —उवोष —आन्निमित्तको लघूपधगुण ।
विद—विदाञ्चकार —विवेद —'विदाङ्कुर्वन्त्विति' निपातनाच्च गुण ।
जागृ—जागराञ्चकार —जजागार —इगन्तगुण ।
भी—बिभयाञ्चकार —बिभाय —श्लुवद्भावाद्द्वित्वम् ।
ह्री—जिह्रयाञ्चकार, —जिह्राय — ,,
भृ—बिभराञ्चकार, —चक्रे,—बभार,—बभ्रे । ,,
हु—जुहवाञ्चकार, —जुहाव ।

जागृधातोरामभावे द्विबहुवचनयोः कितोरपि गुणो विहितः । यथा—

(७९४) **जाग्रोऽविचिण्णल्ङित्सु** । ७ । ३ । ८५ ।

जागर्तेर्गुण· स्यात् विन्, चिण्, णल्, ङितः एभ्योऽन्येषु प्रत्ययेषु । अनेन जजागरतुः जजागरुः इत्यादि ।

अत्र पदान्तरव्यवधान विनैवानुप्रयोग कार्य इति व्याख्यातार । प्राचीना कवयस्तु व्यवहितमपि अनुप्रयोग कुर्वते । यथा—

'ता पातया प्रथममास पपात पश्चात्' 'प्रश्रयाय यो नहुष चकार'

इति क्वचित् प्रयुक्तवान् काळिदास । अश्वघोषस्त्वसकृत् प्रायुङ्क्त । अतो मन्यामहेऽव्यवहितप्रयोगनिर्बन्धोऽर्वाचीन इति । किञ्च 'अनुप्रयुज्यते' इति साम्प्रदायिकता शासता लटा निर्देशेनानुप्रयोगसम्प्रदायस्य स्वर्जावित-काले अव्यवस्थितत्व ज्ञापयति पाणिनि । अष्टाध्याय्यामव्यस्थितेष्वेव कार्येषु लट्प्रयोगो दृश्यते। यथा 'अन्येभ्योऽपि दृश्यते' इति । 'विदाकुर्वन्तु' इति लोटि, 'प्रजनयामक' 'विदामक्रन्' 'पावयाक्रियात्' इति छन्दसि लुङ्लिङोरपि विरळमुपलभ्यमानोऽयम् आमप्रयोगश्छान्दसभाषायाश्चरम-दशाया लब्धजन्मा प्रथम कृञैव बाहुल्येनानुप्रयुक्तो लौकिकभाषायामपि प्रवेशमासाद्य लिण्मात्रे व्यवस्थित आदौ शिथिलमनुप्रयोगेणोपष्टब्ध प्रथम प्रत्ययान्तेषु व्युत्पन्नधातुष्वेवोपयुक्तस्ततोऽनेकाक्षरेषु गुरुस्वरादिष्वपि लाघवा-द्वाप्नुवन्नस्तिभवतिभ्यामपि गाढतरसहिताभ्या यथेच्छमनुप्रयोक्तव्यता प्राप्य दृढप्रतिष्ठ सवृत्त इति प्रतिभाति ।

(७९९) **विदाङ्कुर्वन्त्वित्यन्यतरस्याम्** । ३ । १ । २१ ।

लोट्यपि विदधातो कृआनुप्रयोगेण सवलित आम् वा भवति । प्रथमपुरुषबहुवचननिर्देशः प्रयोगबाहुल्यानुसारेणोपलक्षणार्थ । अत्र आमि लघूपधगुणाभावनिबन्धनेन लिट्यपि विदधातोर्गुणाभाव ज्ञापयत्याचार्य. । तेन विदाञ्चकार, विदामास, विदांबभूव इत्येव लिट्यपि ।

अनेकाच आम् विधिमुपदिशन् कात्यायन ऊर्णोतेराम् प्रतिषेधमप्यु-क्तवान् । 'ऊर्णु' इति णत्वस्यासिद्धत्वात् ऊर्नु इति स्थितस्य द्वित्वप्रसङ्गे 'अजादेर्द्वितीयस्य' 'नन्द्रा सयोगादय' इति च नियमात् 'नु' इत्येकाच् द्विरुच्यते । **ऊर्णुनाव, ऊर्णुनुवतुः ऊर्णुनुवुः** । 'विभाषोर्णोः (इट् डित्)' इति इडादिप्रत्ययस्य डित्त्वविकल्पनात् **ऊर्णुनविथ, ऊर्णुनुविथ** ।

दरिद्रातेरप्याशिषेधो विकल्पेनेष्यते। आमभावे, "दरिद्रातेरार्धधातुके विवक्षित आलोपो वाच्य । लुडि वा। सनि लुटि ण्वुलि च न।" इति वार्त्तिकेन आलोपे **ददरिद्रौ ददरिद्रतुः** इत्यादि। **दरिद्रिता। दरिद्रिष्यति। अदरिद्रीत्, अदरिद्रासीत्।**

आशीर्लिङ ।

'लिङाशिषि' (३९२) इत्यार्धधातुक, 'किदाशिषि' (४९०) इति कित्वामुड्युक्तश्चाय लिङ्। आर्धधातुकत्वादस्य सलोपो नास्ति।

भू सत्तायां—भू+यास्त् इति स्थिते ङित्वान्न गुण । आर्धधातुकत्वेऽपि बलादित्वाभावान्नेट् । यासुडागमयोगेन प्रत्ययस्यार्धधातुकत्वाभावान्न हलन्तादिलोप । 'स्कोः संयोगाद्योरन्ते च' (४९५) इति संयोगादिलोप, **भूयात् भूयास्तां भूयासु । भूया भूयास्त भूयास्त। भूयासं भूयास्व भूयास्म।**

एध वृद्धौ।—तङि सीयुटि प्रत्ययाना सादित्वादिट्। **एधिषीष्ट एधिषीयास्ताम् एधिषीरन्। एधिषीष्ठाः एधिषीयास्थाम् एधिषीध्वम् एधिषीय एधिषीवहि एधिषीमहि।** (२९४)–तमे सूत्रे सुट्सीयुडभ्यां निष्पादिता प्रत्यया द्रष्टव्यन्ताम्।

भिद—(६३९)–तम सूत्रेण किरव—**भित्सीष्ट।**
बुध— ,, ,, ,, —**भुत्सीष्ट**। अत्र भष्भावश्च।
कृ —'उश्च' (६९४) इति किरव—**कृषीष्ट कृषीयास्ताम्।**
'रिङ् शयग्लिङ्षु' (५२९) **क्रियात् क्रियास्ताम्।**
कॄ —'ऋत इद्धातो' (५२२), 'हलि च' (५३१) इति दीर्घ –**कीर्यात्।**
पॄ —'उदोष्ठ्यपूर्वस्य' (५२८) ,, ,, ,, ,,—**पूर्यात्।**
वच, स्वप—'वचिस्वपि ' (५१५) इति सम्प्रसारणम्–**उच्यात्, सुप्यात्।**

आशीर्लिङ प्रयोगेष्वनतिप्राचुर्याद्विशिष्य प्रक्रिया नोच्यते। प्रकरणान्तरेषु प्रसङ्गादुक्ता वक्ष्यमाणाश्च प्रक्रिया अत्रानुसन्धेया ।

यथा सार्वधातुकेषु पाघ्रादीना पिबजिघ्रयादय आदेशा उक्तास्तथा आर्धधातुकेष्वपि केषाचिदादेशा सन्ति । पिबादय सार्वधातुकसामान्ये परतो भवन्ति । वक्ष्यमाणास्तु प्राय आर्धधातुकविशेष एवेति भेद । त इदानीमुच्यन्ते—

(७५६) **आर्धधातुके** । २ । ४ । ३५ ।

इत्यधिकृत्य । विषयसप्तमी चेयम् । तेनार्धधातुकविवक्षायामादेशेषु कृतेषु पश्चाद्यथाप्राप्त कार्य भवति । भव्यम्, आस्येय, जघास । परसप्तमीत्वे तु आद्ययोर्ण्यत् स्यात् तृतीये घस्लृ येन नाप्राप्तिन्यायेन द्वित्वापवाद स्यात् ।

(७५७) **अदो जग्धिर्ल्यप्तिकिति** । २ । ४ । ३६ ।

अदो जग्धिरादेश स्यात् ल्यपि तकारादौ किति च प्रत्यये । यथा—

ल्यप्—प्रजग्ध्य । क्त—जग्ध । क्त्वा—जग्ध्वा ।

(७५८) **लुङ्सनोर्घस्लृ** । २ । ४ । ३७ ।

लुङि सनि च अदो घस्लृ इत्यादेश । लृकारोऽदर्थ । यथा—

अघसत् अघसताम् अघसन् । सनि—जिघत्सति ।

(७५९) **घञपोश्च** । २ । ४ । ३८ ।

अनयो कृत्प्रत्ययोरपि अदो घस्लृ । यथा—घञ्—घास, अप्—प्रघस ।

(७६०) **लिट्यन्यतरस्याम्** । २ । ४ । ४० ।

अदो वा घस्लृ । यथा—जघास—जक्षतु, जक्षु । 'गमहन ' (५६०) इत्युपधालोप । आद आदतु आदु ।

(७६१) **वेञो वयिः** । २ । ४ । ४१ ।

लिटि वा वेञो वयिरादेश । वय् + अ—द्वित्व, वय् वय् अ "लिट्यभ्यासस्ये"ति यकारस्य सम्प्रसारणे प्राप्ते 'लिटि वयो य ' (न सम्प्रसारण) (६ । १ । ३८) वयो यकारस्य न सम्प्रसारणमिति निषेधेन यकारस्य न । वकारस्य तु भवत्येव । उवाय ऊयतु ऊयु 'वश्चास्यान्यतरस्या किति' (६-१-३९) इति यकारस्य किति पक्षे वकार । ऊवतु ऊवु । वयादेशाभावे, 'वेञ ' (६-१-४०) लिटि सम्प्रसारण न इति ववौ-ववतु ववु ।

(७६२) **हनो वध लिङि** । २ । ४ । ४२ ।

हन्तेर्वधादेश आर्धधातुके लिङि । यथा—वध्यात् वध्यास्ता वध्यासु ।

(७६३) **लुङि च** । २ । ४ । ४३ ।

हनो वधादेश । अवधीत् अवधिष्टाम् ।

(७६४) **आत्मनेपदेष्वन्यतरस्याम्** । २ । ४ । ४४ ।

पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । यथा—

आवधिष्ट आवधिषाताम् । आहत आहसाताम् ।

(७६५) **इणो गा लुङि** । २ । ४ । ४५ ।

अगात् अगाताम् अगु । 'गातिस्था' (७०८) इति सिचो लुक् ।

(७६६) **णौ गमिरबोधने** । २ । ४ । ४६ ।

णौ परे इणोऽबोधार्थस्य गमिरादेश । यथा—गमयति । बोधने तु प्रत्याययति ।

(७६७) **सनि च** । २ । ४ । ४७ ।

अबोधनार्थस्य इणो गमिरादेश । यथा—जिगमिषति । बोधनार्थे तु प्रतापिपयिषति ।

(७६८) **इङश्च** । २ । ४ । ४८ ।

सनि परे गमिरादेश । यथा—अधिजिगांसते । अध्येतुमिच्छति ।

(७६९) **गाङ् लिटि** । २ । ४ । ४९ ।

इङो गाङादेशो लिटि । यथा—अधिजगे ।

(७७०) **विभाषा लुङ्लृङोः** । २ । ४ । ५० ।

इङो वा गाङ् । यथा—अध्यगीष्ट, अध्यैष्ट । अध्यगीष्यत, अध्यैष्यत ।

(७७१) **णौ च संश्चङोः** । २ । ४ । ५१ ।

इङो गाङ् वा । यथा—णौ सनि—अधिजिगिप्यापयिषति । अध्यापिपयिषति ।

चङि—अध्यजीगपत् । अध्यापिपत् ।

(७७२) **अस्तेर्भूः** । २ । ४ । ५२ ।

आर्धधातुके अस्तेर्भूरादेश । यथा—

भविता, भविष्यति, बभूव, अभूत्, भूयात् ।

(७७३) **ब्रुवो वचिः** । २ । ४ । ५३ ।

ब्रुवो वचिरादेश आर्धधातुके । यथा—

वक्ता, वक्ष्यति उवाच अवोचत् उच्यात् ।

वक्ता, वक्ष्यते ऊचे अवोचत वक्षीष्ट ।

(७७४) **चक्षिङः ख्याञ्** । २ । ४ । ५४ ।

चक्षिङ ख्याञादेश आर्धधातुके । यथा—

ख्याता ख्यास्यति चख्यौ अख्यत् ख्येयात् ।
ख्याता ख्यास्यते चख्ये अख्यत ख्यासीष्ट ।

(७७५) **वा लिटि** । २ । ४ । ५५ ।

चक्षिङ ख्याञ् वा । यथा—

चचक्षे चख्यौ चख्ये ।

(७७६) **अजेर्व्यघञपोः** । २ । ४ । ५६ ।

अजेर्वीतो वीत्यादेश आर्धधातुके, न तु घञपो । **बलादावार्धधातुके विकल्प इष्यते** । यथा—वेता, अजिता । वेष्यति, अजिष्यति । बलादौ किम् ? प्रवयणीयम् । घञपोस्तु । समाज , समज ।

(७७७) **वा यौ** । २ । ४ । ५७ ।

यु इति ल्युट्यो ग्रहणम् । तत्र अजेर्वा । यथा—प्रवयणम् प्राजनम् ।

सार्वधातुकमात्रविषयाणा असञ्ज्ञभृतीना खिलत्व परिजिहीर्षुर्भूवचादीनेषामादेशान् करोत्याचार्य ।

व्युत्पन्ना धातव ।

व्याख्याता अव्युत्पन्ना केवला धातवो ये ' भ्वादयो धातव ' (१२९) इति दशभिर्गणै परिगणिता । अथ व्याख्यायन्ते व्युत्पन्नधातवो ये ' सनाद्यन्ता धातव ' (१२७) इत्युक्तलक्षणा । सनादयश्च ।

सश्च क्यच्-क्यङ्-क्यष काम्यच् णिङ्णिचौ यग्यङौ तथा ।
आय ईयङिति प्रोक्ता एकादश सनादय ॥

इति परिगणिता एकादश प्रत्यया । एषु सन्णिचौ सर्वेभ्योऽपि धातुभ्यो भवत । यङ् हलाद्येकाजभ्य एव । णिङीयङाया निर्दिष्टधातुभ्य एव । यक् कण्ड्वादिभ्य इति व्यवच्छिन्न । किञ्च, सन्णिचौ स्वार्थिकौ सार्थकौ चेति द्विविधौ । यङ्-क्यच्-क्यङ्-क्यष्-काम्यच' सार्थका एव । शेषा यगीयङायणिङ स्वार्थिका एव । एषु सन्णिचोरेव बहुल प्रयोग इति तावेव सविशेषमत्र व्याख्यायेते ।

---

1. सार्थको णिच् ।

(७७८) **स्वतन्त्रः कर्त्ता** । १ । ४ । ५४ ।

क्रियासिद्धौ स्वातन्त्र्येण, प्राधान्येन, विवक्षित कारक कर्तृसञ्ज स्यात् ।

(७७९) **तत्प्रयोजको हेतुश्च** । १ । ३ । ५५ ।

तस्य, कर्तुः प्रयोजक, प्रेरको योऽर्थस्तत् कारक हेतुसञ्ज स्यात् कर्तृसञ्ज च । यदा हि कर्त्ता परप्रेरणया क्रिया करोति तदा स्वय क्रियानिर्वाहक परप्रेर्यत्वात् प्रयोज्यकर्त्ता, अन्य प्रेरकत्वात् प्रयोजककर्ता । प्रयोजककर्तुरेव हेतुरिति सज्ञा विहिता ।

(७८०) **हेतुमति च** । ३ । १ । २ ६ ।

हेतु प्रयोजककर्त्ता । तदीयो व्यापार प्रेरणादिलक्षणो हेतुमान् । तस्मिन्नर्थे धातोर्णिच् प्रत्यय । देवदत्त कट करोति । त यदा यज्ञदत्त कटकरणक्रियाया प्रेरयति तदा कृधातोर्णिच् । णकारचकारावितौ । 'कृ+इ' इति स्थिते णित्त्वाडिगन्ताङ्गस्य वृद्धि । 'कारि' इति णिजन्तो धातु । तस्मात् लकार । कर्त्तरि लटि शप् । तत्प्रयुक्त इगन्तस्य 'कारि' इति धातोर्गुण, 'कारय' इति विकरणप्रत्ययान्त लट्-लङ्-लोट्-लिङामङ्गम् । तत —

कारयति कारयत कारयन्ति । कारयसि कारयथ कारयथ । कारयामि कारयाव कारयाम । इति नयतिवद्रूपाणि । तद्धि—कारयते कारयेते कारयन्ते । कारयसे कारयेथे कारय-ध्वे । कारय कारयावहै कारयामहै ।

इति नयतिवदेव रूपाणि । णिजन्ता सामान्येनोभयपदिन ।

लङि—अकारयत् अकारयताम् । अकारयत अकारयेताम् इत्यादि ।

लोटि—कारयतु-ताम् । कारयेत्-त इत्यादि ।

एकाचामेव (६७२) इण्निषेधात् व्युत्पन्ना धातव सेट एव ।

लृटि—कारयिष्यति-ते । लृङि—अकारयिष्यत्-त । लुटि—कारयितासि-से ।

लुङि—'णिश्रि ' (४५८) इति चङ् । चङि परे—

(७८१) **णेरनिटि** (लोप आर्धधातुके) । ६ । ४ । ९१ ।

अनिडादावार्धधातुके परे णेर्लोप ।

[(७८२) **निष्ठायाम् सेटि** । ६ । ४ । ५२ ।

सेटि निष्ठायामपि णेर्लोप । निष्ठा नाम क्तक्तवतू कृत्प्रत्ययौ । कारि + इत = कारित । कारि + इतवत् = कारितवत् । इति णिलोप ।] **अचीकरत्–त** । लुङ्प्रक्रिया दृश्यताम् ।

लिटि अनेकाच्त्वादामेव । आमि परे–

(७८३) **अयामन्ताल्वाय्येत्न्विष्णुषु** । ६ । ४ । ५५ ।

आम् अन्त आलु आय्य इत्नु इष्णु एषु परेषु णेरयादेशो लोपापवाद । इति णेरयादेश ।

कार्याद्बभूव,–चक्रे,–बभूव, अस ।

[(७८४) **ल्यपि लघुपूर्वात्** । ६ । ४ । ५६ ।

लघुपूर्वात् परस्य णेरयादेशो ल्यपि । क्त्वादेशो ल्यप् वक्ष्यते । यथा–

प्रशमि + य = प्रशमय्य । विगणि + य = विगणय्य ।

प्रत्यु—(लघुपूर्वात् ' कि ?) प्रपति + य = प्रपात्य इति लोप एव ।

(७८५) **विभाषापः** । ६ । ४ । ५७ ।

आप्नोतेर्ल्यपि णेरयादेशो वा । प्रापय्य । प्राप्य ।] णे प्रकृतत्वात् तस्यादेशा सर्वेऽप्यत्रैवोक्ता । आशीर्लिङि परस्मैपदानाम् इडभावात् ' णेरनिटी ' ति णिलोप ।

कार्यात् कार्यास्ताम् । तङि—कारयिषीष्ट ।

पच—' अत उपधाया ' (७३४) इति उपधावृद्धि , पाचयति–ते । पाचयिता । पाचयिष्यति–ते । पाचयामास अपीपचत्–त ।

रभ—' रभेरशब्लिटो ' (५४१) इति नुम् । आरम्भयति–ते । इत्यादि । एव लभे लम्भयति–ते इत्यादि ।

(७८६) **अर्तिह्वीब्लीरीक्नूयीक्ष्माय्यातां पुक् णौ** । ७ । ३ । ३६ ।

अर्त्यादीनामाकारान्तानां च पुगागमो णौ । यथा—

ऋ—अर्पि अर्पयति आर्पिपत् ।	आत्—दा दापि दापयति । (७३०)
ह्वा—ह्वेपि ह्वेपयति अजिह्विपत् ।	स्था—स्थापि स्थापयति अतिष्ठिपत् ।

(७८७) **शा-छा-सा-ह्वा-व्या वेषां युक्**। ७। ३। ६७।

एषामादन्तत्वात् पुकि आप्ते युक्। यथा—

शा—निशायय॒ति	व्या—सव्यायय॒ति।
छा—छायय॒ति	वे —वायय॒ति। [(७२९)
सा—अवसायय॒ति	पा पाने—पायय॒ति। अपीप्यत्।
ह्वा—ह्वायय॒ति	पा रक्षणे—पालय॒ति।

पातेर्ह्रस्वस्तव्य इति वार्तिकाल्लुगागम। येन 'आदेच ' (७०८) उच्यमाण आदादेश।

(७८८) **वो विधूनने जुक्**। ७। ३। ६८।

वा वाने इत्यस्य कम्पनेऽर्थे जुक्। अन्यत्र पुगेव। यथा—

पक्षेणोपवाजय॒ति, विधूनने तु केशानावापय॒ति।

(७८९) **लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने**। ७। ३। ६९।

लीयतेर्लातेश्च क्रमात् नुग्लुकावागमौ वा णौ स्नेहद्रवेऽर्थे। यथा—

विलीनय॒ति, विलाययति, विलालय॒ति। विलापय॒ति वा घृतम्।

(७९०) **भियो हेतुभये षुक्**। ७। ३। ४०।

भी भये इत्यस्य षुगागमो णौ। हेतौ (प्रयोजककर्तृ) चेत् भय बोध्यते। अन्यात्मनेपद च विधास्यते। यथा—जटिलो भीषय॒ते। मुण्डो भाषय॒ते।

प्रत्यु—कुविकया बाल भाययति। अत्र कुविकातो भयम्।

(७९१) **स्फायो वः**। ७। ३। ४१। स्फावय॒ति।

(७९२) **शदेरगतौ तः**। ७। ३। ४२।

पुष्पाणि शातय॒ति (कृन्तति)। गतौ—ग शाटगति गोष।

(७९३) **रुहः पोऽन्यतरस्याम्**। ७। ३। ४३।

व्रीहीन् रोपय॒ति, रोहय॒ति वा।

अथान्येष्वपि आर्धधातुकेषूपयुक्त आत्वविधिरुच्यते—

(७९४) **आदेच उपदेशेऽशिति**। ६। १। ४५।

एजन्तो यो धातुरुपदेशे, तस्य आकारादेश स्यान्न तु शिति प्रत्यये। यथा—

ह्वे—ह्वाता।	ह्वास्यति। ह्वाययति (७८७)
सो—साता।	सास्यति। साययति ,,
ग्लै—ग्लाता।	ग्लास्यति। ग्लापयति (७८९)

म्लै—म्लाता । म्लास्यति । म्लापयति ,,

प्रत्यु—क्षिति तु क्ष्यति, स्यति, श्लायति, म्लायति ।

(८९५) **ल क्ष्यो लिटि** । ६ । १ । ८६ ।

लिटि क्ष्येव आत्व न । विक्ष्याय ।

(७९६) **स्फुरातेरस्फुलत्योर्वोञि** । ६ । १ । ४७ ।

विस्फार, विष्फाल ।

(७९७) **क्रीङजीनां णौ** । ६ । १ । ४८ ।

क्रीन् इङ् जि एषामेव आत्व णौ । णिवि बुद्ध्या निष्पन्नस्य ऐकारस्य आत्वम् । आदन्तत्वे लुक । यथा—क्रापयति, अ यापयति, जापयति ।

(७९८) **सिध्यतेरपारलौकिके** । ६ । १ । ४९ ।

ऐहलौकिकेऽर्थे सिवुधातोरेव आत्व णौ । यथा—

अत्र साधयति (निष्पादयति) देवदत्त ।

प्रत्यु—तापस सि यति (=तत्व निश्चिनोति) त तप प्रयुङ्क्ते । सेधयति तापस तप ।

(७९९) **मीनातिमिनोतिदीङां ल्यपि च** । ६ । १ । ५० ।

एषा ल्यपि अशिलेचश्च विषये आत्वम् । यथा—

निमाता, निमास्यति, निमाय । उपदाता, उपादास्यत, उपदाय ।

(८००) **विभाषा लीयते** । ६ । १ । ५१ ।

विलाता विलेता विलास्यते विलेष्यते विलाय विलीय ।

(८०१) **अपगुरो णमुलि** । ६ । १ । ५३ ।

अस्यपगारम् अस्यपगोर वा युज्यते ।

(८०२) **चिस्फुरोर्णौ** । ६ । १ । ५४ ।

चापयति, चाययति, स्फारयति, स्फोरयति ।

(८०३) **प्रजने वीयते** । ६ । १ । ५५ ।

पुरोवातो गा प्रवापयति—प्रवाययति वा । गर्भ ग्राहयतीत्यर्थ ।

(८०४) **बिभेतेर्हेतुभये** । ६ । १ । ५६ ।

हेतुभय प्रयोजककर्तु सकाशात् भयम् । यथा—

मुण्डो भापयते भीषयते वा । अन्यतो भये कुधिकया बाल भाययति ।

(८०५) **नित्यं स्मयते** । ६ । १ । ५७ ।

हेतुभय इत्येव । जटिलो विस्मापयते । हेतुभयाभावे पिङ्गलेन विस्मापयति ।

2. सार्थकः सन् ।

(८०६) धातोः कर्मणः समानकर्तृकादिच्छायां वा (सन्) । ३ । १ । ७ ।

इषधातो कर्मभूतात्तेनैवैककर्तृकाच्च धातोरिच्छायामर्थे सन् प्रत्यय स्यात् । वाग्रहण वाक्येनापि प्रयोगस्य सिद्ध्यर्थम् । स इत्यकारान्त प्रत्यय । देवदत्त स्वय पातुमिच्छतीति विवक्षाया पाधातो. सन् । 'सन्यङो' (६०३) इति द्वित्व, 'सन्यत' (६२१) इत्यभ्यासस्य इत्व 'पिपास' इति सन्नन्तो धातुरुत्पन्न । लडादिषु शप् । * तस्य 'अतो गुण' इति पररूप च ।

पिपासति पिपासत पिपासन्ति । पिपाससि पिपासथ पिपासथ । पिपासामि पिपासाव पिपासाम ।

लङ्—अपिपासत् । लोट्—पिपासतु । लिङ्—पिपासेत् । आर्धधातुकेषु ।

(८०७) अतो लोपः (आर्धधातुके) । ६ । ४ । ४८ ।

अकारस्य धात्वन्तस्य लोप स्यादार्धधातुके ।

(८०८) यस्य हलः । ६ । ४ । ४९ ।

हल. परस्य 'य' इत्यस्य लोप आर्धधातुके । 'आदे' परस्य' इति यो लोप । अकारस्य तु 'अतो लोप' इति साच्को यकारो लुप्यते । यङन्तधातौ (लुटि) बेभिदिता, (लृटि) बेभिदिष्यते इत्युदाहरणम् ।

(८०९) क्यस्य विभाषा । ६ । ४ । ५० ।

क्यप्रत्ययययकारस्य तु वा लोप उक्तनिमित्ते । इति धात्वन्तलोप-विधीना मध्ये 'अतो लोप.' इत्यनेन अकारस्य लोप —

पिपासिता पिपासिष्यति, अपिपासिष्यत् ।

अपिपासीत् अपिपासिष्टाम् अपिपासिषु ।

अपवादाभावात् सर्वधातुभ्योऽपि सिजेव । लिट्याम्—

पिपासाञ्चकार,—बभूव,—आस । आशिषि—पिपास्यात् पिपास्यास्ताम् ।

सन्प्रकृतिधातो. पदमेव सन्नन्तस्यापि पदमिति पदव्यवस्था ।

---

* सन्नन्ताच्छप्करण 'पिपासन्ति' इति नित्य नुमर्थमेव ।

एध —मन्, तस्येट्, अजादित्वात् द्वितीयस्यैकाचो द्वित्वम् ।
एदिधिषते एदिधिसते एदिधिषन्ते । ऐदिधिषत ऐदिधिसताम् एदिधिषेत । एदिधिषिष्यते, ऐदिधिषिष्यत, एदिधिषिता, एदधिषिष्ट, एदिधिषाञ्चक्रे,—आस—बभूव । एदिधिषीष्ट ।

भू—'सनिग्रहगुहोश्च' (६७४) इतीण्निषेध, 'इको झल' (६९१) इति कित्त्व, बुभूषति । तॄ—तितीर्षति तितरिषति । तितरीषति । भिद—विभित्सति । बुध—बुभुत्सते । 'सनि ग्रहगुहोश्च' (६७४) इतीण्निषेध । मृ—सुमूर्षति[१] 'हलन्ताच्च' (६९१) इति कित्त्वम । ग्रह—जिघृक्षति ।

इत्यादय इड्व्यवस्थायामुक्ता विशेषविधयोऽत्रानुसन्धेया ।

(८१०) **सनि मी-मा-घु-रभ-लभ-शक-पत-पदामच इस् (सि)** । ७ । ४ । ५४ ।

सकारादौ (अनिटि) सनि परे मीमादीनामच स्थाने इसादेश । अ आ ई इति त्रयोऽच एषु विद्यन्ते । इस् इति सान्त एवादेश ।

(८११) **आप्ज्ञप्यृधामीत्** । ७ । ४ । ५५ ।

एषामच ईकार आदेश सादौ सनि ।

(८१२) **दम्भ इच्च** । ७ । ४ । ५६ ।

दम्भेरच ईकार इकारश्चादेश सि सनि ।

(८१३) **मुचोऽकर्मकस्य गुणो वा** । ७ । ४ । ५७ ।

अकर्मकस्य मुच्यते गुणो वा सि सनि ।

(८१४) **अत्र लोपोऽभ्यासस्य** । ७ । ४ । ५८ ।

'सनिमीमा ' इत्यादि चतुस्सूत्र्या विहितेषु इसादिषु कृतेष्वभ्यासस्य लोप स्यात् । अथोदाह्रियन्ते—

मी—मी+स=मिस्+स 'स स्यार्धधातुके' (७०८) इति सस्य त मित्सति ।

माङ—मित्सते ।	लभ—लिप्सते ।
घु—दित्सति-ते ।	शक—शिक्षति ।
,,—दित्सति-ते ।	पत—पित्सति ।
रभ—आरिप्सते ।	पद—प्रपित्सते ।

[१] 'म्रियतेर्लुङ्लिङोश्च' इति लुङ्लिङ्शिन्सु एव मृङ आत्मनेपदमिति नियमात् । सनि चोक्तनिमित्ताभावात् 'पूर्ववत्सन ' इति आत्मनेपद न ।

प्रारिप्सते इत्यादिषु रिप् स्+स इति स्थिते 'स्को संयोगाद्यो ' (४९५) इति संयोगादिलोपे चर्त्वेन रूपसिद्धि । अत्र पतधातोर्वेट्त्वात् इट्पक्षे सन सादित्वाभावादिसादेशाभ्यासलोपौ न । पिपतिषति ।

आप्—ईप्सति ।	दृश—ईक्षते, अदिदृक्षते ।
ज्ञपि—ज्ञीप्सति ।	'गतीवन्त ' इति वेट् । जिज्ञपयिषति ।
दम्भ—दीप्सति दिप्सति ।	इटपक्षे दिदम्भिषति ।

मुच—मोक्षते[1] । मुमुक्षते वा वत्स स्वयमेव ।
मुमुक्षति वत्स वृषभम् (सकर्मक) ।

(८१५) **अज्झनगमां सनि** (दीर्घ) । ६ । ४ । १६ ।

अजन्तानां हन्तेरजादेशगमेश्च दीर्घ स्यात् झलादौ सनि । यथा—

अजन्त—कृ—कॄ-चिकीर्षति (ऋत इद्धातो)
,, —हृ—हॄ-जिहीर्षति (,,)
,, —वि—वी-विवीषति ।
, —स्तु—स्तॄ-तुष्टूषति ।
हन—जिघांसति (अभ्यासाच्चेति कुत्वम्)
गम—अजिगांसते ।

(८१६) **तनोतेर्विभाषा** । ६ । ४ । १७ ।

तितांसति, तितंसति, तितनिषति । तनिपतीत्यादिना तनोतेर्वेट् ।

(८१७) **सन्लिटोर्जे** (कु) । ७ । ३ । ५७ ।

सनि लिटि च जिवातोरभ्यासात् परस्य कुत्वम् । यथा —
जिगाय जिग्यतु । जिगीषति ।

(८१८) **विभाषा चे** । ७ । ३ । ५८ ।

यथा—चिकाय, चिचाय । चिकीषति, चिचीषति ।

॥ * ॥ **आशङ्किकायां सन् वाच्य** । यथा—

कूलं पिपतिषति । श्वा मुमूर्षति । आशङ्क्यमानपतनम् आशङ्क्यमानमृतिश्च भवतीत्यर्थ ।

शैषिकान्मतुवर्थीयाच्छैषिको मतुवर्थिक ।
सरूप प्रत्ययो नेष्ट सन्नन्ताच्च सनिष्यते ॥

---

१ मुचे कर्मकर्तर्यकर्मकता । कर्मकर्तरि चात्मनेपदमेव । तदेव हि पदं सन्नन्तादपि ।

इति वचनात् चिकीर्षितुमिच्छतीति सन्नन्तात् सन् न भवति । इच्छासन्नन्तादेव प्रतिषेध । स्वार्थिकसन्नन्तात्तु भवत्येव । यथा—

मामासिषते, चिकित्सिषति* ।

---

3. यङ्यङ्लुकौ ।

(८१९) **धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ।३।१।२२।**

पौन पुन्य भृशार्थश्च क्रियासमभिहार । तस्मिन्नर्थे एकाचो हलादेर्धातोर्यङ्प्रत्यय । ङित्त्वादात्मनेपदी । पुन पुन, भृश वा भवतीत्यर्थे विवक्षिते भू+य इति यङ् । 'सन्यङोः' (६०३) इति द्वित्व, 'गुणो यङ्लुको' (६२३) इत्यभ्यासस्य गुण, उत्तरखण्डस्य तु यङो ङित्त्वान्न गुण —

बोभूयते बोभूयेते बोभूयन्ते इत्यादि । अबोभूयत । बोभूयताम । बोभूयेत । बोभूयिष्यते । ['अतो लोप' (८०७)] अबोभूयिष्यत । बोभूयिता । अबोभूयिष्ट । बोभूयाञ्चक्रे,–बभूव,–आस । बोभूचिषीष्ट ।

भिद्– बेभिद्यते । 'यस्य हल' (८०८) इति यलोप । बेभिदिता बेभिद्यते इत्यादि ।

(८२०) **नित्यं कौटिल्ये गतौ ।३।१।२३।**

गत्यर्थकादेकाचो हलादेर्धातो. कौटिल्येऽर्थ एव यङ्, न तु क्रियासमभिहारे । यथा—

व्रज—कुटिल व्रजति वाव्रज्यते ।

(८२१) **लुप-सद-चर-जप-जभ-दह-दश-गृभ्यो भावगर्हायाम् ।३।१।२४।**

एभ्यो धात्वर्थगर्हायामेव यङ् । यथा—

गर्हित लुम्पति = लोलुप्यते । सासद्यते । 'चरफलोश्च' (६२८) इत्यभ्यासस्य सुक् । 'उत्परस्यात' (६२९) इति अत उच्च 'हलि च' इति दीर्घ च=चूर्यते । जपजभ ' (६२७) इति नुक्, जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते । जेगिल्यते इत्यत्र 'ग्रो यङि' इति रेफस्य लत्वेन जेगिल्यते ।

---

* कितधातु परस्मैपदी 'य एव विद्यात् विचिकित्सति' तच्छुश्रुवानृषिर्व्य-चिकित्सत्' इत्यादि प्रयोगदर्शनात् ।

लत्वप्रसङ्गान्मध्ये लत्वविधिरुच्यते—

(८२२) **कृपो रो लः** । ८ । २ । १८ ।

कृपधातो रेफस्य लकार आदेशः स्यात् । 'र' इति 'ल' इति च श्रुतिसामान्यमुपादीयते । तेन यो व्यञ्जनरूपौ रेफलकारौ यौ च ऋकार-लृकारयो अवयवौ श्रूयेते तयोर्द्वयोरपि ग्रहणम् । तथा च कृपधातो र्ऋकारस्य लृकार*, रेफस्य लकारश्चानेन विधीयेते । 'रषाभ्यां नो ण. ' इति णत्वविधावप्येवमेव रेफश्रुतिमात्रमाचार्यस्य विवक्षितम् । अत एव ऋवर्णस्तत्रोपेक्षित । वार्त्तिककारस्तु सूत्रकारस्य विवक्षितमेव 'ऋवर्णा-न्तस्य णत्व वाच्यम्' इति स्पष्टीकृतवान् । किञ्च स्वमतमिद पाणिनिरेव ज्ञापयति 'तासि च क्लृप' (६५९) इति कृपधातोर्लृदुपधपाठेन । कृपधातो क्विडत्प्रत्ययान्तरूपेष्वेव लृकार उपलभ्यते, क्लृप्त, क्लृप्तवत्, क्लृप्ति, प्रक्लृप्य इति । अतो यथा विसर्गानुस्वारौ रेफमकारयोरुच्चारण-भेदौ तथा लृकारोऽपि लकारस्य स्वरभक्तिसंवलित उच्चारणभेद एवेति कल्पयितु शक्यते । मन्ये पाणिनेरप्येतदभिप्रेत स्यात् । अन्यथा 'क्लृप' इति *लृकारोपधमेव धातुमपठिष्यदाचार्य. । $ रप्रत्याहारवादिना च लृकारस्य गुणे लपरत्व सुलभमेव । एव च विसर्गादेरिव लृकारस्य चाक्ष-रसमाम्नायात् बहिष्करणेऽपि न महती क्षति । अथ प्रकृत सूत्रमुदाह्रियते—

कृप—कर्पते = कल्पते । कर्प्ता = कल्प्ता । कृप्त = क्लृप्त ।

(८२३) **उपसर्गस्यायतौ** । ८ । २ । १९ ।

अयतौ परे उपसर्गरेफस्य लकार. । यथा—

प्रायते = प्लायते । परायते = पलायते । पर्यायते = पल्ययते ।

(८२४) **ओ यञि** । ८ । २ । २० ।

---

* 'अचीक्लृपत्' इत्यत्राभ्यासे लृकारस्य अत्त्व, 'चक्लीक्लृप्यते' इत्यत्र लीगा-गम च पृथगनुशासिष्यत् ।

$ रप्रत्याहारो नाम 'लण्' इति प्रत्याहारसूत्रे लकारोपरिश्रूयमाणस्य अकार-स्यानुनासिकत्वप्रतिज्ञानेन इत्सज्ञां सम्पाद्य 'हयवरट्' इति रेफे तदोजनेन निर्वर्त्तितो रेफ-लकारग्राही 'र' इति प्रत्याहार ।

गृधातो रेफस्य लकारो यडि । यथा—जेगिल्यते = जेगिल्यते । 'हलि च' इति दीर्घस्य लत्व असम्भिद्धत्वान्न तस्यावसर ।

(८२५) अचि विभाषा । ८ । २ । २१ ।

अजादौ प्रत्यये परे गृधातो रेफस्य वा लकार । यथा—

गिरति, गिलति । निगरण, निगलनम् ।

(८२६) परेश्च घाङ्कयोः । ८ । २ । २२ ।

परि इत्युपसर्गे स्थितस्य रेफस्य लो वा घशब्दे अङ्कशब्दे च परे । यथा—

परिघ, पलिघ पर्यङ्क, पल्यङ्क ।

अथ प्रस्तुता यङचङ्लुक्प्रक्रिया—तत्र यङो लुगुच्यते—

(८२७) यङोऽचि च (लुक् बहुलम्) । २ । ७ । ७४ ।

यङोऽचूप्रत्यये अन्यत्रापि बहुल लुक् । लुप्तेऽपि यडि प्रत्ययलक्षणेन यङन्तत्वाद्धातुत्व, द्वित्व च ।

शितपा शपानुबन्धेन निर्दिष्ट यद् गणेन च ।
यत्रैकाज्ग्रहण चैव पञ्चैतानि न यङ्लुकि ॥

इति वचनात् 'अनुदात्तङित ' इत्यात्मनेपदस्याप्रवृत्तौ 'शेषात् कर्तरि परस्मैपद' एव । 'चर्करीत च' इत्यदादिगणे पाठात् शपो लुक् । चर्करीतमिति यङ्लुगन्तस्य प्राचा सज्ञा । 'गुणो यङ्लुको' (६२३) इत्यभ्यासस्य गुण, 'यङो वा' (५७३) इति पितः सार्वधातुकस्य वा इट्—

बोभवीति, 'भूसुवोस्तिङि' इति गुणनिषेधो यङ्लुकि भाषाया नेष्यते । 'बोभूतुतेतिक्ते ' इति च्छन्दसि गुणाभावनिपातनात् **बोभोति** । **बोभूतः बोभुवति** । **बोभवीषि, बोभोषि** इत्यादि । लडि—**अबोभवीत्, अबोभोत् अबोभूताम् अबोभवुः** । (अत्र जुसि चेति गुण) लुडि—'गातिस्था ' इति सिचो लुकि निस्त्वाद्धुकि च । **अबोभूवीत्, अबोभोत् अबोभूताम् अबोभूवुः** । **बोभविता, बोभविष्यति, बोभूयात्** । इत्यादि ।

जप—जञ्जपीति, जञ्जप्ति । दह—दन्दह्मीति, दन्दग्धि इत्यादि ।

पच—पापच्यते । पापचीति । पापक्ति । [दीर्घोऽकित] (६२४)

वच—वनीवच्यते । वनीवचीति । वनीवक्ति । [नीग्वञ्चु] (६२५)

अत्र नलोपस्य विधिं मिश्रप्रकरणे वक्ष्याम ।

गम—जङ्गम्यते । जङ्गमीति । जङ्गन्ति । [नुगतो ' (६२६)]

वृत—वरीवृत्यते । वरीवर्त्ति । वरिवर्त्ति, वर्वर्त्ति, वरीवर्तीति, वरिवर्तीति, वर्वर्तीति । [' रुग्रिग्रीकाम् ईटश्च विकरणात् रूपषट्कम्] ।

कृ—चेक्रियते, चर्कर्त्ति, चरिकर्त्ति, चरीकर्त्ति, चर्करीति चरिकरीति, चरीकरीति। चेक्रीयते इत्यत्र प्रक्रिया अनुपद वक्ष्यते—

(८२८) **अकृत्सार्वधातुकयोर्दीर्घः** (यि क्ङिति) ।७।४।२५।

अकृद्यकारे असार्वधातुकयकारे च क्ङिति परे अजन्ताङ्गस्य दीर्घ' ।

स्तु—तोष्टूयते । आशीर्लिङि स्तूयात् । कर्मणि यकि स्तूयते ।

जि—जेजीयते । जीयात् । जीयते ।

एव विष्णूयति—ते इत्यादि क्यच्क्यङो ।

प्रत्यु—(' अकृत् ' कि ?) त्यपि—प्रकृत्य ।

(' असार्वधातुके ' कि ?) चिनुयात् । वृणुयात् ।

(८२९) **च्वौ च** ।७।४।२६।

च्विप्रत्यये परे अजन्ताङ्गस्य दीर्घ । च्विप्रत्यय. सर्वलोपी तद्धित ।

शुचि करोति = शुचीकरोति ।

(८३०) **रीङृतः** ।७।४।२७।

ऋकारान्तस्याङ्गस्य अकृद्यकारेऽसार्वधातुकयकारे च्वौ च परे रीङादेश' । क्ङितीति नानुवर्त्तते । यथा—

यङि—कृ–चेक्रीयते । क्यच्क्यङो पित्रीयति–ते । च्वौ—मात्रीकरोति धात्रा । यकि लिङि चोत्तरसूत्रेण 'रिङ्शयग्लिङ्षु' इत्यनेन रीङपवादो रिङ् । तच्च सूत्र शविकरणे व्याख्यातम् ।

(८३१) **घु-मा-स्था-गा-पा-जहाति-सां हलि** ।६।४।६६।

ईत् क्ङित्यार्धधातुके इत्यनुवर्त्तते । घुसज्ञाना मास्थादीनां च हलादौ क्ङित्यार्धधातुके ईकारोऽन्तादेश । यथा—

दा—देदीयते	सा—सेसीयते	पा—पेपीयते	हा—जेहीयते
धा—देधीयते	स्था—तेष्टीयते	गा—जेगीयते	सा—सेसीयते ।

---

4. स्वार्थिकप्रत्ययाः ।

(८३२) **गुप्तिज्किद्भ्यः सन्** ।३।१।५।

(८३३) **मान्-बध-दान्-शान्भ्यो दीर्घश्चाभ्यासस्य** । ३ । १ । ६ ।

गुपादिभ्य स्वार्थे सन्, मानादिभ्योऽभ्यासदीर्घश्च । अत्रार्थनियम करोति कात्यायन—**गुपेर्निन्दायाम् । तिजेः क्षमायाम् । कितो व्याधिप्रतीकारे, निग्रहेऽपनयने, नाशने, संशये च । मानेर्जिज्ञासायाम् । बधेश्चित्तविकारे । दानेरार्जवे । शानेर्निशाने** इति । यथा—

जुगुप्सते । तितिक्षते । चिकित्सति विचचिकित्सति । मीमासते । बीभत्सते । दीदासते दीदासति । शीशासते शीशासति ।

(८३४) **सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच्** । ३ । १ । २५ ।

सत्यादिभ्य प्रातिपदिकेभ्य उचितधात्वर्थे चुरादिगणात् स्वार्थे च णिच् । सत्यादिभ्य 'प्रातिपदिकाद्धात्वर्थे ' इति गणसूत्रेणैव सिद्धे इह ग्रहणं निदर्शनार्थम् । सत्यादीन् उक्तगणसूत्रव्याख्याने उदाहरिष्याम ।

चुर स्तेये—चोरयति—ते । चोरयाञ्चकार—चक्रे—बभूव—आस । अचूचुरत्—त इत्यादि ।

हेतुमण्णिचि दर्शितैव प्रक्रिया । कथ वाक्यप्रबन्धे, गण सख्याने. कल गतौ—सख्याने च, मह पूजाया, ध्वन शब्दे इत्यादय. केचिद्धातवोऽत्र अदन्ता. पठ्यन्ते । तेषा णिचि 'अतो लोप ' (८०७) इत्यकारो लुप्यते च । लुप्तस्य तस्य *स्थानिवद्भावात् पूर्वस्य अकारस्य उपधात्वासम्भवेन 'अत उपधाया ' (७३४) इति वृद्धिर्न भवति । अलोपात् ह्रस्वसन्वद्भावयोर्निषेध इत्यादि प्रयोजनमदन्तत्वकल्पनस्य ।

कथयति, अकथयत् । गणयति, अजीगणत् [अत्र 'ई च गण ' (६३८) इत्यभ्यासस्य ईत्त्वम्] । महयति, अमहयत् । ध्वनयति । अदध्वनत् । इत्यादि । अन्येषा तु श्रण दाने—विश्राणयति । व्यशिश्रणत् । तुल उन्माने—तोलयति—अतूतुलत् इत्यादि ।

अथ केचिच्चुरादावन्यत्रापि मित्सज्ञका सन्ति धातवः । तेषामपि णिचि ह्रस्वो विधीयते । यथा—

---

* स्थानिवद्भावविनिषेधौ मिश्रप्रकरणे वक्ष्याम ।

चुरादौ 'ज्ञप मिच्च' । भूवादौ (१) घटादयो मित । (२) जनी-जॄष्-क्नसु-रञ्जोऽमन्ताश्च । (३) ज्वलह्वलह्मलनमामनुपसर्गाद्वा । (४) ग्लाञ्-स्ना वनु-वमां च । (५) न क्रम्यमिचमां । (६) शमो दर्शने । (७) यमोऽपरिवेषणे । (८) स्खदिरवपरिभ्यां च इति गणसूत्राणि पठ्यन्ते ।

(८३९) **मितां ह्रस्वः** (णौ) । ६ । ४ । ९२ ।

मितां धातूनां णौ परे उपधाया ह्रस्व । यथा—

ज्ञप—ज्ञपयति—अजिज्ञपत् [अलोपाभावात् सन्वद्भाव]
घट—घटयति—अजीघटत् । घटादि हेतुमण्णिच् ।
त्वर सम्भ्रमे—त्वरयति—अतित्वरत् । ,,
जनी प्रादुर्भावे—जनयति—अजीजनत् ,,
जॄष्—जरयति—अजीजरत् ,,
दम—दमयति—अदीदमत् । अमन्त
रम—रमयति—अरीरमत् । ,,
ज्वल—ज्वलयति—ज्वालयति ।
नम—नमयति—नामयति ।

उपसृष्टात्तु नमेरमन्तत्वान्नित्य मित्त्व, ज्वलतेश्च घटादित्वात् ।

परिणमयति । प्रज्वलयति ।
कमु—कान्तौ—कामयते । मित्त्वनिषेधान्न ह्रस्व ।
शमु—निशमयति (श्रावयति) निशामयति (दर्शयति) ।
ग्लै=ग्ला—ग्लपय ग्लापयति अजिग्लपत्, आदन्तत्वात् पुक् ततो ह्रस्व. ।
स्ना—स्नपयति—स्नापयति—असिस्नपत् । इत्यादि ।

'मिता ह्रस्व' इति सूत्रे 'वा चित्तविरागे' इति पूर्वसूत्रात् 'वा'—कारमनुवर्त्य व्यवस्थितविभाषाश्रयणेन—

*'विश्राम लभतामिद च शिथिलज्यावन्धमस्मद्धनु'—शाकुन्तलम् ।
'विश्रामो हृदयस्य यत्र . '—उत्तररामचरितम् ।

---

* निवृत्तप्रेषणाद्धातो प्राकृतेऽर्थे णिचि घञ् । एव कल्पनाया निष्प्रयोजनत्वं भाव-स्यागलक्षणा स्वीकर्तव्या । शुद्धधातोर्घञि तु नोदात्तोपदेशस्येति वृद्धिर्निषिध्यते 'वौ श्रमेर्घञि वा' इति वर्धमानव्याकरणरीत्या "वृद्धिविकल्पे तु विश्राम इत्यपाणिनीयम्" इति भट्टोजि ।

'कक्ष्यावृत्तज्या उच्चनीचवृत्ते परिणाम्यते'—गणितम् ।
इत्यादिप्रयोगा साधूक्रियन्ते ।

चुरादौ 'इष मिच्च' इत्यत परे 'यम च परिवेषणे' 'चह परिकल्पने' 'रह त्यागे' 'बल प्राणने' 'चिञ् चयने' इति धातून् पठित्वा 'नान्ये मितोऽहेतौ' इति सूत्रितम् । तेन (अहेतौ) स्वार्थणिनि ज्ञपादिषट्कमेव मित् । अमन्तत्वप्रयुक्त तु मित्त्व न विद्यते । अत 'शम' इति चौरादिकस्य शामयतीत्येव रूपम् ।

'प्रातिपदिकाद्धात्वर्थ . ' इत्यादीनि गणसूत्राणि नामधातुप्रकरणे व्याख्यास्याम । स्वार्थिकप्रत्ययप्रसङ्गे ह्यत्र तेषा नावसर ।

(८३६) **कण्ड्वादिभ्यो यक्** । ३ । १ । २७ ।

कण्ड्वादिभ्यो धातुभ्यो यक् स्वार्थे । कण्ड्वादिगणे प्रातिपदिकान्येव धातुत्वेन पठ्यन्ते । तेभ्यो धात्वर्थ एव यक् ।

कण्डूञ् गात्रविघर्षणे—कण्डूयति, ते । कण्डूयिता । कण्डूयाञ्चकार,—चक्रे इत्यादि ।
मन्तु अपराधे—'अकृत्सार्वधातुकयो ' (८२८) इति दीर्घ , मन्तूयति ।
असु उपतापे—असूयति । पूर्ववद्दीर्घ ।
सुख दु ख तत्क्रियायाम्—'अतो लोप ' सुख्यति, दु ख्यति ।
सपर पूजाया—सपर्यति, सपराञ्चकार ।
भिषज् चिकित्साया—भिषज्यति, भिषजाञ्चकार ।
हृणीङ् लज्जाया—हृणीयते । महीङ् पूजाया—महीयते ।
उषस् प्रभातीभावे—उषस्यति उषसाञ्चकार ।

आकृतिगणोऽयम् । तेनापठिता अपि धातवो ग्राह्या ।

(८३७) **गुपूधूपविच्छिपणिपनिभ्य आयः** । ३ । १ । २८ ।

गुपू रक्षणे, धूप सन्तापे, विच्छ गतौ, पण पन व्यवहारे स्तुतौ च इत्येतेभ्यो भौवादिकेभ्य स्वार्थे आयप्रत्यय । यथा—

गोपायति, अगोपायत्, गोपायतु, गोपायेत् इत्यादि । एव धूपायतीत्यादय ।

(८३८) **ऋतेरीयङ्** । ३ । १ । २९ ।

ऋति सौत्रो धातुर्घृणाद्यर्थक । तस्य स्वार्थे ईयङ् । ङित्त्वात् तङ्—ऋणीयते इत्यादि ।

(८३९) **कमेर्णिङ् । ३ । १ । ३० ।**

कमु कान्तौ इति भौवादिकस्य स्वार्थे णिङ् । णिजन्तवत् प्रक्रिया । ङित्त्वात्तङेवेति भेद । कामयते इत्यादि ।

(८४०) **आयादय आर्धधातुके वा । ३ । १ । ३१ ।**

आर्धधातुकविवक्षाया आय ईयङ् णिङ् इत्येते त्रयो विकल्पेनैव स्यु ।

गुप् —गोपायिता, गोपिता गोप्ता । गोपायाञ्चकार, जुगोप । अगोपायीत् अगोप्सीत् अगोपीत् इत्यादि । एव—कामयिता, कमिता । कामयाञ्चक्रे, चकमे । अचीकमत । णिङभावेऽपि **'कमेरिच्छेश्चङ् वक्तव्य'** इति वार्त्तिकाच्चङ्, ऐरभावाच्च सन्वद्भाव , अचकमत ।

---

5. नामधातुप्रत्ययाः ।

(८४१) **सुप आत्मनः क्यच् । ३ । १ । ८ ।**

'धातो कर्मण समानकर्तृकादिच्छाया वा' इत्यतोऽनन्तरं सूत्रमिदम् । इषिकर्मण एषितुरेवात्मसम्बन्धिन सुबन्तादिच्छायामर्थे वा क्यच् प्रत्यय । देवदत्त पुत्रमात्मन इच्छति इति विवक्षाया कर्मभूतात् द्वितीयान्तात् पुत्रशब्दात् क्यच् । पुत्र + य इति स्थिते—

(८४२) **सुपो धातुप्रातिपदिकयोः । २ । ४ । ७१ ।**

धातुप्रातिपदिकयोरवयवभूतस्य सुपो लुक् इत्यनेन पुत्र + य इति क्यजन्तधातोरवयवस्य द्वितीयैकवचनस्य निवृत्तौ पुत्र + य इति क्यजन्तो धातु । अकारस्य ईकारोऽनुपद वक्ष्यते—पुत्रीय । अस्मात् शप्-ताम्-स्यादियोगेन रूपाणि—

पुत्रीयति, अपुत्रीयत्, पुत्रीयेत्, पुत्रीयिता, पुत्रीयिष्यति, पुत्रीयाञ्चकार, अपुत्रीयीत् इत्यादि ।

अथाकारस्य ईकारविधिरुच्यते ।

[(८४३) अस्य च्वौ (ई)।७।४।३२।

अवर्णान्तस्याङ्गस्य ईकारोऽन्तादेशश्च्वौ परे । च्विरिति सर्वलोपी तद्धित' । शुक्लीभवति, शुक्लीकरोतीत्याद्युदाहरणम् ।]

(८४४) क्यचि च ।७।४।३३।

क्यचि परे च अवर्णान्तस्याङ्गस्य ईकारोऽन्तादेश । यथा—

पुत्रमिच्छति = पुत्रीयति । मालामिच्छति = मालीयति ।

(८४५) अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ।७।४।३३।

अशन उदक धन इत्येतेषा यथासख्य बुभुक्षादिष्वर्थेषु इत्वापवाद आत्व, उदकस्योदन्नादेशश्च निपात्यते । यथा—

अशनमात्मन इच्छति = अशनायति । उदकम् उदन्यति । धन धनायति ।

प्रत्यु—('बुभुक्षादिषु' किं ?) स्नानार्थमात्मन उदकमिच्छति = उदकीयतीत्येव ।

पय आत्मन इच्छतीत्यत्र सुबन्तत्वेऽपि 'न क्ये' (१९०) इति नान्तस्यैव क्ये पदसज्ञेति नियमात् पदत्वाभावेन न उत्वादय, पयस्यति इत्येव । नान्तस्य तु पदत्वात् राजानमिच्छति=राजीयति इति नलोपो भवत्येव ।

कविमिच्छति = कवीयति—'अकृत्सार्वधातुकयोर्दीर्घ' ।

"क्यस्य विभाषा' (८०९) इति विकल्पात् समिधमिच्छति = समिध्यति इत्यस्य क्तौ समिध्यिता समिधिता इति रूपद्वयम् । समिधितेत्यत्र अलोपस्य स्थानिवद्भावात् न लघूपधगुण ।

(८४६) अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ।

(असुक्) ।७।१।९१।

एषा क्यचि असुगागम' । यथा—

अश्वस्यति, क्षीरस्यति, वृषस्यति, लवणस्यति ।

॥ * ॥ सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ ।

तृष्णातिरेको लालसा । यथा—

दधिस्यति, दध्यस्यति, मधुस्यति, मध्वस्यति ।

क्यच्प्रत्ययमुदाहर्तुम् एता प्रक्रिया उक्ता । अथ नामधातुप्रत्यया एवोपादीयन्ते ।

(८४७) काम्यच्च । ३ । १ । ९ ।

क्यच्प्रत्ययविषये काम्यच् प्रत्ययश्च । यथा—

पुत्रमात्मन इच्छति, पुत्रकाम्यति, भार्य्याकाम्यति, वल्लकाम्यति इत्यादि ।

(८४८) उपमानादाचारे । ३ । १ । १० ।

क्यजेवानुवर्त्तते न तु काम्यच् । एतदर्थमेव 'काम्यच्च' इति पृथक् सूत्र कृतवानाचार्य । उपमानात् कर्मण सुबन्तादाचारेऽर्थे वा क्यच् । आचारक्रियाया प्रत्ययार्थत्वात् तदपेक्षयैव उपमानस्य कर्मता । अतश्च आचरतिरत्र सकर्मक । यथा—

पुत्रमिवाचरति पुत्रायति छात्रम् ।	राजानमिवाचरति राजीयति बल्लभम् ।
आवारमिवाचरति आवारीयति कम्बलम् ।	पितरमिवाचरति पित्रीयति गुरुम् ।

'रीडृत' (८३०) इति रीङादेशेन पित्रीयति इति रूपसिद्धि ।

॥ * ॥ अधिकरणाच्चेति वक्तव्यम् ।

अधिकरणात् सुबन्तादप्याचारे क्यच्वक्तव्य । यथा—

प्रासादे इवाचरति प्रासादीयति कुड्या भिक्षु ।

(८४९) कर्तुः क्यङ् सलोपश्च । ३ । १ । ११ ।

उपमानात् कर्तुं सुबन्तादाचारेऽर्थे वा क्यङ् । प्रकृते सान्तत्वे सकारलोपश्च । ङित्त्वात्तङ् । 'क्यचि च' इति अनुबन्धविशिष्टस्य निर्देशात् क्यङि अवर्णस्य ईत्व न भवति । अकृत्सार्वधातुकयोर्दीर्घ —

पुत्र इवाचरति = पुत्रायते छात्र । कपिरिवाचरति = कपीयते वटु । विष्णुरिवाचरति = विष्णूयते द्विज । पितेवाचरति = पित्रीयते गुरु । अप्सरा इवाचरतीत्यत्र सलोपे, अप्सरायते वेश्या । ओज इवाचरति = ओजायते ।

अत्र ओज शब्दो लक्षणया ओजस्विपर । सलोपनियम करोति कात्स्यायन —

ओजसोऽप्सरसोर्नित्यमितरेषां विभाषया । पय इवाचरति = पयायते पयस्यते वा जलम् ।

॥ * ॥ सर्वप्रातिपदिकेभ्य आचारे क्विब्वा वक्तव्यः ।

क्विपि ककारपकाराविती । इकार उच्चारणार्थ । शेषस्य 'व्' इत्यस्य लोपश्च । तथा च सूत्रम्—

(८५०) **वेरपृक्तस्य** (लोप) । ६ । १ । ६७ ।

वि इत्यपृक्तस्य लोप स्यात् ।

'प्रातिपदिकेभ्य' इत्युक्तेर्न्न पदकार्थम् । कृष्ण इवाचरति = **कृष्णाति** । अत्र 'अतो गुणे' इति शपा सह पररूपम् । मालेवाचरति = **मालाति** । कविरिवाचरति = **कवयति**—शब्निमित्तको गुण । **कवयिता** – तासिप्रयुक्तो गुण । 'अनुनासिकस्य क्विझलो .' इति वक्ष्यमाणोऽनुनासिकान्तेषूपधादीर्घ । राजेवाचरति = **राजायति** । पन्था इवाचरति = **पथायति** । अयमिवाचरति = **इदमति** । 'प्रत्ययोत्तरपदयोश्च' (३५२) इति त्वद्–मदादेशौ । त्वमिवाचरति = **त्वदति** । अहमिवाचरति = **मदति** । यूयमिवाचरति = **युष्मदति** । वयमिवाचरति = **अस्मदति** ।

(८५१) **भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः** । ३ । १ । १२ ।

भृशादिभ्य प्रातिपदिकेभ्योऽच्व्यन्तेभ्यो भवत्यर्थे क्यङ् । **एषु हलन्ताना तदा अन्तलोपश्च** । यथा—

अभृशो भृशो भवति—भृशायते । 'अकृत्सार्वधातुकयो रिति दीर्घ

चपल—चपलायते	विमनस्—विमनायते ।
पण्डित—पण्डितायते	दुर्मनस्—दुर्मनायते ।
ओजस्—ओजायते	सुमनस्—सुमनायते । इत्यादि ।

प्रत्यु—('अच्वे ' कि ?) भृशीभवति ।

(८५२) **लोहितादिडाज्भ्यः क्यष्** । ३ । १ । १३ ।

लोहितादिभ्यो डाच्प्रत्ययान्तेभ्यश्च भवत्यर्थे क्यष् । 'वा क्यष.' इत्यात्मनेपद वा । अत्र वार्त्तिकम्—

॥*॥ **लोहितडाज्भ्यः क्यष्वचनं, भृशादिष्वितराणि** ।

यानि लोहितादिषु पठितानि तेभ्य· क्यडेव, अपठितेभ्यस्तु क्यषित्यर्थः । क्यष्क्यडो· पदे विशेष । यथा—

लोहित भवति लोहितायति,—ते ।

अव्यक्तानुकरणे डाच्प्रत्ययस्तद्धित. ।

पटपटत् इत्येव भवति पटपटायति,–ते । चकचकायति,–ते । घुरघुरायति,–ते ।

इत्यादि । निद्रा—निद्रायति,–ते । करुणा—करुणायति,–ते । मन्द मन्दायते । फेन—फेनायते । इत्यादिर्लोहितादिराकृतिगण । *

(८५३) **कष्टाय क्रमणे** । ३ । १ । १४ ।

चतुर्थ्यन्तात् कष्टशब्दात् उत्साहेऽर्थे क्यङ् । यथा—कष्टाय क्रमते—कष्टायते ।

(८५४) **कर्मणो रोमन्थतपोभ्यां वर्त्तिचरोः** । ३ । १ । १५ ।

यथा— रोमन्थ वर्त्तयति—रोमन्थायते । तपश्चरति—तप्स्यति । अत्र परस्मैपद वार्त्तिकविहितम् ।

(८५५) **बाष्पोष्मभ्यामुद्वमने** । ३ । १ । १६ ।

बाष्पमुद्वमति–बाष्पायते । ऊष्माणम् ऊष्मायते ।

(८५६) **शब्दवैरकलहाभ्रकण्वमेघेभ्य करणे** । ३ । १ । १७ ।

शब्द करोति–शब्दायते । एव वैरायते कलहायते इत्यादि ।

(८५७) **सुखादिभ्य कर्त्तृवेदनायाम्** । ३ । १ । १८ ।

कर्त्तृवेदना कर्त्तु सवेदनम् । सुख वेदयते–सुखायते । दु खायते ।

(८५८) **नमोवरिवश्चित्रङ क्यच्** । ३ । १ । १९ ।

करणे इत्यनुवृत्ते क्रियाविशेषे (पूजाया परिचर्यायामाश्चर्ये च) क्यच् ।

नमस्यति, वरिवस्यति, चित्रीयते ।

(८५९) **पुच्छभाण्डचीवराण्णिङ्** । ३ । १ । २० ।

पुच्छमुदस्यति—उत्पुच्छयत । भाण्ड समाचिनोति–सम्भाण्डयते । चीवर परिधत्ते—सच्चीवरयते ।

अथ चुरादौ पठितानि गणसूत्राणि—

(१) **प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च** ।

प्रातिपदिकात् धात्वर्थे बहुल णिच् स्यात् । इष्ठप्रत्यये इव कार्याणि च स्यु । पुवद्भाव-रभाव टिलोप-विन्मतुब्लोप-यणादिलोपप्रस्थस्फाद्यादेश-भसंज्ञाः इष्ठप्रत्यये परे भवेयु । तानि कार्याण्यत्राप्यतिदिश्यन्ते । यथा—

पटुमाचष्टे पटयति टिलोप ।	बलवन्त करोति बलयति मतुब्लोप ।
हस्तिनमतिक्रामति हस्तयति ,,	मेधाविन करोति मेधयति । विन्लोप

* लोहित—नील–हरित–पीत–मद्र–फेन–मन्द–इति सप्तशब्दा गणे पठ्यन्ते । पठितेभ्यो नीलादिभ्य क्यङ् । अपठितेभ्य आकृत्या गृहीतेभ्य; श्यामादिभ्य· क्यष् । इतीद काशिकाकृन्मत लोहितडाजभ्य एव क्यष् । अन्येभ्य क्यडेवेति भाष्यकृन्मतम् । अक्षयो पदे भेद । यथाप्रयोग प्रामाण्यम् ।

(२) **तत्करोति तदाचष्टे ।**
(३) **तेनातिक्रामति ।** } पूर्वस्य प्रपञ्चावेतावुदाहृतौ च ।
(४) **धातुरूप च ।**

णिच्प्रकृति धातुरूप प्रतिपद्यते । चकारेण कार्यान्तराणि च । तानि वार्त्तिककारो व्याचष्टे ।

आख्यानात् कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्ययापत्तिः प्रकृतिवच्च कारकम् । यथा—

कसवधमाचष्टे इत्यर्थे कसवधशब्दादाख्यानवाचकात् कृदन्ताण्णिचि कृते घञ्प्रत्ययस्य लोप । हन इति वधप्रकृते प्रत्ययापत्ति । हनधातुकर्मण प्रकृतिनिष्ठ कारक द्वितीया च भवति—कस + हन् + इ = कस, घातयति । घातयतीति हनो णिचि तादेशो मिश्रप्रकरणे वक्ष्यते । बलिबन्धमाचष्टे—बलि बन्धयति । राजागमनमाचष्टे—राजानमागमयति ।

आङ्लोपश्च कालात्यन्तसंयोगे मर्य्यादायाम् । यथा— आरात्रि विवासमाचष्टे—रात्रि विवासयति ।

चित्रीकरणे प्रापि । यथा—उज्जयिन्या प्रस्थितो माहीष्मत्या सूर्योद्गमन सभावयति—सूर्यमुद्गमयति ।

नक्षत्रयोगे ज्ञि । यथा—पुष्ययोग जानाति—पुष्येण योजयति । 'सत्याप ..' (३८४) इत्यादि 'प्रातिपदिकाद्धात्वर्थे' इत्यस्यैव प्रपञ्च —सत्यमाचष्टे—सत्यापयति ।

अर्थवेदयोरापुग्वक्तव्य । अर्थमाचष्टे—अर्थापयति । वेद—वेदापयति । क्षमाशब्दादपि आपुग्दृश्यते—

क्षमापयति । निपाशयति । निरूपयति । उपवीणयति । अनुकूलयति । उपश्लोकयति । अभिप्रेणयति । अनुलोमयति । त्वचयति । सवर्मयति । वर्णयति । अवचूर्णयति ।

मिश्रप्रकरणम् ।

पाणिनिस्तावत् पदे पदे व्यत्यस्तान्यनुधावति, तानि च तत्तत्सङ्केतानुरोधेन तत्र तत्र विप्रकीर्णानि निर्दिशति । तेष्वानुपूर्व्या द्वित्रसूत्रव्यापका ये विधयो दृष्टास्तेऽस्माभिरुचितेषु प्रकरणेषु, प्रायशो व्याख्याता एव । शेषेषु कतिचन * विरलप्रयोगा इत्युपेक्षिताश्च । अपरे तु कतिपये दृष्टप्रयोगा अपि विस्मरणेनाश्रद्धया प्रकरणोपरोधभिया विशिष्टत्वेन चानुक्ताः

* प्रयोगवैरल्येऽपि कतिचिद्रूपाणि सौकर्यसद्भावे व्युत्पादितानि च ।

सन्ति । प्रतिज्ञाताश्च केचिद्विधयो मिश्रप्रकरणे वक्ष्याम इति । तानेतानुचित्यात्र मिश्रप्रकरणमारभ्यते—

लोके हि प्रतिनिधिना कार्यनिर्वाहो दृश्यते । तद्वदिह शास्त्रेऽपीत्याह—

(८६०) **स्थानिवदादेशोऽनल्विधौ** । १ । १ । ५६ ।

आदेश स्थानिना तुल्य वर्त्तेत न तु स्थान्यलाश्रयविधौ । स्थानिसम्बन्धिवर्णाश्रयकार्याणि वर्जयित्वा अन्यानि सर्वाणि कार्याणि आदेशो लभेत अन्यस्य प्रवर्त्तयति चेत्यर्थ । स्थानिगता जातिधर्मा आदेशेषु सक्रामन्ति, व्यक्तिधर्मास्तु नेति यावत् । लोकेऽपि किलैवमेव । यथा —राज्यतन्त्रे तत्तदधिकारेषु नियुक्ता धुर्या पुरुषपरिवर्त्तने अधिकारधर्मानेव प्राप्नुवन्ति न तु पुरुषधर्मान् । तद्वत् इह शास्त्रेऽपि धात्वङ्गकृत्तद्धिताव्ययसुप्तिङन्तपदानामादेशा स्थानिधर्मान् धातुत्वादीन् लभन्ते । यथा—

धातु—'ब्रुवो वचि '—वातुत्वात् वक्ता वक्तव्य इति लुडादय । ऊकारान्तत्व प्रयुक्ता गुणादयस्तु न भवन्ति ।

अङ्ग—'किम क '— अदन्ताङ्गत्वात् इनादयो भवन्ति । 'केन काम्या कैः' इति । मान्तत्वप्रयुक्त तु न भवति ।

कृत्—'त्वो त्यप '—प्रकृत्य इति 'ह्रस्वस्य पिति कृती '—ति तुक् ।

तद्धित—'ठस्येक —वार्षिक—तद्धितत्वेन प्रातिपदिकसज्ञा ।

अव्यय—'त्वो ल्यप्'—प्रकृत्य—क्त्वादेशत्वादव्ययत्वम् ।

सुप—'ङेर्य '—वृक्षाय इति 'सुपि चे'ति दीर्घ ।

तिङ्—'तस्थस्यमिपा तान्तन्ताम '—अकुरुताम् इत्यस्य तिङन्तत्वात् पदसज्ञा ।

पद—'बहुवचनस्य वस्नसौ '—ग्रामो व स्वम् इति पदत्वाद्रुत्वम् ।

(८६१) **अचः परस्मिन् पूर्वविधौ** । १ । १ । ५७ ।

अल्विधावपि क्वचित् स्थानिवद्भावविध्यर्थमारम्भ । **परस्मिन्निति** निमित्तसप्तमी । (परस्मिन्नच आदेश) परनिमित्तकोऽजादेश स्थानिवत् स्यात् । (पूर्वविधौ) स्थानिभूतादच पूर्वस्य विधौ कर्त्तव्ये । यथा—

कथयति—अत्र 'कथ' इत्यकारान्ताद्धातोर्णिचि 'अतो लोपे' तस्य स्थानिवद्भावात् ककारोपरिगताकारस्य उपधात्वाभावेन 'अत उपधाया' इति वृद्धिर्न भवति ।

अत्र लुप्तोऽकारोऽन्त्य उपधायाश्च विवि कर्त्तव्य इति पूर्वरूपैव विवि । आर्धधातुके परे विहित इति परनिमित्तकश्चायमलोप । अदर्शनरूपो लोपोऽप्यादेशत्वेन गण्यते । शून्यादेशो हि लोपो नाम ।

प्रत्यु—('अच' कि १) अक्राष्टाम्—अत्र झलो झलीति सिचो लोप परनिमित्तक कृषे षकारस्य षढो क सीति कत्वे कर्त्तव्ये न स्थानिवत् ।

('परस्मिन्' कि १) वैयाघ्रपद्य — अत्र पादस्यान्तलोपो न परनिमित्तक इति यद्भाव न प्रतिबध्नाति ।

('पूर्वविधौ' कि २) हे गौ —अत्र वृद्धिरजादेश । सम्बुद्धिलोपे कर्त्तव्ये न स्थानिवत् ।

(८६२) न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वार-दीर्घजश्चर्विधिषु । १ । १ । ९८ ।

पूर्वेणातिप्रसक्त स्थानिवद्भाव पदान्तादिविधिषु प्रतिषिध्यते । यथा—

पदान्त—कानि सन्ति—अत्र असन्तीत्यकारस्य किडति सार्वधातुक इति परनिमित्त 'ऋसोरल्लोप इति लोप पूर्वस्य 'कानि' इति इकारस्य यणादेश प्रति न स्थानिवत् ।

द्विर्वचन—म वरि —अत्र परनिमित्तको यणादेशो वकार पूर्वस्य वकारस्य 'अनाप्ति च' इति द्वित्वे कर्त्तव्ये न स्थानिवत् । एवमन्येऽप्युदाहार्या ।

॥ ५ ॥ **पूर्वत्रासिद्धे न स्थानिवत् संयोगादिलोपतत्वणत्ववर्जम् ।**

आदित्यो देवतास्येत्यर्थे **आदित्य** हवि । ण्यप्रत्यये सति यस्येतिचेति प्रकृत्यन्त्यस्याकारस्य लोपो न स्थानिवत् हलो यमा यमीति लोपे कर्त्तव्ये । संयोगादिलोपादिषु तु स्थानिवद्भवत्येव —वाक्यर्थ, निगार्यते, माधवपनी ।

अनेन सिद्धत्वात् द्विर्वचनादिग्रहण भाष्ये प्रत्याख्यातम् ।

(८६३) द्विर्वचनेऽचि । १ । १ । ९९ ।

द्वित्वनिमित्तेऽचि परे अजादेश स्थानिवत्स्यात् द्वित्व एव कर्त्तव्ये । स्थानिवद्भावविधिद्वारा द्वित्वे कर्त्तव्ये परनित्यत्वादिभिर्बलीयसामप्यजादेशानां प्रतिषेधफलकमिद सूत्रम् । यथा—

जग्मतु —अत्र द्वित्वात् परत्वात् 'गम हन' इति उपधालोप प्राप्तोऽनेन प्रतिषिध्यते । लोप प्रथम क्रियते चेत् स्वरनाशात् 'एकाच' इति द्वित्वस्य न प्रसक्ति ।

अथ प्रकीर्णकाः केचिद्विधय —तत्र (१) ईत्वम्—

(८६४) **ईद्यति** (आत) । ६ । ४ । ६५ ।

आदन्तस्य धातोरीकारोऽन्तादेशो यत्प्रत्यये परे । यथा—

ग्ल—ग्लेयम् । दा—देयम् । हा—हेयम् । स्था—स्थेयम् । कृत्प्रत्ययोऽयम् ।

(७३१) 'घुमास्थागापाजहातिसां हलि' (६ । ४ । ६६) व्याख्यातम् ।

(८६५) **एर्लिङि** । ६ । ४ । ६७ ।

घुमास्थादीनामाकारस्य क्ङिति लिङि परे एकार आदेश । यथा—

देयात् । स्थेयात् । पेयात् । प्रत्यु—('क्ङिति कि ?) दासीष्ट । पासीष्ट ।

(८६६) **वान्यस्य संयोगादेः** । ६ । ४ । ६६ ।

घुमास्थादिभ्योऽन्यस्य संयोगादेर्धातोरन्त्याकारस्य वा एत्व क्ङिति लिङि । यथा—

ग्लेयात्, ग्लायात् । म्लेयात्, म्लायात् ।

(८६७) **न ल्यपि** । ६ । ४ । ६९ ।

घुमास्थादीनामात ईत्व ल्यपि न । यथा—

प्रदाय । प्रमाय । प्रस्थाय इत्यादि ।

(८६८) **मयतेरिदन्यतरस्याम्** । ६ । ४ । ७० ।

ल्यपि वा इत्वम् । यथा—अपमित्य । अपमाय ।

(२) गुणविधि—

(८६९) **गुणोऽर्तिसंयोगाद्योः** । ७ । ४ । २९ ।

'रिङ्शयग्लिङ्षु' इत्यतोऽनन्तर सूत्रम् । ऋत इति, असार्वधातुक इति, ये इति च वर्त्तते । अर्त्ते सयोगादीनामृदन्ताना च यकि असार्वधातुक-लिङि च गुण । यथा—

ऋ—अर्यते, अर्यात् । स्मृ—स्मर्यते, स्मर्यात् ।

(८७०) **यङि च** । ७ । ४ । ३० ।

अर्त्तिसयोगाद्योर्गुणो यङि च स्यात् । यथा—ऋ—अरार्यते । स्मृ—सास्मर्यते । अर्त्तेरजादित्वेऽपि 'अज्यत्यशूर्णोतीनामुपसख्या'तत्वात् यङ् । यङि द्वित्वे—'चन्द्रा' इति रेफस्य द्वित्वनिषेधाभावश्च वार्त्तिकेन ।

॥ * ॥ **हन्तेर्हिंसार्थाद्यङि घनीभाव** ।

भृशं हिनस्ति—जेघ्नीयते । भृशं गच्छति । जङ्गम्यते ।

(८७१) **ई घ्राध्मो** । ७ । ४ । ३१ ।

घ्राध्मोर्यङि ईकारोऽन्तादेश । जेघ्रीयते । देध्मीयते ।

(३) नलोप —

(८७२) **अनिदितां हल उपधायाः क्ङिति** (नलोप) । ६ । ४ । २४ ।

अनिदिता धातूना मध्ये हलन्तस्योपधाया नकारस्य लोप. क्ङिति प्रत्यये परे । यथा—

धातु	क्त	यक्	यङ्
स्रन्सु	स्रस्तम्	स्रस्यते	सनीस्रस्यते ।
ध्वन्सु	ध्वस्तम्	ध्वस्यते	दनीध्वस्यते ।
भञ्ज	भक्तम्	भज्यते	बाभज्यते ।

प्रत्यु—('अनिदिता' कि ?) नदि नन्दित नन्द्यते नानद्यते ।
('हल' कि ?) नीतम् नीयते नेनीयते ।
('उपधाया' कि ?) नद्धम् नद्यते नानद्यते ।

(८७३) **दशसञ्जस्वञ्जां शपि** । ६ । ४ । २५ ।

एषा शपि उपधानकारस्य लोप । यथा— दशति, सजति, परिष्वजते ।

(८७४) **रञ्जेश्च** । ६ । ४ । २६ ।

उपधानकारस्य लोप शपि । यथा— रजति, रजत, रजन्ति ।

(८७५) **घञि च भावकरणयोः** । ६ । ४ । २७ ।

भावकरणार्थके घञि च रञ्जेरुपधानलोप । यथा—
रङ्ग राग । रज्यतेऽनेनेति च राग ।
अन्यत्र तु 'रज्यन्तेऽस्मिन्नित्यधिकरणार्थे रङ्ग ।

(८७६) **स्यदो जवे** । ६ । ४ । २८ ।

स्यन्दतेर्घञि नलोप उपधादीर्घाभावश्च निपात्यते । जवभिन्ने त्वर्थे घृतस्यन्द प्रवाह इत्यर्थ ।

(८८७) **नाञ्चेः पूजायाम्** । ६ । ४ । ३० ।

'अञ्चुगतिपूजनयो इत्यनिदितो धातो पूजायामर्थे न नलोप । यथा—
अञ्चित = पूजितम् । क्विपि—प्राङ्, प्राञ्चौ, प्राञ्च इत्यादि ।
प्रत्यु—('पूजाया' कि ?) उदक्तमुदक कूपात् । उद्धृतमित्यर्थ ।

(८७८) **क्त्वि स्कन्दिस्यन्दोः** । ६ । ४ । ३१ ।

क्त्वाप्रत्ययेऽनयोर्नोपधानलोप । स्कन्दित्वा । स्यन्दित्वा ।

(८७९) **जान्तनशां विभाषा** । ६ । ४ । ३२ ।

जकारान्तानां नशेश्च वा नलोप क्त्वाप्रत्यये । यथा—

रञ्ज—रक्त्वा, रङ्क्त्वा । नश—नष्ट्वा, नट्वा ।

(८८०) **भञ्जेश्च चिणि** । ६ । ४ । ३३ ।

अभाञ्जि, अभाजि । भावकर्मणोर्लुङि चिण् ।

---

(४) हनस्तादेश —

(८८१) **हनस्तोऽचिण्णलोः** । ७ । ३ । ६४ ।

ञ्णितीत्यनुवर्त्तते । हन्तेस्तकारोऽन्तादेशो ञिति णिति च प्रत्यये परे । **यथा**—णिचि—

'हो हन्तेर्ञ्णिन्नेषु' इति कुत्वेन हकारस्य घ, नस्य तादेश, घातयति, अजीघतत् इत्यादि ।

(५) मान्तस्य नत्वम्—

(८८२) **मो नो धातोः** । ८ । २ । ६४ ।

मकारान्तस्य धातोर्नकारोऽन्तादेश पठ्यन्ते । यथा—

प्रशाम्यते क्विपि प्रशान् । प्रताम्यते प्रतान् ।

(८८३) **म्वोश्च** । ८ । २ । ६५ ।

मकारवकारयो परयो मान्तस्य धातोर्नकारोऽन्तादेश । यथा—

क्षमूष् सहने—चक्षण्वहे, चक्षण्महे । वेट्त्वात् चक्षमिवहे, चक्षमिमहे ।

भावकर्मप्रक्रिया—

उक्ता धातूनां व्युत्पन्नानामव्युत्पन्नाना च कर्त्तरिप्रयोगे लकारा । अथ भावकर्मणोर्लकारा उच्यन्ते । सुगमात्र प्रक्रिया सामान्यविधीनामुभयसाधारण्यात् भावकर्मणो प्रयोगे पदविकरणभेदयोरभावाच्च । भावकर्मणोर्हि 'सार्वधातुके यक्' (४९३) इति यगेक एव लट्-लङ् लोट्-लिङ्क्षु विकरणम् । स्यतासादीनि च सस्करणानि साधारणानि । 'भावकर्मणो' इति आत्मनेपदविधानात् तयो सर्वेऽपि धातव आत्मनेपदिन एव । अकर्मकेभ्य एव भावे प्रयोग ।

भू—सत्तायाम्-यग्विकरण, तस्य कित्त्वात् गुणप्रतिषेध, **भूयते** । पुरुषवचनयोरभावात् लकारेष्वेकमेव रूपम् । **अभूयत-भूयतां-भूयेत** । सस्करणानां सीयुटश्च णित्त्वविकल्पो वक्ष्यते । तेन वा वृद्धिरिगन्तानाम्—**भाविता, भविता** । **भाविष्यते, भविष्यते** । **अभाविष्यत, अभविष्यत** । लुङि तप्रत्यये चिण् सस्करण, प्रत्ययलोपश्चानुपदमुच्येते, **अभावि, भाविषीष्ट, भविषीष्ट** ।

अनुभूयते, अनुभूयेते, अनुभूयन्ते । अनुभूयसे, अनुभूयेथे, अनुभूयध्वे । अनुभूये, अनुभूयावहे, अनुभूयामहे । अन्वभूयत अन्वभूयेताम् इत्यादन्येषामपि लकाराणाम् ।

त्वया युवाभ्या युष्माभि—वी, मया आवाभ्या अस्माभि—वा, तेन ताभ्या तै—वी भूयते । कर्मणि तु—

सोऽनुभूयते,	तावनुभूयेते,	तेऽनुभूयन्ते ।
त्वमनुभूयसे,	युवामनुभूयेथे,	यूयमनुभूयध्वे ।
अहमनुभूये,	आवामनुभूयावहे,	वयमनुभूयामहे ।

इति कर्मानुरोधेन पुरुषवचने । कर्तुस्तु न निर्बन्ध पुरुषवचनयोर्लकारवाच्यकारकानुरोधित्वात्, अत्र च कर्मणो लकारवाच्यत्वात् । लकारवाच्यमेव हि कारक समानाधिकरण भवति । युष्मदादीना सामानाधिकरण्य एव हि पुरुषवचने च प्रवर्त्तते ।

अथ प्रक्रिया—लुङि किल चिण्सस्करणमुक्तम् । तत् पुन कर्त्तरिप्रयोगेऽपि पञ्चभ्येभ्यो धातुभ्यो भवति । पाणिनिश्च कर्त्तरि चिण्विधि प्रथममुक्त्वैव भावकर्मणोस्तद्विधिमारभत इति सूत्राण्यानुपूर्व्या व्याख्यायन्ते—

(८८४) **चिण् ते पदः** । ३ । १ । ६० ।

'णिश्रिद्रुस्रुभ्य कर्त्तरि चङ्' इति च्लेरादेशविधिप्रकरणस्थमिद सूत्रम् । पदधातो कर्त्तरि लुङस्तप्रत्यये (आत्मनेपदप्रथमपुरुषैकवचने) परे च्ले चिणादेश. । सिचोऽपवाद ।

(८८५) **दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्** । ३ । १ । ६१ ।

दीपादिभ्य. पूर्वोक्त वा । पक्षे सिच् ।

(८८६) **अचः कर्मकर्त्तरि** । ३ । १ । ६२ ।

अजन्ताद्धातो कर्मकर्त्तरि लुङश्च्लेश्चिण् वा तप्रत्यये । कर्मकर्त्ता व्याख्यास्यते । प्राप्तविभाषेयम् । कर्मकर्तरि हि कर्मवद्भावातिदेशाच्चिण् भावकर्मणोरिति नित्य प्राप्तम् ।

(८८७) **दुहश्च** । ३ । १ । ६३ ।

कर्मकर्तरि लुङश्च्लेश्चिण् वा तप्रत्यये । न दुहस्नुनमामिति कर्मवत् कार्यानिषेधाद-प्राप्ते विभाषेयम् ।

(८८८) **न रुध** । ३ । १ । ६६ ।

रुध कर्मकर्त्तरि लुङश्च्लेश्चिण्न ।

(८८९) **तपोऽनुतापे च** । ३ । १ । ६६ ।

तप्यते कर्मकर्त्तरि (भावे) अनुतापेऽर्थे च श्लेश्चिण्न ।

(८९०) **चिण् भावकर्मणोः** । ३ । १ । ६६ ।

नेत्यस्य निवृत्त्यर्थं पुनश्चिण्ग्रहणम् । भावकर्मणोर्लुङश्च्लेश्चिण् तप्रत्यये ।

अथ चिण्कार्यम् ।

(८९१) **चिणो लुक्** । ६ । ४ । १०४ ।

'चिण' इति षष्ठ्यन्तम् । चिण परस्य प्रत्ययस्य लुक् । इति तप्रत्ययो लुप्यते । णित्त्वादजन्तानामदुपधाना च वृद्धि । इगुपधाना तु लघूपधगुण । अथ सूत्राण्युदाह्रियन्ते—

पद—उदपादि सत्यम् । समपादि मैक्षम्—कर्त्तरि ।
अपादि अपत्साताम् अपत्सत इत्यादि ।
दीप—अदीपि, अदीपिष्ट अदीपिषाताम् अदीपिषत ।
जन—*अजनि, अजनिष्ट अजनिषाताम् अजनिषत ।
बुध—अबोधि, अबुद्ध अभुत्साताम् ।
लू—अलावि, अलविष्ट वा वृक्ष स्वयमेव—कर्मकर्त्तरि ।
कृ—अकारि, अकृत—वा घट स्वयमेव— ,,
दुह—अदोहि, अदुग्ध—वा गौ ,, ,,
रुध—अरुद्ध गौ ,, ,,
तप—अतप्त तपस्तापस । अनुतापे अन्वतप्त पापेन ,,
भू—अभावि—भावे । अनुभू—अन्वभावि कर्मणि ।

* 'जनिवध्योश्च' इति वक्ष्यमाण उपधावृद्धिप्रतिषेध ।

(८९२) **आतो युक् चिण्कृतोः** (ञ्णिति) । ७ । ३ । ३३ ।

आदन्तस्य धातोर्युगागमश्चिणि, ञ्णिति कृति च । यथा—

धातु		चिण्		णमुल्		घञ्
दा	—	अदायि	—	दायक	—	दाय
पा	—	अपायि	—	पायक	—	पाय
स्था	—	अस्थायि	—	स्थायक	—	स्थाय

(८९३) **नोदात्तोपदेशस्य मान्तस्यानाचमेः** । ७ । ३ । ३४ ।

उदात्तोपदेशस्य मकारान्तस्य आचमिवर्जितस्य चिणि ञ्णिति कृति च उपधाया अतो वृद्धिर्न स्यात् । सेटो धातव उदात्तोपदेशा । यथा—

शमु—अशमि । दमु—अदमि । प्रत्यु—('उदात्तोपदेशस्य' किं?) अगमि ।

(८९४) **जनिवध्योश्च** । ७ । ३ । ३५ ।

अनयोश्च नोपधावृद्धिश्चिणि, ञ्णिति कृति च । यथा—

अजनि, जनक, प्रजन । अवधि, वधक, वध ।

(८९५) **स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च** । ६ । ४ । ६२ ।

चिण्वत्=चिणि इव कार्यम् । भावकर्मणो प्रयोगे उपदेशे अजन्तानां हनग्रहदृशां च स्यसिच्सीयुट्तासिषु सत्करणेषु परेषु चिणीव कार्यं वा स्यात् । चिण्वद्भावसन्नियोगेन स्यसिजादीनामिट् च । चिण्कार्याणि च—

"चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति"

इति परिगणितानि । एषु वृद्धिर्णित्त्वप्रयुक्ता । 'आतो युक् चिण्कृतो' इत्यत्रैवोक्तो युक् । घत्वमपि 'हो हन्ते .' इति णित्त्वप्रयुक्तम् । दीर्घे पर वक्तव्योऽस्ति । स यथा—

(८९६) **चिण्णमुलोर्दीर्घोऽन्यतरस्यां (णौ)** । ६ । ४ । ९३ ।

'मितां ह्रस्व' इत्यतोऽनन्तरस्तदपवादश्चाय दीर्घे । चिण्परे णमुल्परे च णौ मितामुपधाया वा दीर्घः यथा—

दमयतेर्ल्लुङि चिणि 'णेरनिटि' इति णिलोपे अदम् + इ इति जाते अनेन वा

दीर्घ । **अदामि-अदमि** । एव शमयतेर्लुङि **अशामि-अशमि** । केवलाभ्या तु मिता ह्रस्वात् **अदमि-अशमि** इत्येव ।

क्रमादुदाहरणानि—

अजन्तेषु कृ—कारिष्यते, करिष्यते । चिण्वदभावे 'ऋद्धनो स्ये' इति इट् ।
जी—जायिष्यते, जेष्यते
दा—दायिष्यते, दास्यते युक् ।
हन—घानिष्यते, हनिष्यते हन्तेर्धत्वम् ।
ग्रह—ग्राहिष्यते, ग्रहीष्यते
दृश—दर्शिष्यते, द्रक्ष्यते

शमिर्णिजन्तोऽमन्त — शामिष्यते, शमिष्यते । शमयिष्यते । दीर्घविकल्प । एव सिजादिष्वपि, अकारिषाताम्, अकारिषत । अकृषताम् अकृषत । कारिता, कर्त्ता । कारिषीष्ट, कृषीष्ट इत्यादि । आर्धधातुके इत्यधिकारादाशीर्लिङ सीयुटेव गृह्यते ।

अथ पूर्वमेव प्रत्ययान्तरसाहचर्येणोक्ता कतिचिद्यक प्रक्रियाः सुखार्थमनुसन्धीयन्ते—

'रिङ्शयग्लिङ्क्षु' (५२९) **कृ**—क्रियते । **भृ**—ध्रियते ।
'ऋत इद्धातो' (५२६) **कृ**—कीर्यते । **तॄ**—तीर्यते ।
'उदोष्ठ्यपूर्वस्य' (५२७) **पॄ**—पूर्यते ।
'अकृत्सार्वधातुकयोर्दीर्घ' (८२८) **जि**—जीयते । **स्तु**—स्तूयते ।
'घुमास्था' (८३१) **दा**—दीयते । **मा**—मीयते ।
स्था—स्थीयते ।
'गुणोऽर्तिसं' (८६९) **ऋ**—अर्यते । **स्मृ**—स्मर्यते ।

कर्मकर्तृप्रक्रिया ।

इह किल कर्त्तरि कर्मणि भावे चेति लकाराणा त्रिविध प्रयोग' । यत्र कर्तृकारकावलम्बिनी क्रिया प्रतिभासते तत्र कर्तरि प्रयोग । यत्र कर्मकारकावलम्बिनी तत्र कर्मणि प्रयोग । यत्र पुन कारकसंसर्ग विनैवावभासते तत्र भावे प्रयोग इति । एषु कर्त्तरि प्रयोगो द्विविध सभवति, कर्त्तुर्विवक्षाधीनत्वात् । तथाहि—स्वतन्त्र कारक किल कर्त्ता । स्वातन्त्र्य च विवक्षाधीनम् । यथा— देवदत्तस्तूलिकया लिखतीति वाक्ये लेखनक्रियाया

स्वातन्त्र्याद्देवदत्त कर्त्ता । तूलिका च तस्य लेखनसाधनमिति करणम् । अथ पुनर्लाघवातिशयद्योतनाय तूलिकैव स्वय लेखनक्रिया निर्वहतीति विवक्ष्यते चेत्तर्हि तूलिका कर्त्ता भवति । वस्तुतोऽत्र देवदत्त एव यद्यपि जडा तूलिकामुचितरेखोत्पादनानुकूल चालयति तथापि तूलिका देवदत्तोपदिष्टवर्त्मनो यदि नाचलिष्यत्तर्हि देवदत्तो लिखितु नाशक्ष्यदिति तूलिकाया अपि स्वव्यापारे स्वातन्त्र्यमस्त्येव । इद स्वातन्त्र्यमवलम्ब्य तूलिका लिखतीति करण कर्त्ता सम्पद्यते । एव स्थाली पचतीत्यधिकरणस्य कर्तृत्वं सम्भवति इत्यादि । तथा च कारकान्तराणामपि स्वव्यापारे स्वातन्त्र्यात् कर्तृत्व विवक्षितु शक्यते । लक्षणावृत्त्यस्पृष्टे तत्वाख्यानवाक्ये यानि करणादीनि कारकाणि तानि लाक्षणिके चमत्कृतवाक्ये कर्त्तारो भवन्ति । करणस्य कर्तृत्वविवक्षाया करणकर्त्तरि प्रयोग । अधिकरणस्य कर्तृत्वविवक्षाया अधिकरणकर्त्तरि प्रयोग । कर्मणः कर्तृत्वविवक्षाया कर्मकर्त्तरि प्रयोग । इत्यादयस्तेषा व्यपदेशा । एषु करणकर्त्तरि प्रयोगादय कर्त्तरिप्रयोगसमाना एव । कर्मकर्त्तरिप्रयोगे पर रूपभेद आपततीति तत्प्रक्रिया वक्तव्या जाता ।

(८९७) **कर्मवत् कर्मणा तुल्यक्रियः । ३ । १ । ८७ ।**

कर्मस्थया क्रियया तुल्यक्रिय कर्त्ता कर्मवत् स्यात् । कर्मकर्त्ता व्याख्यातरूप कर्मणा तुल्य स्यादित्यर्थ । कर्मकर्त्तरिप्रयोगे कर्मणिप्रयोग इव कार्याणि भवन्तीति कार्यातिदेशोऽयम् । तेन यक्चिण्चिण्वदिद्वात्मनेपदानि भवन्ति । यथा—

कर्त्तरि	कर्मकर्त्तरि.
देवदत्तस्तण्डुल पचति ।	पच्यते तण्डुल —अपाचि ।
कश्चिच्छक्तिर्घट भिनत्ति ।	भिद्यते घट· —अभेदि ।
वय शब्द शृणुम ।	श्रूयते शब्द —अश्रावि ।
योद्धा लक्ष्य विध्यते ।	विध्यते लक्ष्यम् —अवेधि ।

'कर्मणा तुल्यक्रिय' इत्युक्ते कर्मस्थक्रियाणामेव धातूनामय विधि, न तु कर्तृस्थक्रियाणाम् । यस्मिन् कर्मकारके क्रियाकृतो विकारो

दृश्यते स एव कर्तृत्व प्राप्त कर्मवत् स्यात् । पचनक्रियाया तण्डुलस्य, भेदनक्रियाया घटस्य च विकारो जायते न तु कर्त्तु । अनेन ज्ञानगमनादीना कर्तृनिष्ठफलाना क्रियाणा कर्मकर्तरिप्रयोगे न कर्मवद्भाव । कर्तरिप्रयोगतुल्यमेव तत्र रूपम् । यथा—

'अधिगच्छति शास्त्रार्थं स्मरति श्रद्दधाति च'

शास्त्रार्थ स्वयमेवाधिगमनस्मरणश्रद्धाविषयो भवतीत्यर्थ ।

(८९८) **तपस्तपःकर्मकस्यैव** । ३ । १ । ८८ ।

तप सन्तापे इत्यस्य कर्त्ता कर्मवत् स्यात्, तप इति कर्म प्रयुज्यते चेदेव । 'सुखामिकामास्ते' 'सुखशायिका शय्यन्ते' इत्यादिवन्निजभावार्थकस्य कर्मस्थाने प्रयोगमात्रमिदम् । सकर्मकाणामितरेषा कर्मकर्तरि कर्मवद्भाव प्रतिषिद्धो वार्त्तिककारेण । 'तपोऽनुतापे च' (८८९) इति चिण्निषेधोऽप्यत्रोक्त । यथा—

तप्यते तपस्तापस —अतप्त ।

प्रत्यु—('तप कर्मकस्य' कि ?) उत्तपति सुवर्ण सुवर्णकार ।

(८९९) **न दुहस्नुनमां यक्चिणौ** । ३ । १ । ८९ ।

एषा कर्मकर्तरि यक्चिणौ न । दुह पर चिण् 'दुहश्च' (८८७) इति विकल्पित । यथा—

दुग्धे । अदोहि, अदुग्ध, (लुग्वा दुहेति पक्षे लुक्) अधुक्षत वा गौ स्वयमेव अस्तुत । प्रास्नोष्ट गौ स्वयमेव । नमते । अनस्त दण्ड स्वयमेव ।

(९००) **कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च** । ३ । १ । ९० ।

कुष निष्कर्षे, रञ्ज रागे इत्यनयो कर्मकर्तरि श्यन् परस्मैपद च प्राचा मते । यथा—

कुष्यति पाद स्वयमेव । कुष्यते वा । रज्यति वस्त्र स्वयमेव । रज्यते वा ।

यद्विषय एव परस्मैपद विधे सन्नियोगशिष्टत्वात् । तेन अकोषि पाद इत्येव लुङादिषु ।

'अच कर्मकर्तरि' (८८६) इति चिण्विकल्प —अकारि, अकृत वा घट स्वयमेव । 'न रुध.' (८८८) इति चिण्निषेध —अवारुद्ध गौ स्वयमेव ।

पदव्यवस्था ।

लकारार्थोपसर्गाणा तथा विकरणस्य च ।
इता च बहुधा भेदाद् धातूना भिद्यते पदम्—
यथा वर्त्स्यत्यद्युतच्च, यथा भुङ्क्ते च तिष्ठते,
यथाहते च सवित्ते, यथा बोधति बुध्यते,
यथास्त्यास्ते, लेढि लीढे, म्रियते, स्तौति च स्तुते ॥

इति नानोपाधिभिर्भिद्यमानस्य धातो पदस्य क्वाचिद्व्यवस्था क्रियते—

अनुदात्तङित आत्मनेपदम् । १ । ३ । १२ ।

व्याख्यातम्—(४१९) आस-आस्ते । शीङ्-शेते ।

(९०१) **भावकर्मणोः । १ । ३ । १३ ।**

यथा—भूयते । अनुभूयते ।

(९०२) **कर्तरि कर्मव्यतीहारे । १ । ३ । १४ ।**

कर्मव्यतीहार क्रियाविनिमय । यत्रान्यसम्बन्धिनी क्रियामन्यः करोति, इतरसम्बन्धिनी चेतर सकर्मव्यतीहार । तस्मिन् द्योत्ये धातोः कर्त्तर्यात्मनेपदम् । भावकर्मणोस्तु पूर्वेण सिद्धमेव सर्वत्रात्मनेपदम् । 'व्यति' इत्युपसर्गद्वय कर्मव्यतीहार द्योतयति । यथा—

रामकृष्णौ व्यत्यश्नाते—रामस्य भोज्य कृष्ण , कृष्णस्य भोज्य रामश्चाश्नातीत्यर्थ ।
रामकृष्णौ व्यतितिष्ठेते —स्थानविनिमयेन तिष्ठत इत्यर्थ ।

(९०३) **न गतिहिंसार्थेभ्यः । १ । ३ । १५ ।**

कर्मव्यतीहारे विहितमात्मनेपद गतिहिंसार्थेभ्यो न । यथा—

बाला व्यतिगच्छन्ति । योधा व्यतिघ्नन्ति ।

(९०४) **इतरेतरान्योन्योपपदाच्च । १ । ३ । १६ ।**

अत्र वार्त्तिक-परस्परोपपदाच्चेति वक्तव्यम् । इतरेतरादिपदप्रयोगेऽपि न । यथा—

इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनन्ति ।

(९०५) **नेर्विश । १ । ३ । १७ ।**

निपूर्वाद्विशतेरात्मनेपदम् । यथा—निविशते ।

(९०६) **परिव्यवेभ्य क्रियः** । १ । ३ । १८ ।

नित्यात् कर्त्राभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् अकर्त्राभिप्रायेऽपि यथा स्यादित्यारम्भ । यथा— परिक्रीणीते । विक्रीणीते । अवक्रीणीते ।

(९०७) **विपरिभ्यां जेः** । १ । ३ । १९ ।

विजयते, पराजयते ।

(९०८) **आङो दोऽनास्यविहरणे** । १ । ३ । २० ।

आङ्पूर्वाद्दातेर्मुखविकासनादन्यत्रार्थे तङानौ ।

आदत्ते विद्याम् । गृह्णाति । मुखं व्याददाति—विकासयति ।

(९०९) **क्रीडोऽनुसंपरिभ्यश्च** । १ । ३ । २१ ।

अनुसपरिभ्य आङश्च क्रीड तङानौ ।

अनुक्रीडते, सक्रीडते, परिक्रीडते, आक्रीडते ।

॥ * ॥ **समोऽकूजने इति वक्तव्यम्** ।

सक्रीडन्ति शकटानि—सशब्द चलन्तीत्यर्थ ।

॥ ' ॥ **आगमेः क्षमायाम् आत्मनेपदं वक्तव्यम्** ।

क्षमा = उपेक्षा, कालहरणमिति यावत् । आगमयस्व तावत् **माणवकम्** । क्षमस्व कञ्चित् कालम् । मा त्वरिष्ठा इत्यर्थ ।

॥ ' ॥ **शिक्षेर्जिज्ञासायाम्** । शिक्षते विद्यासु । शक्तो भवितुमिच्छतीत्यर्थः ।

॥ ' ॥ **आङि नुपृच्छयोरुपसंख्यानम्** ।

आनुते सृगाल । आपृच्छते गुरुम् ।

॥ * ॥ **शप उपालम्भने** ।

वाचा शरीरस्पर्शनमुपालम्भनम् । तत्र पादाभ्यां शपे ।

(९१०) **समवप्रविभ्यः स्थः** । १ । ३ । २२ ।

सन्तिष्ठते, अवतिष्ठते, प्रतिष्ठते, वितिष्ठते ।

(९११) **प्रकाशनस्थेयाख्ययोश्च** । १ । ३ । २३ ।

स्वाभिप्रायप्रकटन प्रकाशनम् । विवादपदनिर्णेता स्थेय. । तस्याख्यान स्थेयाख्या । अनयो स्थस्तङानौ । यथा—

गोपी कृष्णाय तिष्ठते—स्वाभिप्राय प्रकाशयतीत्यर्थ ।

'सशब्द कर्णादिषु तिष्ठते य'—कर्णादीन् निर्णेतृत्वेन आश्रयतीत्यर्थः ।

(९१२) **उदोऽनूर्ध्वकर्मणि** । १ । ३ । २४ ।

उत्साहादावर्थे उत्तिष्ठतेस्तङानौ । यथा—

'उत्तिष्ठमानस्तु परो नोपेक्ष्य पथ्यमिच्छता' । उत्तिष्ठमान उत्साहीत्यर्थ । कुटुम्बे उत्तिष्ठते—तदर्थं यतत इत्यर्थ ।

(९१३) **उपान्मन्त्रकरणे** । १ । ३ । २५ ।

उपतिष्ठते सूर्य—सेवत इत्यर्थ ।

(९१४) **अकर्मकाच्च** । १ । ३ । २६ ।

यावत्भुक्तमुपतिष्ठते । सन्निधीयत इत्यर्थ ।

(९१५) **उद्भिभ्यां तप** । १ । ३ । २७ ।

अकर्मकादित्येव । उत्तपते, वितपते—दीप्यत इत्यर्थ ।

(९१६) **आङो यमहनः** । १ । ३ । २८ ।

अकर्मकादित्येव । आयच्छते—दीर्घीभवति । आहते ।

॥ * ॥ **स्वाङ्गकर्मकाच्चेति वक्तव्यम्** ।

आयच्छते पाणिम् । आहते शिर ।

(९१७) **समो गमृच्छिभ्याम्** । १ । ३ । २९ ।

अकर्मकादित्येव । सङ्गच्छते, समृच्छते ।

॥ * ॥ **अर्त्तिश्रुदृशिभ्यश्चेति वक्तव्यम्** । **विदिप्रच्छिस्वरती-नामुपसंख्यानम्** ।

सम्पृच्छते, सम्शृणुते, सविन्ते इत्यादि ।

(९१८) **निसमुपविभ्यो ह्वः** । १ । ३ । ३० ।

अकर्मकादिति निवृत्तम् । निह्वयते, सह्वयते इत्यादि ।

(९१९) **स्पर्धायामाङः** । १ । ३ । ३१ ।

स्पर्धा सङ्घर्ष । मल्लो मल्लमाह्वयते ।

(९२०) **गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः** । १ । ३ । ३२ ।

गन्धनम् अपकारप्रयुक्त हिंसात्मक सूचनम् । अवक्षेपण भर्त्सनम् । सेवनमनुवृत्ति । प्रतियत्न सतो गुणान्तराधानम् । प्रकथन प्रकर्षेण कथनम् । उपयोगो धर्मादि-प्रयोजनो विनियोग । यथा—

गन्धने—उत्कुरुते उदाकुरुते सूचयतीत्यर्थ ।

अवक्षेपणे—श्येनो वर्त्तिकामुदाकुरुते—भर्त्सयतीत्यर्थ ।

सेवने—महामात्रानुपकुरुते—सेवत इत्यर्थ ।

साहसिक्ये—परदारान् प्रकुरुते—तेषु सहसा प्रवर्त्तन इत्यर्थ ।
प्रतियत्ने—काण्ड गुडस्योपस्कुरुते—गुणान्तरमादधातीत्यर्थ ।
प्रकथने—जनपद दान् प्रकुरुते—प्रकर्षेण कथयतीत्यर्थ ।
उपयोगे—शत प्रकुरुते—धर्मादि विनियुङ्क्त इत्यर्थ ।

(९२१) **अधेः प्रसहने** । १ । ३ । ३३ ।

प्रसहनमभिभव शत्रुमधिचक्रे—अभिबभूवेत्यर्थ ।

(९२२) **वेश्शब्दकर्मण** । १ । ३ । ३४ ।

क्रोष्टा विकुरुते स्वराम् । अन्यत्र विकरोति पद ।

(९२३) **अकर्मकाच्च** । १ । ३ । ३५ ।

वे कृत्र अकर्मकात् आत्मनेपदम् । विकुर्वते सैन्यवा । वर्तन्तीत्यर्थ ।

(९२४) **सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः** । १ । ३ । ३६ ।

उत्सञ्जनज्ञानविगणनव्ययानयतेर्वाच्या । सम्माननाचार्यकरणभृत-यस्तु प्रयोगोपाधय । सम्माननं=पूजनम् । नयते चार्वाको लोकायते । तन्म-तसिद्धान्तमुपपत्त्योपदिश्य शिष्यास्तत्र नेऊयतीत्यर्थ । तेन च शिष्याणां तत्पूजा फलिता । उत्सञ्जनमुत्क्षेपणम् । दण्डमुन्नयते—आचार्यकरणमा-चार्यत्वसम्पादनम् । माणवकमुपनयते—स्वसमीप प्रापय्य सस्कारपूर्व वेद-मुपदिशतीत्यर्थ । ज्ञान निश्चय —तत्व नयते । भृतिर्वेतनम् । कर्मकरा-नुपनयते । भृतिदानेन स्वसमीप प्रापयतीत्यर्थ । विगणनमृणादेर्निर्यातनम् । कर विनयते—देयशेष परिशोधयतीत्यर्थ । व्ययो धर्मादिषु विनियोग. । शत विनयते—विनियुङ्क्त इत्यर्थ ।

(९२५) **कर्तृस्थे चाशरीरे कर्मणि** । १ । ३ । ३७ ।

नियो य कर्त्ता लकारवाच्य तत्स्थ चेत् नयते कर्म तदा आत्म-नेपद स्यात् । तच्च कर्म शरीरावयवभिन्न चेत् । यथा—मन्यु विनयते । शरीरावयवे तु गडु विनयति अपनयतीत्यर्थ ।

(९२६) **वृत्तिसर्गतायनेषु क्रमः** । १ । ३ । ३८ ।

वृत्तिरप्रतिबन्ध ।—शास्त्रे क्रमते बुद्धि । सर्ग उत्साह । अध्ययन-नाय क्रमते । तायन—स्फीतता । अस्मिन् शास्त्राणि क्रमन्ते ।

(९२७) **उपपराभ्याम्** । १ । ३ । ३९ ।

उपक्रमते—चिकित्सितु प्रवर्त्तते इत्यर्थ । पराक्रमते ।

(९२८) **आङ उद्गमने** । १ । ३ । ४० ।

'ज्योतिरुद्गमन' एवेति कात्यायन । आक्रमते सूर्य ।

(९२९) **वेः पादविहरणे** । १ । ३ । ४१ ।

साधु विक्रमते वाजी ।

(९३०) **प्रोपाभ्यां समर्थाभ्याम्** । १ । ३ । ४२ ।

समर्थौ तुल्यार्थौ । प्रारम्भेऽनयोस्तुल्यार्थता ।

प्रक्रमते—उपक्रमते ।

(९३१) **अनुपसर्गाद्वा** । १ । ३ । ४३ ।

क्रामति, क्रमते ।

(९३२) **अपह्नवे ज्ञः** । १ । ३ । ४४ ।

शतमपजानीते—अपलपतीत्यर्थ ।

(९३३) **अकर्मकाच्च** । १ । ३ । ४५ ।

सर्पिषो जानीते—सर्पिषा उपायने प्रवर्त्तत इत्यर्थ ।

(९३४) **सम्प्रतिभ्यामनाध्याने** । १ । ३ । ४६ ।

आध्यानमुत्कण्ठापूर्वक स्मरणम् । शत सञ्जानीते—अवेक्षत इत्यर्थ । शतं प्रतिजानीते—अङ्गीकरोतीत्यर्थ ।

आध्याने तु—मातर सजानाति—उत्कण्ठया स्मरतीत्यर्थ ।

(९३५) **भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः** । १ । ३ । ४७ ।

वदते—शास्त्रे—भासमान प्रवक्तीत्यर्थ ।

कर्मकरानुपवदते—उपसान्त्वयतीत्यर्थ ।

वदते शास्त्रे—जानाति वदितुमित्यर्थ ।

क्षेत्रे वदते—क्षेत्रविषयकमुत्साहमाविष्करोतीत्यर्थ ।

मरदारान् उपवदते—रहस्युपच्छन्दयतीत्यर्थ ।

क्षेत्रे विवदते—वैमत्येन कलहायते इत्यर्थ ।

(९३६) **व्यक्तवाचां समुच्चारणे** । १ । ३ । ४८ ।

मनुष्यादीना सम्भूयोच्चारणे वदेरनडानौ । यथा—
सम्प्रवदन्ते ब्राह्मणा । अव्यक्तवाचा तु सम्प्रवदन्ति कुक्कुटा।

(९३७) **अनोरकर्मकात्** । १ । ३ । ४९ ।

अनुवदते कठ कलापस्य ।

(९३८) **विभाषा विप्रलापे** । १ । ३ । ५० ।

विप्रवदन्ते, विप्रवदन्ति वा मौहूर्तिका । परस्परप्रतिषेधेन विरुद्ध वदन्तीत्यर्थ ।

(९३९) **अवाद्ग्र** । १ । ३ । ५१ । अवगिरते ।

(९४०) **समः प्रतिज्ञाने** । १ । ३ । ५२ ।

ग्र इत्येव । शब्द नित्य सङ्गिरते ।

(९४१) **उदश्चरस्सकर्मकात्** । १ । ३ । ५३ ।

धर्ममुच्चरते—उद्गम्य गच्छतीत्यर्थ । अकर्मकात्तु वाष्पमुच्चरति- उद्गच्छतीत्यर्थ ।

(९४२) **समस्तृतीयायुक्तात्** । १ । ३ । ५४ ।

रथेन सञ्चरते ।

(९४३) **दाणश्च सा चेच्चतुर्थ्यर्थे** । १ । ३ । ५५ ।

सा=तृतीया । 'अशिष्टव्यवहारे दाण प्रयोगे चतुर्थ्यर्थे तृतीया' इति वार्त्तिकम् । तद्विषय एव आत्मनेपद च । दाण शिति यच्छादेश ।

दास्या सयच्छते कामुक —अन्याय्य दास्यै धन यच्छतीत्यर्थ ।

(९४४) **उपाद्यमः स्वकरणे** । १ । ३ । ५६ ।

स्वकरण परिग्रह । भार्यामुपयच्छते ।

(९४५) **ज्ञाश्रुस्मृदृशां सनः** । १ । ३ । ५७ ।

सन्नन्तानामेषामात्मनेपदम् । यथा—
जिज्ञासते, शुश्रूषते, सुस्मूर्षते, दिदृक्षते ।

(९४६) **नानोर्ज्ञः** । १ । ३ । ५८ ।

पूर्वेण प्राप्तस्य निषेध । पुत्रमनुजिज्ञासति ।

(९४७) **प्रत्याङ्भ्यां श्रुवः** । १ । ३ । ५९ ।

सन्नन्तान्नेत्येव । आशुश्रूषति । प्रतिशुश्रूषति ।

(९४८) **शदेः शितः** । १ । ३ । ६० ।

शदे शिति शीयादेश उक्त । शीयते—अन्यत्र शत्स्यति ।

(९४९) **म्रियतेर्लुङ्लिङोश्च** । १ । ३ । ६१ ।

मृङो ङित्त्वप्रयुक्तमात्मनेपदमनेन नियम्यते । लुङ्लिङो शिति प्रत्यये चैवेति ।

म्रियते, अम्रिषत, म्रियता । म्रियेत । मृषीष्ट । अमृत ।

(९५०) **पूर्ववत्सनः** । १ । ३ । ६२ ।

सन्नन्तात् प्रकृतिधातोरिव पदम् ।

भू—बुभूषति । एव—एदिधिषते ।

आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य । १ । । ६३ । व्याख्यातम् । (९३७)

(९५१) **प्रोपाभ्यां युजेरयज्ञपात्रेषु** । १ । ३ । ६४ ।

प्रयुङ्क्ते, उपयुङ्क्ते । यज्ञपात्रसम्बन्धे तु—द्वन्द्वं न्यधि पात्राणि प्रयुनक्ति ।

(९५२) **समः क्ष्णुवः** । १ । ३ । ६५ । सक्ष्णुते शस्त्रम् ।

(९५३) **भुजोऽनवने** । १ । ३ । ६६ ।

भुज पालनाभ्यवहारयो । तत्र पालनमिन्नेऽर्थे आत्मनेपदम् । यथा—

ओदनं भुङ्क्ते । भोगान् भुङ्क्ते । पालने तु—राजा महीं भुनक्ति ।

'बुभुजे पृथिवीपाल पृथिवीमेव केवलाम्'

इति कालिदासप्रयोगे तु अनुभोगोऽर्थो, न तु रक्षणम् ।

'कृतसीतापरित्याग स रत्नाकरमेखलाम्'

इति पूर्वार्धेन तस्यैवार्थस्य तत्र विवक्षा स्पष्टीकृता ।

(९५४) **णेरणौ यत्कर्म णौ चेत् स कर्त्तानाध्याने** । १ । ३ । ६७ ।

णिचश्चेति कर्त्रभिप्राये क्रियाफले सिद्धमेवात्मनेपदम् । अकर्त्रभिप्रायार्थमारम्भ । ण्यन्तादात्मनेपदं स्यात् अणौ यत् कर्मकारकं स एव णौ कर्त्ता भवति चेत् । न तु उत्कण्ठापूर्वकस्मरणे । यथा—

आरोहन्ति हस्तिनं हस्तिपकाः । अरोहयते हस्ती स्वयमेव । उपसिञ्चन्ति हस्तिनं हास्तपकाः । उपसेचयते हस्ती स्वयमेव । पश्यन्ति भृत्या राजानम् । दर्शयते राजा स्वयमेव ।

प्रत्यु—('अनाख्याने किं ?') स्मरति वनविहारस्य शुक । स्मरत्येन वयुत्मः स्वयमेव ।

ननु सिद्धमिद 'कर्मवत् कर्मणा तुल्यक्रिय' इति कर्मवद्भावेन इति चेत्, न । कर्मस्थक्रियाणा कर्मस्थभावाना चैव कर्मवद्भावो भवति । कर्तृस्थक्रियाणा कर्तृस्थभावाना च निर्ज्ञार्थमिदम् ।

(९५९) **भीस्म्योर्हेतुभये** । १ । ३ । ६८ ।

णेरित्येव । अत्रैव विषये पुक् आत्व च विहितम् । यथा—

मुण्डो भीषयते, भापयते । जटिलो विस्मापयते ।

प्रत्यु—('हेतुभये किं ?') कुक्षिकया बाल भाययति । जटाभिर्विस्मापयति ।

(९५६) **गृधिवञ्च्योः प्रलम्भने** । ३ । १ । ६९ ।

णेरित्येव । प्रलम्भन प्रतारणम् । तत्र ण्यन्तयोरनयोस्तडागौ । यथा—

साणवक गर्धयत । वञ्चयत ।

प्रत्यु—('प्रलम्भने' किं ?') श्वान गर्धयति—अभिकाङ्क्षामुत्पादयतीत्यर्थ । अहि वञ्चयति । वर्जयतीत्यर्थ ।

(९५७) **लियः सम्माननशालिनीकरणयोश्च** । १ । ३ । ७० ।

जटाभिरालापयत पूजा लभत इत्यर्थ । श्येनो वर्तिकामुल्लापयते—न्यग्भावयतीत्यर्थ । कस्त्वामुल्लापयते—वञ्चयतीत्यर्थ ।

(९५८) **मिथ्योपपदात् कृञोऽभ्यासे** । १ । ३ । ७१ ।

पद मिथ्याकारयते—स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थ ।

'स्वरितञित कर्त्रभिप्राये क्रियाफले' । १ । ३ । ७२ । व्याख्यातम् ।

(९९९) **अपाद्वदः** । १ । ३ । ७३ ।

कर्त्रभिप्राये क्रियाफले आत्मनेपदम् । यथा—

धनकामो न्यायमपवदते—न्यायापवादेन धनमर्जयामीति मन्यत इत्यर्थ ।

(९६०) **णिचश्च** । १ । ३ । ७४ ।

कर्त्रभिप्राये क्रियाफले आत्मनेपदम् । यथा—

स्वय भोक्तुमोदन पाचयते । ब्राह्मणान् भोजयितु पाचयति ।

(९६१) **समुदाङ्भ्यो यमोऽग्रन्थे** । १ । ३ । ७५ ।

व्रीहीन् संयच्छते । भारमुद्यच्छते । अन्ये तु उद्यच्छति वेद—अधिगन्तुमुद्यम करोतीत्यर्थ ।

(९६२) **अनुपसर्गाज् ज्ञः** । १ । ३ । ७६ ।

गां जानीते । अश्वं जानीते, उपसर्गात् 'स्वयं लोक न प्रजानाति मूढ कर्त्राभिप्राये इत्येव । देवदत्तस्य गां जानाति ।

(९६३) **विभाषोपपदेन प्रतीयमाने** । १ । ३ । ७७ ।

'स्वरितञित' इत्यादिपञ्चसूत्र्या विहितमात्मनेपदं समीपप्रयुक्तेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात् । यथा—

स्वं यज्ञं यजति, यजते वा । स्वं कटं करोति, कुरुते वा । स्वं पुत्रमपवदति, अपवदते वा इत्यादि ।

अथ परस्मैपदविधिः—

शेषात् कर्त्तरि परस्मैपदम् । १ । ३ । ७८ ।

व्याख्यात (४२१) उक्तान्यात्मनेपदनिमित्तानि यत्र न विद्यन्ते तत्र परस्मैपदम् ।

(९६४) **अनुपराभ्यां कृञः** । १ । ३ । ७९ ।

कर्त्राभिप्राये क्रियाफले गन्धनादिषु च कारोतेरात्मनेपदं विहितम् । तत्राप्यनुपराभ्या परस्मैपदार्थमिदम् । यथा—

अनुकरोति, पराकरोति ।

(९६५) **अभिप्रत्यतिभ्यः क्षिपः** । १ । ३ । ८० ।

अभिक्षिपति, प्रतिक्षिपति, अतिक्षिपति ।

(९६६) **प्राद्वहः** । १ । ३ । ८१ ।

(९६७) **परेर्मृषः** । १ । ३ । ८२ ।

प्रवहति, परिमृष्यति ।

(९६८) **व्याङ्परिभ्यो रमः** । १ । ३ । ८३ ।

(९६९) **उपाच्च** । १ । ३ । ८४ ।

विरमति, आरमति, परिरमति, उपरमति । योगविभाग उत्तरार्थः ।

(९७०) **विभाषाकर्मकात् । १ । ३ । ८५ ।**

उपाद्रमतेरकर्मकाद्विकल्प । यथा—

उपरमति—उपरमते वा । निवर्त्तत इत्यर्थ ।

(९७१) **बुधयुधनशजनेङ्गुद्रुस्रुभ्यो णेः । १ । ३ । ८६ ।**

ण्यन्तेभ्य एभ्य कर्त्तृगामिन्यपि क्रियाफले परस्मैपदम् । यथा—

बोधयति, योधयति, नाशयतीत्यादि ।

(९७२) **निगरणचलनार्थेभ्यश्च । १ । ३ । ८७ ।**

भक्षणार्थेभ्यश्चलनार्थेश्च ण्यन्तेभ्य परस्मैपदम् । यथा—

निगारयति, आशयति, भोजयति । चल्यति—कम्पयतीत्यादि ।

(९७३) **अणावकर्मकाच्चित्तवत्कर्तृकात् । १ । ३ । ८८ ।**

अण्यन्तो यो धातुरकर्मकश्चेतनकर्त्तृकश्च तस्माण्ण्यन्तात् परस्मैपदम् । यथा—

आस्ते देवदत्त, देवदत्तमासयत्यन्य । शेते बाल, त माता शाययति ।

(९७४) **न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः । १ । ३ । ८९ ।**

एभ्यो ण्यन्तेभ्यो न परस्मैपदम् । पूर्वसूत्रद्वयेन प्राप्तं निषिध्यते । यथा—

पाययते, दमयते इत्यादि ।

(९७५) **वा क्यषः । १ । ३ । ९० ।**

लोहितायति,—लोहितायते । पटपटायति, पटपटायते ।

(९७६) **द्युद्भ्यो लुङि । १ । ३ । ९१ ।**

द्युतादिभ्यो लुङि परस्मैपद वा । परस्मैपदे 'पुषादिद्युतादि ..' (४६१) इति च्लेरङ् । यथा—

अद्युतत्, अद्योतिष्ट ।

(९७७) **वृद्भ्यः स्यसनोः । १ । ३ । ९२ ।**

वृतु वृधु स्यन्दू वृधु इत्येतेभ्यो वृतादिभ्य स्यसनोर्वा परस्मैपदम् ।

परस्मैपदे एषामिण्निषेधश्चोक्त 'न वृद्भ्यश्चतुर्भ्य' (६५८)। यथा—

वर्त्स्यति, अवर्त्स्यत्, विवृत्सति। वर्त्तिष्यते, अवर्त्तिषत, विवर्त्तिषते।

(९७८) लुटि च कल्पः। १।३।९३।

लुटि स्यसनोश्च कल्पे परस्मैपद वा। 'तासि च कल्प (९९९) इति परस्मैपदे इण्निषेधश्चास्ति। यथा—

कर्त्ता, करिष्यति अकल्प्स्यत, चिकल्प्सति।

कल्पिता, कल्पिष्यते, अकल्पिष्यत, चिकल्पिषते।

प्रचारलोपात् प्रचुराच्च कालात् पदव्यवस्थाविधयोऽत्र केचित्।
कृच्छ्रात् समुन्नेयविवक्षितार्था जाता, कथञ्चिद्विवृतास्तथापि॥

कृत्प्रकरणम्।

धातुभ्य किल द्विविधा प्रत्यया उत्पद्यन्ते—तिङ कृतश्चेति। तथा च सूत्रम्—

(९७९) धातोः। ३।१।९१।

अधिकारोऽय तृतीयाध्यायसमाप्तौ 'लभ्य' इत्यधिकारपर्यन्तम्।

(९८०) तत्रोपपदं सप्तमीस्थम्। ३।१।९२।

तत्र एतस्मिन् धात्वधिकारे यत् सप्तमीनिर्दिष्ट तद्वाचकमुपपदसज्ञ स्यात्। रामीपे प्रयोक्तव्य * समर्थ पदमुपपदमित्युच्यते। तच्च धात्वधिकारे सप्तम्या निर्दिश्यत इति सूत्रस्यार्थ। तत्र च कृत्प्रत्ययविधिषु उपपदानां धातुभि सह समासो वक्ष्यते 'उपपदमतिङ्' इति। तिङा तु वाक्यमेव।

(९८१) कृदतिङ्। ३।१।९३।

धात्वधिकारे तिङ्वर्जित प्रत्यय कृत्सज्ञ स्यात्। तिङ्शब्देन च तत्स्थानिनो लकारा विवक्षिताः। एवञ्च धात्वधिकारे लकारा कृत्प्रत्यया-श्चैव विधीयन्ते। अधिकारात् बहिस्तु धातोर्धात्वन्तरनिष्पादका सश्च

* समर्थ = सङ्गतार्थ = सान्वयम्।

क्यच्क्यङ्क्यष ' इति परिगणिता एकादश प्रत्यया - शबादीनि विकरणानि, स्यतासादीनि सस्करणानि च विहितानि ।

(९८२) **वासरूपोऽस्त्रियां** ।३।१।९४।

वा असरूप इति च्छेद । सरूप समानरूप । केनेत्याकाङ्क्षायाम् अर्थादुत्सर्गेणेति सिद्ध्यति । अस्मिन् धात्वधिकारे भिन्नरूपोऽपवादप्रत्ययो विकल्पेनैव उत्सर्ग बाधते 'स्त्रियाम्' इत्यधिकार वर्जयित्वा । प्रक्रियाकार्यसम्पादनार्थं समानाकृतिरेवापवाद कदाचिदनुबन्धभेदेन यत्र निवध्यते तत्रैवोत्सर्गापवादन्याय सञ्चारणीयो न तु भिन्नाकाराणा प्रत्ययाना विधिष्वित्यर्थ । यथा-- अत्र धात्वधिकारे कृत्यसज्ञका तव्य, अनीयर्, यत्, ण्यत्, क्यप् इति पञ्च प्रत्यया एकस्मिन्नेव निमित्ते विधीयन्ते । तत्र तव्यानीयरौ (भिन्नरूपौ) यत्-ण्यत्-क्यप्सु (सरूपेषु) यथाप्राप्तमेकतमश्च सर्वेभ्योऽपि धातुभ्यो भवेयु । तव्यस्यानीयर् न बाधक, नापि तयोर्यत्-ण्यत्-क्यप्स्वेक, एकैकस्यापि भिन्नरूपत्वात् । यत्-ण्यत् क्यपस्तु सरूपत्वादुत्सर्गस्य बाधका एव । तथा च कृवातो -कर्तव्य, करणीय, कार्य (ण्यत्) इति त्रय कृत्यप्रत्यया भवन्ति । नीधातो नेतव्य, नयनीय नेय (यत्) इति त्रय इत्यादि । यथा सिद्धाश्रमेप्वहिनकुलाद्यो नैसर्गिकं विरोधमुत्सृज्य सहैकत्र समाविशन्ति तथा धात्वधिकारे उत्सर्गापवादावपीति फलितम् ।

इह किल क्रियाया अवस्थाभेदा भवन्ति । यथा—

(१) पश्याश्वो धावति ।	(४) पश्याश्वो धावितु कर्णपुटमायच्छते ।
(२) पश्य धावन्तमश्वम् ।	(५) पश्य धावनमश्वस्य
(३) पश्याश्वो धावित्वा मुद्गमश्नाति ।	(६) पश्य धावितुरश्वस्य गतिवेगम् ।

एषु प्रथमवाक्ये धावनक्रिया प्राधान्येन स्वातन्त्र्येण च विशेष्यतया अवभासते । द्वितीयतृतीयचतुर्थेष्वपि प्राधान्यस्य न महती क्षति, किन्तु न स्वातन्त्र्येण प्रतिभानम् । द्वितीये 'अश्व' इति नामपदस्य, तृतीयचतुर्थयोः 'अश्नाति' 'उद्यच्छते' इति क्रियापदस्य च विशेषणीभावेन तदर्थे न्य-

भावात् । पञ्चमषष्ठयो पुन धावनक्रियाया क्रियात्वमेव तिरोहितम् । वाक्ययोरनयो श्रवणे पूर्ववाक्यानां श्रवण इव अश्वेन कृत पादानामायमन, तेषा पुर पुर प्रक्षेप, तेन च व्यापारेण क्रमशो देशाक्रमण च प्रत्यक्षमुपलभ्यमानमिव मनसि प्रत्यायकमनुभव नाङ्कुरयति, किन्तु सिद्धा पूर्वानुभवसंस्काररूपिणी धावनक्रियास्मृतिमेवोत्थापयति । उक्तदृष्टान्तानुरोधेन क्रियाया द्वे अवस्थे भवत —धावति, धावन्त, धावित्वा, धावितु इतिवत् निष्पाद्यमानताप्रतीतिकारिणी एका । 'धावन' 'धावितुम्' इतिवत् सिद्धवस्तुप्रतीतिकारिणी अन्या । अनयो प्रथमा साध्या, द्वितीया सिद्धा चेत्युच्यते । उक्त च हरिणा—

"यावत् सिद्धमसिद्ध वा साध्यत्वेन प्रतीयते ।
आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते ॥ "

इति । सिद्ध = निष्पन्न = भूतकालसयोगि । असिद्धम् = अनिष्पन्न भाविकालसयोगि । साध्य = निष्पाद्यमानावस्थम् । भूत वा भविष्यद्वा भवतु यावत् किञ्चित् कर्म निष्पाद्यमानावस्थाया ज्ञानविषयीभवति, तावत्पर्यन्त तत् (कर्म) क्रियाव्यपदेशमर्हति । तत्र च हेतु 'आश्रितक्रमरूपत्वात्' इति । तावत्पर्यन्तमेव हि जले वीचीतरङ्गाणामिव पुर पुर प्रसरतामवान्तरव्यापाराणा परम्परात्मकतया तस्य (कर्मण) प्रतीतिर्भवति ।

एव साध्या सिद्धा चेति क्रियाया भेदद्वये साध्याया द्वौ प्रभेदौ । 'धावन्त' इतिवत् नामपदाना, 'धावित्वा,' 'धावितु' इतिवत् क्रियान्तरस्य वा विशेषणमेक । 'धावति' इतिवत् विशेष्यमन्य इति । सिद्धाया अपि द्वौ प्रभेदौ । 'धावन' इतिवत् भावात्मना प्रतीतिरेकस्य । 'धावितु'—रितिवत् कारकमुखेन प्रतीतिरन्यस्येति । एतावता लब्ध क्रियाविभाग पङ्क्तिक्रया सगृह्यते—

क्रिया
- साध्या
  - विशेष्यम् = आख्यातम्
  - विशेषणम् = आख्यातकम्
    - नामविशेषणम्
    - क्रियाविशेषणम्
- सिद्धा
  - भावरूपा
  - कारकाङ्गरूपा

एषु प्रभेदेषु साध्यविशेष्यक्रियावाचकस्य पदस्य 'आख्यातम्' इति पूर्वं सज्ञा कृता । साध्यविशेषणक्रियावाचकस्य 'आख्यातकम्' इति सज्ञा क्रियते । आख्यातवर्जमन्ये कृत्सज्ञा । यस्या वाक्यार्थविश्रान्ति, सैव क्रिया स्वतन्त्रविशेष्यत्वेन प्रतिभायादिति साध्यविशेष्यक्रियावचिनो लकारा सर्वेऽपि आख्यातसज्ञा । आख्यातमिवाख्यातकम् इति व्युत्पत्त्या नामक्रियाविशेषणीभूतमाख्यातमेवाख्यातकम् । तथा च एकैकस्याप्याख्यातस्य आख्यातकरूपमस्ति । यथा—

आख्यातम्	आख्यातकम्			
अश्वो धावति	धावन्नश्व	—	कर्त्तरि	लट्
अश्व आरह्यते	आरुह्यमाणोऽश्व	—	कर्मणि	
अश्वो धाविष्यति	धाविष्यन्नश्व	—	कर्त्तरि	लृट्
अश्व आरोक्ष्यते	आरोक्ष्यमाणोऽश्व	—	कर्मणि	
अश्व आससाद	आसेदिवानश्व	—	कर्त्तरि	लिट्
अश्वोऽवावीत्	वावितवानश्व	—	कर्त्तरि	लुट्
अश्वेन रथोऽभावि	अश्वेन भग्नो रथ	—	कर्मणि	
अश्व आरुह्येत	आरोढव्योऽश्व	—	कर्मणि	लिङ्
सुख तीर्यता नदी	सुतरा नदी	—	कर्मणि	लोट्

एव नवसु लकारेषु षण्णामाख्यातकरूपाणि सन्ति । लङ्-लुट्-लृङा त्रयाणा पर न सन्ति । लिट कर्मणि, लिङ्लोटो कर्त्तरि चाख्यातकानि न सन्ति । भावे तु विरळमेवाख्यातकरूपम् । एषु लट्-लिट्-लृटामाख्यातकानि तेषा लकाराणामादेशा एव । अन्येषा लुङ्-लिङ्-लोटा तु आख्यातकानि तेषा लकाराणा स्थानमात्र वहन्ति ।

उक्तो विभागो नामविशेषणानामाख्यातानाम् । क्रियाविशेषणाना तु लुङ्स्थानीय लृट्स्थानीयमिति द्विविध एव भेद । यथा—

आख्यातम्	आख्यातकम्	
भोक्ष्य इति व्रजति ।	भोक्तु व्रजति ।	कर्त्तरि
पूवम् अभुक्त ततो व्रजति ।	भुक्त्वा व्रजति ।	
अश्व आरोक्ष्यते इत्यलक्रियते ।	अश्व आरोढुमलक्रियते	कर्मणि
अश्व पूर्वमलमकारि तत आरुह्यते	अश्वोऽलकृत्यारुह्यते	

तेषा कर्त्तरिप्रयोगे कर्मणिप्रयोगे च रूपभेदोऽपि नास्तीत्युदाहरणे स्पष्टम् ।

आख्यातकानि कृत्प्रत्ययान्तत्वेन प्रातिपदिकत्वात् सुबन्तानि । तेषु नामविशेषणाना विशेष्यभूतनामानुरोधेन लिङ्गविभक्तिवचनानि भवन्ति । क्रियाविशेषणानि तु विशेष्यभूताया क्रियाया लिङ्गाद्ययोगादव्ययानि, अव्ययत्वे च सुपा लुग्भवति ।

एवमनेकधा दर्शितविभागान् प्रत्ययान् अक्षरलाघवमात्रदत्तदृष्टि पाणिनि 'कृदतिङ्' इति प्रक्रियासम्पादनार्थ एकमेव विभाग परिकल्प्य व्यामिश्रमेव विदधाति धात्वधिकारे । अतोऽत्र सूत्राणामानुपूर्व्या व्याख्यान सुकरमप्युपेक्ष्य उक्तविभागानुसारेणैव तेषा विवरणमस्माभिरारभ्यते । प्रथम साध्यक्रियावाचिन आख्यातककृत्प्रत्यया । तदनन्तर सिद्धक्रियावाचिषु कारककृत्प्रत्यया । ततश्च भावकृत्प्रत्यया इति क्रमो भविष्यति ।

आचार्येणाधिकारान्ते कथितामर्थव्यवस्थामप्युक्त्वा यथाप्रतिज्ञात प्रत्ययान् विधास्याम ।

कृतामर्थव्यवस्था—

(९८३) **कर्त्तरि कृत्** । ३ । ४ । ६७ ।

कृत्प्रत्यय कर्त्तर्यर्थे स्यादित्युत्सर्ग ।

(९८४) **भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा** । ३ । ४ । ६८ ।

भव्यादय शब्दा कृत्यप्रत्ययान्तत्वात् 'तयोरेव कृत्यक्तखलर्थाः' इति वक्ष्यमाणेन सूत्रेण भावकर्मणोरेव प्राप्ता । ते कर्त्तर्यर्थेऽपि विकल्पेन स्युरित्यनेन विधीयते । भवनकर्त्ता भव्य । गानकर्त्ता गेय इत्यादि ।

लः कर्मणि च भावे चाकर्मकेभ्यः । ३ । ४ । ६९ ।

व्याख्यातम् (४१४)

(९८५) **तयोरेव कृत्यक्तखलर्थाः** । ३ । ४ । ७० ।

तयोर्भावकर्मणोरेव कृत्यप्रत्यया, क्तप्रत्यय, खलर्थप्रत्ययाश्च । लिड्स्थानीया कृत्यप्रत्यया लुड्स्थानीय क्तप्रत्यय, लोट्स्थानीया ख-

लर्था । एषा कर्त्तरिप्रयोगो न । तथा च दर्शित आख्यातास्यातकयोर्भेद-कथने 'आरोढव्योऽश्व' इत्यादि ।

(९८६) **आदिकर्मणि क्तः कर्त्तरि च** । ३ । ४ । ७१ ।

आदिकर्मणि विहित क्तप्रत्यय कर्त्तर्यपि स्यात् । विधिस्थल एवोदाहरिष्याम ।

(९८७) **गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च** । ३ । ४ । ७२ ।

गत्यर्थेभ्योऽकर्मकेभ्य श्लिषादिभ्यश्च क्तप्रत्यय कर्त्तर्यपि स्यात् । यथा—

गतो ग्राम देवदत्त —कर्त्तरि ।	ग्लान कुसुमम्	.	कर्त्तरि ।
गतो ग्रामो देवदत्तेन—कर्मणि ।	ग्लान कुसुमेन		भावे ।

स्थासवसादयोऽकर्मका अपि उपसर्गयोगेन सकर्मका अपि भवेयुरिति तेषा पृथग्ग्रहणम् ।

उपस्थितो गुरु शिष्य (कर्त्तरि) । उपस्थितो गुरु शिष्येण (कर्मणि) ।

एवमन्येऽप्युदाहार्या ।

(९८८) **दाशगोघ्नौ सम्प्रदाने** । ३ । ४ । ७३ ।

एतौ सम्प्रदानकारकेऽर्थे स्याताम् । यथा—

दाशन्त्यस्मै इति दाश । गौर्हन्यते अस्मै इति गोघ्नोऽतिथिरुच्यते ।

(९८९) **भीमादयोऽपादाने** । ३ । ४ । ७४ ।

भीमादयोऽपादाने कारके स्यु । यथा—बिभ्यत्यस्मादिति भीम, भयानक, भीष्म । भवन्त्यस्या इति भूमि । सकन्दन्त्यस्माच्छत्रव इति सकन्दन इत्यादि ।

(९९०) **ताभ्यामन्यत्रोणादयः** । ३ । ४ । ७५ ।

ताभ्या सम्प्रदानापादानाभ्यामन्यत्र कारके उणादय प्रत्यया स्यु । नामानि सर्वाण्यपि धातोरुत्पन्नानीति वदन् शाकटायन उण्'—प्रभृतिभि प्रत्ययैर्नामानि निर्ब्रवीति । ते प्रत्यया सम्प्रदानापादानभिन्नेषु कर्तृकर्मकरणाधिकरणेषु कारकेष्वेव भवेयु । सम्प्रदानापादानयोर्दूरान्तरित सम्बन्ध इति तयोर्विरला एव प्रत्यया इत्यभिप्राय ।

(९९१) **क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः** । ३ । ४ । ७६ ।

ध्रौव्यार्था = अकर्मका । प्रत्यवसानार्था भुक्त्यर्था । अकर्मकेभ्यो गत्यर्थेभ्यो भुक्त्यर्थेभ्यश्च क्तप्रत्ययोऽधिकरणेऽपि स्यात् । पक्षे यथाप्राप्तमकर्मकेभ्य कर्तृभावयो, गत्यर्थेभ्य कर्तृकर्मभावेषु, भुक्त्यर्थेभ्यो भावकर्मणोश्च । यथा——

"मुकुन्दस्यासितमिद—यत्रास्ते मुकुन्दस्तत् स्थलम् ।
इद यात रमापते —यत्र गच्छति ,, ,,
भुक्तमेतदनन्तस्य—यत्र भुङ्क्ते ,, ,,
इत्यूचुर्गोप्यो दिदृक्षव "

आख्यातकानि ।

वर्त्तमाने लट् । ३ । २ । १२३ । इति लड्विधानानन्तरमेव तस्यादेशमपि विदधात्याचार्य ——

(९९२) **लटः शतृशानचावप्रथमासमानाधिकरणे** । ३ । २ । १२४ ।

'अप्रथमासमानाधिकरणे' इत्यस्य विशेष्य 'लड्वाच्यकारक'—मित्यध्याहियते । लट शतृ इति शानच् इति चादेशौ स्त । लड्वाच्ये कारके (कर्त्तरि कर्मणि वा) अप्रथमान्तेन (युष्मदा अस्मदा शेषेण वा) समानाधिकरणे सति । स्ववाच्यकारकस्य प्रथमान्तसामानाधिकरण्ये लट तिङो विहिता । तदन्यसामानाधिकरण्ये शतृशानचौ विधीयेते । 'युष्मद्युपपदे ' इत्यादित्रिसूत्र्या उपपदभूतेनैव प्रथमान्तेन सामानाधिकरण्ये तिङा प्रवृत्ति । तादृगेव सामानाधिकरण्यमत्रापि निषिध्यते । अतोऽनुपपदभूतेन प्रथमान्तेनापि सामानाधिरण्ये शतृशानचौ प्रवर्त्तेते एव । अथोपपदत्व प्रथमान्तस्य कदा स्यादिति विचारयाम । समीपे साकाङ्क्षमवश्य प्रयोक्तव्य पद ह्युपपदमित्युच्यते । लकारेण सामान्यत एव कर्त्ता कर्म वा कारकमभिधीयते । तद्विशेषप्रतिपत्तये पुन समानाधिकरण प्रथमान्तमपेक्षितम् । यथा 'देवदत्त पचति' इत्यत्र लड्वाच्यस्य कर्तु 'देवदत्त' इति प्रथमान्तस्य च सामान्यविशेषभावेनाभेदान्वय । अतश्च 'देवदत्त' इति प्रथमान्तेन सामानाधिकरण्ये पचतीति लटस्तिङ् । 'पचन्

देवदत्त स्थालीमभाङ्क्षीत्' इत्यादौ तु 'देवदत्त' इति प्रथमान्तस्य 'अभाङ्क्षीत्' इति लुङ्वाच्यकर्त्रा सहैव सामान्यविशेषभावेन सामानाधिकरण्यम्, न तु 'पचन्' इत्यनेन । तस्य 'देवदत्त' इत्यनेन सह 'नीलमुत्पलम्' इत्यादाविवत् विशेषणविशेष्यभावेनैव सामानाधिकरण्यम् । यस्य सामान्यविशेषभावेन लकारवाच्यकारकेण सह सामानाधिकरण्य तदेव प्रथमान्तमुपपद भवति । तत्रैव च लटस्तिङादेश । अन्यत्र विशेषणविशेष्यभावेन प्रथमान्तसामानाधिकरण्येऽपि शतृशानजादेशावेव । अस्मिश्च व्याख्याने—

(९९३) **सम्बोधने च** । ३ । २ । १२९ ।

इति सम्बोधनविषयेऽपि शतृशानञ्विधायकमुत्तरसूत्रम् 'ब्रूहि विद्वन्' इत्यादिवत् समानाधिकरण पद विनापि शतृशानजन्ताना क्वचित् प्रयोगसिद्ध्यर्थम् । 'सम्बोधने' इत्यस्योपलक्षणार्थकत्वात् 'विद्वानेव विजानाति' इत्यादिवत् अन्यत्रापि प्रयोग. । 'विदे शतुर्वसु.' इति वक्ष्यमाणोऽत्र शतृप्रत्ययस्य वस्वादेश. ।

शतृशानचो शकार इत् सार्वधातुकत्वार्थ । ऋकार उगित्त्वेन 'उगिदचा. . ' इति सर्वनामस्थाने नुम, 'उगितश्च' इति स्त्रिया ङीपश्च सिद्ध्यर्थ । इता लोपे 'अत्' 'आन' इति प्रत्ययस्वरूपम् । 'तङानावात्मनेपदम्' इत्युक्ते 'शानच्' आत्मनेपद, शेषत्वात् शता परस्मैपद च । प्रथमासामानाधिकरण्याभावात् पुरुषविभागस्य नावकाश । शतृशानचो स्थानिवद्भावेन लट्त्वादनलाश्रयाणि सर्वाणि लट्कार्याणि भवन्ति ।

भू—परस्मैपदित्वात् शतृप्रत्यय, कर्त्तरि शप्, 'अतो गुणे' इति पररूप, गुणावादेशौ—'भवत्' इति शत्रन्तरूपसिद्धि । अस्य पुस्त्वविवक्षाया 'उगिदचा ' इति सर्वनामस्थाने नुम् । भवन् भवन्तौ भवन्त । भवन्त भवन्तौ भवत इत्यादि विशेष्यानुरोधेन विभक्तय । स्त्रियाम् 'उगितश्चे'-ति ङीप्, आच्छीनद्योर्नुम् 'शप्श्यनोर्नित्य'-मिति नित्य

भवति । भवन्ती भवन्त्यौ भवन्त्य इत्यादि । क्लीबे भवत् भवती भवन्ति इत्यादि । एव पचन्नित्यादि—

पचन्नास्ते देवदत्त	पचतो लब्धयज्ञ देवदत्तात्
पचन्त पश्य देवदत्त	पचत शृणु गान देवदत्तस्य
पचता भग्ना स्थाली देवदत्तेन	पचति रज्यते कन्या देवदत्ते
पचते देहि भुक्ति देवदत्ताय	पचन्नोदन देहि देवदत्त

इत्यादिवदृह्यमप्रथमान्तेन सामानाधिकरण्यम् ।

आचक्षाण (अदादि), जुह्वत् (जुहोत्यादि), रुन्धत् रुन्धान (रुधादि), कुर्वत् कुर्वाण (तनादि), इत्यादि विकरणभेदा उदाहार्या । अनुक्तचरी पर प्रक्रिया प्रदर्श्यते—

(९९४) **आने मुक्** (अत) । ७ । २ । ८२ ।

अदन्ताङ्गस्य मुगागम आनप्रत्यये परे । अनेन शप्श्यन् शविकरणेषु अङ्गस्यादन्तत्वान्मुम् । यथा—

एध—एधमान । व्याप्रि—व्याप्रियमाण । पच—पचमान इत्यादि ।

(९९५) **ईदासः** । ७ । २ । ८३ ।

आसधातो परस्य आनस्य ईदादेश । 'आदे परस्य' इति आकारस्य ईत्वम् । आस्—आसीन ।

(९९६) **विदेः शतुर्वसुः** (वा) । ७ । २ । ३६ ।

विद ज्ञाने इत्यस्माच्छतृप्रत्ययस्य वस् इत्यादेशो वा ।

विद्वस्—विदन्, विद्वान्—विदती, विदुषी ।

कर्मणि लट आत्मनेपदत्वात् शानजेव ।

पच्यमान, क्रियमाण, स्तूयमान, उच्यमान इत्यादिरूपाणि ।

(९७७) **लक्षणहेत्वोः क्रियायाः** । ३ । २ । १२६ ।

क्रियाया लक्षणे हेतौ वा द्योत्येऽपि लटश्शतृशानचौ । आधिक्यद्योतनविधानार्थमारम्भ । यथा—

लक्षणे—शयाना भुञ्जते यवना—अत्र शयन लक्षण भोजनस्य । हेतौ—अर्जयन् वसति—अत्रार्जन हेतुर्वासस्य ।

(९९८) **तौ सत्** । ३ । २ । १२७ ।

तौ शतृशानचौ सत्संज्ञौ स्त ।

अथ लृडादेश —"लृट्शेषे च" इति लृट्विध्यनन्तर सूत्रम्—

(९९९) **लृटः सद्वा** । ३ । ३ । १४ ।

लृट सदाख्यौ शतृशानचौ वा स्त । व्यवस्थितविभाष्येयम् । तेन लडादेशवत् अप्रथमासामानाधिकरण्ये लक्षणहेत्वोश्च नित्यम् । लृडादेशत्वात् स्यप्रत्ययो विकरणम् ।

पठिष्यन् गच्छति देवदत्त । पठिष्यन्तमानय देवदत्तम् । पठिष्यन् वसति नगरे देवदत्त । एविष्यमाण पश्य वृक्ष, छेत्स्यमानमित्यादि ।

अथ लिडादेश —

(१०००) **छन्दसि लिट्** । ३ । २ । १०५ ।

(१००१) **लिटः कानज्वा** । ३ । २ । १०६ ।

(१००२) **क्वसुश्च** । ३ । २ । १०७ ।

भूतसामान्ये धातोर्लिट् छन्दसि तस्य पूर्वोक्तवदप्रथमासामानाधिकरण्ये क्वसुकानचौ । तत्र 'तडानावात्मनेपदम्' इति कानजात्मनेपदम् । क्वसुस्तु शेषत्वात् परस्मैपदम् । एष लिट् तदादेशौ च छन्दस्येव पाणिनेरभिमतौ । कवयस्तु लोकेऽपि क्वसु यथेच्छ प्रयुञ्जते—

'त तस्थिवास नगरोपकण्ठे'—'श्रेयासि राजाप्यधिजग्मुषस्ते' इत्यादि ।

लिडादेशत्वात् द्वित्वम्, इट्, एत्वाभ्यामलोपौ च । यथा—

कृ—चकृवस् चकाण चकृवान् चकुषी चकृवत् चकाणा ।
भू—बभूवस् बभूवान् बभूवुषी बभूवत् ।
पच—पेचिवस् पेचिवान् पेचुषी पेचिवत् ।
सु—सुषुवाण । चि—चिक्याण ।
दा—ददिवस्—ददिवान् ददुषी ददिवत् ददान ददाना ।

(१००३) **भाषायां सदवसश्रुवः** । ३ । २ । १०८ ।

एभ्यो लिटि भाषाया क्वसु । सेदिवस्, ऊषिवस्, शुश्रुवस् । उक्तमेव ह्यन्येभ्योऽपि कवय प्रयुञ्जत इति ।

(१००४) **उपेयिवाननाश्वाननूचानश्च** । ३ । २ । १०९ ।

एते प्रक्रियाविशेषप्रापणाय निपात्यन्ते । यथा—

उप + इण् — उपेयिवान् । न + अश = अनाश्वान् ।

अनु + वच् — अनूचान । वेदानुवचन कृतवान् अनूचान इत्युच्यते ।

भावकर्मणोर्लिङादेशो न दृश्यते ।

अथ लुङ्स्थानीया निष्ठा—

(१००५) **क्तक्तवतू निष्ठा** । १ । १ । २६ ।

क्तश्च क्तवतुश्च निष्ठासज्ञ स्यादिति सज्ञाध्याये निष्ठासज्ञा विहिता । अथ धात्वधिकारे प्रकृते 'भूते' इत्यनुवर्त्तमाने—

(१००६) **निष्ठा** । ३ । २ । १०२ ।

भूतसामान्यार्थवृत्तेर्धातो क्त-क्तवतू भवत । लङ्लिङ्लृट्स्विव विकरणादिकार्याणामनपेक्षया निष्ठा लकारादेश न कृतवानाचार्य । लादेशत्व यद्यपैक्षिप्यत तर्हि लुङादेशत्वमस्य प्राप्स्यदिति लुङ्स्थानीयेय कल्पितास्माभि । अप्रथमासामानाधिकरण्य एव निष्ठापि भवति । प्रथमासामानाधिकरण्ये तु लुड एवावकाश । अनयो क्तप्रत्यय सामान्येन भावकर्मणो, गत्यर्थेभ्योऽकर्मकेभ्यश्च कर्त्तर्यपि । क्तवतुस्तु कर्त्तर्येव इत्याद्यर्थव्यवस्था पूर्वोक्तान्नानुसन्धेया । यथा—

भू—भूत,–ता,–तम् । एध—एधित,–धिता,–धितम् ।

ग्रन्थ कृतवान् काळिदास —कर्त्तरि	शयितो बाल —कर्त्तरि
काळिदासेन कृतो ग्रन्थ —कर्मणि	शयित बालेन—भावे
ग्राम गतो देवदत्त —कर्त्तरि	जृम्भितमसूयया— ,,
गतो ग्रामो देवदत्तेन —कर्मणि	

'श्रयुक किति' (६७३) इति इण्निषेध —श्रित, भूत, कृत ।

'यस्य विभाषा' (६७६) इति इण्निषेध —धूत, वृद्ध, गृढ ।

इत्यादय प्रक्रिया अत्र स्मर्त्तव्या । नवीना अप्युच्यन्ते—

(१००७) **द्यतिस्यतिमास्थामित्ति किति** । ७ । ४ । ४० ।

एषा इकारोऽन्तादेश स्यात् तादौ किति प्रत्यये परे । यथा—

	क्त	क्तवतु	क्त्वा	क्तिन्
दो अवखण्डने	—दित,	दितवत्	दित्वा	दिति ।
सो अन्तकर्मणि	—सित,	सितवत्	सित्वा	सिति ।
मा माने	—मित,	मितवत्	मित्वा	मिति ।
स्था गतिनिवृत्तौ	—स्थित,	स्थितवत्	स्थित्वा	स्थिति ।

(१००८) **शाच्छोरन्यतरस्याम्** । ७।४।४१।

अनयो पूर्वोक्त वा । यथा—शित, शात । छित, छात ।

(१००९) **दधातेर्हिः** । ७।४।४२।

ति किर्तीत्येव । यथा—हित, हितवत् । हित्वा, हिति ।

(१०१०) **जहातेश्च क्त्वि** । ७।४।४३।

हित्वा । जिहीतेस्तु हात्वा ।

(१०११) **दो दद्धोः** । ७।४।४६।

घुसञ्ज्ञस्य दाधातोर्दद् इत्यादेश तादौ किति । यथा—

दत्त, दत्तवत् । दत्वा, दत्ति ।

घोरित्युक्ते —दाप्लवने इत्यस्य दात वर्हि । दैप् शोधने—अवदात मुख । इत्येव ।

(१०१२) **अच उपसर्गात्तः** । ७।४।४७।

अजन्तादुपसर्गात् परस्य घुसञ्ज्ञस्य दाधातो त इत्यादेश तादौ किति । ददादेशापवादोऽयम् । अकार उच्चारणार्थ । त् इत्येवादेश । यथा—

प्र + दात = प्रत्त । अव + दात = अवत्त । आ + दात = आत्त ।

"अवदत्त विदत्त च प्रदत्त चादिकर्मणि ।
सुदत्तमनुदत्त च निदत्तमिति चेष्यते ॥" *

अथ नत्वविधिरसिद्धकाण्डोक्त —

(१०१३) **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** । ८।२।४२।

रेफदकाराभ्या परस्य निष्ठातकारस्य नकार स्यात् निष्ठापेक्षया पूर्वस्य धातुदकारस्य च । स्वतो रेफान्तधातूना सेट्त्वेन रेफात् परस्य तकारस्य

* इगन्तोपसर्गस्य तु तादेशेकृते 'दस्ति (६-३-१२४) इति दीर्घो भवति । नीत्त, सूत्त इत्यादिकमुदाहरणम् ।

असम्भवात् ऋकारान्तधातव एवात्रोदाहरणम् । ते च 'ऋत इद्धातो' इति इदादेशे रपरे रेफान्ता भवेयु । यथा—

कॄ—किर्—कीर्ण कीर्णवत् 'हलि चे'त्युपधादीर्घ ।
गॄ—गिर्—गीर्ण गीर्णवत् ,, ,,
पॄ—पुर्—('उदोष्ठ्यपूर्वस्य') पूर्ण—पूर्णवत्

भिद्—भिन्न—भिन्नवत् । छिद्—छिन्न—छिन्नवत् । सेटा तु इटा व्यवधानात्—चर—चरित, मुद—मुदित इत्येव ।

(१०१४) **संयोगादेरातो धातोर्यण्वतः** ।८।२।४३।

सयोगादिर्यो धातुराकारान्तो यण्सहितश्च तस्मात् परस्य निष्ठातकारस्य नकार । यथा—

विद्रा—विद्राण—विद्राणवत् । ग्ला—ग्लान—ग्लानवत् ।
म्ला—म्लान—म्लानवत् । ध्या—ध्यान—ध्यानवत् ।
प्रत्यु—('यण्वत किं?') स्ना—स्नात—स्नातवत् ।
('सयोगादे' किं?) या—यात—यातवत् ।

(१०१५) **क्वादिभ्यः** ।८।२।४४।

एभ्यो निष्ठातकारस्य न । यथा—

लू—लून, लूनवत् । धू—धून धूनवत् ।

(१०१६) **ओदितश्च** ।८।२।४५।

ओ लस्जी—लग्न लग्नवत् । भुजो—भुग्न भुग्नवत् ।
ओ विजी—विग्न विग्नवत् । ओ हाक्—हीन हीनवत् ।

'स्वादय ओदित' इति गणसूत्रात्

सू—सून, दू—दून, डी—डीन इत्यादि ।

(१०१७) **शुषः क.** ।८।२।५१। शुष्क ।
(१०१८) **पचो व.** ।८।२।५२। पक्व ।
(१०१९) **क्षायो मः** ।८।२।५३। क्षाम ।
(१०२०) **वित्तो भोगप्रत्यययो** ।८।२।५८। अन्यत्र वित्तम् ।
(१०२१) **भित्तं शकलम्** ।८।२।५९। अन्यत्र भिन्नम् ।
(१०२२) **ऋणमाधमर्ण्ये** ।८।२।६०। अन्यत्र ऋतम् ।

अथ लिङ्स्थानीयाः कृत्यसंज्ञाः—

तथा चाधिकारसूत्रम्—

(१०२३) **कृत्याः** । ८ । २ । ९५ । इति ।

(१०२४) **तव्यत्तव्यानीयरः** । ३ । १ । ९६ ।

धातोरेते प्रत्यया स्यु, ते च कृत्यसज्ञा । 'तयोरेव कृत्यक्तखलर्था' (९८५) इति भावकर्मणोरेवैते । 'तव्यत्' इति तकारानुबन्धकस्य पृथग्ग्रहण स्वरार्थम् । यथा—

भू— भवितव्यम् * । भवनीयम् ।
कृ — कर्त्तव्य –व्या,–व्यम् । करणीय –या,–यम् ।
दा—दातव्य –व्या,–व्यम् । दानीय –या–यम् ।

त्वया विनीतेन भाव्य, त्वयेद कर्त्तव्य इत्यादि भावकर्मणो ।

(१०२५) **अचो यत्** । ३ । १ । ९७ ।

अजन्ताद्धातोर्यत्प्रत्यय स्यात् कृत्यसज्ञ । 'वा सरूप' (९८३) इति परिभाषया तव्यानीयरौ विकल्पेनैवाय बाधते । यथा—

दा—दा + य इति स्थिते 'ईद्यति' (८६४) इत्याकारस्य ईत्व, देय,–या,–यम् इति रूपम् । दातव्य, दानीय इत्यपि ।

श्रा—श्रेय । जि–जेय । नी–नेय इत्यादि ।

'एचोऽयवायाव' इति सन्धिविधौ

(१०२६) **वान्तो यि प्रत्यये** । ६ । १ । ७९ ।

यकारादौ प्रत्यये परेऽपि एचो वकारन्त आदेश स्यात् । वकारान्तश्च अव् आव् इत्येतौ । आन्तरतम्यात् ओदौतावेव स्थानिनौ । यकारादौ प्रत्ययेऽपि ओकारस्य अव्, औकारस्य आव् च आदेश स्यादित्यर्थ । अनेन—

भू + य—गुणे भो + य = अवादेशे भव्य ।
लू + य ,, लो + य = ,, लव्य ।

(१०२७) **धातोस्तन्निमित्तस्यैव** । ६ । १ । ८० ।

---

* भावे कृत्यस्य विशेष्यत्वात्सामान्ये नपुसकम् ।

यादौ प्रत्यये परे धातोरेचश्चेद्धान्तादेशस्तर्हि तन्निमित्तस्यैव (यादि-प्रत्ययनिमित्तकस्य एच एव) इति नियमात् आद्गुणसृष्टात् वेञ कर्मणि यकि यन्निमित्ते सम्प्रसारणे आद्गुणेन निष्पन्नस्य ओकारस्य अवादेशो न भवति, 'ओयते' इत्येव रूपम् । अतश्च धातोरिगन्तत्वेन गुणवृद्धिभ्यां निष्पन्नस्यैव अवावौ । पूर्वसूत्र तु गव्य नाव्यमिति तद्धितार्थम् ।

(१०२८) **क्षय्यजय्यौ शक्यार्थे** । ६ । १ । ८१ ।

(१०२९) **कय्यस्तदर्थे** । ६ । १ । ८२ । (तदर्थे = क्रयार्थे)

इति यत्प्रत्यये क्षि–जि–क्रीधातूना अयादेशो निपात्यते । यथा—

क्षेतु शक्य = क्षय्यम् । जेतु शक्य + जय्यम् ।

क्रयार्थमापणे प्रसारित क्रय्यम् । क्षेतु योग्य इत्यादौ तु क्षेय, जेय, क्रेय इत्येव । कृत्यानामर्थविशेषा वक्ष्यन्ते ।

'अचोयत्' इत्येवोक्तम् । हलन्तेभ्योऽपि केभ्यश्चिदाह—

(१०३०) **पोरदुपधात्** । ३ । १ । ९८ ।

पवर्गान्तादकारोपधादपि यत् । यथा—

शप्—शप्य, लभ–लभ्य, रम्–रम्यम् ।

(१०३१) **शकिसहोश्च** । ३ । १ । ९९ । शक्य सह्यम् ।

(१०३२) **वदः सुपि क्यप् च** । ३ । १ । १०६ ।

सुबन्त उपपदे वदधातो क्यप् स्यात्, चाद्यच्च । क्यप पित्त्वम् प्रक्रियाविशेषार्थम् । स चायम्—

(१०३३) **ह्रस्वस्य पिति कृति तुक्** । ६ । १ । ७१ ।

ह्रस्वस्य तुगागम पिति कृत्प्रत्यये परे । यथावसरमिदमुदाहरिष्याम· ।

प्रकृते ब्रह्म + वद् + य इति क्यपि कृते 'उपपदमतिङ्' इति वक्ष्यमाणेन सूत्रेण उपपदस्य सुबन्तस्य कृदन्तेन सह समास । क्यप कित्त्वात् वदते. प्रसारण, ब्रह्मोद्य इति रूपनिष्पत्ति. । पक्षे यत्प्रत्यये ब्रह्मवद्य इत्यपि । एव सत्यस्य वदनं सत्योद्य, सत्यवद्यं वा । अयं क्यप् भावा-

र्थक सिद्धक्रियावाची च । 'कृत्यल्युटो बहुलम्' इति कृत्यानामर्थेष्वव्यवस्था विहिता च ।

(१०३४) **भुवो भावे** । ३ । १ । १०७ ।

सुप्युपपदे भूधातो सिद्धभावार्थे क्यप् । यथा—

ब्रह्मभूय—ब्रह्मात्मना भवन, ब्रह्मणो भाव ब्रह्मत्वमित्यर्थ ।

इद नित्यक्लीव विशेष्यनिघ्नत्वाभावेन नियतलिङ्गत्वात् ।

(१०३५) **हनस्त च** । ३ । १ । १०८ ।

हन्ते सुप्युपपदे भावे क्यप्, तकारोऽन्तादेशश्च । यथा—

ब्रह्मणो हनन ब्रह्महत्या ।

अय नित्यस्त्रीलिङ्ग । सूत्रत्रयोक्त क्यप् अनुपसर्गादेव धातोर्भवति, अनुपसर्गे इति सर्वत्रानुवृत्ते ।

(१०३६) **एतिस्तुशास्वृदृजुषः क्यप्** । ३ । १ । १०९ ।

सुप्यनुपसर्ग इति च निवर्त्तयितु पुन क्यबग्रहणम् । कित्त्वाद्गुणाभावे 'ह्रस्वस्य पिति कृति तुक्'—

इ—इत्य । स्तु—स्तुत्य । शास—शिष्य ('शास् इदङ्हलो,' ५८३) । वृ—वृत्यः । दृ—दृत्य । जुष्—जुष्य ।

अत्र 'अचो यतो' बाधनार्थम् एतिस्तुवृदृग्रहणम् । 'ऋहलोर्ण्यतो' बाधनार्थम् अन्येषाम् । यत्—क्यप्—ण्यता सरूपत्वादुत्सर्गापवादन्याय प्रवर्त्तत एव ।

(१०३७) **ऋदुपधाच्चाक्लृपिचृतेः** । ३ । १ । ११० ।

यथा—वृतु—वृत्यम् । वृधु—वृध्यम् । मृग—मृग्यम् । क्लृप्तेस्तु कृत्यम् ।

(१०३८) **ऋहलोर्ण्यत्** । ३ । १ । १२४ ।

ऋवर्णान्ताद्धलन्ताच्च ण्यत् । 'अचो यत्' अनेन बाध्यते । यथा—

ऋ—इ—हार्य, —र्या, —र्यम् । णित्त्वाद्वृद्धि ।

हल्—चल—चाल्य, —ल्या, —ल्यम् । ,,

(१०३९) **ओरावश्यके** । ३ । १ । १२५ ।

आवश्यकेऽर्थे द्योत्ये उवर्णान्तादपि ण्यत् । यतोऽपवादः । यथा—

भू—भाव्यम्—अवश्य भवितु योग्यम् । भव्यमन्यत्र ।

श्रु—श्राव्यम्— ,, श्रोतु ,, श्रव्य ,,

उभयत्रापि 'वान्तो यिप्रत्यये' (१०२६) इत्यवादेशौ ।

अथ ण्यति कुत्वमुच्यते—

(१०४०) **च-जोः कु घिण्ण्यतोः** । ७ । ३ । ५२ ।

चकारजकारयो कवर्गादेशो घिति प्रत्यये ण्यति च । यथा—

धातु	ण्यत्	घित् -घञ्
पच	पाक्य	पाक
सृज	सर्ग्य	सर्ग

(१०४१) **न क्वादेः** । ७ । ३ । ५९ ।

कवर्गादेर्धातोर्घिण्ण्यतो परयोश्चजो कुर्न । यथा—

कूज—कूज्य कूज । गर्ज—गर्ज्यम् । गर्ज ।

(१०४२) **अजि-व्रज्योश्च** । ७ । ३ । ६० ।

कुत्व न । समाज परिव्राज्य इत्यादि ।

(१०४३) **ण्य आवश्यके** । ७ । ३ । ६५ ।

आवश्यकार्थे द्योत्ये ण्यति चजो कुर्न । अवश्यपाच्यम् ।

(१०४४) **यजयाचरुचप्रवचर्चश्च** । ७ । ३ । ६६ ।

याज्य , याच्य , रोच्य , प्रवाच्य , अर्चर्य । घिति तु याग इत्यादि ।

त्यजिपूज्योश्च—त्याज्य , पूज्य ।

(१०४५) **वचोऽशब्दसंज्ञायाम्** । ७ । ३ । ६७ ।

नेत्येव । अन्वितपदसाङ्गतो वाक्यम् । अन्यत्र वाच्यम् ।

(१०४६) **प्रयोज्यनियोज्यौ शक्यार्थे** । ७ । ३ । ६८ ।

योग्यार्थे तु प्रयोग्य , नियोग्य इत्येव ।

(१०४७) **भोज्यं भक्ष्ये** । ७ । ३ । ६९ ।

भोज्यमन्नम् । भोग्य सुखम् ।

अथ लोट् स्थानीया.—

(१०४८) **ईषदुस्सुषु कृच्छ्राकृच्छ्रार्थेषु खल्** । ३ । ३ । १२६ ।

कृच्छ्राकृच्छ्रार्थेषु ईषदुस्सुषु निपातेषूपपदेषु धातोः खल् प्रत्ययः ।

'तयोरेव कृत्यक्तखलर्थाः' (९८९) इति भावकर्मणोरेव । खकार इत् हुख-मुमागमार्थं । ते चानुपद वक्ष्यन्ते । यथा—

ईषत्कर, – रा, – रम् — अनायासे न कर्तुं शक्य.
दुष्कर, – रा, – रम् — ,,
सुकर, – रा, – रम् — ,,
एव जि— ईषज्जय, दुर्ज्जय, सुजय इत्यादि ।

(१०४९) **कर्तृकर्मणोश्च भूकृञोः** । ३ । ३ । १२७ ।

ईषद्दुस्सुभि सह भवते कर्तृवाचिनि सुवन्ते, कृञ कर्मवाचके चोपपदेऽपि खल् । अभूततद्भाव एवेदमिति वार्त्तिककारो नियम कृतवान् । यथा—

ईषदाढ्यभव व्यवसायिना—अनाढ्यो व्यवसायी सुखमाढ्यो भवितु शक्नोतीत्यर्थ ।
स्वाढ्यकर सेवको राज्ञा । दुराढ्य करोऽलस ।

एषु मुमागमोऽनुपद विधास्यते ।

(१०५०) **आतो युच्** । ३ । ३ । १२८ ।

खलोऽपवाद । 'यु' इत्यक्षरम् 'अन' इत्यस्य प्रतिनिधि. क्रियते यथा 'ञ' इति 'अन्त' इत्यस्य । एव फ ढ घ छ ठ ख इति वर्णा अपि तद्धितेषु प्रतिनिधित्वेनोपयुज्यन्ते । तथा च सूत्राणि—

(१०५१) **युवोरनाकौ** । ७ । १ । १ ।

प्रत्ययावयवस्य 'यु' इत्यस्य 'अन' इति 'वु' इत्यस्य 'अक' इत्यप्यादेशौ । युच्, ल्युट्, ण्वुल्, वुञ्, वुन् इत्यादिष्वनुबन्धासञ्जनसौकर्यार्थम् आदेशकल्पनमिति प्रतिभाति ।

[(१०५२) **आयनेयीनीयियः फ-ढ-ख-छ-घां प्रत्ययादीनाम्** । ७ । १ । २ ।

प्रत्ययादिभूताना फादीनाम् आयनादय आदेशा. । यथा—

फ=आयन । ढ=एय । ख=ईन । छ=ईय । घ=इय ।

कृत्सु खघयो 'लशकतद्धिते' इतीत्सज्ञया 'खल्' 'घञ्' इत्यादिषु नैते आदेशा]

अनेन युचो युकारस्य अनादेश. । पा—ईषत्पान, सुपानः, दुष्पानः इत्यादि ।

अथ स्वाङ्यम्भव इत्यादौ सुमागमविधानाय खित्त्वप्रयोजनान्युच्यन्ते—

(१०५३) **खित्यनव्ययस्य** (ह्रस्वः) । ६ । ३ । ६६ ।

खिदन्ते उत्तरपदे अव्ययभिन्नस्य पूर्वपदस्य ह्रस्व । यथा—

या कालीमात्मान मन्यते सा कालिम्मन्या—अत्र 'मन्थ' इति खिदन्तम् ।

(१०५४) **अरुर्द्विषदजन्तस्य मुम्** । ६ । ३ । ६७ ।

अरुस्, द्विषत् इत्यनयोरजन्तानां च खिदन्ते उत्तरपदे सुमागम । यथा—

अरुस् + तुद = अरुन्तुद ।	ईषदाङ्यम्भवम् ।
द्विषत् + तप = द्विषन्तप ।	स्वाङ्यङ्कर ।
काली + मन्या = कालिम्मन्या	दुराङ्यङ्कर ।

(१०५५) **इच एकाचोऽम्प्रत्ययवच्च** । ६ । ३ । ६८ ।

इजन्तस्यैकाच पूर्वपदस्य खिदन्ते उत्तरपदे अम् स्यात् स च अम्प्रत्ययवत् (अम् इति सुप्प्रत्ययवत्) स्यात् । अतिदेशात् 'अमिपूर्व', 'औतोऽशसो' इत्यादयो विधय प्रवर्त्तन्ते । यथा—

गो + मन्य गाम्मन्य । स्त्री + मन्य = स्त्रीम्मन्य । स्त्रियम्मन्य ।

(१०५६) **वाचंयमपुरन्दरौ च** । ६ । ३ । ६९ ।

(१०५७) **कारे सत्यागदस्य** । ६ । ३ । ७० ।

वाचयम । पुरन्दर । सत्यङ्कार । अगदङ्कार ।

(१०५८) **रात्रेः कृति विभाषा** । ७ । ३ । ७२ ।

रात्रिञ्चर । रात्रिचर । रात्रिमट । रात्र्यट ।

उक्तानि नामविशेषणान्याख्यातकानि । अनन्तर क्रियाविशेषणानि तान्युच्यन्ते—

क्रियाविशेषणाख्यातकानि ।

(१०५९) **समानकर्तृकयोः पूर्वकाले** (क्त्वा) । ३ । ४ । २१ ।

यदैक एव कर्त्ता पर्यायेणानेका क्रिया करोति तदा पूर्वकालवर्त्ति-क्रियावाचिनो धातो क्त्वा । उत्तरकालक्रियानुरोधेन कर्त्ता कर्म भावो वा क्त्वाप्रत्ययार्थः । विशेष्यवशवर्तीनि हि विशेषणानि । तुमुनोऽपि क्रिया-विशेषणाख्यातकस्यैवमेव विशेष्यानुरोधादर्थनिर्णय. । यथा—

देवदत्त पूर्वं स्नाति, ततो भुङ्क्ते—तत्र स्नात्वा भुङ्क्ते इति स्नाधातो क्त्वा ।
एव भुक्त्वा पिबति । पीत्वा स्वपिति । सुप्त्वा व्रजति ।
देवदत्त स्नात्वा भुक्त्वा पीत्वा सुप्त्वा व्रजति इति वा ।
देवदत्तस्तण्डुलान् पक्त्वा भुङ्क्ते—कर्तरि क्त्वा ।
देवदत्तेन तण्डुला पक्त्वा भुज्यन्ते—कर्मणि क्त्वा ।
देवदत्तेन भुक्त्वा सुप्यते । — भावे ,,
देवदत्तो भुक्त्वा प्रतिष्ठते । भुक्त्वा प्रस्थितेन देवदत्तेन मार्गे विश्रान्तम् इत्याद्य यथायोग पूर्वकाल ।

अव्ययत्वात् क्त्वाप्रत्ययस्य लिङ्गवचनविभक्तिभेदा न भवन्ति । स्नात्वा गच्छन्तीर्नारी पश्य ।

प्रसङ्गादव्ययत्वविधायकानि सूत्राणि व्याख्यायन्ते—'स्वरादिनिपातमव्ययम्' इत्यनन्तर सूत्रम्—

(१०६०) **तद्धितश्चासर्वविभक्तिः** । १ । १ । ३८ ।

यस्मात् सर्वा विभक्तयो नोत्पद्यन्ते स तद्धितान्तोऽव्ययसंज्ञः । ते च प्रत्यया एव परिगणिता —

तसिल्–त्रल्–दा–स्तसि–शसा–वस्तात्ति कृत्वसु–ज्वति
धा–थालौ डाच्–च्वि–साति–त्रा इत्येतेऽव्ययतद्धिताः

तसिल्	— सर्वत'	वति	— हरिवत्
त्रल्	— सर्वत्र	धा	— शतधा
दा	— सर्वदा	थाल्	— सर्वथा
तसि	— स्वभावत	डाच्	— पटपटाकृत्य
शस्	— शतश	च्वि	— शुक्लीकृत्य
अस्तात्ति	— परस्तात्	साति	— भस्मसात्कृत्व
कृत्वसुच्	— शतकृत्व	त्रा	— ब्राह्मणत्राकृत्य

एषामपवादा अप्यव्ययानि—
इह—त्रलोऽपवादो ह प्रत्यय । दक्षिणेन—अस्तातेरपवाद एनप् ।

(१०६१) **कृन्मेजन्तः** । १ । १ । ३९ ।

मकरान्त एजन्तश्च कृत्प्रत्ययोऽव्ययसज्ञ । यथा—
कर्तु–तुमुन् मान्त । कारकार–णमुल् मान्त । एजन्ता प्रत्यया इच्छन्दस्येव ।

(१०६२) **क्त्वातोसुन्कसुनः** । १ । १ । ४० ।

एतेऽप्यव्ययसञ्ज्ञा । कृत्वा । तोसुन्कसुनौ च्छान्दसौ ।

(१०६३) अव्ययीभावश्च ।१।१।४१।

अयमप्यव्ययसञ्ज्ञ । उपहरि, यथासुख, मन्येमार्गम् ।

अथ प्रक्रिया —

(१०६४) न क्त्वा सेट् (कित्) ।१।२।१८।

सेट् क्त्वा कित्र स्यात् । यथा—

शीङ्—शायित्वा, वृतु-वर्तित्वा ।

अनिट् तु किदेव । भू—भूत्वा । कृ—कृत्वा ।

(१०६५) निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः ।१।१।१९।

शीङादि-भ्यस्सेट् निष्ठा न कित् । शीङ्—शयित शयितवान् ।

स्विदादीनामादित्वात् 'विभाषा भावादिकर्मणो' (६७८) इतीड्विकल्प ।

स्विद्ना—स्वेदित, स्विन्न इत्यादि ।

(१०६६) उदुपधाद्भावादिकर्मणोरन्यतरस्याम् ।१।२।२१।

सेण्निष्ठा वा कित् स्यात् । मुदित मोदित वा त्वया ।

(१०६७) रलो व्युपधाद्धलादेः संश्च (क्त्वा) ।१।१।२१।

उश्च इश्च वौ । रल् प्रत्याहार । रलन्तात् व्युपधात् हलादेर्धातोः परौ सेटौ क्त्वासनौ वा कितौ स्त । यथा—

लिख—लिखित्वा,—लेखित्वा । लिलिखिषति, लिलेखिषति ।

द्युत—द्युतित्वा—द्योतित्वा । दिद्युतिषति, दिद्योतिषति ।

अत्र नम—नत्वा—'अनुदात्तो ..' (५५९) इत्यनुनासिकलोप ।

वच—उक्त्वा—'वचिस्वपि ' (५११) इति सम्प्रसारणम् ।

भ्रमु—भ्रान्त्वा, भ्रमित्वा—* "अनुनासिकस्य कि झलो क्ङिति" इति दीर्घ ।

इत्यादय. प्रक्रिया अनुसन्धेया ।

(१०६८) समासेऽनञ्पूर्वे क्त्वो ल्यप् ।७।१।३७।

नञ्भिन्नेन पूर्वपदेन समासे क्त्वाप्रत्ययस्य ल्यबादेश । यथा—

---

* इद सूत्र मिश्रप्रकरणे व्याख्यातु विस्मृतम् अनुनासिकान्तस्याङ्गस्योपधाया दीर्घ क्विप्रत्यये झलादौ क्ङिति च । इति सूत्रार्थ. ।

प्राप्य। प्रदाय। निधाय। विलोक्य। परिभूय इत्यादि।
ऊरीकृत्य। पाणीकृत्य। शुचीकृत्य। वामनीभूय ,,
प्रत्यु—('नञ् समासे तु) अदृष्ट्वा, अश्रुत्वा, अकृत्वा।

'ऊरीकृत्य' इत्यादौ 'ह्रस्वस्य पिति कृति तुक्' (१०३३)। 'अनुदात्तोपदेश' (५९९) इत्यनुनासिकलोपो ल्यपि

(१०६९) **वा ल्यपि** ६।४।३८।

इति सूत्रेण विकल्प्यते। तेन—प्रणम्य, प्रणत्य सङ्गम्य सङ्गत्य इत्यादि रूपाणि। अनुनासिकलोपे ह्रस्वान्तत्वात् तुक्। प्रक्रियान्तराणि पूर्वमेवोक्तानि।

(१०७०) **अलखल्वोः प्रतिषेधयोः प्राचां क्त्वा**।३।४।१८।

प्रतिषेधवाचिनोरलङ्खल्वोरुपपदयो प्राचा मते क्त्वा स्यात्। सिद्धभावार्थ एवायमुपपद्यते उपपदानुरोधात्। यथा—

अलमुक्त्वा, खल्वुक्त्वा—वचन मास्त्वित्यर्थ। मतान्तरे तु अल रोदनेन।

(१०७१) **परावरयोगे च**।३।४।२०।

परावरौ=दूरसान्निहितौ। तद्योगे च क्त्वा स्यात्। पूर्वकाल एव हि क्त्वा विहित। अनेन पूर्वदेशेऽपि विधीयते। यथा—

क्रान्त्वा नदीं पर्वत—नद्या पारे इत्यर्थ।
अक्रान्त्वा ,, ,, अवारे ,,।

समानकर्तृकयो पूर्वकाले।३।४।२१। (व्याख्यातम्—१०५९)

(१०७२) **आभीक्ष्ण्ये णमुल् च**।३।४।२२।

आभीक्ष्ण्य=पौन पुन्यम्। तस्मिन् द्योत्ये समानकर्तृकयो पूर्वकाले णमुल् क्त्वा च स्याताम्। आभीक्ष्ण्येऽर्थे पदद्वित्व वक्ष्यते। यथा—

स्मार स्मार—स्मृत्वा स्मृत्वा वा नमति शिवम्।

(१०७३) **कर्मण्याक्रोशे कृञ खमुञ्**।३।४।२५।

कर्मण्युपपदे आक्रोशे द्योत्ये कृञ खमुञ्प्रत्यय। खित्त्वात् उपपदस्य ह्रस्वमुमागमादय। यथा—

चोरङ्कारमाक्रोशति। भीरुङ्कारमाक्रोशति। चोरोऽसि, भीरुरसीत्याक्रोशतीत्यर्थ।

(१०७४) **अन्यथैवंकथमित्थ सुसिद्धाप्रयोगश्चेत्** (णमुल्)।३।४।२७।

अन्यथादिषूपपदेषु कृञ स्वार्थे णमुल्। यथा—अन्यथाकारम्, इत्यङ्कार इत्यादि।

(१०७५) **यथातथयोरसूयाप्रतिवचने** । ३ । ४ । २८ ।

कृञो णमुल् । यथाकारं मे रोचते तथाकारमहं करिष्ये किं तवानेन । अत्र सासूय प्रतिवचनं द्योत्यते ।

(१०७६) **कर्मणि दृशिविदो साकल्ये** । ३ । ४ । २९ ।

कर्मण्युपपदे साकल्ये द्योत्ये दृशिविदोर्णमुल् । यथा—
ब्राह्मणवेदं भोजयति—यत्र ब्राह्मणं वेत्ति ततमित्यर्थः ।
कन्यादर्शं वरयते—या या कन्या पश्यति ता ता ,,

(१०७७) **यावति विन्दजीवो** । ३ । ४ । ३० ।

यावद्वेद भुङ्क्ते । यावज्जीवमधीते ।

(१०७८) **चर्मोदरयो पूरे.** । ३ । ४ । ३१ ।

चर्मपूरं स्तृणाति । उदरपूरं भुङ्क्ते ।

(१०७९) **वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्** । ३ । ४ । ३२ ।

गोष्पदपूरं, गोष्पदप्रं वा वृष्टो देव ।

(१०८०) **चेले क्नोपेः** । ३ । ४ । ३३ ।

चेलक्नोपं यसनक्नोपं वा वृष्टो देव । चेल इत्यर्थग्रहणम् ।

(१०८१) **निमूलसमूलयो कषः** । ३ । ४ । ३४ ।

'कषादिषु यथाविध्यनुप्रयोग' इति वक्ष्यते । तेन इत प्रभृति णमुलिविधिषु णमुल्-प्रकृतिर्धातुरेवानुप्रयोक्तव्य । तत्रानुप्रयोगस्यैवार्थयोजना । णमुलप्रकृतिर्निरर्थक एव । यथा— निमूलकाषं, समूलकाषं वा कषति—निमूलं समूलं वा कषतीत्यर्थ ।

(१०८२) **शुष्कचूर्णरूक्षेषु पिषः** । ३ । ४ । ३५ ।

शुष्कपेषं, चूर्णपेषं, रूक्षपेषं, वा पिनष्टि—शुष्कं पिनष्टीत्यादिरर्थ ।

(१०८३) **समूलाकृतजीवेषु हन्कृञ्ग्रहः** । ३ । ४ । ३६ ।

समूलघातं हन्ति । समूलं हन्तीत्यर्थ । एव अकृतकारं करोति । जीवग्राहं गृह्णाति । जीवतीति जीव , जीवन्तमित्यर्थ ।

(१०८४) **करणे हन** । ३ । ४ । ३७ ।

करणे उपपदे हन्तेर्णमुल् । पादघातं हन्ति—पादेनेत्यर्थ ।

(१०८५) **स्नेहने पिषः** । ३ । ४ । ३८ ।

स्नेहनवाचिनि करणे उपपदे णमुल् । तैलपेषं पिनष्टि ।

(१०८६) **हस्ते वर्त्तिग्रहो** ।३।४।३९।

हस्तवर्त्तं वर्त्तयति—हस्तेनेत्यर्थः। एव हस्तग्राहम्।

(१०८७) **स्वे पुष** ।३।४।४०।

स्व इत्यर्थग्रहणम्। तेन स्वरूपे पर्याये विशेषे च णमुल्। स्वपोषम् आत्मपोष, पितृपोष वा पुष्णाति।

(१०८८) **अधिकरणे बन्ध** ।३।४।४०।

चक्रबन्ध बध्नाति। मुष्टिबन्ध बध्नाति।

(१०८९) **सज्ञायाम्** ।३।४।४२।

मयूरिकाबन्ध, अट्टालिकाबन्ध वा बध्नाति।

(१०९०) **कर्त्रोर्जीवपुरुषयोर्नशिवहोः** ।३।४।४३।

जीवनाश नश्यति।—जीवो (जीवन्) नश्यति।

पुरुषवाह वहति—पुरुष प्रेष्यो भूत्वा वहतीत्यर्थः।

(१०९१) **ऊर्ध्वे शुषिपुरोः** ।३।४।४४।

ऊर्ध्वशोष शुष्यति वृक्ष। ऊर्ध्वपूर पूर्यते घट।

(१०९२) **उपमाने कर्मणि च** ।३।४।४५।

उपमानभूते कर्त्तरि कर्मणि वा उदपदे धातोर्णमुल्। यथा—

घृतनिधाय निहित जल—घृतमिव निहितम्। अजकनाश नष्ट—अजक इव नष्ट

(१०९३) **कषादिषु यथाविध्यनुप्रयोगः** ।३।४।४६।

तथैवोदाहृतम्। इत परमनुप्रयोगनियमो नास्ति।

(१०९४) **उपदशंस्तृतीयायाम्** ।३।४।४७।

मूलकोपदश भुङ्क्ते—मूलकेनोपदश्येत्यर्थः।

(१०९५) **हिंसार्थानां च समानकर्मकाणाम्** ।३।४।४८।

दण्डोपघात गा कालयति—दण्डेनोपहत्य।

(१०९६) **सप्तम्यां चोपपीडरुधकर्षः** ।३।४।४९।

पार्श्वोपपीड शेते—पार्श्वयोरुपपीड्य इत्यादि।

(१०९७) **समासत्तौ** ।३।४।५०।

सामीप्ये द्योत्ये तृतीयासप्तम्यन्तयोरुपपदयोर्धातोर्णमुल्। यथा—

केशग्राह युध्यन्ते। हस्तग्राह।

(१०९८) **प्रमाणे च** । ३ । ४ । ९१ ।

तृतीयासप्तम्योरित्येव । यथा—अगुलेरुत्कर्षं वस्त्रं छिनत्ति ।

(१०९९) **अपादाने परीप्सायाम्** । ३ । ४ । ५२ ।

परीप्सा=त्वरा । तस्यां द्योत्यायामपादाने उपपदे धातोर्णमुल् । यथा—शय्योत्थाय धावति—शय्योत्थानक्षण एवेत्यर्थः ।

(११००) **द्वितीयायां च** । ३ । ४ । ९३ ।

परीप्सायामित्येव । यष्टिग्राह युद्धयन्ते ।

(११०१) **स्वाङ्गेऽध्रुवे** । ३ । ४ । ९४ ।

अध्रुवे स्वाङ्गवाचिनि द्वितीयान्ते उपपदे धातोर्णमुल् । यथा—अक्षिनिकोचं जल्पति—भ्रुविक्षेपं कथयति । 'अध्रुव' इत्युक्ते शिर उत्क्षिप्य इत्येव । येन विना न जीवन तद्ध्रुवम् ।

(११०२) **परिक्लिश्यमाने च** । ३ । ४ । ५५ ।

स्वाङ्गे द्वितीयायामित्येव । उर प्रतिक्षेपं युध्यन्ते । ध्रुवार्थोऽयमारम्भः ।

(११०६) **अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ** । ३ । ४ । ५९ ।

अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः, प्रियस्य नीचैश्च कथनम् । उच्चैः कृत्य, उच्चैः कृत्वा, उच्चैः कारमाचष्टे ।

प्रयोगवैचित्र्यप्रतिपादका इति णमुलो विशेषविधय प्राय सर्वेऽप्यत्र व्याख्याताः

अथ तुमुन्—

(११०७) **शक-धृष-ज्ञा-ग्लाघट रभ-लभ-क्रम-सहा-र्हा-स्त्यर्थेषु तुमुन्** । ३ । ४ । ६५ ।

शकादिषु दशसु, अस्त्यर्थेषु चोपपदेषु धातोस्तुमुन् प्रत्ययो भवति भावे । अत्रार्थशब्दोऽस्तिनैव सम्बध्यते अनन्तरत्वात् । शकधृषयो, र्घटार्ह्ययोश्च पृथगुपादानाच्च । अक्रियार्थोपपदार्थोऽयमारम्भः । यथा—

उपपद	तुमुन्	अर्थ	कारकम्
शक्नोति धृष्णोति जानाति	भोक्तुम्—इत्यत्र	भोजने प्रावीण्य गम्यते ।	वैषयिकाधिकरणम्

(११०३) विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ।३।४।९६।

साकल्येन सम्बन्धो व्याप्ति, पौन पुन्यमासेवा । यथा—

गेहानुप्रवेशमास्ते । पीठानुपातमास्ते इत्यादि ।

(११०४) अस्यतितृषोः क्रियान्तरे कालेषु ।३।४।९७।

क्रियान्तर क्रियाया व्यवधानम् । तस्मिन् द्योत्ये कालवाचिषु द्वितीयान्तेषूपपदेषु अस्यतितृषोर्णमुल् । यथा—

ब्रह्मोत्सास वत्सान् पाययति । ब्रह्मतर्षम् ।

(११०५) नाम्न्याद्यादिग्रहोः ।३।४।९८।

नामादेशमाचष्टे । नामग्राहमाह्वयति—नामादिश्य गृहीत्वा च ।

तण्डुलान् पक्तुमानयति—कर्तरि । तण्डुला पक्तुमानीयन्ते—कर्मणि ।
स्वपितु शेते—कर्तरि । स्वपितु शय्यते—भावे ।

अयमेवाभिप्राय 'अव्ययकृतो भावे' इति सिद्धान्तस्य । भोक्तुमिच्छति, भोक्तु काल. इतीच्छार्थेषु कालपर्यायेषु चोपपदेषु तुमुन् विधास्यते ।

(१०९८) **प्रमाणे च** । ३ । ४ । ९१ ।

तृतीयासप्तम्योरित्येव । यथा—अगुलोत्कर्षं वस्त्रं छिनत्ति ।

(१०९९) **अपादाने परीप्सायाम्** । ३ । ४ । ५२ ।

तुमुन् । ३ । ४ । ६५ ।

शकादिषु दशसु, अस्त्यर्थेषु चोपपदेषु धातोस्तुमुन् प्रत्ययो भवति भावे । अत्रार्थशब्दोऽस्तिनैव सम्बध्यते अनन्तरत्वात् । शकधृषयो, घटार्हयोश्च पृथगुपादानाच्च । अक्रियार्थोपपदार्थोऽयमारम्भ । यथा—

उपपद	तुमुन्	अर्थ	कारकम्
शक्नोति वृणोति जानाति	भोक्तुम्—इत्यत्र भोजने आवीण्य गम्यते ।		वैषयिकाधिकरणम्
ग्लायति	,, ,, ,,	अशक्ति ,,	,,
घटते	,, ,, ,,	योग्यता ,,	,,
आरभते	,, ,, ,,	आद्यावस्था ,,	कर्म
लभते	,, ,, ,,	सुभिक्ष ,,	कर्म
क्रमते	,, ,, ,,	अप्रतिहति ,,	अधिकरणम्
सहते	,, ,, ,,	उत्साह ,,	अधिकरणम्
अर्हति	,, ,, ,,	योग्यता ,,	कर्म
अस्ति भवति विद्यते	,, ,, ,,	अदारिद्र्य ,,	कर्त्री ।

(११०८) **पर्याप्तिवचनेष्वलमर्थेषु** । ३ । ४ । ६६ ।

पूर्णतावाचिषु सामर्थ्यार्थकेषूपपदेषु धातोस्तुमुन् । यथा—

पर्याप्तो भोक्तु, प्रवीण, कुशल, पटु, अल वा ।

(११०९) **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** । ३ । ४ । १० ।

भविष्यतीत्यनुवर्त्तते । क्रियार्थाया क्रियायामुपपदे भविष्यति काले धातोस्तुमुन्ण्वुलौ । यथा पूर्वकालक्रियावाचिनो धातो क्त्वाणमुलावुक्तौ तथा उत्तरकालक्रियावाचिनस्तुमुन्ण्वुलावुच्येते । तत्र तुमुन् मान्तत्वादव्ययम् । तेन च न लिङ्गविभक्त्यादिभेदः । ण्वुलस्तु विशेष्यानुसारेण लिङ्गादय । 'युवोरनाकौ' (१०९१) इति ण्वुलो वुकारस्य अकादेश । क्त्वा प्रत्ययवदेव कर्त्राद्यर्थे व्यवस्था । यथा—

भोक्तु स्नाति—भोजनार्थक स्नानम् । भोक्तुमागच्छति देवदत्त,—भोजको वा । भोक्तुमागच्छति गार्गी,—भोजिका वा । भोक्तुमागच्छतो देवदत्तस्यान्न लब्ध, भोजकस्य वा । भोक्तुमागच्छन्त्या गार्ग्या अन्न न लब्ध, भोजिकया वा ।

तण्डुलान् पक्तुमानयति—कर्तरि । तण्डुला पक्तुमानीयन्ते—कर्मणि ।

स्वप्तु शेते—कर्तरि । स्वप्तु शय्यते—भावे ।

अयमेवाभिप्रायः 'अव्ययकृतो भावे' इति सिद्धान्तस्य । भोक्तुमिच्छति, भोक्तु काल. इतीच्छार्थेषु कालपर्य्यायेषु चोपपदेषु तुमुन् विधास्यते ।

कर्त्रर्थककृत्प्रत्ययाः ।

कर्त्रर्थककृत्सु क्रिया सिद्धा । आख्याताख्यातकयो क्रिया साध्ये-तिभेद । आख्यातसज्ञा आख्यातकसज्ञा कृत्सज्ञा वा भवन्तु कर्तृकर्म-भावेष्वेव धातो प्रत्यया विधीयन्ते । क्रियाया सिद्धत्वसाध्यत्वाभ्यामेव भेदोपलब्धि । आख्याताख्यातकाभ्या यद्यपि कर्तृकर्मणी अभिधीयेते तथापि आख्याते अव्ययाख्यातके च भाव एव विशेष्यम् । यथा–'देवदत्त पचति' इत्यत्र देवदत्तकर्तृक वर्त्तमानकालिक पचनमित्येव बोध । न तु वर्त्तमानकालिकपचनकर्त्ता देवदत्त इति । तथा च हरि —

'फलव्यापारयोर्धातुराश्रये तु तिङ स्मृता ।
फले प्रधान व्यापरस्तिङर्थस्तु विशेषणम् ॥'

फलानुकूलो व्यापारो धात्वर्थ । व्यापारफलयोराश्रयभूत कारकं कर्त्ता कर्म वा तिङाभिधीयते । फलापेक्षया व्यापार एव प्रधानम् । तिङर्थभूत कारक तु विशेषणमेव । इदमेवाभिप्रेत्योच्यते–'**भावप्रधानमाख्यातम्**' इति । अन-व्ययाख्यातकाना कारककृता च कारक प्रधानम् । भावार्थकाना सिद्धात्मा भावश्च ।

(१११०) **ण्वुल्तृचौ** ।३।१।१३३।

धातो कालसामान्ये कर्त्तर्येतौ । ण्वुल्=अक । णित्त्वाद्वृद्धि । यथा—
करोतीति—कर्त्ता—कर्त्री—कर्तृ । कारक—कारिका—कारकम् ।
भवतीति—भविता—त्री—तृ । भावक—विका—कम् ।
ददातीति—दाता—दात्री—दातृ । दायक—यिका—कम् ।

(१११९) **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** ।३।१।१३४।

नन्द्यादिभ्यो ल्यु, ग्रह्यादिभ्यो णिनि, पचादिभ्योऽच् । यथा—
नन्दयतीति—नन्दन—ना,—नम् । मदन, दूषण, साधन इत्यादि ।
गृह्णातीति—ग्राही,—हिणी,—हि । उत्साही, स्थायी, मन्त्री ,,
पचतीति—पच,—चा,—चम् । पत, खद, चल, जर, ,,

त्रयोऽपि गणा आकृतिगणा ।

(१११२) **इगुपधज्ञाभीकिरः कः** । ३ । १ । १३५ ।

इगुपध—वुध्यत इति बुध । विलिख । विजिघ । ज्ञा-ज्ञ ।

प्री—प्रिय, कृ-किर, किरश्चतुर्णामाद प्रिय इति संयोगादित्वाद्यिड् ।

(१११३) **आतश्चोपसर्गे** । ३ । १ । १३६ ।

आदन्तादुपसर्गे उपपदे क । —पद, प्रस्थ, प्रप इत्यादि ।

(१११४) **पाघ्राध्माधेट्दृशः शः** । ३ । १ । १३७ ।

उपसर्गे सत्यसति च शित्त्वात् पिबाद्यादेशा । यथा—

प्रपिब, जिघ्र विधम, धय, उत्पश्य इत्यादि ।

(१११५) **कर्मण्यण्** । ३ । २ । १ ।

कर्मण्युपपदे धातोरण् । वृत्त्यादौ द्योत्य एवोपयुज्यते । यथा—

कुम्भ करोतीति कुम्भकार, काण्डलव, वेदाध्याय ।

(१११६) **आतोऽनुपसर्गे कः** । ३ । २ । ३ ।

कर्मण्युपपदे । यथा—गोद, वनद । कर्मणोऽन्यत्रापि को दृश्यते । शातपत्र, करस्थ, नदीष्ण ।

(१११७) **प्रियवशे वदः खच्** । ३ । २ । ३८ ।

खित्त्वान्मुमागम —प्रियंवद, वशंवद ।

(१११८) **सर्वकूलाभ्रकरीषेषु कषः** । ३ । २ । ३९ ।

खशित्येव—सर्वङ्कष इत्यादि ।

(१११९) **त्यदादिषु दृशोऽनालोचने कञ् च** । ३ । २ । ६० ।

त्यदादिषूपपदेषु अदर्शनार्थाद् दृश कञ्, क्विन् च । यथा—

तादृक्, तादृश । त्वादृक्, त्वादृश । ईदृक्, ईदृश । **समानान्ययोश्च दृशः केन् कञाविति** कालापन ।

अत्र प्रक्रिया—'समान' इत्यस्य सादेशविधिप्रस्तावे—

(११२०) **दृग्दृशवतुषु** । ६ । ३ । ८९ ।

एषु परेषु समानशब्दस्य 'स' इत्यादेश । सदृक् सदृश ।

(११२१) **इदंकिमोरीश्की** । ६ । ३ । ९० ।

दृग्दृशवतुष्वित्येव—ईदृक, ईदृश ।

(११२२) **आ सर्वनाम्नः** । ६ । ३ । ९१ ।

सर्वनाम्न आकारोऽन्तादेशो दृग्दृशवतुषु । यथा—

तादृश, मादृश । तावत्, यावत् इति वतुप्रत्यये । स च तद्धिते वक्ष्यते ।

(११२३) **किप् च** । ६ । ३ । ९२ ।

सोपपदाच्चिरुपपदाद्वा धातो किर् स्यात् । पित्त्वात् 'ह्रस्वस्य पिति कृति तुक्' । यथा—

कृ—कृत् । विट्, विश्वपा । विश्वजित् । पर्णध्वत् ।

(११२४) **सुप्यजातौ णिनिस्ताच्छील्ये** । ३ । २ । ७८ ।

अजातिवाचिनि सुबन्ते उपपदे ताच्छील्ये द्योत्ये धातोर्णिनि स्यात् ।

यथा—उष्णं भोक्तुं शीलमस्येति उष्णभोजी,—जिनी,—जि । शीतपायी । उपजीवी, विसारी । विलासी ।

प्रत्यु—('अजातौ' किं ?) ब्राह्मणवन्दी इति न ।

(११२५) **कर्त्तर्युपमाने** । ३ । २ । ७९ ।

कर्तृवाचिन्युपमाने उपपदे धातोर्णिनि । यथा—

उष्ट्र इव क्रोशतीत्युष्ट्रक्रोशी । गजगामिनी ।

(११२६) **व्रते** । ३ । २ । ८० ।

व्रते द्योत्ये सुप्युपपदे धातोर्णिनि । यथा—

स्थण्डिलशायी । मासोपवासी । अश्राद्धभोजी ।

(११२७) **मनः** । ३ । २ । ९१ ।

पण्डित (आत्मानमन्य वा) मन्यते पण्डितमानी ।

(११२८) **आत्ममाने खश्च** । ३ । २ । ७२ ।

आत्मान मन्यते इत्यर्थे मन्यतेर्णिनि. खश्च । खित्त्वादजन्तस्योपपदस्य मुम् । शित्त्वात् श्यन् विकरणप्रत्ययश्च । यथा—

आत्मान सुभग मन्यते इति सुभगम्मन्य, सुभगमानी ।

(११२९) **सप्तम्यां जनेर्डः** । ३ । २ । ९७ ।

(११३०) **अन्येष्वपि दृश्यते** । ३ । २ । १०१ ।

डित्त्वाट्टिलोप.—पङ्कज, द्विज, अनुज ।

(११३१) **आ केस्तच्छीलतद्धर्मतत्साधुकारिषु** । ३ । २ । १३४ ।

इत्यधिकृत्य—

(११३२) **तृन्** । ३ । २ । १३५ ।

यथा—कर्त्ता कटम्—कटकरणशीलस्तद्धर्मा, तत्साधुकारी वा ।

(११३३) **अलङ्खनिराकृञ्प्रजनोत्पचोत्पतोन्मदरुजपत्रपवृतुवृधुसह-चर इष्णुच्** । ३ । २ । १३६ ।

अलङ्करिष्णु, निराकरिष्णु, प्रजनिष्णु, उत्पचिष्णुरित्यादि ।

(११३४) **लषपतपदस्थाभूवृहनकमगमशभ्य उकञ्** । ३ । २ । १५४ ।

अभिलाषुक, प्रपातुक उत्पादुक स्थायुक, भावुक, कामुक इत्यादि ।

(११३५) **जल्पभिक्षकटलुण्टवृङ षाकन्** । ३ । २ । १५५ ।

जल्पाक, भिक्षाक इत्यादि ।

(११३६) **स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्** । ३ । २ । १५८ ।

स्पृह्यादयो णिजन्ता । अयामन्ताल्वाय्येत्न्विष्णुषु । स्पृहयालुरित्यादि ।

(११३७) **भञ्जभासमिदो घुरच्** । ३ । २ । १६१ ।

'चजो कु घिण्ण्यतो'—भङ्गुर इत्यादि ।

(११३८) **विदिभिदिच्छिदेः कुरच्** । ३ । २ । १६२ ।

विदुर भिदुर च्छिदुर । भिदिच्छिदो कर्मकर्त्तर्येव प्रयोग ।

(११३९) **सनाशंसभिक्ष उः** । ३ । २ । १३८ ।

सन्नन्तेभ्य आशसभिक्षतिभ्या च उ । यथा—

चिकीर्षु, जिगीषु, चिकित्सु, आशसु, भिक्षु ।

'तच्छीलतद्धर्मतत्साधुकारिषु' इत्यधिकारो वृत्त ।

(११४०) **क्तीतः क्तः** । ३ । २ । १८७ । (वर्तमाने)

क्तीतो धातोर्वर्त्तमानकाले कर्त्तरि क्त । यथा—

त्रि वृषा—वृष्ट । त्रि स्विदा—स्विन्न ।

(११४१) **मतिबुद्धिपूजार्थेभ्यश्च** । ३ । २ । १८८ ।

मतिरिच्छा । बुद्धिर्ज्ञानम् । पूजा सत्कार । एभ्योऽपि वर्त्तमाने क्त । यथा—

सता मतो विदित पूजितो वा—सद्भिर्मन्यमानो वेद्यमान, पूज्यमानो वेत्यर्थ ।

भावकृत्प्रत्ययाः ।

(११४२) भावे । ३ । ३ । १८ ।

(११४३) अकर्त्तरि च कारके संज्ञायाम् । ३ । ३ ४९ ।

अधिकारो विधिश्च सूत्रद्वयम् । इत ऊर्ध्वं भावे कर्तृभिन्नकारके च प्रत्यया । उभयत्रापि सिद्धावस्थापन्नैव क्रिया गृह्यते । सिद्धावस्थापन्ना क्रिया द्रव्यवत् प्रकाशत इति द्वित्वादियोगे द्विवचनबहुवचने अपि सम्भवत । देवदत्तश्चेत्त्रिवार सम्यक् पचति तदा देवदत्तस्य पाका समीचीना इति प्रयोगस्यावसर । भावार्थकृत्प्रत्यया कर्तृभिन्नेषु कारकेष्वपि भवन्ति, तदा ते द्रव्यवाचकाश्च स्यु । सज्ञाशब्देनात्र द्रव्यनामैवोच्यते, न तु यदृच्छाशब्द, घञित्यनुवृत्त्या सूत्रद्वयेन भावकर्तृभिन्नकारकयोर्घञ्प्रत्ययो विधीयते च । वित्त्वाच्चजो कुत्वम् । ञित्त्वादजन्ताद्युपधयोर्वृद्धिश्च । यथा----

पच—पाक —सिद्धा पचनक्रियेत्यर्थ । घञ पुल्लिङ्गनिर्दिष्ट । एव भू—भाव वद—वाद । दा—दाय । प्रान—प्राण । आहरन्त्यस्मादसमित्याहार । व्यस्यतेऽनेन वृत्तमिति व्यास । प्रकाश्यतेऽनेनेति प्रकाश । आरमन्त्यस्मिन्नित्याराम ।

(११४४) परिमाणाख्यायां सर्वेभ्यः । ३ । ३ । २० ।

अजपोर्वक्ष्यमाणयो पुरस्तादपवादो घञ् । यथा—

तण्डुलनिचाय, शूर्पनिष्पाव ।

(११४५) कर्मव्यतीहारे णच् स्त्रियाम् । ३ । ३ । ४३ ।

कर्मविनिमये गम्ये धातोर्णच्, स्त्रीलिङ्गश्चाय प्रत्यय 'णच स्त्रियामञ्' इति तद्धितविधानाद्व्यन्त एवाय प्रयुज्यते । अत एव च ङीप् । यथा—

व्यावक्रोशी, व्यावहासी, व्यात्युक्षी ।

(११४७) अभिविधौ भाव इनुण् । ३ । ३ । ४४ ।

अभिविधि क्रियागुणाभ्या कात्स्न्र्येन सम्बन्ध । 'अणिनुण' इति सूत्रेण अणन्त एव घिनुणन्त. प्रयोक्तव्य. । यथा—

स + र—सारविण वर्त्तते ।

(११४७) **एरच्** । ३ । ३ । ५६ ।

इवर्णान्ताद्धातोरच् भावे अकर्त्तरि कारके च । घञोऽपवाद । यथा—

चि—चय । जि–जय । इ–अय । नी–नय । भी–भयम् ।

(११४८) **ऋदोरप्** । ३ । ३ । ५७ ।

ऋदन्तेभ्य उवर्णान्तेभ्यश्च अप् । स्वरे एव भेद । यथा—

कृ - कर । गृ–गर । शृ–शर । क्षु–क्षव । लू–लव । पू–पव ।

(११४९) **ङितः क्तिः** । ३ । ३ । ८८ ।

'क्तेर्मङ्नित्यम्' इति मप्प्रत्ययान्त एवाय सर्वदा । यथा—

डु कृञ् करणे—कृत्रिम ,–मा –मम् । डु पच–पक्किमम् ।

(११५०) **ङितोऽथुच्** । ३ । ३ । ८९ ।

डु णदि समृद्धौ – आनन्दथु । टु ओश्वि—श्वयथु ।

(११५१) **उपसर्गे घोः किः** । ३ । ३ । ९२ ।

विधि । व्याधि । अन्तर्धि , सन्धि , प्रधि , निधि ।

(११५२) **स्त्रियां क्तिन्** । ३ । ३ । ९४ ।

भावे अकर्त्तरि च कारके धातो क्तिन् । तदन्तश्च स्त्रियाम् । यथा–

कृ—कृति । मन मति । सृज–सृष्टि । वच–उक्ति ।

॥ * ॥ **ऋत्व्यादिभ्यः क्तिच्तिष्ठावद्वाच्य** ।

इति वार्त्तिकात् तकारस्य नत्व—कृ - कीर्णि । लू–लूनि ।

॥ * ॥ **ग्ला म्ला ज्या हा–भ्यो नि** —ग्लानि , म्लानि , ज्यानि , हानि ।

॥ * ॥ **सम्पदादिभ्यः क्विप्** ।—सम्पद् , विपद् , रुच् , भास् इत्यादि ।

वासरूपविधिना —सम्पत्ति । विपत्तिरित्यादयपि ।

(११५३) **अ प्रत्ययात्** । ३ । ३ । १०२ ।

प्रत्ययान्तेभ्य (सनाद्यन्तेभ्य) धातुभ्य अप्रत्यय स्त्रियाम् ।

यथा—चिकीर्षा, पुत्रकाम्या, अटाट्या, कण्डूया ।

(११५४) **गुरोश्च हलः** । ३ । ३ । ११३ ।

हलन्तो यो धातुर्गुरुमान् तत स्त्रियामप्रत्यय । यथा—

ईहा, ऊहा, कुण्डा ।

वासरूपविधे 'आस्त्रियामि'ति निषेधात् क्तिनोऽपवादोऽयम् ।

(११५५) **षिद्भिदादिभ्योऽङ्** । ३ । ३ । १०४ ।

षिद्भ्यो भिदादिभ्यश्च क्तिनोऽपवादोऽङ् । यथा—

क्षमूष—क्षमा । जॄष्—जरा । त्रपूष्—त्रपा । भिद्—भिदा । छिदा, मेधा, धारा, रेखा, चूडा, पीडा इत्यादि ।

(११५६) **आतश्चोपसर्गे** । ३ । ३ । १०६ ।

आदन्तेभ्यश्च सोपसर्गेभ्योऽङ् स्त्रियाम् । यथा—

उपधा, उपदा, श्रद्धा, प्रतिष्ठा, उपमा, प्रमा ।

(११५७) **ण्यासश्रन्थो युच्** । ३ । ३ । १०७ ।

ण्यन्तेभ्य आसश्रन्थाभ्यां च युच् 'अ प्रत्ययात्' इत्यस्यापवादः ।

यथा— कारणा, चोरणा, भावना, आसना, श्रन्थाना ।

(११५८) **रोगाख्यायां ण्वुल् बहुलम्** । ३ । ३ । १०८ ।

यथा—प्रच्छर्दिका, प्रवाहिका, विचर्चिका । बहुलग्रहणात् शिरोऽर्त्ति इत्येव ।

॥ ॥ **धात्वर्थनिर्देशे ण्वुल् वक्तव्यः** ।

स्त्रियामित्येव । यथा—

आसिका, शायिका, भाक्षिका, खादिका इत्यादि ।

(११५९) **संज्ञायाम्** । ३ । ३ । १०९ ।

स्त्रियां ण्वुल् । यथा—

उद्दालकपुष्पभञ्जिका, —क्रीडाविशेषस्य संज्ञेयम् । वारणपुष्पप्रवाहिका । अभ्यूषखादिका ।

(११६०) **आक्रोशे नञ्यनिः** । ३ । ३ । ११२ ।

आक्रोशे गम्ये नञ्युपपदे धातोरनि यथा—

'तस्याजननिरेवास्तु'—जननाभाव —एवम् अरमणि ।

(११६१) **कृत्यल्युटो बहुलम्** । ३ । ३ । ११३ ।

भावे अकर्त्तरि च कारके इति निवृत्तम् । कृत्यप्रत्ययाः ल्युट् च बहुलमेषु भ्यु । अविहितेष्वर्थेष्वपि द्रष्टव्याः । यथा—

कृत्या —स्नानाय्यम् चूर्णम्—स्नान्त्यनेनेति करणे ।
दानीयो विप्र —दीयतेऽस्मै इति सम्प्रदाने ।
ल्युट् —राजभोजना शालय —राज्ञा भुज्यन्त इति कर्मणि ।

(११६२) **नपुंसके भावे क्तः** । ३ । ३ । ११४ ।

(११६३) **ल्युट् च** । ३ । ३ । ११५ ।

सिद्धावस्थापन्ने भावे क्तो ल्युट् च स्यात्, क्लीबता चानयो । यथा—
जल्पित, जल्पनम् । विलोकित, विलोकनम् । चेष्टित, चेष्टनम् ।

(११६४) **करणाधिकरणयोश्च** । ३ । ३ । ११७ ।

ल्युडेवानुवर्त्तते योगविभागात् । यथा—इध्मवश्चन कुठार । गोदोहनी स्थाली ।

(११६५) **पुंसि संज्ञायां घः प्रायेण** । ३ । ३ । ११८ ।

करणाधिकरणयोरित्येव । यथा—दन्तच्छद । उरश्छद । आलय ।

लकारार्थप्रकरणम् ।

इह सुबन्ततिङन्तप्रकरणयो सुपा तिङा च प्रक्रिया एव कथिता । अर्थविचारो न कृत । स इदानी प्राप्तावसर आरभ्यते । तत्र प्रथम तिङामर्थविचार, तेषा धात्वधिकारान्तर्गतत्वात्, धात्वधिकारस्य च प्रकृतत्वात् । तिङो लकारा आख्यातानीत्यनर्थान्तरम् । सन्निष्ठाकृत्यादयश्चाख्यातानामादेशा स्थानीया वा । अत आख्यातानामाख्यातकाना चार्थविशेषा एकस्मिन्नेव प्रकरणे मिलिता प्रदर्श्यन्ते । 'कर्त्तरि कृत्' इत्यादि कृता सामान्यतोऽर्थव्यवस्था प्रतिपादितैव ।

(११६६) **भविष्यति गम्यादयः** । ३ । ३ । २ ।

गम्यादयो भविष्यति काले स्यु । यथा—
आम गमा । प्रस्थायी । प्रतियायी । भावी इत्यादि ।

(११६७) **यावत्पुरानिपातयोर्लट्** । ३ । ३ । ४ ।

निपातयोर्यावत्पुराशब्दयोरुपपदयोर्भविष्यति लट् । यथा—

यावत् भुङ्क्ते । पुरा भुङ्क्ते—भोक्ष्यत इत्यर्थः ।

भविष्यत्कालद्योतकत्व एवानयोर्निपातत्वम् । तेन 'यावल्लभ्यते तावद्भोक्ष्यत' इत्येव ।

(११६८) **विभाषा कदाकर्ह्योः** । ३ । ३ । ५ ।

अनयोर्योगे भविष्यति वा लट् । यथा—

कदा भुङ्क्ते । कर्हि भुङ्क्ते—भोक्ष्यते वा ।

(११६९) **किंवृत्ते लिप्सायाम्** । ३ । ३ । ६ ।

किंशब्दनिष्पन्न किंवृत्त । किंकतरकतमशब्दा । लिप्साया गम्याया किंवृत्ते उपपदे भविष्यति लट् । यथा—

क कतर कतमो वा भिक्षां ददाति, दास्यति वा ।

तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् । ३ । ३ । १० । (व्याख्यातम्)

(११७०) **भाववचनाश्च** । ३ । ३ । ११ ।

तुमुना बाधो मा भूदिति भावार्थका वजादयश्च विधीयन्ते ।

(११७१) **अण् कर्मणि च** । ३ । ३ । १२ ।

भविष्यति काले कर्मण्युपपदे अण् च ।

लृट् च्छेषे च । ३ । ३ । १३ । (व्याख्यातम्)

उक्तसूत्रचतुष्टयस्य युगपदुदाहरणम्—

अत्र भोक्तुम्, अत्र भाजको, अत्रास्य भोजनाय, अत्रभोज अत्र भोक्ष्ये इति वा व्रजति देवदत्त ।

(११७२) **वर्तमानसामीप्ये वर्तमानवद्वा** । ३ । ३ । १३१ ।

वर्तमानसन्निहिते भूते भविष्यति च वर्तमाने इव प्रत्यया वा स्युः । यथा—

कदा त्वमागतोऽसि ?—अयमागच्छामि—भूते ।

कदा ग्राम गमिष्यसि ?—एष गच्छामि—भविष्यति ।

पक्षे उभयत्रापि लट् ।

(११७३) **आशंसायां भूतवच्च** । ३ । ३ । १३२ ।

अप्राप्तस्य प्रियार्थस्य प्राप्तुमिच्छा आशसा । तस्याश्च भविष्यत्कालो विषय । तत्र भविष्यति काले आशसायां द्योत्यायां भूतकाले इव प्रत्यया वा । चकाराद्वर्त्तमानवच्च । यथा—

यदि परीक्षा॒मुदतारिष्म नूनमधिकारमलप्स्महि ।
,, उत्तरिष्याम ,, लप्स्यामहे ।
,, उत्तराम ,, लभामहे ।
,, उत्तीर्णा ,, लब्धवन्त ।

(११७४) **क्षिप्रवचने लृट्** । ३ । ३ । १३३ ।

क्षिप्रवाचिन्युपपदे आशसाया लृडेव । यथा—

यदि परीक्षाया क्षिप्रमुत्तरीष्याम क्षिप्रमविकार लप्स्यामहे ।

(११७५) **आशंसावचने लिङ्** । ३ । ३ । १३४ ।

यथा— परीक्षाया चेदुत्तरेम, आशसेऽविकार लभेय ।

लिङ्निमित्ते लृङ् क्रियातिपत्तौ (भविष्यति) । ३ । ३ । १३९ ।

व्याख्यात–(४३६) किन्तु नोदाहृतम् । क्रियातिपत्तिर्नाम क्रियाया अनिष्पत्ति । कुताश्चित् कारणात् क्रिया न निर्वृत्तेति प्रतीयते चेत् हेतुहेतुमद्भावादौ लिङर्थे लृङ् । हेतु कारणम्, हेतुमत् फलम् । यथा—

नास्तिकोऽय गिरा देवीमवन्दिष्यत चेत् परीक्षायामुदतरिष्यत्—
नास्तिकत्वान्न वन्दिष्यते अतश्च नोत्तरिष्यतीति गम्यते ।

(११७६) **भूते च** । ३ । ३ । १४० ।

उक्तेऽर्थे भूतेऽपि लृङ् । योगविभाग उत्तरार्थ । यथा—

सुवृष्टिश्चेदभविष्यत् धान्यमवप्स्याम—वृष्टिर्नाभूद्धान्य च नोप्तामिति गम्यते ।

(११७७) **वोताप्योः** । ३ । ३ । १४१ ।

इत ऊर्ध्वम् 'उताप्यो. समर्थयोर्लिङ्' (३ । ३ । १५२) इति सूत्रं यावद्यानि यानि लकारानिमित्तानि कथ्यन्ते तेषु तेषु भूते लिङ्निमित्ते लृङ् क्रियातिपत्तौ वा स्यादित्यधिकारोऽयम् ।

(११७८) **गर्हायां लडपिजात्वोः** । ३ । ३ । १४२ ।

गर्हाया गम्याया अपिजात्वोरुपपदयो कालत्रये लट् । यथा—

अपि (जातु वा,) युधिष्ठिरोऽनृत वदति—भूते ।
जातु मन्दोऽस्य परीक्षायामुत्तरति—भविष्यति ।
अपि नृपोऽदण्ड्यान् दण्ड्यति—वर्त्तमाने ।

(११७९) **विभाषा कथमि लिङ् च** । ३ । ३ । १४३ ।

गर्हायामित्येव । चाल्लट् । विभाषाग्रहणात् पक्षे यथाप्राप्त लकारः । यथा—कथ नाम नृपोऽधर्ममाचरेत्, आचरति वा । पक्षे यथाकालम् आचरिष्यति, आचारीत् इति च ।

अत्र क्रियातिपत्तिश्चेत् 'दोनाप्यो'—रित्यधिकारात् भूते लृङ् वा । भविष्यति नित्यम् ।

(१२८०) **किंवृत्ते लिङ्लृटौ** । ३ । ३ । १४४ ।

गर्हायां कालसामान्ये लिङ्लृटौ किंवृत्त शब्द उपपद चेत् । यथा—

को नाम नृपोऽधर्म चरेच्चरिष्यति वा ।

अत्रापि लृङ्लृङः । एवमत्रेऽपि लिङ्प्रसक्तौ ।

(११८१) **अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि** । ३ । ३ । ७४९ ।

अनवक्लृप्तिरसम्भावना । अमर्षोऽक्षमा । एतदर्थयोर्धात्वोरुपपदयो-र्लिङ्लृटौ कालसामान्ये । यथा—

नावकल्पयामि, न सम्भावयामि, न श्रद्दधे, न मर्षयामि, न सम्प्रधारयामि वा नृपोऽधर्म चरेच्चरिष्यति वा ।

(११८२) **किंकिलास्त्यर्थेषु लृट्** । ३ । ३ । १४६ ।

अनवक्लृप्त्यमर्षार्थे 'किंकिल' इति निपातसमुदाये अस्त्यर्थे धातौ चोपपदे कालसामान्ये लृडेव । यथा—

किंकिल त्वमसत्य वक्ष्यसि । अस्ति भवति विद्यते वा अस्तिमान् भवान् परान्न भोक्ष्यते ।

(११८३) **जातुयदोर्लिङ्** । ३ । ३ । १४७ । (यदायद्योरुपसख्यानम्)

अनवक्लृप्त्यमर्षयोरित्येव । लृटोऽपवाद । यथा—

जातु यद्यदा यदि वा त्वादृशो हरि निन्देत् नावकल्पयामि ।

(११८४) **यच्चयत्रयोः** । ३ । ३ । १४८ ।

यथा—यच्च यत्र वा त्वमेव कुर्या न श्रद्दधे न मर्षयामि ।

(११८५) **गर्हायां च** । ३ । ३ । १४९ ।

यच्चयत्रयोरुपपदयोर्लिङ् । यथा—

यच्च यत्र वा परदारान् गच्छे —गर्ह्यमेतत् ।

(११८६) **चित्रीकरणे च** । ३ । ३ । १५० ।

यच्च यत्र वा कामनाम्नि पदैर्जेष्यन्मिमीत—चित्रमेतत् ।

(११८७) **शेषे लृङ्यदौ** । ३ । ३ । १५१ ।

यच्चयत्राभ्यामन्यत्र चित्रीकरण शेष । तत्र लृट् यदिशब्दस्य प्रयोगाभावे । यथा—

आश्चर्यमन्वो नाम कृष्ण द्रक्ष्यति ।

यदिप्रयोगे तु—आश्चर्य यदि मन्द परीक्षायामुत्तरेत् ।

(११८८) **उताप्योः समर्थयोर्लिङ्** । ३ । ३ । १५२ ।

बाढमित्यर्थे अनयो. समानार्थता । यथा—

उतायमवीयीत । अप्ययमवीयीत—बाढमध्येष्यत इत्यर्थ ।

(११८९) **कामप्रवेदनेऽकच्चिति** । ३ । ३ । १५३ ।

स्वाभिप्रायाविष्करण कामप्रवेदनम् । तस्मिन् गम्यमाने कच्चिद्भिन्ने उपपदे धातो कालत्रये लिङ् । यथा—कामो वे भुञ्जीत भवान् ।

कच्चिति तु—'कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता ।

(११९०) **सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे** । ३ । ३ । १५४ ।

सम्भावन क्रियासु योग्यताध्यवसानम् । शक्ति श्रद्धानम् । तस्मिन्नर्थे अलशब्दप्रयोग विनैव द्योत्ये धातो कालत्रये लिङ् । यथा—अलमय शिरसा गिरि भेत्तु इत्यर्थे

अपि गिरिं शिरसा भिन्द्यात् । अपि द्रोणमत्र भुञ्जीत ।

(११९१) **विभाषा धातौ सम्भावनवचनेऽयदि** । ३ । ३ । १७५ ।

सम्भावनवाचिनि धातावुपपदे पूर्वोक्त वा । न तु यच्छब्दप्रयोगे ।

सम्भावयामि भुङ्क्ते भोक्ष्यते वा भवान् । यत्प्रयोगे तु पूर्वेण नित्य लिङ्—सम्भावयामि यद् भुञ्जीत भवान् ।

(११९२) हेतुहेतुमतोर्लिङ् । ३ । ३ । १५६ ।

कार्यकारणभावे द्योत्ये धातोर्वा लिङ् । क्रियातिपत्तौ लृङ् । यथा—कृष्ण नमेच्चेत् सुख यायात् । नमति चेत् सुख याति । नस्यति चेत् सुख यास्यति ।

(११९३) इच्छार्थेषु लिङ्लोटौ । ३ । ३ । १५७ । (कामप्रवेदने इति वाच्यम् ।)

इच्छार्थेषु धातुपपदेषु सर्वलकारापवादौ लिङ्लोटौ । यथा—इच्छामि भुञ्जीत भवान् । भुङ्क्ता वा ।

(११९४) समानकर्तृकेषु तुमुन् । ३ । ३ । १५८ ।

इच्छार्थकेषु धातुषु समानकर्तृकेषु उपपदे तुमुन् । यथा—इच्छामि भोक्तुम् । भिन्नकर्तृके तु—इच्छामि भुञ्जाते भवान्, भुङ्क्ता वा इति पूर्वसूत्रेण लिङ्लोटावेव ।

(११९५) लिङ् च । ३ । ३ । १५९ ।

तुमुन्विषये लिङ् च । यथा— इच्छामि भुञ्जीयेति ।

(११९६) इच्छार्थेभ्यो विभाषा वर्तमाने । ३ । ३ । १६० ।

पक्षे यथाप्राप्तो लट् । इच्छति, इच्छेत् । वाञ्छति, वाञ्छेत् ।

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ् । ३ । ३ । १६१ ।

लोट् च । ३ । ३ । १६२ ।

व्याख्यात सूत्रद्वयमत्रोदाह्रियते—

विधि शास्त्रचोदना—अहरह सन्ध्यामुपासीत । उपास्ता वा ।

निमन्त्रणमावश्यके कार्ये नियोग—श्राद्ध भुञ्जीत भवान्, भुङ्क्ता वा ।

आमन्त्रण कामचारानुज्ञा—इहासीत भवान्, आस्ता वा ।

अधीष्ट सत्कारपूर्वो व्यापार—मम पुत्र भवानुपनयेत्, उपनयतु वा ।

सम्प्रश्न सम्प्रधारणम्—किन्नु भो व्याकरणमधीयीय, अधीयै वा ।

प्रार्थना याच्ञा । —पुत्रमह लभेय, लभै वा ।

विध्यादयः प्रवर्तनाभेदा इत्येव ।

(११९७) **प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च** । ३ । ३ । १६३ ।

एषु धातो कृत्यप्रत्यया लोट् च । यथा—

विधिभेद प्रैष —त्वया कट कार्य कर्तव्य, क्रियता वा ।

कामचाराभ्यनुज्ञातिसर्ग —यष्टव्य त्वया, इज्यता वा ।

अवसरप्राप्तिबोधन प्राप्तकाल —अथ भोक्तव्य त्वया, भुज्यता वा ।

'यजता पाण्डव स्वर्ग-
मवतिवन्द्रस्तपात्विन } अतिसर्ग ।

वय हनाम द्विषत
सर्व स्वार्थ समीहते' } प्राप्तकाल ।

(११९८) **कालसमयवेलासु तुमुन्** । ३ । ३ । १६७ ।

प्रैषाद्यर्थे द्योत्ये कालार्थकेषूपपदेषु तुमुन् । यथा—

काल समयो वेळानेहा वा भोक्तुम् ।

(११९९) **लिङ्यदि** । ३ । ३ । १६८ ।

कालादिष्वित्येव । कालो यद्भुञ्जीत भवान् ।

(१२००) **अर्हे कृत्यतृचश्च** । ३ । ३ । १६९ ।

योग्यार्थे कृत्या., तृच्, लिङ् च । यथा—

भवता कन्या वोढव्या । भवान् कन्याया वोढा । भवान् कन्या वहेत् ।

(१२०१) **आवश्यकाधमर्ण्ययोर्णिनिः** । ३ । ३ । १७० ।

अवश्यङ्कारी । शत दायी ।

(१२०२) **कृत्याश्च** । ३ । ३ । १७१ ।

अवश्यकार्यम् । अवश्यकृत्यम् । शत देयम् ।

'**लुम्पेदवश्यमः कृत्ये तुं काममनसोरपि**' इति वचनात् समास

अवश्यकार्यम् । अवश्यकर्त्तव्यमित्यादि । एव कर्त्तुकाम, कर्त्तुमना इत्यादपि ।

(१२०३) **शकि लिङ् च** । ३ । ३ । १७२ ।

शक्यर्थे लिङ्, कृत्यप्रत्ययाश्च । यथा—

भवान् भार वहेत् । भवता भारो वोढव्य —भारवहने भवान् शक्त इत्यर्थ ।

आशिषि लिङ्लोटौ । ३ । ३ । १७३ । व्याख्यातम् । भूयात्, भवतात् ।

(१२०४) **माङि लुङ्** । ३ । ३ । १७५ ।

माङ् इति निपाते उपपदे धातोर्लुङ् सर्वलकारापवाद । 'न माङ्योगे' (४७०) इत्यडाटो प्रतिषेध । यथा—

मा त्व भैषी । मैव भाषिष्ठा । मा पीडा भूत् ।

लोडपि दृश्यते—मास्तु, अनृत मा वद ।

(१२०५) स्मोत्तरे लङ् च । ३ । ३ । १७६ ।

चालुङ्— मास्म करोत्, कार्षीद्वा ।

(१२०६) धातुसम्बन्धे प्रत्ययाः । ३ । ४ । १ ।

धात्वर्थसम्बन्धो धातुसम्बन्ध । स च विशेषणविशेष्यभाव । तदनुसारेण यथाकालोक्ता प्रत्यया स्यु । कालस्यापेक्षिकत्वात् विशेष्यक्रियाकालापेक्षया विशेषणक्रियाया भूतभविष्यद्वर्त्तमानव्यवहार इत्यर्थ । प्रत्यया इति सामान्यग्रहणात् न केवल कृत्सु लकारेषु च, अपि तु तद्धितेष्वप्ययमेव नियम । यथा—

'सीतां परिणीयागच्छन् रामो जामदग्न्येनाधर्षि'

अत्र आगच्छन्निति वर्त्तमानकालो धर्षणापेक्षया ।

"कदा वाराणस्याममरतटिनीरोधसि वसन्
प्रसीदेति क्रोशन् निमिषमिव नेष्यामि दिवसान्"

अत्र वसन् क्रोशन् इति लट शता नेष्यामीति भविष्यदपेक्षया ।

'अय ग्रन्थो मासादर्वाक् पूर्णो भविष्यति'

अत्र भविष्यदपेक्षया पूर्ण इति भूते निष्ठा ।

'गतवानस्मि काशीम्'—अत्रास्मीति कथनकालापेक्षया गतवानिति भूते क्तवतु ।

'कीर्त्तिमानासीन्नृपो राजा'—अत्र कीर्त्तिरस्यास्तीति कीर्त्तिमान् इति तद्धिते अस्तीति वर्त्तमानकाल आसीदिति भूतापेक्षया ।

(१२०७) क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः । ३ । ४ । २ ।

पौन पुन्य भृशार्थश्च क्रियासमभिहार इत्युक्तम् । तस्मिन् द्योत्ये धातो सर्वलकारापवादो लोट् । लोटश्च सर्वतिङपवादो हिस्वौ । (आन्तरतम्यात् परस्मैपदिनां हि आत्मनेपदिनां स्व) । तध्वमोर्विषये पर हिस्वौ विकल्पेनैव । 'क्रियासमभिहारे द्वे वाच्ये' इति वार्त्तिकात् द्वित्वम् । यथा—

लुनीहि लुनीहीलय लुनाति—इमे लुनन्ति इत्यादि ।

लोट सर्वलकारापवादत्वात्—

लुनीहि लुनीहीत्ययमलुनात् लविष्यति वा । एवमधीष्वाधीष्वेत्ययमधीते—अध्यगीष्ट अध्येष्यते वा ।

(१२०८) **समुच्चयेऽन्यतरस्याम्** । ३ । ४ । ३ ।

अनेकक्रियासमुच्चये लोट्, लोटो हिस्वौ वा च तध्वमोरिति सर्वं वा स्यात् । पक्षे यथाप्राप्तं लकारा । यथा—

गजान् बधान, अश्वानुच्चाटय, रथानुत्पाटय, पदातीस्ताडयेति युध्यते वीर । पक्षे—गजान् बध्नाति, अश्वानुच्चाटयति, रथानुत्पाटयति, पदातीस्ताडयति ।

बन्धनोच्चाटनोत्पाटनताडनानि विशेषभूतानि सामान्ये युद्धक्रियाया सामान्यविशेषभावेन सम्बध्यन्ते ।

"पुरीमवस्कन्द लुनीहि नन्दनं लुनाण रत्नानि हरामरद्विषः ।
विगृह्य चक्रं नमुचिद्विषो बली य इत्थमस्यास्यमहर्दिवं दिव ॥

अत्रानुप्रयोगे नियमं करोति—

(१२०९) **यथाविध्यनुप्रयोगः पूर्वस्मिन्** । ३ । ४ । ४ ।

पूर्वस्मिन् क्रियासमभिहारे लोड्विधौ लोट्प्रकृतिरेव धातुरनुप्रयोक्तव्य ।

(१२१०) **समुच्चये सामान्यवचनस्य** । ३ । ४ । ५ ।

समुच्चये लोड्विधौ सामान्यवाची धातुरनुप्रयोक्तव्य । तथैव उभयमप्युदाहृतम् ।

(१२११) **अभिज्ञावचने लृट्** । ३ । ३ । ११२ ।

भूत इत्यनुवर्तते । अभिज्ञा स्मृति । तद्वाचिनि धातावुपपदे भूते लृट् । यथा—स्मरसि कृष्ण गोकुले वत्स्याम ।

(१२१२) **न यदि** । ३ । ३ । ११३ ।

यच्छब्दसहितेऽभिज्ञावचने उपपदे भूते न लृट् । यथा—

अभिजानासि कृष्ण यद् गोकुले अवसाम ।

(१२१३) **विभाषा साकांक्षे** । ३ । ३ । ११४ ।

लक्ष्यलक्षणभावेन साकांक्षत्वे उक्तविषये लृट् वा स्यात् । यथा—

स्मरसि कृष्ण गोकुले वत्स्याम, तत्र ते पश्चाराधिष्याम ।

अत्र वासो लक्षणम् । चारण इत्यम् । पक्षे लडपि ।

(१२१४) लट् स्मे ।३।२।११८।

स्मशब्दे उपपदे भूते लट् । लिङोऽपवाद । यथा—

यजति स्म युधिष्ठिर ।

एव परिसमाप्ते धात्वधिकारे धातू ना नानाविधानुबन्धकरणस्य विकृतैर्वर्णैः पाठस्य च फल प्रक्रियासर्वस्वादुद्घृत्य प्रदर्श्यते—

"उदात्तेत्त्वानुदात्तेत्त्वस्वरितेत्त्वविभागकृत् ।
एधादीनामकारोऽन्त्य कथादीना त्वबृद्धिकृत् ॥

एध वृद्धौ—एधते । गद व्यक्तायां वाचि—गदति । लिह आस्वादने—लेढि लीढे ।

आदिदीदिच निष्ठायामनिट्त्वार्थ कृतावुभौ ।
भावादिकर्मणोर्वेट् स्यादादितः मिति भिद्यते ॥

ष्विदा—अस्वेदित अस्वेदो वा चैत्र । स्विन्न स्वेदित वा चैत्रेण । मदी हर्ष ग्लेपनयो —मत्त, मत्तवान् ।

इदित्व हि नुमर्थं स्यादुदित्व क्त्वीड्विकल्पकृत् ।
ऊदित्व हीड्विकल्पार्थमृदित्व ङ्हस्वनापक ॥

णिदि कुत्सायां—निन्दति । असु क्षेपे—अक्षि त्वा, अस्त्वा ।
ञपूष् लज्जाया—ञपिष्यते, ञप्स्यते । नाधृ याच्ञायां—अननाथत् ।

लदित्व लुङचङर्थं स्यादेदित्व सिच्यवृद्धिकृत् ।
निष्ठानत्वार्थमोदित्व ङित्तङर्थौ द्वयाथ ञित् ॥

शक्लृ शक्तौ—अशकत् । कटे वर्षावरणयो —अकटीत् । ओ हाए त्यागे—हीन, हीनवान् । ङीङ् विहायसा गतौ—ङयते । णीञ् प्रापणे—नयति, नयते ।

इरित्त्वमङ्विकल्पार्थं षित्त्व भा वेऽङ्विधायकम् ।
ञि वर्त्तमाने क्तार्थोऽय ङुटुशः दौ ऋचधुच्फलौ ॥

रुधिर् आवरणे—अरुधत्, अरौत्सीत् । क्षमूष् सहने—क्षमा । ञि ष्विदा—स्विन्न । डु कृञ् करणे—कृत्रिमम् । डु नदि समृद्धौ—नन्दथु ।

नकारजावनुस्वारपञ्चमौ झलि धातुषु ।
सकारजशकारश्चे धाद्दवर्गस्तवर्गजः ॥

स्नन्सु = संसु । अन्क्षु = अङ्क्षु । ब्रस्व्रू = ब्रश्व्रू । ष्ठिव्यु = ष्ठिव्यु ।

अनुदात्तात्मता धातोरिण्निषेधार्थमुच्यते ।
उदात्तत्वं च सेट्त्वार्थमिति सर्वत्र दृश्यताम् ॥ "

शक्ल—शक्ष्यति । वद—वदिष्यति ।

विभक्त्यर्थप्रकरणम् ।

प्रसङ्गवशात् पूर्वमेव कारकस्य सामान्यलक्षणमुक्तम् । निरुक्ते प्रधानकारके कर्तृकर्मणी । शेषाणि हेतु-सम्प्रदान-पादान-करणा-धिकरणाख्यानि नामतः परिगणितानि । एवमत्र विभक्त्यर्थप्रकरणे भारो लघूकृतो वर्त्तते । विभक्तेस्तावत् कारकविभक्तिरुपपदविभक्तिरित्यर्थापाधिको द्विविधो भेदः । तत्र कारकविभक्तिर्व्यापकं, निरुक्तस्वरूपं, तत्कारकात्मकं सम्बन्धमाह । अन्या व्याप्यस्वरूपं तत्तदुपपदानुरोधात् भिन्नाभिन्नं सम्बन्धमभिदधाति । अत्र सूत्रक्रमानुरोधेन प्रथमं कारकाणि लक्षयित्वा तदुभे उपपदयोगे च विभक्तीर्विधास्यामः । अमुकस्मिन् कारकेऽमुका विभक्तिः प्रयोक्तव्येति व्यवस्थायामकृतायां कारकाणामुदाहरणमशक्यमिति सा व्यवस्था वृत्तेनात्र पूर्वमेव संगृह्यते—

तेजोवत् प्रथमा स्थितं प्रकटयत्यर्थं, द्वितीया पुनः
स्यात् कर्मण्यथ हेतुकर्तृकरणेष्वेवं तृतीया भवेत् ।
तुर्यार्थः किल सम्प्रदानक,—मपादानार्थिका पञ्चमी,
सप्तम्या ह्यभिधीयतेऽधिकरणं, शेषेषु षष्ठी मता ॥

(१२१९) **कारके** । १ । ४ । २३ ।

इतः परं कारके (क्रियायां) विषये संज्ञा विधीयन्ते । इत्यधिक्रियते ।

(१२१६) ध्रुवमपायेऽपादानम् । १।४।२४।

अपायो विश्लेष, तत्र कारके ध्रुव (स्थिर) अपादानसञ्ज स्यात्। विश्लेषे साध्ये तद्युक्तमवधिभूत अपादानमित्यर्थ । अपादान पञ्चमी वक्तीत्युक्त हि। यथा—

वृक्षात् पर्ण पतति । रथादवरोहति सूत । ग्रामादागच्छति वट्ट । मार्गात् भ्रश्यति पान्थ ।

धावतोऽश्वात् पततीत्यादौ चलतोऽप्यश्वस्य पतनक्रियापेक्ष स्थिरत्वमादायापादानसज्ञा प्रवर्त्तते । बुद्धिकृतमपि सम्बन्ध पुरस्कृत्य कारकाणि भवन्ति । तेन—

आचार्याद्वेदमधीते	पापात् विरमति
हिमवतो गङ्गा प्रवहति	चोरात् बिभेति

इत्यादिषु बौद्ध विश्लेषमवलम्ब्यापादानत्वम् । अत उपलक्षणार्थकै· 'भीत्रार्थानाम् ' इत्यादिभिरुत्तरसूत्रै प्रकृतसूत्रस्य प्रपञ्च एव क्रियत इति बोध्यम् ।

॥ * ॥ **जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्** ।

जुगुप्सादीना विषयभूत कारकमपादानम् । अत्रापि बौद्धो विश्लेष सम्भवतीति प्रपञ्चार्थमेव वार्त्तिकमिदम् । यथा—पापाज्जुगुप्सते, विरमति, स्खलति वा ।

(१२१७) **भीत्रार्थानां भयहेतुः** । १।४।२५।

एषा प्रवोधे भयहेतुरपादानम् । यथा—चोरात् बिभेति । चोराज्जायते ।

(१२१८) **पराजेरसोढः** । १।४।२६।

असोढ असह्य इत्यर्थ । यथा—

अध्ययनात् पराजयते—अध्ययनस्यासह्यत्वात् ग्लानो भवतीत्यर्थ ।

(१२१९) **वारणार्थानामीप्सितः** । १।४।२७।

यथा—यवेभ्यो गा वारयति । निवर्त्तयतीत्यर्थ ।

(१२२०) **अन्तर्धौ येनादर्शनमिच्छति** । १।४।२८।

यत्कर्तृकमदर्शनमिच्छतीत्यर्थ । यथा—मातुर्निलीयते बाल, अन्तर्धत्ते वा ।

(१२२१) **आख्यातोपयोगे** । १।४।२८।

नियमपूर्वकविद्यास्वीकारे गुरुरपादानम् । यथा—उपाध्यायादधीते, पठति वा ।

(१२२३) **जनिकर्तुः प्रकृतिः** । १ । ४ । ३० ।

जायमानस्य हेतुरपादान स्यात् । यथा—गोमयादृश्चिको जायते ।

(१२२७) **भुवः प्रभव** । १ । ४ । ३१ ।

हिमवतो गङ्गा प्रभवति ।

अथ सम्प्रदानम्—

(१२२४) **कर्मणा यमभिप्रैति स सम्प्रदानम्** । १ । ४ । ३२ ।

कर्त्ता कर्मणा यत् प्राप्तुमिच्छति तत् कारक सम्प्रदानसज्ञम् । यथा—

विप्राय गा ददाति	शिष्याय शास्त्रमुपदिशति ।
राज्ञे करमर्पयति	अतिथये पाद्यमुपनयति ।

(१२२५) **रुच्यर्थानां प्रीयमाण** । १ । ४ । ३३ ।

प्रीयमाणस्तर्प्यमाण, प्रीतिभाक् इत्यर्थ । अन्यकर्तृकोऽभिलाषो रुचि । रुच्यर्थाना प्रयोगे प्रीतिभाक् सम्प्रदान स्यात् । यथा—

बालाय रोचते स्वदते वा मोदक —बालक तर्पयतीत्यर्थ ।

(१२२६) **श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान** । १ । ४ । ३४ ।

यथा—गोपी कृष्णाय श्लाघते, स्वकृता श्लाघा कृष्णो जानीयादिति श्लाघत इत्यर्थ ।

एव ह्नुते, शपते, तिष्ठते इति ।

(१२२७) **धारेरुत्तमर्ण.** । १ । ४ । ३५ ।

यथा—देवदत्ताय शत धारयति—शतमितमृण देवदत्ताय प्रत्यर्पणीय वहतीत्यर्थ ।

(१२२८) **स्पृहेरीप्सित** । १ । ४ । ३६ ।

स्पृहयते प्रयोगे आप्तुमिष्ट सम्प्रदानम् । 'कर्तुरीप्सिततम कर्म' इतीप्सिततमत्वे कर्मसज्ञा विधास्यते । यथा—

पुष्पेभ्य स्पृहयति—पुष्पविषयका स्पृहा करोति ।

पुष्पाणि स्पृहयति—अत्र सप्रकर्षा स्पृहा ।

(१२२९) **क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोप** । १ । ४ । ३७ ।

क्रोधोऽमर्ष, द्रोहोऽपकार, ईर्ष्या अक्षमा, असूया गुणेषु दोषाविष्करणम् । एतदर्थकाना प्रयोगे कोपविषय सम्प्रदानम् । क्रोधस्तावत् कोप एव । द्रोहादय क्रोपप्रभवा एव विवक्षिता । अत उक्त सामान्येन 'य प्रति कोप' इति । यथा—

चैद्यो हरये कुध्यति, द्रुह्यतीर्ष्यत्यसूयति वा ।

प्रत्यु—('य प्रति कोप' कि?) भार्यामीर्ष्यति—मैनामन्यो द्राक्षीदिति क्रोपोऽन्यविषयक ।

(१२३०) **क्रुधद्रहोरुपसृष्टयोः कर्म** । १ । ४ । ३८ ।

सोपसर्गयोस्तु क्रुधद्रुहोः प्रयोगे यं प्रति कोपः तत्कारकं कर्मसंज्ञं स्यात् । यथा—देवदत्तमभिक्रुध्यति, अभिद्रुह्यति वा ।

(१२३१) **राधीक्ष्योर्यस्य विप्रश्नः** । १ । ४ । ३९ ।

राधीक्ष्योरत्र शुभाशुभपर्यालोचनमर्थः । तत्र यस्य शुभाशुभे पर्यालोच्येते स सम्प्रदानम् । विप्रश्नः शुभाशुभसम्बन्धी विविधः प्रश्नः । यथा—

गर्गः कृष्णाय राध्यतीक्षते वा—नन्देन पृष्टः कृष्णस्य शुभाशुभरूपं दैवं पर्यालोचयतीत्यर्थः ।

(१२३२) **प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता** । १ । ४ । ४० ।

पूर्वस्य = पूर्वव्यापारस्य । प्रतिश्रवाश्रवावभ्युपगमार्थकौ । येन प्रथमं प्रार्थितः कर्ता अभ्युपगच्छति स सम्प्रदानम् । यथा—विप्राय गां प्रतिशृणोति आशृणोति वा विप्रेण प्रार्थितः प्रतिजानीत इत्यर्थः ।

(१२३३) **अनुप्रतिगृणश्च** । १ । ४ । ४१ ।

पूर्वस्य कर्तुरनुवर्तते । अनुगरः प्रतिगरश्च शंसितुः प्रोत्साहनमभिधत्ते । यथा—होत्रे प्रतिगृणाति, अनुगृणाति वा—शंसन्तं होतारं प्रोत्साहयतीत्यर्थः ।

अथ करणम्—

(१२३४) **साधकतमं करणम्** । १ । ४ । ४२ ।

क्रियासिद्धौ यत् प्रकृष्टोपकारकं तत्कारकं करणसंज्ञं स्यात् । यथा—

दण्डेन ताडयति	हस्तेन गृह्णाति ।
परशुना छिनत्ति	मुष्टिना हन्ति ।

(१२३५) **दिवः कर्म च** । १ । ४ । ४३ ।

दिवुधातोः प्रयोगे तु साधकतमं कर्मसंज्ञं स्यात्, चकारात् करणसंज्ञं च । यथा—अक्षान् अक्षैर्वा दीव्यति ।

(१२३६) **परिक्रयणे सम्प्रदानमन्यतरस्याम्** । १ । ४ । ४४ ।

नियतकालं वेतनादिना भृत्यादेरासन्नितः क्रय एव परिक्रयणं । तत्र क्रियायां साधकतमं सम्प्रदानं करणं वा स्यात् । यथा—शताय शतेन वा परिक्रीतो भृत्यः ।

अथाधिकरणम् —

(१२३७) **आधारोऽधिकरणम्** । १ । ४ । ४५ ।

कर्तुः कर्मणो वा क्रियाश्रयभूतस्य धारणक्रियां प्रत्याधारभूतं कारकमधिकरणसंज्ञं स्यात् । यथा—

कटे आस्ते—कर्तुराधारः । स्थाल्यां पचति तण्डुलान्—कर्मण आधारः ।

औपश्लेषिकः, अभिव्यापकः, वैषयिकश्चेति त्रिविध आधारः सम्भवति । यथा—

ग्रामे वसति—ग्रामस्यैकदेश एव वसतीत्यौपश्लेषिक आधारः ।
तिले तैलं वर्त्तते—सर्वत्र व्याप्य तैलमित्यभिव्यापकः ।
मोक्षे इच्छास्ति—इच्छाया मोक्षविषयत्वाद्वैषयिकः ।

(१२३८) **अधिशीङ्स्थासां कर्म** । १ । ४ । ४६ ।

अधिपूर्वत्वे शीङ्स्थासामाधारः कर्मसंज्ञः । यथा—

तल्पमधिशेते, अधितिष्ठति, अध्यास्ते वा ।

(१२३९) **अभिनिविशश्च** । १ । ४ । ४७ ।

आधारः कर्म स्यात् । प्रायिकश्चायं विधिः । 'एष्वर्थेष्वभिनिविष्टानाम्' इति भाष्य एव प्रयोगदर्शनात् । यथा—सन्मार्गमभिनिविशते ।

(१२४०) **उपान्वध्याङ्वसः** । १ । ४ । ४८ ।

यथा—ग्रामसुपवसति, अनुवसति, अधिवसति, आवसति वा सेना ।

अथ कर्म—

(१२४१) **कर्तुरीप्सिततमं कर्म** । १ । ४ । ४९ ।

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञम् । यथा—

ग्रामं गच्छति । ओदनं भुङ्क्ते । कटं करोति । हरिं भजति ।

अत्र—('कर्तुः' किं?) माषेष्वश्वं बध्नाति—अत्र कर्मण ईप्सिता माषाः न तु कर्तुः ।
('तत्प्रयुक्तः' किं?) पयसा ओदनं भुङ्क्ते—पयोऽपेक्षया ओदनस्य ईप्सिततमत्वात् करणत्वमेव ।

"त्रिविधं कर्म निर्वर्त्त्यविकार्यप्राप्यभेदतः ।
कटं करोति, तक्ष्णोति, वृक्षम्, आदित्यमीक्षते ॥"

(१२४२) **तथायुक्तं चानीप्सितम्** । १ । ४ । ५० ।

अनीप्सितमपीप्सितवत् क्रियया युक्तं कर्म स्यात् । यथा—

विषं भुङ्क्ते । ग्रामं गच्छंस्तृणं स्पृशति ।

(१२४३) **अकथितं च** । १ । ४ । ५१ ।

अपादानादिविशेषैरविवक्षितं च कारकं कर्मसंज्ञम् । ईदृश्यः क्रिया एता एवेति व्याख्यातृभिः परिगणिताः—

दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम् ।
कर्मयुक्स्यादकथित तथा स्यान्नीहृकृष्वहाम् ।

यथा— गा दोग्धि पय —गोरित्यपादानमविवक्षितम् ।
बलि ययाचे वसुधा—बले ,, ,,
तण्डुलानोदन पचति—तण्डुलैरिति करणम् ,,
देवदत्त शत दण्डयति—देवदत्तादित्यपादानम् ,,
व्रजमवरुणद्धि गा —व्रजे इत्यधिकरणम् ,,
माणवक पन्थान पृच्छति—माणवकायेति सम्प्रदानम् ,,
वृक्षमवचिनोति फलानि—वृक्षादित्यपादानम् ,
माणवक धर्म ब्रूते शास्ति वा—माणवकायेति सम्प्रदानम् ,,
शत जयति देवदत्त (द्यूते)—देवदत्तादित्यपादानम् ,,
सुधा क्षीरनिधि मथ्नाति—क्षीरनिधेरित्यपादानम् ,,
पान्थ शत मुष्णाति चोर —पान्थात् ,, ,,
ग्राममजा नयति, हरति, कर्षति, वहति वा—ग्रामे इत्यधिकरणम् ।

अर्थनिबन्धनेय परिगणना । तेन

बलि भिक्षते—प्रार्थयते वसुधाम् इत्यावृद्ध्यम् ।

(१२४४) **गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्त्ता स णौ ।१।४।५२।**

अणौ अण्यन्तावस्थाया केवलक्रियाया कर्त्ता अणि कर्त्ता । (स इति कर्त्ता परामृश्यते) स णौ = णिसहितायामवस्थायाम् । गतिबुद्धिभुक्त्यर्थानां शब्दकर्मकाणा अकर्मकाणा च धातूना अण्यन्तावस्थाया कर्त्ता ण्यन्तावस्थाया कर्म स्यात् । उक्ताना क्रियाणा प्रयोज्यकर्त्ता कर्म स्यादित्यर्थ । यथा—

"शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृत देवान्वेदमध्यापयद्विधिम् ॥
आसयत् सलिले पृथ्वी य स मे श्रीहरिर्गति ।"

गत्यर्थादिभिन्नानां तु कर्त्तरि तृतीयैव । यथा—

पाचयत्योदन देवदत्तेन ।

(१२४५) **हृक्रोरन्यतरस्याम् ।१।४।५३।**

अणि कर्त्ता णौ वा कर्म स्यात् । यथा—

हारयति भार भृत्यान्, भृत्यैर्वा । कारयति कट देवदत्त, देवदत्तेन वा ।

अकर्मकधातुभिर्योगे देश कालो भावो गन्तव्योऽध्वा च कर्मसज्ञक इति वाच्यम् । यथा—

देश कुरुपाञ्चालादि —कुरून् स्वपिति । कालो मुहूर्तमासादि —निशा जागर्त्ति । भाव क्रियोपयुक्त काल —गोदोह विहरति बाल । गन्तव्योऽध्वा क्रोशयोजनादि —क्रोश धावति रथी ।

क्रियाविशेषणानां कर्मसज्ञा वाच्या ।

मन्द गच्छति । मृदु हसति । व्यक्तमाह ।

अथ कर्त्ता—

स्वतन्त्रः कर्त्ता । १ । ४ । ५४ । (व्याख्यातम् ७७८) यथा—

देवदत्तेन पच्यते	देवो वर्षति	तूलिका लिखति ।
इक्षुणा स्थीयते	स्थाली पचति	कालिदासेन कृतो ग्रन्थ ।

तत्प्रयोजको हेतुश्च । १ । ४ । ५५ । (व्याख्यातम् ७७९) यथा—

पाचयत्योदन देवदत्तेन यज्ञदत्त । गुरु शिष्यान् शास्त्रमध्यापयति ।

नाम्ना क्रियया सम्बन्धो हि कारकव्यपदेशस्य निमित्तम् । स च दूर आसन्नो वा भवति । तत्र अपादानस्य दविष्ठ सम्बन्ध, तत सम्प्रदान-करण—अधिकरण—कर्मणाम् इति दूरताया अवरोहेण, आसत्तेरारोहेण वा क्रम । अत्र प्रथम क्रममुपात्तवानाचार्य एकसज्ञाधिकारे 'विप्रतिषेधे पर कार्यम्' इति परिभाषाया अनुरोधात् । एव च यथायथा सम्बन्ध आसन्नस्तथा तथा बलीय कारकमिति सिद्धम् ।

अथ कारकाणामर्थे उपपदयोगे च विभक्तयो विधीयन्ते—

कारकाणि तावद्विभक्तिभिन्नाना प्रत्ययानामन्येषा चार्थतया दृश्यन्ते । यथा—लकारा कर्तृकर्मकारकयोर्विहिता । कृत्प्रत्ययास्तयो, 'करणाधि-करणयोश्च (ल्युट्)' 'भीमादयोऽपादाने' इत्यन्येष्वपि कारकेषु दृश्यन्ते । तद्धिता 'तेन क्रीत' 'तत आगत' इति नानाकारकार्थेषु भवन्ति । समासा 'प्राप्तमुदक य स प्राप्तोदको ग्राम' इत्यादौ कारकार्थेषूपलभ्यन्ते । निपाताश्च सन्ति कर्माद्यर्थेषु साम्प्रत (युक्तम्) इत्यादय । एवमन्यथासिद्धे कारकार्थे विभक्तीना नावसर इति स्पष्टीकर्त्तुम् अधिकरोत्याचार्य—

(१२४६) **अनभिहिते । २ । ३ । १ ।**

इति । तिङ्कृत्तद्धितसमासनिपातैरनुक्त एव कारके विभक्तयो विधीयन्त इत्यर्थः । उक्ते पुनः कारके प्रथमा विधास्यते । इह हि पदमेव प्रयोगार्हम् । पदं च सुतिङ्प्रत्ययान्यतरान्तम् । अत एव विभक्तियोगानर्हेष्वव्ययेषु प्रथमां विभक्तिमुत्पाद्य लोपयन्ति पाणिनीयाः । उक्तसिद्धान्तानुरोधेनाभिहिते कारके प्रथमा भवति । यथा—

देवदत्त ओदनं पचति—अनभिहिते कर्तरि प्रथमा ।
देवदत्तेनौदनः पच्यते— ,, कर्मणि ,, ।

(१२४७) **कर्मणि द्वितीया । २ । ३ । २ ।**

अनभिहिते कर्मणि द्वितीया स्यात् । इह त्रिविधं कर्म सम्भवति—निर्वर्त्यं, विकार्यं, प्राप्यं चेति । यथा—

कटं करोति—निर्वर्त्यम् । वृक्षं तक्षतीति—विकार्यम् । सूर्यमाप्नोति—प्राप्यम् ।

द्विकर्मकेषु कतरस्य कर्मणोऽभिधानमिति व्यवस्था क्रियते—

(१) **गौणे कर्मणि दुह्यादेः** (२) **प्रधाने नीहृकृष्वहाम् ।**
(३) **बुद्धिभक्ष्यार्थयोः शब्दकर्मणां च निजेच्छया ।**
(४) **प्रयोज्यकर्मण्यन्येषां पयन्तानां लादयो मताः ।**

(१) दुहादीनां द्वादशानाम् 'अकथितं च' इति विहितेऽप्रधाने कर्मणि लकाराः क्तादयश्च भवन्ति । अतस्तत् कर्माभिहितम्—यथा—

गौः पयो दुह्यते । बलिर्वसुधां याच्यते ।

(२) नीहृकृष्वहां चतुर्णां प्रधानं कर्माभिहितम् । यथा—

अजो ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते वा ।

(३) 'गतिबुद्धि.....' इति विहिते कर्मणि बुद्धिप्रत्यवसानार्थ-शब्दकर्मणां प्रधानमप्रधानं वा यथाविवक्षितमभिहितम् । यथा—

बटुर्वेदमध्याप्यते । वेदो बटुमध्याप्यते वा ।

(४) अन्येषां गत्यर्थाकर्मकहरतिकरोतीनां प्रयोज्यकर्माभिहितम् । यथा—देवदत्तो ग्रामं गम्यते ।

॥*॥ **उभसर्वतसोः कार्या धिग्युपर्यादिषु त्रिषु ।**
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥

उभयत· सर्वत· धिक् एषा, द्विरुक्तानाम् उपरि, अधि, अधस् एषां च उपपदानां योगे द्वितीया वक्तव्या । अन्येषामपि निपातानां योगे द्वितीया दृश्यते इति वार्त्तिकार्थ । यथा—

उभयतो नदीं शाद्वल—नद्या उभयो पार्श्वयोरित्यर्थ । सर्वत कृष्ण गोप्य—कृष्णस्य समन्तादित्यर्थ । धिक्कृष्णाभक्त—कृष्णाभक्तो निन्द्य इत्यर्थ । भुवमुपर्युपरि भुवरादयो लोका । भुवमधि प्रवहादयो वायव । भुवमधोऽतलादयो लोका ।

॥*॥ **अभितःपरितःसमयानिकषाहाप्रतियावद्वतेयोगेऽपि** । यथा—

अभित परितो वा कृष्ण गोप्य—कृष्णस्य समन्तात । ग्राम समया निकषा वा नदी—ग्रामस्य समीपे । हा कृष्णाभक्त—तस्य शोच्यतेत्यर्थ । बुभुक्षित न प्रति भाति किञ्चित्—बुभुक्षितस्येत्यर्थ । नदीं यावत्—नदीपर्यन्तमित्यर्थ ।श्रद्धामृते—श्रद्धा विनेत्यर्थ ।

(१२४८) अन्तरान्तरेणयुक्ते ।२।३।४। यथा—

'अङ्गनामङ्गनामन्तरा माधवो
माधव माधव चान्तरेणाङ्गना' } अङ्गनयोर्माधवयोश्च मध्ये ।
'अथ त्वामन्तरेण कीदृशी तरया दृष्टि '— त्वामधिकृत्य ।
अन्तरेण हरिं न सुख — हरि विनेत्यर्थ ।

(१२४९) कालाध्वनोरत्यन्तसंयोगे ।२।४।५।

द्रव्यगुणक्रियाभि साकल्येन सम्बन्धोऽत्यन्तसयोग । तस्मिन् द्योत्ये कालवाचिभ्योऽध्ववाचिभ्यश्च द्वितीया । यथा—

मास अधीते मासव्यापकमध्ययनम् । कालस्य क्रियया अत्यन्तसयोग ।
,, कल्याणी ,, कल्याणत्वविशिष्टा ,, गुणेन ,,
,, गुडधाना मासव्यापिन्य ,, द्रव्येण ,,

एवमध्वनोऽपि—क्रोशमधीते । क्रोश कुटिला नदी । क्रोश गिरि ।

(१२५०) अपवर्गे तृतीया ।२।३।६।

अपवर्ग. फलप्राप्ति सत्या क्रियापरिसमाप्ति । तस्मिन् द्योत्ये कालाध्वनोरत्यन्तसयोगे तृतीया स्याद् द्वितीयापवाद । यथा—

मासेनानुवाकोऽधीत
क्रोशेनानुवाकोऽधीत } अधीतो ज्ञातश्चेत्यर्थ ।

(१२६१) **सप्तम्यधिकरणे च** । २ । ३ । ७ ।

'अत्यन्तसंयोगे' इति निवृत्तम् । 'कालाध्वनो'–रिति परमनुवर्त्तते । कार-कयोर्मध्ये यौ कालाध्वानौ तद्वाचिभ्यः सप्तमीपञ्चम्यौ स्तः । यथा—

अद्य भुक्त्वा देवदत्तः श्वोहात् श्व्हे वा भोक्ता—अत्र भुक्तिकर्त्रोर्मध्यकालो विभक्त्यर्थः ।

अत्रस्थो धानुष्कः क्रोशात् क्रोशे वा लक्ष्यं विध्येत्—अत्र कर्तृकर्मणोर्मध्येऽध्वा विभक्त्यर्थः ।

(१२५२) **कर्मप्रवचनीययुक्ते द्वितीया** । २ । ३ । ८ ।

प्रादिषु केचिदर्थविशेषे कर्मप्रवचनीयसंज्ञाः । तान् प्रकरणान्ते निरूपयिष्यामः । तेषां योगे द्वितीया स्यात् । वृक्षं प्रति विद्योतते विद्युत् इत्युदाहरणम् ।

(१२५३) **यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी** । २ । ३ । ९ ।

कर्मप्रवचनीययोगे द्वितीयापवादः सप्तमी विधीयते । अधिकमित्यर्थे यतोऽधिकं तस्मात् सप्तमी । यन्निष्ठमीश्वरत्वं तस्मादपि सप्तमी । यथा—

उप परार्धे हरेर्गुणाः—परार्धादधिका इत्यर्थः । अधि रामे भूः—रामाधीना भूरित्यर्थः ।

(१२५४) **पञ्चम्यपाङ्परिभिः** । २ । ३ । १० ।

एभिः कर्मप्रवचनीयैर्योगे पञ्चमी । यथा—

अप परि वा त्रिगर्त्तेभ्यो वृष्टो देवः—त्रिगर्त्तान् वर्जयित्वेत्यर्थः ।

आ पाटलीपुत्राद्वृष्टो देवः—पाटलीपुत्रमभिव्याप्य विहाय वा ।

(१२५५) **प्रतिनिधिप्रतिदाने च यस्मात्** । २ । ३ । ११ ।

यदपेक्षः प्रतिनिधिः प्रतिदानं वा अर्थो गम्यते तस्मात् च पञ्चमी । 'प्रतिः प्रतिनिधिप्रतिदानयोः' इति विहितस्य प्रतेर्योगे पञ्चमीति तात्पर्यम् । यथा—अभिमन्युरर्जुनात् प्रति—अर्जुनस्य प्रतिनिधिरित्यर्थः ।

तिलेभ्यः प्रति यच्छति माषान्—माषैस्तिलान् क्रीणातीत्यर्थः ।

(१२५६) **गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि** । २ । ३ । १२ ।

अध्वभिन्ने गत्यर्थानां कर्मणि द्वितीयाचतुर्थ्यौ स्तः, चेष्टायां गम्यमा-नायाम् । चेष्टा चलनम् । यथा—

ग्रामं ग्रामाय वा गच्छति—अध्ववाचकेभ्यस्तु पन्थानं गच्छति ।
चेष्टाभावे तु—मनसा हरिं व्रजति ।

(११९७) **चतुर्थी सम्प्रदाने** । २ । ३ । १३ ।

विप्राय गां ददातीत्यादुदाहरणम् ।

॥ * ॥ **तादर्थ्ये चतुर्थी वा वाच्या** । यथा—
यूपाय दारु । कुण्डलाय हिरण्यम् । अवहननायोलूखलम् ।

॥ * ॥ **क्लृपि सम्पद्यमाने च** ।

क्लृप्त्यर्थकधातुप्रयोगे य सम्पद्यते तस्मात् चतुर्थीत्यर्थ । यथा—
भक्तिर्मोक्षाय कल्पते, सम्पद्यते, जायते भवति वा ।
प्रकृतिविकृत्योर्भेदविवक्षायामेवेदम् । अभेदविवक्षायां तु प्रथमैव । यथा—
मृद् घट सम्पद्यते ।

॥ * ॥ **हितयोगे च** । यथा—ब्राह्मणाय हितम् ।

(१२५८) **क्रियार्थोपपदस्य च कर्मणि स्थानिनः** । २ । ३ । १४ ।

क्रियार्था क्रिया उपपद यस्य सोऽय क्रियार्थोपपद, 'तुमुन्ण्वुलौ क्रियाया क्रियार्थायाम्' इत्यस्य विषयो लक्ष्यते । अर्थसिद्धस्य तुमुन्नन्तस्य कर्मणि चतुर्थी स्यादित्यर्थ. । यथा—

पुष्पाय व्रजति —पुष्पमाहर्त्तुमित्यर्थ ।
नगराय प्रतिष्ठते—नगर गन्तुम् ,, ।
पत्ये शेते —पतिमनुकूलयितुमित्यर्थ ।

(१२९९) **नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च** । २ । ३ । १६ ।

निपातैरेतैर्योगे चतुर्थी स्यात् । यथा—

नमो देवेभ्य	स्वधा पितृभ्य
स्वस्ति प्रजाभ्य	दैत्येभ्यो हरिरल—पर्याप्त इत्यर्थ ।
स्वाहा अग्नये	वषडिन्द्राय

अलमिति पर्याप्त्यर्थग्रहणम् । तेन दैत्येभ्य पर्याप्त इत्याद्यपि ।

(१२६०) **मन्यकर्मण्यनादरे विभाषाप्राणिषु** । २ । ३ । १७ ।

मन्यते कर्मणि प्राणिवर्जिते चतुर्थी वा स्यादनादरे गम्यमाने ।
यथा—न त्वा तृणाय मन्ये, तृण मन्ये वा । न त्वा लोष्टाय मन्ये, लोष्ट मन्ये वा ।

॥ * ॥ **अप्राणिष्वित्यपनीय लौकाकाक्षशुकसुगालवर्जमिति वाच्यम्** ।

न त्वा शुने मन्ये, श्वान वा । नावादिभ्यस्तु द्वितीयैव—न त्वा सृगाल मन्ये ।

(१२६१) **कर्तृकरणयोस्तृतीया** । २ । ३ । १८ । यथा—

रामेण बाणेन हतो बाली ।

॥ * ॥ **प्रकृत्यादिभ्य उपसख्यानम्** । यथा—

प्रकृत्या चारु	समेन धावति
प्रायेण याज्ञिक	विषमेण धावति
गोत्रेण गार्ग्य	द्विद्रोणेन धान्य क्रीणाति ।
'नाम्ना सुतीक्ष्ण	चरितेन दान्त '

(१२६२) **सहयुक्तेऽप्रधाने** । २ । ३ । १९ ।

सहार्थकेन युक्ते अप्रधाने तृतीया स्यात् । अप्रयुक्तेऽपि सहार्थके तृतीयेष्यते । पाणिनिरेव हि 'वृद्धो यूना' इति प्रयुक्तवान् । यथा—

पुत्रेण सहागत पिता—साक, सार्ध वा । शिष्यैर्गतो गुरु—शिष्यै सहेत्यर्थ ।

(१२६३) **येनाङ्गविकारः** । २ । ३ । २० ।

येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया । यथा—

अक्ष्णा काण । पाणिना कुणि । पादेन खञ्ज ।

(१२६४) **इत्थंभूतलक्षणे** । २ । ३ । २१ ।

कञ्चित् प्रकार प्राप्त इत्थभूत. । तस्य लक्षणमित्थंभूतलक्षणम् । तस्मात् तृतीया स्यात् । यथा—

जटाभिस्तापस —जटारूपलक्षणज्ञापिततापसत्वविशिष्ट ।
पुस्तकेन विद्वान्—पुस्तकरूप ,, विद्वत्त्व ,,
काषायेण यती—काषाय ,, यतित्व ,,

(१२६५) **हेतौ** । २ । ३ । २३ ।

फलसाधनयोग्य. पदार्थ फल चात्र हेतुशब्देन विवक्ष्यते । क्रिया-मात्रसाधक करणमिति करणे तृतीयाया अप्राप्तौ हेतौ तृतीयाविधिरार-भ्यते । यथा—

दण्डेन घट । धनेन कुलम् । | कन्यया शोक । विद्यया यश ।
अध्ययनेन वसति । आशया धावति ।

॥ * ॥ **वारणार्थकालंयोगे पूर्वावरोनार्थकादियोगे च तृतीयेष्यते** ।

अल भयेन — भय मास्त्वित्यर्थ । मासेन पूर्व, मासेनावर, भयेन हीन:, पञ्चभिरून गुडैर्मिश्र इत्यादि ।

॥ * ॥ **अशिष्टव्यवहारे दाण प्रयोगे चतुर्थ्यर्थे तृतीया ।** यथा—
दास्या वन सयच्छते कामुक । शिष्टव्यवहारे तु—भार्यायै वन यच्छति ।

(१२६६) **अकर्तर्यृणे पञ्चमी ।२।३।२४।**

कर्तृभिन्नादृणवाचिनो हेतुभूतात् पञ्चमी तृतीयापवाद । यथा—
शतात् बद्ध —शतमितर्णहेतुको बन्ध ।

(१२६७) **विभाषा गुणेऽस्त्रियाम् ।२।३।२५।**

गुणहेतावस्त्रीलिङ्गे विभाषा पञ्चमी स्यात् । यथा—
जाड्यात्, जाड्येन वा बद्ध । पाण्डित्यात्, पाण्डित्येन वा मुक्त ।

व्यवस्थितविभाषाश्रयणादगुणे स्त्रियामपि वा पञ्चमी । यथा—
पर्वतो वह्निमान् धूमात् । नास्ति घटोऽनुपलब्धे ।

(१२६८) **षष्ठी हेतुप्रयोगे ।२।३।२६।**

हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी स्यात् । यथा—
अन्नस्य हेतोर्वसति । अध्ययनस्य हेतोर्वसति ।

(१२६९) **सर्वनाम्नस्तृतीया च ।२।३।२७।**

सर्वनाम्ना विशेषितस्य हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी तृतीया च ।
यथा— कस्य हेतो, केन हेतुना वा वसति ।

॥ * ॥ **निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम् ।** यथा—
किं निमित्त, कस्मै निमित्ताय । कस्मिन् निमित्ते वा वसति ।

(१२७०) **अपादाने पञ्चमी ।२।३।२८।**

ग्रामादागच्छतीत्याद्युदाहरण दत्तमेव ।

॥ * ॥ **ल्यब्लोपे कर्मण्यधिकरणे चोपसंख्यानम् ।**

उचितस्य ल्यबन्तधातोरर्थसिद्धस्य कर्मण्यधिकरणे च पञ्चमी ।
यथा— प्रासादात् प्रेक्षते—प्रासादमारुह्येत्यर्थ । आसनात् प्रेक्षते—आसने उपविश्य ।

॥ * ॥ **यतश्चाध्वकालनिमान तत्र पञ्चमी । तद्युक्तादध्वनः प्रथमासप्तम्यौ । कालात् सप्तमी च वक्तव्या ।** यथा—
वनात् ग्रामो योजन योजने वा । कार्त्तिक्या आग्रहायणी मासे ।

(१२७१) **अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते ।२।३।२९।**

एतां योगे पञ्चमी । अन्य इत्यर्थग्रहणम्, इतरस्य पृथग्ग्रहणं तु प्रपञ्चार्थम्, 'आरात्' 'ऋते' इत्येतौ निपातौ । दिशि दृष्ट शब्दो दिक्छब्द , —पूर्वपश्चिमदक्षिणोत्तरा । अञ्चूत्तरपदा प्राक्प्रत्यगुदगवाञ्च., आजाही तद्धितप्रत्ययौ । यथा—

कृष्णादन्य परमितर वा न भजे ।	उदक पर्वतान्नदी ।
ग्रामादारान्नदी ।	दक्षिणा ग्रामात् मम गृहम् ।
ऋते मोक्षान्न सुखम् ।	उत्तराहि ,, श्वशुरस्य ,,
पूर्व उत्तरो वा ग्रामात् पर्वत ।	

दिक्च्छब्दस्य कालवाचिनोऽपि योगे पञ्चमीष्यते ।

चैत्रात् पूर्व फाल्गुन ।

(१२७२) **षष्ठ्यतसर्थप्रत्ययेन** । २ । ३ । ३० ।

'दक्षिणोत्तराभ्यामतसुच्' इति तद्धिते अतसुच् विधीयते । स च "दिग्देशकालेष्वस्तातिं" इति प्रकरणे वर्त्तते । अस्तातिं , अतसुच्, सुच् एते अतसर्था दिक्च्छब्देभ्यश्च विहिता । तेषा योगे पञ्चम्यपवाद षष्ठी । यथा— ग्रामस्य दक्षिणत , पुर पुरस्ताद्वा पर्वत ।

(१२७३) **एनपा द्वितीया** । २ । ३ । ३१ ।

एनबन्तयोगे तु द्वितीयैव । यथा—

'दक्षिणेन वृक्षवाटिकामालाप इव श्रूयते' ।

(१२७४) **पृथग्विनानानाभिस्तृतीयान्यतरस्याम्** । २ । ३ । ३२ ।

एभियोंगे तृतीया, पञ्चमी, द्वितीया वा स्यात् । यथा—

पृथग्देवदत्तात्, देवदत्तेन, देवदत्त वा ।

विना ,, ,, ,, । इत्यादि ।

(१२७५) **सप्तम्यधिकरणे च** । २ । ३ । ३३ ।

अधिकरणे कारके सप्तमी । चकारेण दूरान्तिकार्थेभ्योऽसत्त्ववाचिभ्य सप्तमी स्वार्थे विधीयते । अत्रोपेक्षितेन सूत्रद्वयेन दूरान्तिकार्थेभ्य षष्ठीद्वितीयापञ्चभ्यो विधीयन्ते । तेन एभ्य शब्देभ्य. षष्ठी द्वितीया पञ्चमी सप्तमीति चतस्रे विभक्तयो भवन्ति । यथा—

दूरस्य, दूर, दूरात्, दूरे वा ग्रामस्य नदी ।

एव समीपार्थका अप्युदाहार्या । असत्ववाचिनामेवेत्युक्तेरव्ययसाधारण्यात् एते विभक्तिप्रतिरूपकाण्यव्ययानीत्यपि कल्पयितु शक्यन्ते । अधिकरणे कारके सप्तम्युदाहृतैव ।

॥ * ॥ **क्तस्येड्वियस्य कर्मणि सप्तम्या उपसंख्यानम्** ।

क्तप्रत्ययान्तेभ्य 'इष्टादिभ्यश्च' इति इनिप्रत्ययो विधीयते । तदन्तस्य कर्मणि सप्तमीत्यर्थ । यथा—

अधीती व्याकरणे । पठिती न्याये । आम्नाती छन्दसि ।

॥ * ॥ **निमित्तात् कर्मयोगे** । यथा—

'चर्मणि द्वीपिन हन्ति दन्तयोर्हन्ति कुञ्जरम् ।
वालेषु चमरा हन्ति सीत्रि पुच्छलको हत '

चर्मादिनिमित्तक द्वीप्यादिहननमर्थ । निमित्तमिह फलम्, अतश्च हेतौ तृतीया वाधितुमयमारम्भ । 'कर्मयोगे' इत्यत्र कर्मणा सह सश्लेषरूपो योगो विवक्षित. । अतो योगा—(सम्बन्धा)—न्तरेषु तृतीयैव । यथा—

वेतनेन धान्य क्रीणाति इत्यादौ ।

(१२७६) **यस्य च भावेन भावलक्षणम्** । २ । ३ । ३७ ।

भाव क्रिया । यस्य क्रियाश्रयस्य कारकस्य क्रियया क्रियान्तरं लक्ष्यते तस्मात् सप्तमी । यत्र एकस्याः क्रियाया काल क्रियान्तरपरामर्शेन परिच्छिद्यते तत्र लक्षणक्रियाया आश्रयभूतात् कारकात् (कर्तृकर्मणोरन्यतरस्मात्) सप्तमी स्यादित्यर्थ । यथा—

भुञ्जानेष्वस्मास्वतिथिरागत —कर्तृनिष्ठा क्रिया अत्र लक्षणम् ।
गोषु दुह्यमानासु वृष्टो देव —कर्म ,, ,,

(१२७७) **षष्ठी चानादरे** । २ । ३ । ३८ ।

अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ । यथा—

रुदतो बन्धुजनस्य प्राव्राजीत्—रुदति बन्धुजने वा । रुदन्त बन्धुजनमनादृत्येत्यर्थ ।
मिषता पार्थिवानामदृढ्धिमणी कृष्ण । जाग्रतो मे प्रभाता रजनी ।

(१२७८) **स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च** । २ । ३ । ३९ ।

एभिर्योगे षष्ठीसप्तम्यौ । षष्ठ्यामेव प्राप्तायां पक्षे सप्तमीविधानार्थं वचनम् । यथा—

गवां गोषु वा ईश्वर, स्वामी इत्यादि ।
गवां गोषु वा प्रसूत —गा अनुभवितु जात इत्यर्थ ।

(१२७९) **आयुक्तकुशलाभ्यां चासेवायाम् ।२।३।४०।**

आभ्या योगे षष्ठीसप्तम्यौ तात्पर्येऽर्थे द्योत्ये । आयुक्तो व्यापारित । कुशल समर्थ । यथा —

आयुक्त कटकरणे, कटकरणस्य वा—एव कुशल ।
तात्पर्यभिन्ने त्वर्थे—आयुक्तो गौ शकटे—ईषद्युक्त इत्यर्थ ।

(१२८०) **यतश्च निर्धारणम् ।२।३।४२।**

जातिगुणक्रियासज्ञाभि समुदायादेकदेशस्य पृथक्करण निर्धारणम् । यतो निर्धारण तत षष्ठीसप्तम्यौ । यथा—

मनुष्याणा क्षत्रिय शूरतम । मनुष्येषु वा—जातौ ।
गवा कृष्णा बहुक्षीरा । गोषु वा —गुणे ।
अश्वगाना धावन् शीघ्रतम । अश्वगेषु वा—क्रियायाम् ।
शिष्याणा मैत्र पटु । शिष्येषु वा —सज्ञायाम् ।

(१२८१) **पञ्चमी विभक्ते ।२।३।४१।**

विभागो विभक्त, भेद इत्यर्थ । यत्र निर्धारणावधिर्निर्धार्य्यमाणं च भिन्न वस्तुद्वय तत्र पञ्चम्येव । गुणक्रिययोर्भिन्नद्रव्यनिष्ठयोस्तोलने अवधिभूतादपादानत्वेन प्राप्तायाः एव पञ्चम्या प्रतिप्रसवोऽयम् । यथा—

मनुष्येभ्य श्वापदा शूरतरा —गुणस्य तोलनम् ।
कृष्णादश्वाच्छ्वेतो धावतितरा—क्रियाया ।

(१२८२) **साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः ।२।३।४३।**

॥ * ॥ अप्रत्यादिभ्य इति वक्तव्यम् ।

आभ्या योगे सप्तमी, प्रत्यादयो यदि न प्रयुज्यन्ते । पूजार्थश्च यदि द्योत्यते । तत्त्वकथनमात्रे कर्मप्रवचनीययोगे च न स्यादित्यर्थः । यथा—

साधु कृष्णो मातरि, असाधुर्मातुले—एव निपुण ।
तत्त्वकथने तु—साधुर्निपुणो वा राज्ञो भृत्य ।
प्रत्यादियोगे च—साधु कृष्णो मातर प्रति, अनु वा ।

(१२८३) **प्रसितोत्सुकाभ्यां तृतीया च ।२।३।४४।**

चात्सप्तमी । प्रसित आसक्त, उत्सुक उत्कण्ठित । यथा—

केशेषु केशैर्वा प्रसित —केशविषयकसक्तिमान् ।
केशेषु केशैर्वा उत्सुक — ,, औत्सुक्यवान् ।

(१२८४) **नक्षत्रे च लुपि ।२।३।४५।**

'नक्षत्रेण युक्त काल' इति तद्धितस्य यो लुब्विधीयते तदन्ताच्छब्दात्तृतीयासप्तम्यौ स्याताम् । यथा—

'मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्'—मूले श्रवणे वा—मूलयुक्ते श्रवणयुक्ते च काले इत्यर्थ ।

लुबन्तस्य कालवाचिनोऽधिकरणे सप्तम्यामेव प्राप्तायां पक्षे तृतीयाविधानार्थमारम्भः । तेन 'अद्य पुष्य' इत्यादौ नातिप्रसङ्ग । 'पुष्येशनि' इत्यादौ लुबभावान्न तृतीया प्रवर्त्तते ।

(१२८५) **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ।२।३।४६।**

प्रातिपदिकार्थ सत्ता । लिङ्ग-पुंस्त्रीक्लीवानि । परिमाण-द्रोणखार्यादिमानम् । वचन एकद्वित्वहीन । द्वन्द्वान्ते श्रूयमाणो मात्रशब्द प्रत्येकमन्वेति । एष्वेकैकमात्रे प्रथमा स्यादित्यर्थ । इहानभिहित एव कर्मादौ कारके द्वितीयादिर्विभक्तिर्विहिता । अभिहिते तु कारके न कापि विभक्तिः प्राप्नोति । 'न केवला प्रकृतिः प्रयोक्तव्या' इति सिद्धान्ताद्याकाचिद्विभक्तिरवश्य कर्त्तव्या च वर्त्तते । ततः 'प्रातिपदिकार्थमात्रे' इत्यशेन स्वार्थे प्रथमा विधीयते । यथा—

देवदत्तस्तण्डुल पचति —कर्त्तरि तृतीयाया अप्राप्तौ स्वार्थे प्रथमा ।
देवदत्तेन तण्डुल पच्यते—कर्मणि द्वितीयाया ,, ,,

किञ्च, असत्ववाचिभ्यो निपातेभ्यो न कस्याश्चित् विभक्ते प्रसक्तिरिति तेभ्योऽपि प्रातिपदिकार्थमात्रे प्रथमा । तत्रापि वचनायोगात् सामान्यमेकवचनम् । तस्य च 'अव्ययादाप्सुपः' इति लोप इति कल्प्यते । क्लेशश्चाय 'धिगनात्मज्ञम्' इत्यादौ पदान्तकार्याणां जश्त्वादीना साधनाय सोढव्यो वर्त्तते ।

'भित्त शकलखण्डे वा पुस्यर्धोऽर्धं समेऽशके' इत्यादि नामलिङ्गानुशासनवाक्यानि लिङ्गमात्रे प्रथमाया उदाहरणम् । अत्र हि अर्धशब्द पुमान् खण्डवाची, क्लीव समाशवाचीति प्रथमाविभक्तिरूपमेव दर्शयति ।

परिमेय व्रीह्यादि कियद्वत्तामिति प्रश्ने, द्रोण इत्युत्तरवाक्य परिमाणमात्रस्योदाहरणम् । अत्र हि मानपात्र प्रातिपदिकार्थो न वक्तृतात्पर्यविषय । द्रोणपरिमितो व्रीहिरित्यर्थे द्रोणो व्रीहिरित्यादिप्रयोगस्तु लक्षणया । एव सिहसदृशो माणवक इत्यर्थे सिहो माणवक इत्यादि प्रयोगोऽपि सिध्यति ।

एक, द्वे, त्रीणि, चत्वारि, इति सख्यानवाक्ये सख्यामात्र विवक्षितं न तु प्रातिपदिकार्थभूत सख्येयमिति तद्वचनस्योदाहरणम् । प्रवृत्तिनिमित्तमात्रे प्रथमार्थ परिमाणवचनग्रहणमिति फलति । इद च परिमाणसख्याशब्दाना प्रवृत्तिनिमित्तमात्रवृत्तितास्तीति शिक्षणपरम् । तेन यथायोग विभक्त्यन्तराण्यपि । पण प्रस्थस्य मूल्यम् । द्वाभ्या गुणितानि त्रीणि षट् भवन्ति । भावप्रधाना सर्वे निर्देशा इदमेवानुकुर्वन्ति ।

(१२८६) **सम्बोधने च** । २ । ३ । ४७ ।

सम्बोधनमाभिमुख्यकरणम् । तदधिके प्रातिपदिकार्थे च प्रथमा स्यात् । यथा—

हरे कृपालो न पाहि । सर्वे जना शृणुत मे वच ।

(१२८७) **सामन्त्रितम्** । २ । ३ । ४८ ।

सम्बोधने या प्रथमा तस्या आमन्त्रितमिति सज्ञा ।

एकवचनं संबुद्धिः । २ । ३ । ४९ । (व्याख्यातम्)

(१२८८) **षष्ठी शेषे** । २ । ३ । ५० ।

कर्मादिभ्य. प्रातिपदिकार्थाच्च व्यतिरिक्त स्वस्वामिभावादिसम्बन्ध. शेषः । तत्र षष्ठी । यथा—

राज्ञः पुरुष —स्वस्वामिभाव सम्बन्ध ।
दशरथस्य पुत्र. —पितृपुत्रभाव ,,
मर्कटस्य लाङ्गूलम्—आङ्गाङ्गिभाव ,,
व्यासस्य शिष्य —गुरुशिष्यभाव ,,

इह हि सम्बन्धविशेषा एव कारकाणि । सम्बन्धाश्च विवक्षाधीना । अतो विवक्षात कारकाणि भवन्ति । कर्मण कर्मत्वरूपेण विशेषेणाविवक्षायां शेषत्वात् षष्ठी भवति । एव करणादीनामपि सम्बन्धसामान्यविवक्षाया षष्ठ्येव । तत्र 'अकथित च' (१२४३) इति सूत्रेण दुहियाच्यादीनामविवक्षितस्यापादानादे कारकस्य कर्मसज्ञा विहिता । तव्यतिरिक्ताना 'शेषे षष्ठी' भवेत् । यथा—

'यस्य बिभ्यति देवाश्च जातरोषस्य सयुगे'—यस्मात् ।
रजकस्य वस्त्र ददाति—रजकाय ।
फलाना तृप्यति—फलै । भजे शम्भोश्चरणयो —चरणौ ।

अथ कारकार्थे प्रवर्त्तमाना 'शेषे षष्ठी' मार्गप्रदर्शनाय प्रपञ्चयत्यष्टभि सूत्रै —

(१२८९) **ज्ञोऽविदर्थस्य करणे** । २ । ३ । ९१ ।

करणस्य शेषत्वविवक्षाया षष्ठ्यनेन विधीयते । प्रयोगवैरळ्यादस्पष्टमुदाहरणम् ।

(१२९०) **अधीगर्थदयेशां कर्मणि** । २ । ३ । ५२ ।

स्मरणार्थकाना दयेशोश्च शेषत्वेन विवक्षिते कर्मणि षष्ठी । यथा—

मातु स्मरति बाल —मातरमित्यर्थ ।
भीरोर्दयते वीर —भीरुम् ,,
राजा प्रजानामीष्टे —प्रजा ,,

शेषत्वाविवक्षाया यथाप्राप्ता द्वितीयैव । मातर स्मरति बाल ।

(१२९१) **कृञः प्रतियत्ने** । २ । ३ । ५३ ।

प्रतियत्नो गुणाधानम् । अत्र कृञ सुडात्मनेपद च विहितम् । यथा—* तेमनान्यवस्योपस्कुर्वते—गुणमादधतीत्यर्थ ।

(१२९२) **कृत्वोऽर्थप्रयोगे कालेऽधिकरणे** । २ । ३ । ६४ ।

'सख्याया क्रियाभ्यावृत्तिगणने कृत्वसुच्' 'द्वित्रिचतुर्भ्यः सुच्'

---

* 'रुजार्थाना ' इत्यादि सूत्रदशक नात्यन्तोपयुक्तमित्युपेक्षितम् । शेषषष्ठ्या उपलक्षणानि विहितानि । कतिचिच्छान्दसानि च ।

'एकस्य सकृच्च' एते कृत्वोर्थाः । एषां प्रयोगे कालरूपेऽधिकरणे शेषत्वेन विवक्षिते षष्ठी । यथा—

दिनस्य पञ्चकृत्वो भुङ्क्ते । वत्सरस्य सकृद्यजति ।
वारस्य त्रिरभ्यनक्ति । मासस्य द्विरायुष्कर्म करोति ।

अथ द्वितीयादीनामपवाद षष्ठीविधि —

(१२९३) **कर्तृकर्मणोः कृति** । २ । ३ । ६५ ।

कृदन्तप्रयोगे कर्तृकर्मणो षष्ठी, तृतीयाद्वितीययोरपवाद । यथा—

नृपस्यागमनम्, । ब्रह्मण सृष्टि —कर्त्तरि ।
उत्सवस्य दर्शन, जगत सृष्टि, जगत स्रष्टा—कर्मणि ।
प्रत्यु—('कर्तृकर्मणो ' कि ?) शस्त्रेण भेदन, पुरे वास ।
('कृति' कि ?) कृतपूर्वी कटम्—अत्र इनिप्रत्ययस्तद्धित ।

॥ * ॥ **गुणकर्मणि वेष्यते** ।

द्विकर्मकेष्वप्रधाने कर्मणि वा षष्ठी । यथा—

मोक्षस्य याचको विष्णो विष्णु वा ।

(१२९४) **उभयप्राप्तौ कर्मणि** । २ । ३ । ६६ ।

उभयो प्राप्तिर्यस्मिन्निति बहुव्रीहि । कर्तुः कर्मणश्च यत्र प्रसक्तिः तस्य कृदन्तस्य योगे कर्मण्येव षष्ठीति नियम । यथा—

आश्चर्यो गवा दोहोऽगोपेन । विचित्र समुद्रस्य पान कुम्भोद्भवेन ।

॥ ५ ॥ **अककारयोः स्त्रीप्रत्यययोर्नेति वक्तव्यम्** । यथा—

रामस्य भेदिका धनुष , अकवे काव्यस्य चिकीर्षोपहासाय ।

शेषे विभाषा ।

यथा—शब्दानामा नुशासनमाचार्येणाचार्यस्य वा ।

(१२९५) **क्तस्य च वर्त्तमाने** । २ । ३ । ६७ ।

(१२९६) **अधिकरणवाचिनश्च** । २ । ३ । ६८ ।

'ज्ञीत' क्त.' 'मतिबुद्धिपूजार्थेभ्यश्च' इति वर्त्तमानार्थे विहितस्य, 'क्तोऽधिकरणे च ' इति अधिकरणार्थे विहितस्य च क्तप्रत्ययस्य योगे कर्तृकर्मणो षष्ठी । 'न लोक . .' इत्यनन्तरसूत्रेण प्राप्तं निषेध बाधितुमिदम् । यथा—

सता मत, पूजित, विदितो वा—कर्त्तरि षष्ठी ।
मुकुन्दस्यासितामिदमिद यात रमापते — ,, ,,

(१२९७) **न लोकाव्ययनिष्ठाखलर्थतृनाम् ।२।३।६९।**

ल, उ, उक, अव्यय, निष्ठा, खलर्थी, तृन् एषा कृता योगे कर्तृकर्मणो षष्ठी न स्यात । लकार कृत्=लकारादेश कृत्=शतृशानचौ, कसुकानचौ च । यथा—

ओदन पचन् पचमानो वा — लादेशौ शतृशानचौ ।
गृहमासेदिवान् — लादेश क्वसु ।
कन्यामलङ्करिष्णु, ओदन बुभुक्षु — उ ।
आगामुक वाराणसीं रक्ष माम् — उक ।
ओदन भोक्तु, ओदन भुक्त्वा — अव्ययम ।
ओदन भुक्तवान्, देवदत्तेन कृतम् — निष्ठा ।
ईषत्करो घट कुलालेन — खलर्थ ।
कर्त्ता कटान्, वदिता जनापवादान्— तृन् (तान्छीलिक)

(१२९८) **अकेनोर्भविष्यदाधमर्ण्ययोः ।२।३।७०।**

कर्तृकर्मणो षष्ठी न । 'तुमुन्ण्वुलौ क्रियाया क्रियार्थायाम्' इति ण्वुल् । 'आवश्यकाधमर्ण्ययोर्णिनि' इत्यकेनो विहितौ । यथा—

सर्त्ता पालकोऽनतरति विष्णु । व्रज गामी । शत दायी ।

(१२९९) **कृत्यानां कर्त्तरि वा ।२।३।७१।**

'कर्तृकर्मणो कृति' इति नित्य प्राप्ता षष्ठी कर्त्तरि विकल्प्यते । यथा— मया मम वा सेव्यो हरि । कर्मणि तु—गेयो माणवक साम्ना इत्येव ।

॥ ॥ **उभयप्राप्तौ कृत्ये षष्ठ्या प्रतिषेधो वक्तव्य** । यथा—

नेतव्या व्रज गावो गोपेन ।

'अनन्तरस्य विधिर्वा प्रतिषेधो वा' इति न्यायात् 'कर्तृकर्मणो कृति' इति विहिता कारकषष्ठ्येवात्र प्रतिषिध्यते, शेषे षष्ठी तु सावकाशैव । तेन—

नरकस्य जिष्णु । लक्ष्म्या कामुक । सुरस्य द्विषन् ।

इत्यादीनि सिध्यन्ति । वस्तुतस्तु 'यावत्सिद्धमसिद्ध वा . .' इति निर्वचनानुरोधेन साध्यावस्थाया क्रमात्मना प्रतीयमानाया क्रियाया कर्तृकर्मणोस्तृतीयाद्वितीये । सिद्धावस्थापन्नायास्तु नामसाधर्म्यात् षष्ठ्येवेति कारक-

षष्ठीविधिप्रतिषेधप्रपञ्चस्यास्य रहस्यम् । कृत्यु तावत् लादेशा लस्थानीयाश्च साध्यक्रियावाचिन । त एव 'न लोक ' इत्यादिभि निषेधसूत्रै परिगणिता । कर्मापेक्षया कर्तु प्राधान्यात् 'उभयप्राप्तौ कर्मणि' षष्ठीमाहाचार्य । कृत्यप्रत्यया यद्यविवक्षे साध्या सिद्धा वा क्रियामभिदध्युरिति 'कृत्यानां कर्त्तरि वा' इत्युक्तम् । कर्मणि तु कृत्याना भावकर्मणोर्विहितत्वेन कर्मणोऽभिहितत्वात् बाहुलकेन कर्त्तरि प्रवृत्तावेव पष्ठ्या अवकाश । खलर्थाना कर्त्तरि षष्ठीविकल्पोऽविहितोऽपि प्रयोगेषु दृश्यते । यथा—

'दुष्कर किं महात्मना' । 'श्रिया दुराप कथमीप्सितो जन'

तृन , भविष्यदाधमर्ण्यार्थयोरकेनोश्च षष्ठीप्रतिषेध 'ण्वुल्तृचौ' 'ग्रह्यादिभ्यो णिनि ' इति सामान्यतो विहितेभ्यस्तेषा व्यावर्त्तनाय । उक्तमाचार्यस्य षष्ठीप्रतिषेध ज्ञापकमवलब्यास्माभि कृत्प्रत्ययानाम् **'आख्यातकम्'** इति कोऽपि नवो विभाग कल्पित । एवञ्च 'कर्तृकर्मणो कृति' इति सूत्रे 'सिद्धक्रियावाचिनि' इति विशेषणे दत्ते प्रतिषेधकाण्डस्यक्तु शक्यत इति मन्यामहे । अनेन च व्याख्यानेन 'कर्त्तरि वा' इति योगविभाग , ' .खलर्थतृनाम्' इत्यत्र 'तृन्' इत्यय 'लट शतृशानचौ .' इति तृकारस्य 'तृन्' इति नकारेण प्रत्याहार इति कल्पन इत्यादय क्लेशा सर्वेऽप्यपास्ता ।

(१३००) **तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् ।२।३।७२।**

तुलोपमार्वर्जितैस्तुल्यार्थैर्योगे षष्ठीतृतीये स्त । यथा—

चन्द्रेण चन्द्रस्य वा तुल्य मुखम् ।

(१३०१) **चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ।२।३।७३।**

एतदर्थकैर्योगे षष्ठीचतुर्थ्यौ आशिषि द्योत्यायाम् । यथा—

कृष्णाय कृष्णस्य वा आयुष्यमनामय, क्षेम वा भूयात् ।

अथ कर्मप्रवचनीया उच्यन्ते—

(१३०२) **कर्मप्रवचनीयाः । १ । ४ । ८३ ।**

इत्यधिकृत्य—

(१३०३) **अनुर्लक्षणे** । १ । ४ । ८४ ।

लक्षणे द्योत्ये अनु कर्मप्रवचनीयसञ्ज्ञ । एकसञ्ज्ञाधिकारान्तर्गतत्वात् कर्मप्रवचनीयसञ्ज्ञा गत्युपसर्गसञ्ज्ञे बाधते । यथा—

जपमनु प्रावर्षत्—जपोऽत्र वर्षस्य लक्षणम् ।

(१३०४) **तृतीयार्थे** । १ । ४ । ८५ ।

अनो साहित्यमेव तृतीयार्थ सम्भवति । तत्र द्योत्ये अनुरुक्तसञ्ज्ञ । यथा—नदीमन्ववसिता सेना—नद्या सह सम्बद्धेत्यर्थ ।

(१३०५) **हीने** । १ । ४ । ८६ ।

हीनेऽर्थेऽप्यनुरुक्तसञ्ज्ञ । यथा—अन्वर्जुन कर्ण—अर्जुनात् न्यून इत्यर्थ ।

(१३०६) **उपोऽधिके च** । १ । ४ । ८७ ।

उप इत्ययं हीने अधिके चोक्तसंज्ञ । हीने एव द्वितीया, अधिके सप्तम्युक्ता (१२९३) । यथा—

उप हरि सुरा—हरेर्न्यूना इत्यर्थ । उप परार्द्धे हरेर्गुणा—परार्धादधिका इत्यर्थ ।

(१३०७) **अपपरी वर्जने** । १ । ४ । ८८ ।

(१३०८) **आङ् मर्यादावचने** । १ । ४ । ८९ ।

वर्जन परिहरणम् । मर्यादावचनमवधिकथनम् । तच्च द्विविधम्—अवधित्वेन निर्दिष्ट वस्तु क्रोडीकृत्य, परिहृत्य चेति । तत्र पूर्वस्य अभिविधिरिति, परस्य मर्यादेति च सज्ञे प्रसिद्धे । अत्र वचनग्रहणादुभयमपि विवक्षितम् । अपाङ्परियोगे पञ्चम्युक्ता (१२९४) यथा—

अप परि वा त्रिगर्त्तेभ्यो वृष्टो देव—त्रिगर्त्तान् वर्जयित्वा ।
आ मोक्षात् ससार—मर्यादा ।
आ सेतोरा च हिमाल्यात् भारतखण्ड—अभिविधि ।

(१३०९) **लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः** । १ । ४ । ९० ।

लक्षणे—वृक्ष प्रति, परि अनु वा विद्योतते विद्युत्—वृक्ष लक्षीकृत्येत्यर्थ ।
इत्थभूताख्याने—भक्तो विष्णु प्रति, परि अनु वा ।
भागे—यदत्र मा प्रति, परि अनु वा स्यात्तद्देहि—अत्र मत्सम्बन्धिन भाग देहीत्यर्थ ।
वीप्सायां—वृक्ष वृक्ष प्रति, परि अनु वा सिञ्चति—एकैक वृक्ष सिञ्चतीत्यर्थ ।

पदद्वित्वेनैव वीप्सायां द्योतितायां कर्मप्रवचनीयत्व उपसर्गसञ्ज्ञाबाधेन षत्वनिषेधफलकम् । अत परिसिञ्चतीति षत्व न भवति ।

(१३१०) **अभिरभागे** । १ । ४ । ९१ ।

लक्षणेत्थभूतवीप्सासु अभिरप्युक्तसञ्ज्ञ । पूर्ववदेवोदाहरणम् ।

(१३११) **प्रतिः प्रतिनिधिप्रतिदानयोः** । १ । ४ । ९२ ।

उदाहृतम्—१२९९-तमसूत्रे ।

(१३१२) **अधिपरी अनर्थकौ** । १ । ४ । ९३ ।

(१३१३) **सुः पूजायाम्** । १ । ४ । ९४ ।

(१३१४) **अतिरतिक्रमणे च** । १ । ४ । ९५ ।

एषा गत्युपसर्गसञ्ज्ञाबाधनार्थं कर्मप्रवचनीयत्वम् । तेन च सुसिक्तम्, अतिसिक्तमिति षत्वनिषेध ।

(१३१५) **अपिः पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु** । १ । ४ । ९६ ।

पदस्याप्रयुज्यमानस्यार्थे पदार्थ । यथा—

सर्पिषोऽपि स्यात्—मात्रा, बिन्दु, स्तोकमित्यर्थे **अपि** ।

सम्भावन शक्त्युत्कर्षमाविष्कर्तुमत्युक्ति । यथा—

अपि स्तुयाद्विष्णुम् । अपि सिञ्चेद्वृक्षसहस्रम् ।

अन्ववसर्ग. कामचारानुज्ञा । यथा—

अपि सिञ्च, अपि स्तुहि ।

गर्हा निन्दा—धिग्देवदत्तम्, अपि सिञ्चेत् स पलण्डुम् ।

समुच्चये—अपि सिञ्च, अपि स्तुहि—सिञ्च स्तुहि चेत्यर्थ ।

इहापि षत्वनिषेध एव सञ्ज्ञाप्रयोजनम् । द्वितीया त्वर्थासङ्गत्यान्न प्रवर्तते ।

(१३१६) **अधिरीश्वरे** । १ । ४ । ९७ ।

ईश्वर. स्वामी । स्वस्वामिसम्बन्धे इत्यर्थः । अत्र च '. .. .यस्य चेश्वरवचनम् ...' (१२९३) इति सप्तमी विहिता । सा च स्वात् स्वामिनश्चेष्यते । यथा—

अधि रामे भू । अधि भुवि राम इति वा—रामाधीना भूरित्यर्थ ।

निरुक्तकाण्डः।

शब्दव्युत्पत्तिर्हि निरुक्तकाण्डस्य विषयः। सर्वमपि शब्दजातं धातुभ्यो निष्पन्नं मन्यन्ते नैरुक्ता, वैयाकरणेषु शाकटायनश्च। अत्र तु

कृत्प्रत्ययाः आख्यातकैः सह प्रक्रियासाधारण्यादष्टाध्याय्यनुरोधाच्च आख्यातकप्रकरणानन्तरमेव निरूपिताः। तद्धिताः इदानीं निरूप्यन्ते—

तद्धितप्रकरणम्।

कृतां यथा धातोरुत्पत्तेस्तिङा सह प्रक्रियासाम्यं, तथा तद्धितानां प्रातिपदिकेभ्य उत्पत्तेः सुपा सह प्रक्रियासाम्यं भवति। अतोऽत्र भपद-संज्ञे तत्प्रयुक्तकार्याणि चानुसन्धेयानि।

(१३१७) तद्धिताः।४।१।७६।

अयमधिकारश्चतुर्थपञ्चमाध्यायौ व्याप्नोति। बहवश्च तत्र बहुष्वर्थेषु प्रत्ययाः विधीयन्ते। तेषु व्युत्पित्सूनामत्यन्तोपयुक्ताः कतिचिदेवात्रोपादीयन्ते। प्रत्ययविधे प्रागेव सौकर्यार्थं तद्धितेषु कार्या प्रक्रिया उच्यन्ते—

तद्धितकार्याणि।

'अचो ञ्णिति' 'अत उपधायाः' इति वृद्धिस्तद्धितेषु न भवति तस्या अयमपवादः।

(१३१८) तद्धितेष्वचामादेः।७।२।११७।

ञिति णिति च तद्धिते परे अङ्गस्याचामादेरचो वृद्धिः। न त्वन्त्यस्याच, नाप्युपधायाः अतः। यथा—

'तस्यापत्यम्' इत्यर्थे दशरथशब्दात् इञ् इति त्रिति प्रत्यये कृते 'दाशरथि' इति अचा मध्ये आद्यस्य वृद्धि ।

(१३१९) **किति च** । ७ । २ । ११८ ।

किति तद्धिते चाचामादेरचो वृद्धि । यथा—

शक्तिशब्दात् 'ईकक्'-प्रत्यये 'शार्क्तीक' ।

(१३२०) **देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्** । ७ । ३ । १ ।

देविकादीना वृद्धिप्रसङ्गेऽचा मध्ये आद्यस्य आकार एव वृद्धि । एषा सूत्राणामङ्गाधिकारान्तर्गतत्वात् 'पदाङ्गाधिकारे तस्य च तदन्तस्य च' इति तदन्तानामप्युक्त भवति । यथा -देविकाकूले भवा इत्यण्प्रत्यये दाविकाकूला शालय । एवम् अण्प्रत्यये शाशप, दात्यूह इत्यादि ।

(१३२१) **केकयमित्रयुप्रलयानां यादेरियः** । ७ । ३ । २ ।

एषा वृद्धिप्रसङ्गे यकारादेर्भागस्य 'इय' इति आदेशश्च स्यात् । यथा—केकय + अण्—केकेय, मित्रयु + वुञ — मैत्रेयिका, प्रलय + अण्— प्रालेयम् ।

मलयशब्दस्यापि केरळीया 'इया' देशमुशन्ति । यथा—

मलये भवमित्यर्थेऽणप्रत्यये मालेय चन्दनम् ।

"काले कदाचिदथ कामिजनानुकूले मालेयमारुतविलोलितमालतीके ।
लीलारसेन विचरन् विपिने विनोदलोला समीरणसुतो रमणीमभाणीत् ॥"

(१३२२) **न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्** । ७ । ३ । ३ ।

पदान्ताभ्या यकारवकाराभ्या परस्य अचां मध्ये आद्यस्य न वृद्धि । किन्तु ताभ्या पूर्वौ यथासङ्ख्यम् ऐकार-औकारौ आगमौ स्त । इवर्ण-उवर्णान्तानामेकाचा पदानामादिवृद्धिप्रसक्तौ यणादेशसन्धि विश्लेष्य इ-उवर्णयोर्यथाप्राप्त वृद्धि कृत्वा यणादेशस्थाने यणागम कार्य इति फलितम् । यथा—

व्याकरण + अण् इत्यत्र वि + आकरण इति सन्धि विश्लेष्य इकारस्य ऐकार वृद्धि कृत्वा यकारागमयोजने वैयाकरण इति रूपम् । एव स्वश्व + अण्—सु + अश्व + अण् सौ + अश्व + अण् — सौवश्व । इद ज्ञापयति अन्यत्र सन्धिकार्य कृत्वैव तद्धित कार्य इति तेन सूत्रितस्यापत्य सौत्रितिरित्येव । स्वामि-

प्रत्यु—('पदान्ताभ्या' किं ?) यष्टि + ईकक् — याष्टिक ।

(१३२३) **द्वारादीनां च** । ७ । ३ । ४ ।

वृद्धिप्रसङ्गे पूर्वोक्त स्यात् । एषु यवयो. पदान्तत्वाभावादप्राप्ते

यथा— द्वार + इक—दौवारिक । द्वार,-स्वर,-स्वाध्याय,-व्यल्कश,-स्वस्ति, स्वर स्व इत्यादि ।

(१३२४) **न्यग्रोधस्य च केवलस्य** । ७ । ३ । ४ ।

यथा—न्यग्रोध + अण् = नैयग्रोधम् ।

प्रत्यु—(' केवलस्य ' किं ?) न्याग्रोधमूला शालय ।

(१३२५) **न कर्मव्यतीहारे** । ७ । ३ । ६ ।

यथा— व्यवक्रोश + ण = व्यावक्रोशी ।

(१३२६) **स्वागतादीनां च** । ७ । ३ । ७ ।

नेत्येव— स्वागत + इक (क्) = स्वागतिक । एव व्यावहारिक, स्वापतेयम् इत्यादि ।

(१३२७) **उत्तरपदस्य** । ७ । ३ । १० ।

अथ पूर्वपदवृद्धेरपवाद उत्तरपदवृद्धिर्विधीयते इत्यधिकार ।

(१३२८) **अवयवाद्तः** । ७ । ३ । ११ ।

अवयववाचिन परस्य ऋतुवाचिन उत्तरपदस्याचा मध्ये आदस्य वृद्धिर्जिति णिति किति च तद्धिते । यथा—पूर्ववर्षा + इक (क्) = पूर्ववार्षिकम् । एवमपरवार्षिकमित्यादि ।

(१३२९) **सुसर्वार्धाज्जनपदस्य** । ७ । ३ । १२ ।

यथा—सुपद्माल + तुल्—सुपाद्मालक ।

(१३३०) **सख्याया' संवत्सरसंख्यस्य च** । ७ । ३ । १५ ।

सख्याया परस्य सवत्सरशब्दस्य सख्यावाचकस्य च वृद्धिर्जिदादिषु । यथा— द्विसवत्सर + इकक् = द्विसावत्सरिक । द्विषष्टि + इकक् = द्विषाष्टिक ।

(१३३१) **वर्षस्याभविष्यति** । ७ । ३ । १६ ।

यथा— द्विवार्षिक । भविष्यति तु द्वैवर्षिक ।

(१३३२) **परिमाणान्तस्यासञ्ज्ञाशाणयोः** । ७ । ३ । १७ ।

यथा—द्विनिष्क + इकन् = द्विनैष्किकम् ।

(१३३३) **हृद्भगसिन्ध्वन्ते पूर्वपदस्य च** । ७ । ३ । १९ ।

तस्या एतदन्तेऽङ्गे पूर्वोत्तरपदयोर्वृद्धिर्जिदादौ । यथा—

हृद् + अण = सौहार्दम् । सुभग + ष्यञ् = सौभाग्यम् । सुरसिन्धु + अण् = सौरसैन्धवम् ।

स्याच, ग (१३३४) **अनुशतिकादीनां च** । ७ । ३ । २० ।

उभयपदवृद्धि स्यात् । — अनुशतिक + अण् = आनुशातिक । ऐहलौकिक, पारलौकिक, पारस्त्रैणेय, सार्वभौम ।

(१३३५) **देवताद्वन्द्वे च** । ७ । ३ । २१ ।

उभयपदवृद्धि । — अग्निमरुत् + अण् — आग्निमारुतम् ।

(१३३६) **नञ शुचीश्वरक्षेत्रज्ञकुशलनिपुणानां** (पूर्वस्य वा) । ७ । ३ । २२ ।

नञ परेषां शुच्यादीनामुत्तरपदस्य वृद्धि, पूर्वपदस्य तु वा । यथा—

अशुचि+अण्—अशौचम्, आशौचम् । अनीश्वर+ष्यञ्—अनैश्वर्य, आनैश्वर्यम् । एवमन्येषामपि ।

(१३३७) **यथातथयथापुरयोः पर्यायेण** । ७ । ३ । ३१ ।

नञ परयोरनयो पर्यायेणोभयपदवृद्धि । यथा—

आयथातथ्यम्, अयाथातथ्यम् । आयथापुर्यम्, अयाथापुर्यम् ।

अथ भसंज्ञाकार्याणि ।

एषु 'वसो सम्प्रसारणम्' 'अल्लोपोऽन' इत्यादीनि कतिचन पूर्वमेवोक्तानि । 'भस्य' इत्यधिकारे 'अल्लोपोऽन' इत्यतो लोप इत्यनुवर्त्तमाने—

(१३३८) **तिं विंशतेर्डिति** । ६ । ४ । १४२ ।

डिति प्रत्यये परे भसंज्ञस्य विंशतिशब्दस्य तिकारो लुप्यते । यथा—

विंशति + ङट्—विंश ।

(१३३९) **टेः** । ६ । ४ । १४३ ।

भस्य टेर्लोपः डिति । यथा— त्रिंशत् + ङट्—त्रिंश ।

डित्वस्य प्रयोजनान्तराभावात् भसंज्ञाभावेऽपि टिलोपो भवति । अतो लृङादेशे 'ङा' इत्यस्मिन् परे टिलोपेन 'भविता' इति रूपसिद्धिः ।

(१३४०) [illegible] । ६ । ४ । १४४ ।

नकारान्तस्य भस्य टेर्लोपस्तद्धिते परे । यथा—

औडुलोमन् + इञ्—औडुलोमि । अतद्धिते तु—राज्ञा, ब्रह्मणा ।

॥ * ॥ **अव्ययानां प्रायो भमात्रे टिलोपः** । यथा—

सायम्प्रातर् + इक—सायम्प्रातिक ।

पुनः पुनर् + ष्यञ्—पौनःपुन्यम् । एवं बाह्यभित्यादि ।

ग्राय इत्युक्ति ग्राश्वतिक इत्यादिसिद्ध्यर्था ।

(१३४१) अन्हुखोरेव । ६ । ४ । १४४ ।

नान्तत्वात् सर्वत्र ग्राप्ते टिलोपे टखयोरेवेति नियम । यथा—
ब्रह्, त्रह —ट । ब्रह्हीन, त्रह्हीन —ख । अन्यत्र ग्राह्निकम् ।

(१३४२) ओर्गुणः । ६ । ४ । १४६ ।

उवर्णान्तस्य भस्य गुणस्तद्धिते । यथा—
पाण्डु + अण् —पाण्डव । मृदु + अण् — मार्दवम् ।

(१३४३) ढे लोपोऽकद्वाः । ६ । ४ । १४७ ।

यथा—कमण्डलु + ढक् — कामण्टलेय । ढ = एय [१०५२]
कद्वास्तु काद्वेय इति गुण एव ।

(१३४४) यस्येति च । ६ । ४ । १४८ ।

इश्च अश्च यम् इति समाहारद्वन्द्व । यस्य ईति इति छेद । इवर्णान्तस्य अवर्णान्तस्य च भस्य लोप ईकारे तद्धिते च परे । यथा—

अत्रि + एय —आत्रेय
दशरथ + इञ् —दाशरथि
} तद्धित |
सखि + ई—सखी
ब्राह्मण + ई—ब्राह्मणी
} ई = ङी ।

अत्र ईति इत्यनेन स्त्रीप्रत्ययो ङी एव गृह्यते । तथा च वार्त्तिकम्—

॥ * ॥ ग्रौङ श्यां प्रतिषेधो वाच्यः ।

तेन धन + औ = धन + ई = धने इत्यत्र लोपो न ।

(१३४५) सूर्यतिष्यागस्त्यमत्स्यानां य उपधाया । ६ । ४ । १४९ ।

एषामुपधाया यकारस्यापि लोप ईति तद्धिते च । यथा—
तिष्य + अण् —तैषम् । मत्स्य + ङी— मत्सी ।

'मत्स्यस्य ङ्यां सूर्यागस्त्ययोश्छे ङ्यां च तिष्यपुष्ययोर्नक्षत्र-अणि' ।
इति शोषितोऽय लोपविधिर्वार्त्तिककारेण ।

(१३४६) हलस्तद्धितस्य । ६ । ४ । १५० ।

हल परस्य तद्धितस्यान्त्यस्य लोप ईति तद्धिते च । यथा—
गार्ग्य + ङी—गार्गी ।

(१३४७) तुरिष्ठेमेयस्सु । ६ । ४ । १५४ ।

इष्ठन्, इमनिच्, ईयसुन् इति तद्धितेषु परेषु 'तृ' प्रत्ययस्य लोप । यथा—कर्तृ + इष्ठ — करिष्ठ । दोषन् + ईयसी—दोहीयसी वेनु ।

इमनिच् तु तृप्रत्ययान्तान्न भवत्येव । तस्येह ग्रहणमुत्तरसूत्रे अनुवृत्त्यर्थम् ।

(१३४८) टेः । ६ । ४ । १५५ ।

भस्य टेर्लोप इष्ठेमेयस्सु । यथा—

पटु + इमन् — पटिमन् , + इष्ठ — पटिष्ठ । + ईयस् — पटीयस् ।

(१३४९) स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः । ६ । ४ । १५६ ।

एषामिष्ठेमेयस्सु यणादिपर लुप्यते पूर्वस्य गुणश्च । एषु यवरलानामुत्तरस्वरसहकृताना लोप कृत्वा तत्पूर्वस्वरस्य गुण कार्य इत्यर्थ । यथा—

स्थूल—स्थविष्ठ । — स्थवीयस् ।	क्षिप्र—क्षेपिष्ठ । क्षेपिमन् । —क्षेपीयस् ।
दूर —दविष्ठ । —दवीयस् ।	ह्रस्व—ह्रसिष्ठ । ह्रसिमन् । —ह्रसीयस् ।
युवन्—यविष्ठ । —यवीयस् ।	क्षुद्र—क्षोदिष्ठ । क्षोदिमन् । —क्षोदीयस् ।

(१३५०) प्रिय-स्थिर-स्फिरो-रु-बहुल-गुरु-वृद्ध-तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ-स्फ-वर्-वंहि-गर्-वर्षि-त्रप्-द्राघि-वृन्दाः । ६ । ४ । १५७ ।

प्रियस्थिरादीनामिष्ठेमेयस्सु प्रस्थाद्या आदेशा स्यु । यथा—

प्रिय—प्रेम । प्रेयस् । प्रेष्ठ इत्यादि ।

प्रियोरुगुरुबहुलदीर्घाणामेव पृथ्वादिपाठादिमनिच् । स्फिरः प्रवृद्धः । तृप्र उत्सुकः । अन्ये प्रसिद्धा ।

(१३५१) बह्वोर्लोपो भू च बहोः । ६ । ४ । १५९ ।

बह्वो परेषामिष्ठेमेयसामादिलोप , प्रकृतेर्भू इत्यादेशश्च । यथा—भूम । भूयस् । इष्ठे तु ।

(१३५२) इष्ठस्य यिट् च । ६ । ४ । १५९ ।

यिडित्यागम । यथा—भूयिष्ठ ।

(१३५३) ज्यादादीयस । ६ । ४ । १६० ।

आकार आदेश । यथा—ज्यायस् ।

(१३५४) र ऋतो हलादेर्लघोः । ६ । ४ । १६१ ।

हलादेर्लघोर्ऋकारस्य रेफादेश इष्ठेमेयस्सु । पृथु-मृदु-भृश कृश-दृढ-परिवृढानां षण्णामेव रत्वमिष्यते । यथा—

भृश—भ्रंशिमन् , भ्रंशीयस् , भ्रंशिष्ठ इत्यादि ।

(१३५५) **प्रकृत्यैकाच्** । ६ । ४ । १६२ ।

एकाच् भसञ्ज्ञकमिष्ठेमेयस्सु न कञ्चिद्विकार प्राप्नुयात् । यथा—
स्रज् + इष्ठ—स्रजिष्ठ । अत्र स्रग्विन् इति विनो लोप ।

(१३५६) **इनण्यनपत्ये** । ६ । ४ । १६३ ।

इन्नन्तमपत्यार्थकमिन्नेऽणि प्रकृत्या स्यात् । 'नस्तद्धिते' इति टिलोपो न स्यादित्यर्थ । यथा— सराविन् + अण् — सराविणम् । अपत्यार्थके तु— मेधाविनोऽपत्य—मैधाव ।

(१३५७) **गाथिविदथिकेशिपणिगणिनश्च** । ६ । ४ । १६४ ।

इन् अणि प्रकृत्या । अपत्यार्थ वचन । यथा—गाथिन , पाणिन ।

(१३५८) **संयोगादिञ्च** । ६ । ४ । १६४ ।

शङ्खिनोऽपत्य—शाङ्खिन = शाङ्खिण । वाजिण ।

(१३५९) **अन्** । ६ । ४ । १६६ ।

अण्यन् प्रकृत्या स्यात् । ब्रह्मन् + अण्—ब्राह्मण ।

(१३६०) **ये चाभावकर्मणोः** । ६ । ४ । १६८ ।

यादौ च तद्धिते अन् प्रकृत्या स्याच्च तु भावकर्मार्थके । यथा—
सामसु साधु —सामन्य । राज्ञोऽपत्य—राजन्य ।
भावकर्मार्थके तु—राज्ञो भाव , कर्म वा राज्यम् ।

(१३६१) **आत्माध्वानौ खे** । ६ । ४ । १६९ ।

आत्मनीन , अध्वनीन ।

अथ तद्धितप्रत्ययविधि ।

(१३६२) **तद्धिताः** । ४ । १ । ७६ ।

आ पञ्चमाध्यायपरिसमाप्तेरधिकारोऽयम् । 'प्रत्यय' 'परश्च' 'ङ्याप्प्रातिपदिकात्' इत्यधिकारत्रय वर्त्तते । इत पर ङ्यन्तादाबन्तात् प्रातिपदिकाच्च तद्धिताख्या प्रत्यया विधीयन्ते । ते च प्रकृते परे स्युरिति फलितम् ।

(१३६३) **समर्थानां प्रथमाद्वा** । ४ । १ । ८२ ।

अयमप्यधिकार । 'प्राग्दिशो विभक्ति.' (१४८४) इति स्वार्थिक-

तद्धितविधिं यावत् । समर्थः सङ्गतार्थः, तेषां मध्ये सूत्रे प्रथमानिर्दिष्टाच्छब्दात्तद्धिताः स्युर्वा इत्यर्थः । इह हि 'तस्यापत्यं' 'तेन रक्तं रागात्' 'तदधीते तद्वेद' 'तत आगतः' 'तत्र भवः' इत्याद्यर्थेषु तद्धिता विधीयते । तत्र अर्थसाङ्गत्य एव प्रत्ययोत्पत्तिः । साङ्गत्येऽपि सूत्रे पूर्वमुपात्तेभ्यः 'तस्य' 'तेन' 'तत' इत्यादितच्छब्दपरामृष्टेभ्यः, 'स्त्रीभ्यो ढक्' 'कालाट्ठञ्' इत्यादौ अर्थानिर्देशे प्रातिपदिकान्तेभ्यः कालवाचिभ्य इत्यादिभ्य एव प्रातिपदिकेभ्यः प्रत्ययाः स्युर्न तु 'अपत्यं' 'रक्तम्' इत्यादिभ्योऽर्थवाचिभ्य इत्याशयः । तस्यापत्यम् इति वाक्यतया, तदपत्यम् इति समासतया च प्रयोगसिद्ध्यर्थं 'वा' इति तद्धिता विकल्पिताः ।

एते व्यापका अधिकाराः । एतन्मध्ये व्याप्याश्च सन्ति बहवोऽवान्तराधिकाराः । एषु 'अण्' 'ठक्' 'यत्' इत्यादयः प्रत्ययाः सामान्येनाविक्रियन्ते 'ढक्' 'यञ्' 'इञ्' इत्यादयोऽपवादाश्च प्रतिस्वं विधीयन्ते । एकैकोऽप्यवान्तराधिकारः पुनरर्थनिर्देशाय व्याप्यतरैः क्षुद्रैरधिकारैर्विभज्यते । एवं च यथा भुवस्तलं वर्ष-खण्ड-राज्य-जनपद-ग्रामादिभिर्विभक्तं तथा तद्धिताश्च व्याप्यव्यापकैरधिकारैर्विभक्ताः । एषु प्रसिद्धा नित्योपयुक्ताश्च कतिचिदेवात्र निरूप्यन्ते ।

प्रत्ययार्थो यत्र विशेष्यं स विशेष्यतद्धितः । यत्र विशेषणं स विशेषणतद्धितः । यत्र प्रकृत्यर्थे स स्वार्थिकतद्धितः इति तद्धितस्य त्रयो विभागाः सम्भवन्ति । तत्र प्रथमं विशेष्यतद्धिताः—

(१३६४) माग्दीव्यतोऽण् । ४ । १ । ८३ ।

'तेन दीव्यति.....' इति यावदण्प्रत्ययाधिकारः । अयं 'तस्यापत्यं' 'तेन रक्तं रागात्' इत्यादीनवान्तरानधिकारान् क्रोडीकरोति । ते चैवं परिगणिताः प्रक्रियासर्वस्वे—

"अपत्यं, रक्तयुक्ते, च दृष्टं, परिवृतोद्धृते, ।
संस्कृतं, पौर्णमासी, च देवता—व्यूहनीवृतः, ॥

आदि , प्रयोजन, योद्धा, तथा प्रहरण, क्रिया, ।
अधीते, वेदास्ति, निर्वृत्तावासादूरसम्भवा ॥
शेषो, जात , कृतो, लब्ध , क्रीत , कुशल, इत्यपि ।
अनित्यभवसम्भूतौ साधु पुष्प्यति पच्यते ॥
उप्त, ढेय, रौति, सोढ भवो, व्याख्यान, आगत , ।
प्रभवत्ये,ति, निष्क्रामत्यधिकृत्यकृतस्तथा ॥
निवासो,ऽभिजनो, भक्ति , प्रकर्षेणोक्तमेकादिक् ।
उपज्ञात , कृत, इद, विकारो,ऽवयवश्च ते ॥"

(१३६५) **अश्वपत्यादिभ्यश्च** । ४ । १ । ८४ ।

अण् प्राग्दीव्यतीयेष्वर्थेषु । उत्तरसूत्रेण ण्यप्रत्यये प्राप्ते वचनमिदम् । यथा—अश्वपतेरपत्यादि आश्वपत ।

(१३६६) **दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः** । ४ । १ । ८५ ।

प्राग्दीव्यतीयेष्वर्थेषु अणोऽपवादो ण्य । यथा—

दितेरपत्यादिदैत्य इत्यादि ।

(१३६७) **स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्** । ४ । १ । ८७ ।

'धान्याना भवने' इति यावत् स्त्रीशब्दात् नञ्, पुंशब्दात् स्नञ् च अधिक्रियते । यथा—स्त्रिया अपत्यादि स्त्रैण, पुस पौंस्न ।

(१३६८) **द्विगोर्लुगनपत्ये** । ४ । १ । ८८ ।

द्विगुसमासात् प्रवृत्तस्य प्राग्दीव्यतीयस्य तद्धितस्य लुक्, नत्वपत्याधिकारोक्तस्य । यथा—

पञ्चसु कपालेषु संस्कृत पञ्चकपाल—अत्र 'संस्कृत भक्षा' इत्यर्थे उत्पन्नस्य प्रत्ययस्य लुक् ।

द्वौ वेदावधीते इति द्विवेद —अत्र 'तदधीते' इत्यर्थे उत्पन्नस्य तद्धितस्य लुक् ।

(१३६९) **तस्यापत्यम्** । ४ । १ । ९२ ।

तस्येति षष्ठ्येव विवक्ष्यते न तु लिङ्गवचने । षष्ठीसमर्थात् प्रातिपदिकादपत्येऽर्थे अण्प्रत्यय, दित्यदित्यादिभ्यो ण्य, स्त्रीपुंसाभ्यां नञ्स्नञौ च । यथा—

उपगोरपत्यम् इत्यर्थे उपगुशब्दात् अण् । उपगु + अ इति स्थिते 'ओर्गुण' (१३४३) इति प्रकृत्यन्त-उकारस्य गुण । 'तद्धितेष्वचामादे' (१३१८) इति आद्य-उकारस्य वृद्धिश्च, **औपगव** इति तद्धितरूपम् । तद्धितान्ततयेन प्रातिपदिकत्वात् पुसि औपगव औपगवौ इत्यादि विभक्तय । स्त्रीत्वविवक्षाया 'टिड्ढाणञ् . ' इति ङीपि औपगवी औपगव्यौ इत्यादि रूपाणि । एव अङ्गिरसोऽपत्यम्—आङ्गिरस ।

मरीचेरपत्यम्—मारीच –'यस्येति च' (१३४४) इतीकारलोप ।

(१३७०) **एको गोत्रे** । ४ । १ । ९३ ।

'अपत्य पौत्रप्रभृति गोत्रम्' इति गोत्रलक्षणम् । तस्मिन् गोत्रा पत्ये विवक्षिते प्रत्यपत्य भेदेन प्रत्ययोत्पत्तिप्रसङ्गे नियम. क्रियते । गोत्रा-पत्यविवक्षायामेक एव प्रत्यय इति । कूटस्थस्य पौत्रप्रभृतय एकेनैव प्रत्य-येनोच्यन्त इति फलितम् । यथा—

गर्गस्यापत्य गार्गि । गार्गेरपत्य गार्ग्य । गार्ग्यस्य पुत्र, पौत्र, प्रपौत्र, प्रप्रपौत्रादिरपि गार्ग्य एव ।

(१३७१) **गोत्राद्यून्यस्त्रियाम्** । ४ । १ । ९४ ।

'जीवति तु वश्ये युवा' इति युवा निरुक्त । यून्यपत्ये विवक्षिते गोत्रादेव प्रत्ययो न तु कूटस्थात् । स्त्रिया तु कूटस्थादेव । यथा—

गर्गस्यापत्य युवा गार्ग्यायण । स्त्रिया तु गार्गी ।

(१३७२) **अत इञ्** । ४ । १ । ९५ ।

अदन्तात्तस्यापत्यमित्यर्थे अणोऽपवाद इञ् । यथा—

दशरथस्यापत्य दाशरथि । दक्षस्यापत्य दाक्षि ।

(१३७३) **गर्गादिभ्यो यञ्** (गोत्रे) । ४ । १ । १०५ ।

गर्गस्य गोत्रापत्य गार्ग्य' । एव वात्स्य', आगस्त्य इत्यादि ।

(१३७४) **शिवादिभ्योऽण्** । ४ । १ । ११२ ।

अत इञोऽपवाद' । शिवस्यापत्य शैव इत्यादि ।

(१३७५) **स्त्रीभ्यो ढक्** । ४ । १ । ११३ ।

स्त्रीप्रत्ययान्तेभ्यो ढक् । विनता—वैनतेय ।

(१३७६) **जनपदशब्दात् क्षत्रियादञ्** । ४ । १ । १६८ ।

जनपदशब्दो य क्षत्रियवाची तस्मादपत्येऽर्थे अञ्। यथा—
पाञ्चाल, वैदेह।

(१३७७) **ते तद्राजाः**।४।१।१७४।

जनपदशब्दात् क्षत्रियवाचिनो विहिता प्रत्ययास्तद्राजाख्या।

(१३७८) **कम्बोजाल्लुक्**।४।१।१७५।

कम्बोजादिभ्यस्तद्राजप्रत्ययस्य लुक्। यथा—
कम्बोजाना राजा कम्बोज। एव चोळ, केरळ, शक इत्यादि।

(१३७९) **नक्षत्रेण युक्तः कालः**।४।२।३।

अस्मिन्नर्थे तृतीयासमर्थादण्। नक्षत्रेण कालस्य योगश्चन्द्रद्वारेण। यथा—पुष्येण (पुष्यस्थेन चन्द्रेण) युक्त दिन पौषम्। अत्र 'तिष्य-पुष्ययोर्नक्षत्र-अणि' (१३४६) इति यलोप।

(१३८०) **लुबविशेषे**।४।२।४।

कालविशेषवाचिन. पदस्याप्रयोगे 'नक्षत्रेण युक्तः काल' इति विहितस्याण्प्रत्ययस्य लुप्। लुप्शब्देन लोपे विशेष उक्त—

(१३८१) **लुपि *युक्तवद्व्यक्तिवचने**।१।२।५१।

लुपा लोपे प्रकृतेरेव लिङ्गवचने अवतिष्ठेते। इति। यथा—
अद्य पुष्य। अद्य पुनर्वसू। अद्य कृत्तिका।

(१३८२) **तस्य समूहः**।४।२।३७।

अण्। यथा—बकाना समूहो बाकम्।

(१३८३) **भिक्षादिभ्योऽण्**।४।२।३८।

पृथग्विधान बाधकबाधनार्थम्। भैक्षम्। गाभिण, यौवत, पादातम् इत्यादि।

(१३८४) **ग्रामजनबन्धुभ्यस्तल्**।४।२।४३।

॥*॥ **गजसहायाभ्यां चेति वक्तव्यम्**।

ग्रामाणा समूहो ग्रामता इत्यादि।

(१३८५) **अचित्तहस्तिधेनोष्ठक्**।४।२।४७।

---

* युक्त—व्यक्ति—वचनशब्दा प्रकृति लिङ्ग-सख्याना वाचका।

अचेतनेभ्यो हस्तिधेनुभ्या च समूहार्थे ठक् । प्रत्ययादिठकारस्यादेश उक्त । यथा—

(१३८६) **ठस्येकः** ।७।३।५०।

(१३८७) **इसुसुक्तान्तात् कः** ।७।३।५१।

प्रत्ययादिठकारस्य 'इक' इत्यादेश । इस्, उस्, उक् (प्रत्याहार) त् एतदन्ताभ्यस्तु प्रकृतिभ्य परस्य 'क' इत्येवादेश । अनेनात्र ठस्य इकादेश । किित्त्वादादिवृद्धि ।

अपूपाना समूह आपूपिक शाष्कुलिकम् । हविषा समूहो हाविष्कम् ।—इसन्तत्वात् कादेश ।

(१३८८) **तदधीते तद्वेद** ।४।२।५९।

यो निरुक्तमधीते, वेद वा स नैरुक्त । एव वैयाकरण ।

(१३८९) **प्रोक्ताल्लुक्** ।४।२।६४।

तेन प्रोक्तमित्यर्थे विहित प्रत्यय उच्चारात् प्रोक्त । प्रोक्तप्रत्ययान्तादुत्पन्नस्य 'तदधीते तद्वेदे'–ति प्रत्ययस्य लुक् । यथा—

पाणिनिना प्रोक्त पाणिनीयम् । पाणिनीयमधीते वेद वा पाणिनीया ब्राह्मणी ।

(१३९०) **जनपदे लुप्** ।४।२।७१।

जनपदेऽर्थे तस्य निवास इति प्रत्ययस्य लुप् । यथा—

पञ्चालाना निवासो जनपद पञ्चाला ।

(१३९१) **शेषे** ।४।२।९२।

अपत्यादिचातुरार्थिकान्ता उक्ता । तेभ्योऽन्येष्वप्यर्थेषु अण् । 'वृद्धाच्छ' इत्यादि विशेषविध्यर्थं शेषाधिकार । यथा—

चक्षुषा गृह्यत इति चाक्षुष रूपम् । दृतिदि पिष्टा दार्तिदा वाना । उलूखले क्षुण्ण औलूखलो यावक । इत्यादि ।

(१३९२) **ग्रामाद्यखञौ** ।४।२।९४।

'तत्र जात' इत्यादौ शेषेऽर्थे ग्रामशब्दाद्यखञौ स्तः । यथा—

ग्रामे जातादि ग्राम्य, ग्रामीण ।

(१३९३) **नद्यादिभ्यो ढक्** ।४।२।९७।

यथा—नद्या जातादि—नादेयम्।

(१३९४) **दक्षिणापश्चात्पुरसस्त्यक्**।४।२।९८।

दाक्षिणात्य। पाश्चात्य। पौरस्त्य।

(१३९५) **अव्ययात्त्यप्**।४।२।१०४।

अमेहकतसिलत्रेभ्य एव। अमात्य। इहत्य इत्यादि।

(१३९६) **वृद्धाच्छः**।४।२।११४।

वृद्धसज्ञाच्छन्दाज्जाताद्यर्थे छ (=ईय, १०९२)। वृद्धसज्ञा च प्रथमाध्याये विहिता। यथा—

(२३९७) **वृद्धिर्यस्याचामादिस्तद्वृद्धम्**।१।१।७३।

यस्य शब्दस्य स्वरेष्वाद्य आ ऐ औ वा स वृद्धसज्ञः।

॥*॥ **वा नामधेयस्य वृद्धसज्ञा वाच्या**।

(१३९८) **त्यदादीनि च**।१।१।७४।

त्यदादीनि सर्वनामानि च वृद्धसज्ञानि। इति। यथा—

भानौ जातादि—भानवीयम्। शैले जातादि—शैलेयम्। देवदत्ते जातादि—देवदत्तीयम्। एव तदीय, यदीय, किमीयम् अदसीयमित्यादि।

'युष्मदस्मदोरकवचने' 'प्रत्ययोत्तरपदयोश्च' (३९२) इति त्वादेश.—त्वदीय, मदीयम्। बहुत्वे तु युष्मदीयम्, अस्मदीयम्।

(१३९९) **भवतष्ठक्छसौ**।४।२।११९।

छस्यापवाद। छस सित्त्वात् 'सिति च' (१९१) इति पदसज्ञाया जश्त्वेन तकारस्य द, भवदीयम्। तान्तत्वात् 'इसुसुक्तान्तात् क.' (१३८७) इति ठस्य कादेश, भावत्कम्।

(१४००) **युष्मदस्मदोरन्यतरस्यां खञ्च**।४।३।१।

चकाराच्छ। अन्यतरस्यामित्युक्ते पक्षे अण्।

(१४०१) **तस्मिन्नणि च युष्माकास्माकौ**।४।३।२।

खञ्यणि च युष्मदस्मदोर्युष्माकास्माकावादेशौ। छे तु यथास्थित रूपमेव।

(१४०२) **तवकममकावेकवचने** । ४ । ३ । ३ ।

खञ्यणि चेत्येव । अथ सूत्रत्रयमुदाह्रियते--

युष्माक युदयोर्वा इद--यौष्माकीण, यौष्माक, युष्मदीयम् । अस्माकम् आवयोर्वा इदम्--आस्माकीनम्, आस्माकम्, अस्मदीयम् । तवेद--तावकीन, तावक, त्वदीयम् । ममेद--मामकीन, मामक, मदीयम् ।

(१४०३) **कालाट्ठञ्** । ४ । ३ । ११ ।

कालविशेषवाचकात् शैषिक ठञ् । यथा--

प्रभाते जातादि प्राभातिकम् । अह्नि--आह्निकम् ।

(१४०४) **सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्**[१] । ४ । ३ । १६ ।

सन्धिवेलादेर्गण --सान्धिवेल, सान्ध्यम् । शारद पौषम् इत्यादि ।

(१४०५) **सायंचिरंप्राह्णेप्रगेव्ययेभ्यष्ट्युट्युलौ तुट् च** । ४ । ३ । २३ ।

अव्ययेभ्य सायप्रभृतिभ्य ट्युट्युलौ प्रत्ययौ तुडागमश्च तत्सन्नियोगेन । ट्युट्युलाविति द्वयोर्ग्रहण स्वरे भेदार्थम् । टित्त्व डीवर्थम् । 'यु' इत्यशस्य अनादेश । स तुडागमेन 'तन' इति जायते । सायन्तन, चिरन्तन, प्रगेतनम् इत्यादि । एते शेषाधिकारे सामान्यप्रत्ययाः । अथ शैषिकाणामर्थाः समर्थविभक्तयश्च निर्दिश्यन्ते--

(१४०६) **तत्र जातः** । ४ । ३ । २५ ।

मथुराया जातो माथुर । ग्रामे ग्राम्यो ग्रामीणो वा इत्यादि ।

(१४०७) **तत्र भवः** । ४ । ३ । ५३ ।

मथुरायां भवो माथुर । ग्राम्य , ग्रामीण इत्यादि ।

(१४०८) **दिगादिभ्यो यत्** । ४ । ३ । ५४ ।

दिशि भवं--दिश्यम् । दिश्, पक्ष, पूग, गण, रहस् इत्यादि ।

(१४०९) **शरीरावयवाच्च** । ४ । ३ । ५५ ।

भवार्थे यत् । कण्ठे भव--कण्ठ्यम् । मूर्वन्यम्, तालव्यम् इत्यादि ।

---

१ अह्नष्टखोरेव । ६ । ४ । १४५ । इति टिलोपनियमादल्लोप ।

(१४१०) **तत आगतः**।४।३।७४।

मथुराया आगतो माथुर। ग्राम्य ग्रामीण इत्यादि।

(१४११) **कृतश्छ्च्**।४।३।७८।

होतुरागत हौतृकम्। भ्रातृक, मातृकम् इत्यादि।

(१४१२) **पितुर्यच्च**।४।३।७९।

पितुरागत पित्र्य, पैतृकम्।

(१४१३) **तस्येदम्**।४।३।१२०।

षष्ठीसमर्थात् सम्बन्धिसामान्ये अण्। ग्रामादिभ्यो यदादयश्च। यथा—

भगवत इद—भागवतम्। ग्रामस्येद—ग्राम्य, ग्रामीणम्। देवदत्तस्येद—दैवदत्त देवदत्तीय वा। तस्येद—तदीयम् इत्यादि।

(१४१४) **तस्य विकारः**।४।३।१३४।

सुवर्णस्य विकार सौवर्णम् इत्यादि।

(१४१५) **अवयवे च प्राण्योषधिवृक्षेभ्यः**।४।३।१३५।

वक्ष्यमाणेभ्यस्तस्यावयव इत्यर्थेऽपि विकारप्रत्यया स्यु। यथा—

मयूरस्य विकारोऽवयवो वा मायूर।
दूर्वाया ,, ,, ,, दौर्व।
करीरस्य ,, ,, ,, कारीर।

(१४१६) **मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः**।४।३।१४३।

भक्ष्याच्छादनवर्जितयोर्विकारावयवयो षष्ठीसमर्थात् प्रातिपदिकात् वा मयट्। पक्षे यथाप्राप्तम्। यथा—

अश्मनो विकारावयवौ आश्मनम् आश्मो वा (अश्मनो विकारे ढिलोपौ वा) अश्ममय वा।

(१४१७) **फले लुक्**।४।३।१६३।

फले विवक्षिते विकारावयवप्रत्ययस्य लुक्। यथा—

आम्रस्य फल आम्रम्।

(१४१८) **लुप् च (वा)**।४।३।१६३।

'लुपि युक्तवद्व्यक्तिवचने'—जम्ब्वा फल—जम्बू। जाम्बव वा।

॥ * ॥ **पुष्पमूलेषु बहुल लुप्** । जाता पुष्प मूल वा जाति ।
इति प्राग्दीव्यतीयाणधिकार ।

अथ प्राग्वहतीयष्ठगधिकारः ।

(१४१९) **प्राग्वहतेष्ठक्** । ४ । ४ । १ ।

'तद्वहति . . .' इत्यत प्राक् ठगधिक्रियते । अत्राप्यधिकारसङ्ग्रह प्रक्रियासर्वस्वे—

"ठक्स्यात् पूर्व वहत्यर्थाद्दीव्यत्यथ खनन् जयन् ।
जित च सस्कृततरच्चरन्तश्चाथ जीवति ॥
हरन् निर्वृत्तसस्टे उपसिक्त च वर्त्तते ।
यच्छत्युञ्छन्नवन् कुर्वन् हन्ति तिष्ठति धावति ॥
गृह्णाति च चरत्येति समवैति च पश्यति ।
धर्म्य चावक्रय. पण्य शिल्प प्रहरण मति ॥
शील वृत्त हित भक्षा दीयते च नियोजित ।
अध्यायी च व्यवहरन् वसतीत्यर्थसग्रह ॥"

(१४२०) **तेन दीव्यति-खनति-जयति-जितम्** । ४ । ४ । २ ।

अक्षैर्दीव्यति जयति वा आक्षिक ।

(१४२१) **शिल्पम्** । ४ । ४ । ५५ ।

तदस्येत्यनुवर्त्तते । तदस्य शिल्पमित्यर्थे प्रथमासमर्थाष्ठक् ।

मृदङ्ग शिल्पमस्य—मार्दङ्गिक । वाशिक इत्यादि ।

(१४२२) **प्रहरणम्** । ४ । ४ । ५७ ।

धनु प्रहरणमस्य—धानुष्क । पारश्वधिक ।

इति प्राग्वहतीयष्ठगधिकार ।

अथ प्राग्घितीयो यत्—

(१४२३) **प्राग्घिताद्यत्** । ४ । ४ । ७५ ।

इह 'तत्र साधु'–रित्येवार्थो बहुविषयक ।

(१४२४) **तद्वहति रथयुगप्रासङ्गम्** । ४ । ४ । ७६ ।

रथ वहति–रथ्य । युग–युग्य । प्रसङ्ग–प्रासङ्ग्य ।

(१४२५) **धुरो यड्ढकौ** । ४ । ४ । ७७ । धुर्य । धौरेय ।

(१४२६) **नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्य-वध्यानाम्यसमसमितसंमितेषु** । १ । ४ । ९१ ।

नावा तार्या नाव्या नदी—'वान्तो यि प्रत्यये' इत्यावादेश । वयसा तुल्यो वयस्य इत्यादि ।

(१४२७) **धर्मपथ्यर्थन्यायादनपेते** । ४ । ४ । ९२ ।

धर्मादनपेत—धर्म्यम् । पथ पथ्यम् । अर्थादर्थ्यम् ।

(१४२८) **हृदयस्य प्रियः** । ४ । ४ । ९५ । * हृद्य ।

(१४२९) **तत्र साधुः** । ४ । ४ । ९८ । शरण्य ।

(१४३०) **पथ्यतिथिवसतिस्वपतेर्ढञ्** । ४ । ४ । १०४ ।

पाथेयम् । आतिथेय । वासतेयी । स्वापतेयम् ।

इति प्राग्घितीयो यदधिकार ।

अथ प्राक्क्रीतीयच्छयतोरधिकारः—

(१४३१) **प्राक् क्रीताच्छः** । ५ । १ । १ । तेन क्रीतमित्यत. प्राक् छ. ।

(१४३२) **उगवादिभ्यो यत्** । ५ । १ । २ । उवर्णान्तगवादिभ्या तु यत् ।

(१४३३) **तस्मै हितम्** । ५ । १ । ३ ।

वत्सेभ्यो हित वत्सीयम् । गोभ्यो हित गव्यम् । वटवे हित वटव्यम् ।

(१४३४) **आत्मन्विश्वजनभोगोत्तरपदात् खः** । ५ । १ । ९ ।

आत्मने हितमात्मनीनम् । विश्वजनीनम् । राजभोगीणम् ।

इति प्राक्क्रीतीयौ छयतौ ।

---

* 'हृदयस्य हृल्लेख-यद्-अण् ख्रासेषु' । ६ । ३ । ५० । इति हृदादेश ।

अथ प्राग्वतीयष्ठञधिकार —

(१४३५) **प्राग्वतेष्ठञ्** । ५ । १ । १८ । वतिप्रत्ययविधि यावत् ठञ् ।

(१४३६) **संख्याया अतिशदन्तायाः कन्** । ५ । १ । २२ ।

ठञोऽपवाद कन् ।

(१४३७) **तेन क्रीतम्** । ५ । १ । ३७ । पञ्चकम् ।

सप्तत्या क्रीत—साप्ततिकम् । विंशत्या तु—विंशतिकम् । त्रिंशता—त्रिंशत्कम् ।[१]

(१४३८) **तदर्हति** । ५ । १ । ६३ । श्वेतच्छत्रमर्हति—श्वैतच्छत्रिक ।

(१४३९) **कालात्** । ५ । १ । ७८ । इत्यधिकृत्य ।

(१४४०) **तेन निर्वृत्तम्** । ५ । १ । ७९ ।

अह्ना निर्वृत्तमाह्निकम् मासिक, वार्षिकमित्यादि ।

इति प्राग्वतीयष्ठञधिकार. ।

अथ वति —

(१४४१) **तेन तुल्यं क्रिया चेद्वतिः** । ५ । १ । ११५ ।

तेन तुल्यमिति तृतीयासमर्थाद्वति स्यात्, यत्तुल्य क्रिया चेत् सा भवति । प्रायिकोऽय नियम । गुणद्रव्ययोस्तुल्यत्वेऽपि प्रयोगो दृश्यते । 'तद्धितश्चासर्वविभक्ति' इत्यव्यय वति. । यथा—

गजेन तुल्य गजवद्धरति—अत्र धरणक्रिया तुल्या । गजवत्स्थूलोऽयमिति गुणतुल्यताया, गजवदश्वो न महार्घ इति द्रव्यतुल्यतायामपि क्वचित् प्रयोग ।

(१४४२) **तत्र तस्येव** । ५ । १ । ११६ ।

सप्तमीसमर्थात् षष्ठीसमर्थाच्च इवार्थे वति. । यथा—

मथुरायामिव मथुरावत् खुल्ले प्राकार । राज्ञ इव राजवत् भोगा वल्लभस्य ।

(१४४३) **तदर्हम्** । ५ । १ । ११७ ।

द्वितीयासमर्थाद्दार्हार्थे वति । अर्हे चेत्क्रिया भवति ।

विधिमर्हति विधिवदिज्यते ।

इति वति ।

---

[१] विंशतित्रिंशद्भ्या कन् संज्ञायामित्यते ।

अथ भावप्रत्ययाः—

(१४४४) तस्य भावस्त्वतलौ । ५ । १ । ११९ ।

भवत्यनेन शब्दोऽर्थविशेषे इति भाव । शब्दस्य प्रवृत्तिनिमित्त भाव इति लक्षितोऽयम् । षष्ठीसमर्थात् भावेऽर्थे त्वतलौ स्त । तत्र त्वप्रत्ययो नपुंसकम् । तल् तु स्त्रीलिङ्गम् । यथा—

गोर्भावो गोत्व, गोता वा । घटस्य भावो घटत्व, घटता वा ।

(१४४५) आ च त्वात् । ५ । १ । १२० ।

अपवादै सह पक्षे समावेशार्थं 'ब्राह्मणस्व·' इति यावत् त्वतलावधिक्रियेते । तेन प्रथिमा, पार्थव, पृथुत्व, पृथुता इत्यादि पारिभाषिकरूपाणि सिध्यन्ति ।

(१४४६) न नञ्पूर्वात्तत्पुरुषादचतुरसङ्गतलवणवटबुधकतरसलसेभ्यः । ५ । १ । १२१ ।

इत ऊर्ध्वम् उपक्रमिष्यमाणा भावकर्मार्थकप्रत्यया नञ्पूर्वात्तत्पुरुषान्न भवेयु चतुरादीन् वर्जयित्वा । तेन नञ्तत्पुरुषात् भावार्थे त्वतलावेव । न तु वक्ष्यमाणा ष्यञादय ।

(१४४७) पृथ्वादिभ्य इमनिज्वा । ५ । १ । १२२ ।

वावचन यथायोगमणादिसमावेशार्थम् । यथा—

पृथोर्भाव प्राथिमा—'ऋतो हलादेर्लघो' इति रादेश—पार्थव, पृथुत्व, पृथुता वा ।

(१४४८) वर्णदृढादिभ्यः ष्यञ्च । ५ । १ । १२३ ।

वर्णविशेषवाचिभ्यो दृढादिभ्यश्च ष्यञ् इमनिच् । यथा—

शुक्लस्य भाव शौक्ल्यम् । शुक्लिमा, शुक्लत्व, शुक्लता वा—वर्णवाचि ।
दृढस्य भाव दार्ढ्य, द्रढिमा, दृढत्व, दृढता वा—दृढादि ।

(१४४९) गुणवचनब्राह्मणादिभ्यः कर्मणि च । ५ । १ । १२४ ।

गुणवचना गुणवाचिन . भेदका । तेभ्यो ब्राह्मणादिभ्यश्च ष्यञ् । तस्य भाव· तस्य कर्म इति चार्थयो । यथा—

जडस्य भाव कर्म वा जाड्यम् । ब्राह्मणस्य भाव कर्म वा ब्राह्मण्यम् ।

ब्राह्मणादिराकृतिगण । एवमनन्तरोक्तश्चतुर्वर्णादिरपि ।

॥ * ॥ **चतुर्वर्णादीनां स्वार्थ उपसङ्ख्यानम् ।**

चत्वारो वर्णा एव चातुर्वर्ण्यम् । एव त्रैलोक्यमित्यादि ।

(१४९०) **हायनान्तयुवादिभ्योऽण् । ५ । १ । १३० ।**

द्विहायनस्य भाव कर्म वा द्वैहायनम् । यून—भाव, कर्म वा यौवनम् ।

(१४९१) **इगन्ताच्च लघुपूर्वात् । ५ । १ । १३१ ।**

शुचि—शौचम् । मुनि—मौनम् । लघु—लाघवम् । पृथु—पार्थवम् ।

(१४९२) **योपधाद्गुरूपोत्तमाद्वुञ् । ५ । १ । १३२ ।**

त्रिप्रभृतीनामन्तस्य समीपमुपोत्तमम् । यकारोपधात् गुरूपोत्तमाद्वुञ् भावकर्मणो । यथा—

रमणीय—रामणीयकम् । कमनीय—कामनीयकम् । आचार्य—आचार्यकम् । सहाय—साहायकम् ।

(१४९३) **द्वन्द्वमनोज्ञादिभ्यश्च । ५ । १ । १३३ ।**

शिष्योपाध्याय—शिष्योपाध्यायिका—स्त्रीत्व लोकात् । मनोज्ञ—मानोज्ञकम् । प्रियरूप—प्रैयरूपकम् इत्यादि ।

इति भावकर्मीया नञ्सुब्ओरत्वविश्च गता ।

इत परं प्रत्यया नाधिक्रियन्ते । केचित् प्रकीर्णका —

(१४९४) **तदस्य सञ्जातं तारकादिभ्य इतच् । ५ । २ । ३६ ।**

तारका अस्य सञ्जाता तारकित नभ । तारका, पुष्प, मुकुळ, कण्टक, सुख, दु ख कुड्मळ, रोग, व्याधि इत्यादि ।

(१४९५) **प्रमाणे द्वयसज्दघ्नञ्मात्रचः । ५ । २ । ३७ ।**

तदस्य प्रमाणमित्यर्थे द्वयसजादय । तत्र द्वयसज्दघ्नचावूर्ध्वमान एव । मात्रच् तु सार्वत्रिक इति विवेक । यथा—

ऊरुद्वयस ऊरुदघ्न वा नद्या जलम् । अगुष्ठमात्र पुरुष । क्रोशमात्रो मार्ग ।

(१४९६) **यत्तदेतेभ्यः परिमाणे वतुप् । ५ । २ । ३९ ।**

यत् परिमाणमस्य यावत् । तावत् । एतावत् —'आ सर्वनाम्न.' (१४२२) इत्याकारोऽन्तादेश' ।

(१४९७) **किमिदंभ्यां वो घः** । ५ । २ । ४० ।

आभ्यां वतुप् तस्य च वकारस्य घादेश । घ=इय । वतुप्=वतुप् =इयतुप् । 'इदकिमोरीश्की' (११२१) इति इदम ईश् सर्वादेश । तस्य च 'यस्येति च' इति लोपे प्रत्यय एवावशिष्यते—ई + इयत् = इयत् । किमः कियत् । इयच्छब्दस्य विचित्रा व्युत्पत्तिमविकृत्य केनापि श्लेषक-विना गीतोऽय श्लोक —

उदितवति परस्मिन् प्रत्यये शास्त्रयोनौ
गतवति विलय च प्राकृतेऽपि प्रपञ्चे ।
सपदि पदमुदीत केवलप्रत्यय यत्
तदियदिति मिमीते को हृदा पण्डितोऽपि ॥

(१४९८) **किमः संख्यापरिमाणे डति च** । ५ । २ । ४१ ।

का सख्या परिमाणमेषा कति, कियन्तो वा ब्राह्मणा ।

(१४९९) **संख्याया अवयवे तयप्** । ५ । २ । ४२ ।

सोऽस्यावयव इत्यर्थे सख्यावाचकात्तयप् । पञ्चावयवा अस्य पञ्चतयम् । दशतय, चतुष्टयम् इत्यादि ।

(१५००) **द्वित्रिभ्यां तयस्यायज्वा** । ५ । २ । ४३ ।

द्वाववयवावस्य द्वय, द्वितय वा । एव त्रय त्रितयम् ।

(१५०१) **तदस्मिन्नधिकमिति दशान्ताड्डः** । ५ । २ । ४५ ।

एकादश अधिका अस्मिन्निलेकादश शत, सहस्र वा । एव द्वादश त्रयोदशमित्यादि । शतसहस्रयोर्विशेष्यत्व एव ।

(१५०२) **शदन्तविंशतेश्च** । ५ । २ । ४६ ।

त्रिंश शत, विंश सहस्रम् इत्यादि ।

अथ पूरणीप्रत्ययाः ।

(१५०३) **तस्य पूरणे डट्** । ५ । २ । ४८ ।

षष्ठीसमर्थात् सख्यावाचिनो डट् पूरणेऽर्थे । डित्वाट्टिलोप । यथा—एकादशाना पूरण एकादश । द्वादश त्रयोदश इत्यादि ।

(१४६४) **नान्तादसंख्यादेर्मट्** । ५ । २ । ९१ ।

डट्प्रत्ययस्य मडागम । पञ्चम सप्तम इत्यादि ।

(१४६५) **षट्कतिकतिपयचतुरां थुक्** । ५ । २ । ९१ ।

षडादीना डटि परे थुगागम । कतिपयशब्दस्य सख्यात्वाभावेऽपि वचनसामर्थ्याड्डट् । यथा—

षष्ठ , कतिथ , कतिपयथ , चतुर्थ ।

॥ * ॥ **चतुरश्छयतावाद्यक्षरलोपश्च** । तुर्य , तुरीय ।

(१४६६) **बहुपूगगणसङ्घस्य तिथुक्** । ५ । २ । ९२ ।

बहूना पूरणो बहुतिथ इत्यादि ।

(१४६७) **वतोरिथुक्** । ५ । २ । ९३ ।

यावतिथ , तावतिथ , एतावतिथ ।

(१४६८) **द्वेस्तीयः** । ५ । २ । ९४ ।—द्वितीय ।

(१४६९) **त्रेः सम्प्रसारणं च** । ५ । २ । ९५ । तृतीय ।

(१४७०) **विंशत्यादिभ्यस्तमडन्यतरस्याम्** । ५ । २ । ९६ ।

डटस्तमडागम । 'ति विंशतेर्डिति' इति भसज्ञाया तिकारलोप· ।

विंश , विंशतितम , त्रिंश , त्रिंशत्तम ।

(१४७१) **नित्यं शतादिमासार्धमाससंवत्सराच्च** । ५ । २ । ९७ ।

शतादुत्तरेभ्यश्च नित्य डटस्तमडागम । मासादिभ्यश्चैव विधानसामर्थ्याड्डट् तस्य च तमट् । —शततम , सहस्रतम , लक्षतम इत्यादि ।

(१४७२) **षष्ट्यादेश्चासंख्यादेः** । ५ । २ । ९८ ।

केवलेभ्य षष्टिसप्तत्यशीतिनवतिशब्देभ्यश्च नित्य तमट् ।

षष्टितम , सप्ततितम , अशीतितम नवतितम ।

सख्यादेस्तु एकाष्ट , द्वासप्तत इत्यादि ।

इति पूरण· ।

अथ मत्वर्थीया —

(१४७३) तदस्यास्त्यस्मिन्निति मतुप् । १ । २ । ९४ ।

गावोऽस्य सन्तीति गोमान् देवदत्त. । धनुरस्यास्तीति धनुष्मान् । हविरस्यास्तीति हविष्मती वेदि , चरुमती ।

मतुपो मकारस्य क्वचित् वादेशोऽसिद्धकाण्डे विधीयते । यथा—

(१४७४) मादुपधायाश्च मतोर्वोऽयवादिभ्यः । ८ । २ । ९ ।

म् च अश्च मम् इति समाहारद्वन्द्व. । अवर्णमकाराभ्यामित्यर्थ । उपधाभूताभ्या अन्तभूताभ्या वा अवर्णमकाराभ्या परस्य मतुपो वादेश । न तु यवादिभ्य परस्य । आदे परस्येति मकारस्यैव वादेश । यथा—

मान्तस्य—क्ष्मावान् , श्वावान्	अवर्णान्तस्य—धनवान्, भार्यावान् ।
मोपधस्य—लक्ष्मीवान्, चमूवान्, डाडिमीवान्	अवर्णापवरय—पयस्वान्, भास्वान् ।

(१४७५) झयः । ८ । २ । १० ।

झयन्तान्मतुपो वकारादेश. । यथा—विद्युत्वान् मेघ । हृद्वान् देश ।

(१४७६) सञ्ज्ञायाम् । ८ । २ । ११ ।

अहीवती, कपीवती इत्यादि ।

(१४७७) उदन्वानुदधौ च । ८ । २ । १२ । चान्मुनौ ।

(१४७८) राजन्वान् सौराज्ये । ८ । २ । १३ । अन्यत्र राजवान् ।

उक्ता वादेशविधय । अथ प्रकृते. प्रत्ययविधिरनुबध्यते—

(१४७९) रसादिभ्यश्च । ५ । २ । ९५ ।

रसादिभ्यश्च मतुप् अपवादबाधनार्थं विधीयते ।

(१४८०) लोमादिपामादिपिच्छादिभ्यः शनेलचः । ५ । २ । १०० ।

यथासख्य प्रत्यया. वा स्यु । यथा—

लोमश —लोमवान् । पामन —पामवान् । पिच्छिल पिच्छावान् ।

(१४८१) अत इनिठनौ । ५ । २ । ११५ ।

अदन्तादिनिठनौ वा पक्षे मतुप् । यथा—

दण्डोऽस्यास्तीति—दण्डी, दण्डिक, अन्यतरस्यामित्यविकारात् दण्डवान् । छत्रमस्यास्तीति—छत्री छत्रिक, छत्रवान् ।

॥ * ॥ (१) एकाक्षरात्—यथा— स्ववान्
(२) कृतो ,, कारकवान् ।
(३) जातेः ,, व्याघ्रवान् ।
(४) सप्तम्यां च न तौ स्मृतौ—दण्ड अस्यामस्ति दण्डवती ।

(१४८२) अस्मायामेधास्रजो विनिः ।५।२।१२१।

असन्तान्मायादिभ्यश्च विनि । यशस्वी, तरस्वी, मायावी ।

(१४८३) अर्शआदिभ्योऽच् ।५।२।१२७।

अर्शस, पलित, कर्दम इत्यादि । आकृतिगण ।

'तदस्यास्त्यस्मिन्निति मतुप्' इति सूत्रे इतिशब्दस्य प्रयोजन व्याख्यात पूर्वाचार्यै । यथा—

"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षाया भवन्ति मतुवादय. ॥"

यथा—भूम्नि—गोमान् । निन्दाया—पुण्ड्री माली वा पुरुष । प्रशंसाया—रूपवती कन्या, बुद्धिमान् बाल । नित्ययोगे—क्षीरिणो वृक्षा । अतिशायने—उदरिणी कन्या । संसर्गे छत्री, दण्डी पान्थ । अस्तिविवक्षाया—अस्तिमान् गृहस्थ । इति मत्वर्थीया ।

समर्थानामिति प्रथमादिति चाधिकारयोर्गतोऽवधि । वेति तु वर्त्तते एव ।

अथ विभक्तितद्धिताः—

(१४८४) प्राग्दिशो विभक्तिः ।५।३।१।

'दिक्शब्देभ्य सप्तमी ' इत्यत प्राग्विधीयमाना प्रत्यया विभक्तिसंज्ञा स्यु । 'त्यदादीनाम ', 'न विभक्तौ तुस्मा ' इत्यादिप्रक्रियासमावेशार्थक संज्ञाविधि । अव्ययान्येतानि ।

(१४८५) किंसर्वनामबहुभ्योऽद्यादिभ्यः ।५।३।२।

विभक्तितद्धिता सर्वनामभ्यो बहुशब्दाच्च स्यु । किंशब्दवर्जितेभ्यो द्यादिभ्यस्तु न ।

(१४८६) **इदम इश्** । १ । ३ । ३ ।

विभक्तितद्धिते परे इदम इशादेश ।

(१४८७) **एतेतौ रथोः** । १ । ३ । ४ ।

रेफथकारादौ, प्रत्यययोरिदम 'एत' 'इत्' इत्यादेशौ यथासङ्ख्यम् स्तः । इशोऽपवाद ।

(१४८८) **एतदोऽश्** । १ । ३ । ५ । विभक्तितद्धिते परे ।

(१४८९) **सर्वस्य सोऽन्यतरस्यां दि** । १ । ३ । ६ ।

सर्वशब्दस्य 'स' इत्यकारान्त आदेशो वा दादौ विभक्तितद्धिते । एव प्रक्रियाविशेषानुक्त्वा प्रत्ययान् विदधाति ।

(१४९०) **पञ्चम्यास्तसिल्** । १ । ३ । ७ ।

किंसर्वनामबहुभ्य पञ्चम्यर्थे तसिल्प्रत्ययो वा । त्यदाद्यत्वम् ।

तद्—तत । यद्—यत । इदम इश्—इत । एतदोऽश्—अत, सर्वत, अन्यत, पूर्वत इत्यादि । किंशब्दस्य 'किम क' इत्यस्यापवादत्वेन ।

(१४९१) **कु तिहोः** । ७ । २ । १०४ ।

(१४९२) **काति** । ७ । ५ । १९४ ।

इति कु क-आदेशयोर्विधानात्तसिलि कुत इति रूपम् ।

(१४९३) **तसेश्च** । १ । ३ । ८ ।

'प्रतियोगे पञ्चम्यास्तसि' 'अपादाने चाहीयरुहो' इति वक्ष्यमाणस्य तसेश्च किंसर्वनामबहुभ्यस्तसिलादेशो विधीयते । विभक्तिकार्यप्रापणार्थमयमायास । कुत तत इत्यादि ।

(१४९४) **सप्तम्यास्त्रल्** । १ । ३ । १० ।

कुत्र, बहुत्र, तत्र, सर्वत्र, अत्र, अमुत्र इत्यादि ।

(१४९५) **इदमो हः** । १ । ३ । ११ । त्रलोऽपवाद । इदम इश्—इह ।

(१४९६) **किमोऽत्** । १ । ३ । १२ ।

अय विशेषविधिरेव । न तु त्रलोऽपवाद । 'काति' इति किम. कादेश । 'यरयेति च' इत्यकारलोप—क ।

(१४९७) **इतराभ्योऽपि दृश्यन्ते** । ५ । ३ । १४ ।

विभक्त्यन्तरेऽपि उक्ता विभक्तितद्धिता भवन्ति । ततोभवान्, तत्रभवान्, अतोभवान्, अत्रभवान् इहभवान् इत्यादय पूजार्थका अनेन सिध्यन्ति ।

(१४९८) **सर्वैकान्यकिंयत्तदः काले दा** । ५ । ३ । १५ ।

सर्वादिभ्य कालेऽर्थे दाप्रत्ययस्तलोऽपवाद । सर्वदा । 'सर्वस्य सोऽन्यतरस्या दि'—सदा । एकदा इत्यादि ।

(१४९९) **इदमो र्हिल्** । ५ । ३ । १६ । एतर्हि 'एतेतौ रथो' ।

(१५००) **अधुना** । ५ । ३ । १७ । अधुना—इशादेशे 'यस्येति' लोप ।

(१५०१) **दानीं च** । ५ । ३ । १८ । इदानीम् ।

(१५०२) **तदो दा च** । ५ । ३ । १९ । तदानीं । तदा ।

(१५०३) **अनद्यतने र्हिलन्यतरस्याम्** । ५ । ३ । २१ ।

किसर्वनामबहुभ्य इलेप् । कर्हि, कदा । यर्हि, यदा । तर्हि, तदा ।

(१५०४) **सद्यःपरुत्परार्यैषम परेद्यव्यद्यपूर्वेद्युरन्येद्युरितरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः** । ५ । ३ । २२ ।

सप्तम्या काले एते निपात्यन्ते । यथा—

समानेऽहनि—सद्य । पूर्वेऽह्नि—परुत् । पूर्वतरे—परारि । वर्त्तमाने—एषम । परस्मिन् दिने—परेद्यवि । अस्मिन् दिने—अद्य । शेषेषु दिनशब्दस्य द्युरादेश ।

(१५०५) **प्रकारवचने थाल्** । ५ । ३ । २३ ।

किसर्वनामबहुभ्य प्रकारेऽर्थे थाल् ।

सर्वेण प्रकारेण—सर्वथा, यथा, तथा ।

(१५०६) **इदमस्थमुः** । ५ । ३ । २४ ।

थालोऽपवाद । इत्थम् 'एतेतौ रथो' इति इदादेश ।

(१५०७) **किमश्च** । ५ । ३ । २५ । कथम् ।

इति विभक्तितद्धिता ।

अथ केचित् प्रकीर्णका—

(१९०८) संख्याया विधार्थे धा । ५ । ३ । ४२ ।

त्रिधा प्रकार । एकधा, द्विधा, त्रिधा इत्यादि । इदमाद्यन्यथम् ।

(१९०९) याप्ये पाशप् । ५ । ३ । ४७ ।

याप्य कुत्सित । कुत्सितो भिषक्-भिषक्पाश ।

(१९१०) भूतपूर्वे चरट् । ५ । ३ । ५३ ।

पूर्वभूतो भूतपूर्वे । पूर्वं दृष्टो दृष्टचर । आढ्यचर, उपाध्यायचर, भिषक्चर ।

(१९११) षष्ठ्या रूप्य च । ५ । ३ । ५४ ।

देवदत्तस्य भूतपूर्वो देवदत्तरूप्य, देवदत्तचरो वा गौ ।

अथ अतिशायनतद्धिताः—

(१९१२) अतिशायने तमबिष्ठनौ । ५ । ३ । ५५ ।

प्रकर्षेऽर्थे प्रातिपदिकात्तमबिष्ठनौ । प्रकर्षेण आढ्य आढ्यतम । पटु पटिष्ठ ।

(१५१३) तिङश्च । ५ । ३ । ५६ ।

तिङन्तादप्यतिशायने तमप् । इष्ठस्तु निषेत्स्यते । अत्र प्रक्रियोच्यते—

(१५१४) किमेत्तिङव्ययघादाम्बद्रव्यप्रकर्षे । ५ । ४ । ११ ।

किम, एदन्तात्, तिङो,—ऽव्ययाच्च परो यो घस्तस्य आमुप्रत्ययः स्यात् स्वार्थे । प्रकर्षो घबाच्यो न चेद्द्रव्यस्य । अथ को नाम घ ?—

(१९१५) तरप्तमपौ घः । १ । १ । २२ । एतौ घसंज्ञौ ।

प्रकर्षेण पचति पचतितमाम् । पठतितमाम् । किरतितमा—तिङ् ।

आह्वेतमा प्रेगेतमा—एत् । उच्चैस्तमा, सुतमाम—अव्ययम् ।

(१९१६) द्विवचनविभज्योपपदे तरबीयसुनौ । ५ । ३ ५७ ।

द्वयो प्रकर्षवचने, 'पञ्चमी विभक्ते' इति विहिते पञ्चम्यन्ते चोपपदे तरबीयसुनौ स्त । तमबिष्ठनोरपवादौ । अतो बहुषु प्रकर्षनिर्धारण एव तौ । यथा—

---

* द्वेधा, द्वैध, त्रेधा, त्रैधम, ऐकध्यम्, इति विशेषरूपाण्यपि सन्ति ।

रामकृष्णयो कृष्ण पटुतर , पटीयान् वा । माथुरा पाटलीपुत्रेभ्य आढ्यतरा । सुकुमारतर , पचतितराम् । सुतराम्, उच्चैस्तराम् ।

(१५१७) **अजादी गुणवचनादेव** ।५।३।५८।

अतिशायनप्रत्ययेषु इष्ठन्नीयसुनौ अजादी । तौ गुणवाचिभ्य एव । एवमेवोदाहृतम् । इष्ठेमेयस्सु विहिता प्रक्रिया अत्रानुसन्धेया ।

(१५१८) **प्रशस्यस्य श्रः** ।५।३।६०।

इष्ठन्नीयसुनो । प्रशस्यतर , श्रेयान् । प्रशस्यतम श्रेष्ठ ।

(१५१९) **ज्य च** ।५।३।६१। प्रशस्यतरो ज्यायान्, ज्येष्ठ ।

(१५२०) **वृद्धस्य च** ।५।३।६२। वृद्धतरो ज्यायान्, ज्येष्ठ

(१५२१) **अन्तिकबाढयोर्नेदसाधौ** ।५।३।६३।

यथासङ्ख्यम् । नेदीयान्, नेदिष्ठ । साधीयान्, साधिष्ठ ।

(१५२२) **युवाल्पयोः कनन्यतरस्याम्** ।५।३।६४।

यवीयान्, यविष्ठ । कनीयान्, कनिष्ठ । अल्पीयान्, अल्पिष्ठ ।

(१५२३) **विन्मतोर्लुक्** ।५।३।६५।

इष्ठन्नीयसुनो परयोर्मतुपो विन्प्रत्ययस्य च लुक् ।

बलवत्तरो बलीयान् । बलवत्तमो बलिष्ठ । मेधावितरो मेधीयान् । मेधावितमो मेधिष्ठ ।

इत्यातिशायनिका ।

अथ पुनरपि प्रकीर्णका ।

(१५२४) **प्रशंसायां रूपप्** ।५।३।६६।

प्रशस्तो वैयाकरणो वैयाकरणरूप ।

(१५२५) **ईषदसमाप्तौ कल्पब्देश्यदेशीयरः** ।५।३।६७।

ईषदून पटु पटुकल्प , पटुदेश्य , पटुदेशीयो वा ।

तिङश्चेत्यनुवृत्तेरेते तिङन्तादपि स्यु —

प्रशस्त पचति–पचतिरूपम् । ईषदून पचति–पचतिकल्पम् ।

तद्धितत्वेन सुबुत्पत्तौ द्वित्वकर्मत्वादीनामयोगात् सामान्ये नपुंसक प्रथमैकवचन च । तथा चाव्ययप्रायत्वम् ।

(१५२६) **विभाषा सुपो बहुच् पुरस्तात्तु** । ५ । ३ । ६८ ।

ईषदसमाप्तावित्येव । सुप् इत्युक्तिस्तिङो निवृत्त्यर्था । बहुच्-प्रत्यय प्रकृते पूर्वं भवतीति विशेष । विभाषाग्रहण समासार्थम् ।

ईषदून पटुर्बहुपटु ।

(१५२७) **प्रकारवचने जातीयर्** । ५ । ३ ६९ ।

पटुप्रकार पटुजातीय । मृदुजातीय ।

अथापकर्षक कप्रत्यय —

(१५२८) **प्रागिवात् कः** । ५ । ३ । ७० ।

'इवे प्रतिकृतौ' इति पर्यन्त कप्रत्यय सामान्येनाविक्रियते ।

(१५२९) **अव्ययसर्वनाम्नामकच् प्राक् टेः** । ५ । ३ । ७१ ।

कप्रत्ययापवादोऽकच् । अय टे प्राग् भवतीति विशेष । तिङन्ते-भ्योऽप्ययमिष्यन्ते ।

अज्ञाते, कुत्सिते, चाल्पे, ह्रस्वे, सज्ञानुकम्पयो ।
प्रतिकृत्यामथ स्वार्थेऽप्येष कप्रत्ययो भवेत् ॥

यथा—कस्यायमित्यज्ञातोऽश्व अश्वक । उष्ट्रक इत्यादि । कुत्सितोऽल्पो ह्रस्वो वा अश्व अश्वक । शूद्रक, शाबक, वेणुक इत्यादय सज्ञायाम् । अनुकम्पनीय पुत्र पुत्रक । वत्सक । बुभुक्षितक । अश्वस्य प्रतिकृतिरश्वक । उष्ट्रक । गजक । वृक्ष एव वृक्षक । बाल एव बालक । अल्प पचति पचतकि । कुत्सितमजल्पत् अज-ल्पकत् । उच्चकै, नीचकै, सर्वके, सक, अमुक सयका ।

(१५३०) **समासाच्च तद्विषयात्** (छ) । ५ । ३ । १०६ ।

तच्छब्देन इवार्थ परामृश्यते । इवार्थविषयात् समासाच्छप्रत्यय-स्यात् । यथा—

काकतालीयो देवदत्तवत् —काकागमनतालपतनयोर्घटनेन जात काकवत् इव यदृच्छाघटित इत्यर्थ ।

अथ केचिदव्ययतद्धिताः ।

(१५३१) संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ।५।४।१७।

पञ्चकृत्वो भुङ्क्ते—पञ्चवारमित्यर्थे । एव षट्कृत्व इत्यादि ।

(१५३२) द्वित्रिचतुर्भ्यः सुच् ।५।४।१८।

कृत्वसुचोऽपवाद । द्वि, त्रि, चतु ।

(१५३३) एकस्य सकृच्च ।५।४।१९।

एकशब्दस्य सकृदित्यादेश सुप्रत्ययश्च । प्रत्ययस्य सयोगान्तलोप—सकृद्—एकवारमित्यर्थ ।

(१५३४) प्रज्ञादिभ्यश्च (अण्) ।५।४।३८।

स्वार्थे अण्प्रत्यय । नेद परमव्ययम् ।

प्रज्ञ एव—प्राज्ञ । वणिगेव—वाणिज । मरुदेव—मारुत । चोर एव—चौर । मन—एव—मानसम् । देवतैव—दैवतम् ।

(१५३५) बहुलपार्थाच्छस्कारकादन्यतरस्याम् ।५।४।४२।

बहु, बहुभि,—बहुभ्यो, बहुषु वा बहुशो ददाति । एव स्तोकश, अल्पश इत्यादि ।

(१५३६) संख्यैकवचनाच्च वीप्सायाम् ।५।४।४३।

सख्यावाचिभ्य परिमाणवाचिभ्यश्च कारकेभ्य. शस् वीप्साया द्योत्यायाम् । द्वौ द्वौ मोदकौ ददाति । द्विशो मोदक ददाति । एव त्रिश, शतश, सहस्रश । प्रस्थशो धान्य क्रीणाति ।

(१५३७) प्रतियोगे पञ्चम्यास्तसिः ।५।४।४४।

प्रतिना कर्मप्रवचनीयेन योगे विहिताया पञ्चम्यास्तसि । यथा—अभिमन्युरर्जुनत प्रति ।

(१५३८) अपादाने चाहीयरुहोः ।५।४।४५।

अपादाने पञ्चम्याश्च तसिर्न तु हीयरुहो ।

अपादाने—ग्रामत आगच्छति । चोरतो बिभेति ।

हीयरुहोस्तु—अर्थाद्धीयते । वृक्षादवरोहति इति पञ्चम्येव ।

॥ * ॥ आद्यादिभ्यस्तसेरुपसख्यानम् ।

आद्यादिभ्यो विभक्त्यन्तरेऽपि तसि। आदौ आदित। पार्श्वे-पार्श्वत। एव पृष्ठत इत्यादि। अयमेव सार्वविभक्तिकस्तसिरित्युच्यते।

(१९३९) **षष्ठ्या व्याश्रये**।५।४।४८।

नानापक्षसमाश्रयो व्याश्रय। तत्र षष्ठ्यास्तसि। यथा—

देवा अर्जुनतोऽभवन्। अर्जुनस्य पक्षे इत्यर्थ।

(१९४०) **कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः**।५।४।५०।

॥ * ॥ **अभूततद्भाव इति वक्तव्यम्**।

कारणस्य विकाररूपेण अभूतस्य तदात्मना भावोऽभूततद्भाव। सम्पद्यते कर्त्ता सम्पद्यकर्त्ता। अभूततद्भावे गम्यमाने कृभ्वस्तिभिर्वातुभिर्योगे सम्पत्तिकर्तु प्रातिपदिकात् च्विरिति सर्वलोपी प्रत्यय। 'अस्य च्वौ' इत्यवर्णान्तस्य ईत्वमुक्त च्वौ। यथा—

अशुक्ल शुक्लो भवति शुक्लीभवति। पटीस्यात्तन्तु।

अशुक्ल शुक्ल करोति शुक्लाकरोति। घटीकरोति मृदम्।

(१९४१) **विभाषा साति कात्स्न्र्ये**।५।४।५२।

पूर्वसूत्रविषया सातिर्वा कात्स्न्र्ये गम्यमाने।

भस्मसाद्भवति, भस्मीभवति काष्ठ—कात्स्न्र्येन अस्म सम्पद्यते। एकदेशे तु भस्मीभवतीत्येव।

(१९४२) **अभिविधौ सम्पदा च**।५।४।५३।

अभिव्याप्तौ गम्यमानाया च्विविषये साति सम्पद्यतेर्योगे च।

उदकसात् सम्पद्यते भवति वा लवणम्। उदकीभवति इति च।

(१९४३) **तदधीनवचने**।५।४।५४।

स्वामिविशेषवाचिन प्रातिपदिकादीप्सितव्येऽर्थे साति कृभ्वस्तिसम्पद्यतिभिर्योगे। यथा—

राज्ञोऽधीन करोति राजसात्करोति महीम्। एव राजसात्भवति सम्पद्यतेऽस्ति वा।

(१९४४) **देये त्रा च**।५।४।५५।

ब्राह्मणत्राकरोति, ब्राह्मणसात्करोति वा गाम्।

(१५४५) **देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्** । १ । ४ । ९६ ।

देवादिभ्यो द्वितीयासप्तम्योरर्थे बहुल त्रा । यथा—

देवान् गच्छति—देवत्रा गच्छति । मनुष्येषु वसति—मनुष्यत्रा वसति । बहुलग्रहणादन्यत्रापि—'बहुत्रा जीवतो मन '

(१५४६) **अव्यक्तानुकरणाद् द्व्यजवरार्धादनितौ डाच्** । १ । ४ । ९७ ।

द्व्यजवरम् अक्षरद्वयादन्यूनमर्धं यस्य तस्मादव्यक्तानुकरणशब्दात् कृञ्वस्तियोगे डाच् न त्वितिशब्दे परे । यथा—

पटपटाकरोति पट । चटचटाकरोतीन्धनम् ।

इत पर तद्धितेषु समासान्ता शिष्यन्ते । तान् समासविधेरनन्तर वक्ष्याम ।

आकाङ्क्षाकाण्डः ।

शब्दाना व्युत्पत्तिर्व्युत्पन्नाना शब्दानामव्युत्पन्नाना च सुप्तिङ्भेद-भिन्ना रूपनिष्पत्तयश्च व्याख्याता । इत पर निष्पन्नाना पदानाम् अन्यो-न्यान्वये यानि कार्याणि तानुच्यन्ते—

(१५४७) **समर्थः पदविधिः** । २ । १ । १ ।

पदसम्बन्धी विधि सर्वोऽपि सङ्गतार्थो भवितुमर्हति । पदकार्याण्यर्थ-साङ्गत्य एव प्रवर्तेरन् । अर्थसाङ्गत्यमेव सामर्थ्यमित्युच्यते । इह हि सस्कृ-तभाषाया सहिताया· प्राबल्याद्वाक्यद्वयप्रयोगे पूर्ववाक्यान्तिमपदस्य उत्तर-वाक्यादिपदेन सहान्वयाभावेऽपि योगसद्भावाल्लक्षणैकचक्षु. शिष्य. पदकार्या-ण्यपि कदाचिदापादयेदिति शङ्कमान आचार्य परिभाषामेनां प्रणीतवान् । तेन पुत्रो राज्ञ , पुरुषो देवदत्तस्य इत्यत्र सामर्थ्याभावात् राज-पुरुषपदयोः राजपुरुष इति समासो न प्राप्नोति । पदविधिरित्युक्तेर्वर्णकार्याणि तु भव-

न्त्येव । यथात्रैव डस सकारस्य रुत्वे पाक्षिकावुपध्मानीयविसर्गौ । यथा वा तिष्ठतु दध्याहर भोस्तक्रमित्यादौ यण् सन्धिकार्यम् ।

सामर्थ्यं तावद्विध—व्यपेक्षा एकार्थीभावश्चेति । तत्र स्वार्थपर्यवसायित्वेन स्वतन्त्राणामेव पदानामाकाङ्क्षावशाद्. परस्परसम्बन्ध सा व्यपेक्षा समुदायार्थस्य एकत्वप्रतीत्यर्थं स्वस्वाभिधेयस्य परस्परस्मिन् न्यग्भावनेन पर तन्त्राणां पदाना सामर्थ्यमेकार्थीभाव । एकार्थीभाव एव वृत्तिरित्युच्यते । सा च कृत्, तद्धित, समास, एकशेष, सनाद्यन्ता इति पञ्चविधा । एषु समासैकशेषयोरेव घटकावयवा पदानि । अन्ये पदप्रत्ययाभ्याम् उपकल्पिता । वृत्तीनामर्थानुवादक वाक्यं विग्रह इत्युच्यते । वृत्तिषु घटकावयवानां स्वातन्त्र्याभावाद्विशेषणयोगो न घटते । यथा—

दृढ कुम्भ करोतीति दृढ कुम्भकार —(कृत्) । इति न ।
अश्वर्वेन शतेन क्रीत अश्ववेंन शत्य —(तद्धित) । ,,
विक्रमिणो राज्ञ पुरुष विक्रमिणो राजपुरुष –(समास) । ,,
युवतिर्माता वृद्ध पिता च युवतिर्वृद्ध पितरौ–(एकशेष) । ,,
आयुष्मन्त पुत्रमिच्छति आयुष्मन्त पुत्रकाम्यति—(सनाद्यन्त) । इति न ।

विशेषणविशिष्टे वाक्ये वृत्तिर्न प्रवर्तेतैव । वृद्धस्य दशरथस्यापत्यमिति विवक्षाया दशरथशब्दात् 'अत इञ्' इत्यपत्यप्रत्ययस्य नावकाश एव । तथा चोक्तम् ।

सविशेषणानां वृत्तिर्न, वृत्तस्य च विशेषणयोगो न ।

इति । वृत्तौ घटक वृत्तम् ।

वाक्ये सामर्थ्यं व्यपेक्षा । तत्र च पदाना स्वातन्त्र्याद्यथेष्ट विशेषणयोग । आकाङ्क्षायोग्यतासन्निध्यनुरोधेनैकस्यानेकपदान्वयोऽपि भवति । यथा—राज्ञो देवदत्तस्य च पुरुष । राज्ञ पुरुषोऽश्व । तव वा मम वा गृहम ।

नित्यसापेक्षाणां तु शब्दाना वृत्तावपि एकदेशान्वयो भवत्येव । तथा चोक्तम्—

'सम्बन्धिशब्द सापेक्षो नित्यं सर्वः समश्नुते ।
वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते' ॥

अनेन देवदत्तस्य गुरुकुलम् इत्यादि सिध्यति । अन्यत्रापि

शिवस्य भगवतो भक्त शिवभागवत ।
आकृष्टा मरुता लीला यैस्तान् 'मरुतामाकृष्टलीलान्' } —रघुवंशम्
गृहीतो रतेरनुनयो येन तेन 'रतेर्गृहीतानुनयेन' }

इत्यादौ सापेक्षाणा समासो दृश्यते । तेन यत्रार्थप्रतीतिर्न हीयते तत्र सापेक्षाणामपि व्यधिकरणविशेषणानाम् एकदेशान्वयोऽभ्युपेय एवेति स्थितम् ।

समासप्रकरणम् ।

अन्विताना पदानामेकीकरण समास । स च घटकपदाना जातिभेदाभिप्रायेण

'सुपा सुपा, तिङा नाम्ना, धातुनाथ तिङा तिङा ।
सुबन्तेनेति च ज्ञेय समास षड्विधो बुधै' ॥

इत्युक्त्वरीत्या षड्विध । किन्त्वय विभागो नातीव कार्यकारी । घटकपदाना प्राधान्यनिबन्धने विभागे समासश्चतुर्विध —

पूर्वपदार्थप्रधानोऽव्ययीभाव —उपहरि ।
उत्तरपदार्थप्रधानस्तत्पुरुष —राजपुरुष ।
उभयपदार्थप्रधानो द्वन्द्व —रामलक्ष्मणौ ।
अन्यपदार्थप्रधानो बहुव्रीहि —पीताम्बर ।

इति । अयमेव विभागो व्युत्पादक, पाणिनिना चादृत । किन्तु प्रक्रियैकपरायण आचार्यस्तत्पुरुषादी सज्ञा समासान्तादिकार्यप्रापणार्थमेव निबध्नाति । अतश्चाव्ययीभावादीनामर्थव्यभिचार सुलभ एव । यथा—

शाकप्रति इत्यव्ययीभाव उत्तरपदार्थप्रधान । अतिमाल इति तत्पुरुष पूर्वपदार्थप्रधान । द्वित्रा इति बहुव्रीहिरुभयपदार्थप्रधान ।

तत्तदधिकारेषु विहिता समासान्तत्तत्सज्ञा इत्येव । एव सर्वनामादय सज्ञा

अपि कार्यनिबन्धना एव, नत्वर्थनिबन्धना । अन्यथा प्रथमचरमतया-ऽर्थादीना कथ सर्वनामता स्यात् ?

समासविधे प्राक् तदुपयुक्ता प्रक्रिया वक्ष्याम —

(१५४८) **तत्पुरुषः समानाधिकरणः कर्मधारयः** । १ । २ । ४२ ।

उत्तरपदप्राधान्यात्तत्पुरुषे हि पूर्वपद विशेषणम् । तच्च तत्र विशेष्येणोत्तरपदेन समानाधिकरण स तत्पुरुष कर्मधारयसज्ञ । यथा—

नीलमुत्पल नीलोत्पलम् ।

(१५४९) **प्रथमानिर्दिष्टं समास उपसर्जनम्** । १ । २ । ४३ ।

समासविधौ प्रथमाविभक्त्या निर्दिष्ट पदमुपसर्जनसज्ञम् । यथा—

'विशेषण विशेष्येण बहुलम्' इति विधौ प्रथमान्त विशेषणपदमुपसर्जनम् ।

(१५५०) **एकविभक्ति चापूर्वनिपाते** । १ । २ । ४४ ।

एका अभिन्ना विभक्तिर्यस्य तदेकविभक्ति । विग्रहे नियतविभक्तिक पदमप्युपसर्जनम् । न तु पूर्वनिपातविषये । उपसर्जनस्य समासे पूर्व प्रयोगो वक्ष्यते । नियतविभक्तिकत्वेन प्राप्तमुपसर्जनत्व पूर्वनिपातप्रयोजक न स्यादित्यर्थ । फलान्तर चोपसर्जनह्रस्व । स एवोच्यते—

(१५५१) **गोस्त्रियोरुपसर्जनस्य** । (ह्रस्व) । १ । २ । ४८ ।

उपसर्जनयोर्गोशब्दस्त्रीप्रत्ययान्तयोर्ह्रस्व । यथा—

चित्रा गावो यस्य स चित्रगु । मालामतिक्रान्तोऽतिमालु ।
निर्गत कौशाम्ब्या निष्कौशाम्बि ।

(१५५२) **लुक् तद्धितलुकि** । १ । २ । ४९ ।

यत्र तद्धितप्रत्ययस्य लुक् तत्र स्त्रीप्रत्ययस्यापि लुगेव, न तु ह्रस्वः । क्रीतविकारादिष्वर्थेषु तद्धितस्य लुगुक्त. ।

पञ्च इन्द्राण्यो देवता अस्य—पञ्चेन्द्र । आमलक्या फलमामलकम् ।

अथ समासविधिः—

(१५५३) **प्राक्डारात् समासः** । २ । १ । ३ ।

'कडारा' कर्मधारये' इति यावत् समासोऽधिक्रियते ।

(१५५४) **सह सुपा** । २ । १ । ४ ।

सुविति पूर्वतरसूत्रादनुवर्त्तते । सुबन्त सुबन्तेन सह समस्यत इति समाससामान्यस्वरूप कथ्यते ।

(१५५५) **अव्ययीभावः** । २ । १ । ५ ।

इत्यधिकृत्य ।

(१५५६) **अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु** । २ । १ । ६ ।

विभक्त्यादिष्वर्थेषु वर्त्तमानमव्ययं समर्थेन सुबन्तेन सह समस्यते अव्ययीभावश्च समासो भवति । 'अधि' इति सप्तम्यर्थकमव्यय समर्थेनसुबन्तेन हरिशब्देन समस्यते । 'कृत्तद्धितसमासाश्च' इति समासस्य प्रातिपदिकत्वात् घटकपदस्थाना सुपा 'सुपो धातुप्रातिपदिकयो' इति लोप । 'अधिहरि' इति समासो जातः । समस्तात् पुन प्रातिपदिकत्वेन सुपामुत्पन्नानामव्ययीभावस्य अव्ययत्वात् 'अव्ययादाप्सुपः' इति लोप । **अधिहरि लक्ष्मीर्वसति** । हरौ लक्ष्मीर्वसतीत्यर्थ । 'अव्ययादाप्सुपः' इति लोपम्यापवादोऽस्ति । यथा —

(१५५७) **नाव्ययीभावादतोऽम् त्वपञ्चम्याः** । २ । ४ । ८४ ।

अदन्तादव्ययीभावात् परस्य सुपो न लुक् । किन्तु 'अम्' इत्यादेशः । पञ्चम्यास्तु न लुक्, नाप्यमादेश ।

(१५५८) **तृतीयासप्तम्योर्बहुलम्** । २ । ४ । ८४ ।

अदन्तादव्ययीभावात्तृतीयासप्तम्योर्बहुलमम्भाव । समीपाद्यर्थेष्वव्ययीभाव उदाह्रियते—

वृक्षस्य समीप उपवृक्षम्, उपवृक्षात्, उपवृक्षेण, उपवृक्षे । उपवृक्षादोषधिर्गृहीता । उपवृक्षमुपवृक्षे वा तिष्ठति । उपवृक्षमुपवृक्षेण वा मृगो गत । एवमन्येषामव्ययीभाव ।

मद्राणा समृद्धि —सुमद्रम् । निद्रा सम्प्रति न युज्यते—अतिनिद्रम् ।

यवनाना व्यृद्धि (क्षय)—दुर्यवनम् । हरिशब्द प्रकाशत इति—इतिहरि ।
मक्षिकाणामभावो—निर्मक्षिकम् । हरे पश्चात्—अनुहरि ।
हिमस्यात्यय (अतिक्रम)—अतिहिमम् । (योग्यतावीप्सापदार्थानतिवृत्तिसाद-
श्यानि यथार्था) । रूपस्य योग्यम्—अनुरूपम् ।
अर्थमर्थं प्रति—प्रत्यर्थम् । चक्रेण युगपत्—सचक्रम् ।
शक्तिमनतिक्रम्य यथाशक्ति । सदृश सख्या—ससखि ।
हरे सादृश्य सहरि (सह=स) । क्षत्राणा सम्पत्ति—सक्षत्रम् ।
तृणमत्त्यपरित्यज्य—सतृणमत्ति ।
ज्येष्ठानुक्रमेण—अनुज्येष्ठम् । तद्धितपर्यन्त—सतद्धितमधीते ।

अतिनिद्रम् इत्यत्र नपुसकहस्व । अव्ययीभावस्य नपुंसकत्वं वक्ष्यते । सचक्रमित्यादौ सहशब्दस्य 'स' इत्यादेशोऽपि वक्ष्यते । यथार्थत्वेनैव सादृश्यार्थेऽव्ययीभावे सिद्धे पृथग्ग्रहण गुणभूतेऽपि सादृश्ये यथा स्यादिति । सम्पत्तिरनुरूप आत्मभाव. । समृद्धिस्तु ऋद्धेराधिक्यम् ।

(१९९९) **यथाऽसादृश्ये** । २ । १ । ७ ।

सादृश्यभिन्नेऽर्थे एव यथाशब्द समर्थेन सुबन्तेन समस्यते । यथावृद्ध ब्राह्मणानामन्त्रयस्व । यथा हरिस्तथा हर. इति सादृश्येऽर्थे समासनिषे-धार्थमारम्भ. ।

(१९९०) **यावदवधारणे** । २ । १ । ८ ।

अवधारणमियत्तापरिच्छेद । यावदमत्र ब्राह्मणानामन्त्रयस्व—यावन्त्यमत्राणि तावतो ब्राह्मणानित्यर्थ. ।

(१९९१) **सुप् प्रतिना मात्रार्थे** । २ । १ । ९ ।

मात्रा बिन्दु स्तोकमल्पमिति पर्याया । सुविति वर्त्तमाने पुन सुग्ग्रह-णमव्ययनिवृत्त्यर्थम् । सुप प्रथमानिर्दिष्टत्वात्तस्य पूर्वनिपात. ।—शाकस्य लेश शाकप्रति ।

(१९९२) **विभाषा** । २ । १ । ११ ।

इत. पर ये समासा उच्यन्ते ते विकल्पेनैवेत्यधिकार । एतेनोक्ताः समासा नित्या । उपवृक्षम्, अधिहरि, निर्मक्षिकम् इत्यादिषु वृक्षस्य उप, हरौ अधि, मक्षिकाणा निर् इति विग्रहावस्था न भवत्येव । अतो

नित्यसमास, अनित्यसमास इति समासस्यान्योऽपि द्विविधो भेदो भवति । अस्वपदविग्रहा नित्यसमासा । स्वपदविग्राह्या अनित्यसमासा ।

(१५६३) **अपपरिबहिरञ्चवः पञ्चम्या** । २ । १ । १२ ।

अञ्चुशब्देन प्राक्प्रत्यगादयो गृह्यन्ते । अपादय पञ्चम्यन्तेन वा समस्यन्ते । यथा—

अपत्रिगर्त्तम्, अप त्रिगर्त्तेभ्यो वा वृष्टो देव । एव परित्रिगर्त्तं, बहिर्ग्राम, प्राग्ग्रामम इत्यादि ।

(१५६४) **आङ्मर्यादाभिविध्योः** । २ । १ । १३ ।

आसेतु आहिमाचलम्, आसेतोरा हिमाचलाद्वा ।

(१५६५) **लक्षणेनाभिप्रती आभिमुख्ये** । २ । १ । १४ ।

लक्षणवाचिना सह अभिप्रती वा समस्येते आभिमुख्येऽर्थे ।

अभ्यग्नि शलभा पतन्ति । प्रत्यग्नि पतन्ति—अग्नि लक्षीकृत्येत्यर्थ ।

(१५६६) **अनुर्यत्समया** । २ । १ । १५ ।

अनुर्यस्य समीपवाची तेन लक्षणभूतेन वा समस्यते ।

अनुवनमशनिर्गत —वनसमीप लक्षीकृत्येत्यर्थ ।

(१५६७) **यस्य चायामः** । २ । १ । १६ ।

अनुयमुन मथुरा—यमुनायामेन मथुरायामो लक्ष्यते ।

(१५६८) **तिष्ठद्गुप्रभृतीनि च** । २ । १ ।

एतानि निपात्यन्ते । तिष्ठद्गु नाम गोदोहनकाल ।

(१५६९) **पारे मध्ये षष्ठ्या वा** । २ । १ ।

पारे मध्ये इत्येवमन्ते पदे षष्ठ्या वा समस्येते । विभाषाधिकारेऽपि वावचन षष्ठीतत्पुरुषसमावेशार्थम् । यथा—

पारेगङ्ग, गङ्गापार, गङ्गाया पार वा ।

एव मध्येमार्ग, मार्गमध्य, मार्गस्य मध्य वा ।

(१५७०) **तत्पुरुषः** । २ । १ । २२ ।

(१५७१) **द्विगुश्च** । २ । १ । २३ ।

द्विगुरपि तत्पुरुषसंज्ञः । समासान्तः सञ्ज्ञाप्रयोजनम् ।

(१९७२) **द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः** । २ । १ । २४ ।

द्वितीयान्तं श्रितादिभिः कर्त्तरिनिष्ठान्तैर्वा समस्यते । तत्पुरुषसञ्ज्ञश्च समासः । यथा—कृष्णं श्रितः कृष्णश्रितः । सुखप्राप्तः, शरणापन्नः इत्यादिः ।

॥ ॥ **गम्यादीनामुपसङ्ख्यानम्** ।

ग्रामं गमी—ग्रामगमी । अत्र बुभुक्षुरन्नबुभुक्षुरित्यादि ।

यथाप्रयोगं गम्यादिः पठनीयः ।

(१९७३) **अत्यन्तसंयोगे च** । २ । १ । २९ ।

अत्यन्तसंयोगे द्वितीया समर्थेन समस्यते ।

मुहूर्त्तं सुखं—मुहूर्त्तसुखम् । क्रोशंकुटिला नदी ।

(१९७४) **पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः** । २ । १ । ३१ ।

मासेन पूर्वौ मासपूर्वः । चन्द्रेण सदृशश्चन्द्रसदृशः इत्यादि ।

(१९७५) **कर्तृकरणे कृता बहुलम्** । २ । १ । ३२ ।

सर्पेण दष्टः सर्पदष्टः । नखैर्भिन्नो नखभिन्नः ।

बहुलग्रहणादन्येऽपि यथाप्रयोगं तृतीयातत्पुरुषाः ।

(१९७६) **चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः** । २ । १ । ३६ ।

यूपाय दारु यूपदारु । कुण्डलाय हिरण्यं कुण्डलहिरण्यम् ।

(१०७७) **पञ्चमी भयेन** । २ । १ । ३७ ।

उपलक्षणमिदम् । अन्येऽपि पञ्चमीतत्पुरुषा एवमूह्याः ।

चोरात् भयं चोरभयम् । वृक्षात् पतितं वृक्षपतितम् ।

(१९७८) **सप्तमी शौण्डैः** । २ । १ । ४० ।

इदमप्युपलक्षणमेव । अक्षेषु शौण्डः अक्षशौण्डः । ग्रामे वास्तव्यो ग्रामवास्तव्यः । चरणे न्यस्तं चरणन्यस्तम् ।

(१९७९) **पात्रेसमितादयश्च** । २ । १ । ४८ ।

एते सप्तमीतत्पुरुषा निपात्यन्ते । निपातात् पूर्वपदे सप्तम्या लुगभावः । यो भोजनकाल एव सन्निधत्ते न तु कार्येषु स **पात्रेसमितः** । **गेहेनर्दी, गेहेशूरः** इत्यादि ।

(१९८०) **पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन** । २ । १ । ४९ ।

पूर्वकाल इत्यर्थनिर्देश, स्वरूपग्रहणमन्येषाम् । पूर्वकालक्रियावाचकं सुबन्तं, एकादीनि च समानाधिकरणेन समर्थेन सुबन्तेन वा समस्यन्ते ।

पूर्वं स्नात पश्चादनुलिप्त —स्नातानुलिप्त । कृष्टसमीकृत क्षेत्र । दग्धप्ररूढस्तरु । भुक्तसुक्त भाव्यम् । एकवीर । सर्वविद्या । जरन्नैयायिक । पुराणमीमांसक । नववैद्य । केवलवैयाकरण ।

(१९८१) **दिक्संख्ये संज्ञायाम्** । २ । १ । ५० ।

समानाधिकरणेनेत्येव ।

उत्तरकुरव । दक्षिणकोसला । पञ्चाम्रा । सप्तर्षय ।

(१९८२) **तद्धितार्थोत्तरपदसमाहारे च** । २ । १ । ५१ ।

तद्धितार्थे विषये, उत्तरपदे परे, समाहारे च वाच्ये दिक्संख्ये समानाधिकरणेन सुबन्तेन समस्येते । यथा—

तद्धितार्थे—पूर्वस्या शालाया भव पौर्वशाल ।
पञ्चसु कपालेषु संस्कृत पञ्चकपाल ।
उत्तरपदे—पूर्वा शाला प्रिया यस्य—स पूर्वशालाप्रिय ।
पञ्च गावो धन यस्य—स पञ्चगवधन ।
समाहारे—पञ्चाना वटाना समाहार पञ्चवटी ।

समाहारे दिक्पूर्वपदत्वं न सम्भवति । पञ्चगवधन इत्यादौ प्रक्रिया वक्ष्यते—

(१९८३) **संख्यापूर्वो द्विगुः** । २ । १ । ५२ ।

पूर्वसूत्रेण विहिते समासे संख्यापूर्वपदो द्विगुसंज्ञः । 'द्विगोर्लुगनपत्ये' इति तद्धितलुक् समासान्तादयश्च प्रयोजनम् । यथा—

पञ्चसु कपालेषु संस्कृत पञ्चकपाल'—तद्धिते लुक् । पञ्चनावप्रिय—'नावो द्विगो.' इति समासान्त । त्रयाणा लोकाना समाहारस्त्रिलोकी—'द्विगो' इति ङीप् ।

(१९८४) **उपमानानि सामान्यवचनैः** । २ । १ । ५५ ।

उपमानवाचकानि साधारणधर्मवाचिभि समस्यन्ते । यथा—

मेघ इव श्यामो मेघश्याम । चन्द्र इव सुन्दरश्चन्द्रसुन्दर ।

(१९८५) उपमितं व्याघ्रादिभिः सामान्याप्रयोगे । २ । १ । ९६ ।

उपमेय सुबन्तम् उपमानभूतैर्व्याघ्रादिपदै. सह समस्यते साधारण-धर्मो यदि न प्रयुज्यते । यथा—

पुरुषव्याघ्र, राजसिंह, नरर्षभ, राजहंस ।

एषु शूरत्वादि साधारणधर्मो न प्रयुक्त । तत्प्रयोगे तु पुरुषो व्याघ्र इव शूर इति वाक्यमेव ।

(१९८६) विशेषणं विशेष्येण बहुलम् । २ । १ । ९७ ।

विशेषणवाचि सुबन्त समानाधिकरणेन विशेष्येण सह बहुल समस्यते । यथा—

नील च तदुत्पल च नीलोत्पलम् । रक्तोशक ।

बाहुलकात् कृष्णसर्पादौ नित्य समास । रामो जामदग्न्य इत्यादौ वाक्य मेव । नीलोत्पलमित्यादौ विकल्पश्च । वैयाकरणखसूचिरित्यादौ कुत्सित-वाचिन. पूर्वनिपात अणकुलाच इत्यादौ परनिपातश्च बाहुलकादेव सिध्यति । अनेनैव सिद्धे 'पूर्वकालैक' इत्यादि पूर्वनिपातनियमार्थ ।

(१९८७) क्तेन नञ्विशिष्टेनानञ् । २ । १ । ९० ।

नञ्सहितेन क्तान्तेन समानाधिकरणेन तद्रहित क्तान्त समस्यते । यथा—कृत च तदकृत च कृताकृतम् । भुक्त भुक्तम् इत्यादि ।

॥ ॥ शाकपार्थिवादीनामुपसख्यानमुत्तरपदलोपश्च ।

शाकप्रिय पार्थिव शाकपार्थिव ।

अयं मध्यमपदलोपी समास इत्युच्यते ।

(१९८८) पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणी प्रवक्तृश्रोत्रियाध्यापकधूर्त्तजातिः । २ । १ । ९९ ।

पोटादिभि सह जातिवाचक सुबन्त समस्यते । समानाधिकरणत-त्पुरुषस्य कर्मधारयसज्ञोक्ता । कर्मधारये च पूर्वपदस्य पुवद्भावो वक्ष्यते ।

यथा—इभपोट । अजयुवति । गोधेनु । महिषगृष्टिरित्यादि ।

(१९८९) प्रशंसावचनैश्च । २ । १ । ९९ ।

जातिरित्येव । गोमतल्लिका । पुरुषप्रकाण्डम् । अश्वतल्लज इत्यादि ।

(१५९०) **वर्णो वर्णेन** । २ । १ । ६९ ।

कृष्णश्च रक्तश्च कृष्णरक्त । नीललोहित । कृष्णशार ।

(१५९१) **मयूरव्यंसकादयश्च** । २ । १ । ७२ ।

एते निपात्यन्ते । मयूरो व्यसको मयूरव्यसक ।

(१) **एहीडादयोऽन्यपदार्थे**—

एहीडम्, एहियव वर्त्तते । एहिवाणिजा, अपेहिवाणिजा, एहिस्वागता, अपेहिस्वागता क्रिया ।—

(२) **'जहि' कर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाति** ।

जाहिजोड, जाहिस्तव, उज्जाहिस्तव ।

(३) **आख्यातमाख्यातेन क्रियासातत्ये** ।

'अश्नीतपिवत' इति यत्र सततमुच्यते सा अश्नीतपिबता । एव खादतमोदता, उद्धरोत्सृजा, पचतभृज्जता इत्यादि ।

(१५९२) **पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे** । २ । २ । १ ।

पूर्वादयोऽवयववाचका अवयविना समस्यन्ते । षष्ठीसमासे पूर्वादीनां पूर्वनिपातो न स्यादिति वचनम् । यथा—

पूर्व कायस्य पूर्वकाय । उत्तरकाय । इत्यादि ।

(१३९३) **अर्धं नपुंसकम्** । २ । २ । २ ।

अर्धं समाश । अर्धो य कोऽप्यश ।

अर्ध पिप्पल्या अर्धपिप्पली । ग्रामस्यार्धो ग्रामार्ध इत्येव ।

(१७९४) **कालाः परिमाणिना** । २ । २ । ५ ।

मासो जातस्य यस्य स—मासजात । सवत्सरजात । अहजात इत्यादि ।

(१५९५) **नञ्** । २ । २ । ६ ।

नञ् इति निपात समर्थेन सुपा समस्यते । यथा—

न ब्राह्मण अब्राह्मण । न सित असित ।

नञो नकारलोपो वक्ष्यते ।

(१५९६) **षष्ठी** । २ । २ । ८ ।

षष्ठ्यन्त समर्थेन सुबन्तेन समस्यते । यथा—

राजपुरुष, वसिष्ठशिष्य, गुरुपुत्र, जगत्स्रष्टा, शास्त्राध्यापक, सूत्रकृत्, बन्धुकृत्य, क्षीरपानम् इत्यादि ।

षष्ठीतत्पुरुषनिषेधा. प्रायिका इति नात्रोपात्ता. ।

(२९९७) **कुगतिप्रादयः** (नित्यम्) । २ । १ । १८ ।

एते समर्थेन सह नित्य समस्यन्ते । प्रादीना क्रियायोग एव गति-सज्ञेत्यन्यत्रापि समासार्थं पृथग्ग्रहणम् । कुशब्दः कुत्सितवाच्यव्ययमेव गृह्यते । यथा—

कुत्सित पुरुष कुपुरुष । प्र दत्वा प्रदाय । पूजित पुरुष सुपुरुष । दुष्टो मार्गः दुर्मार्ग । आपिङ्गलम् ।

प्रादिविषये वार्त्तिकानि—

(१) **प्रादयो गताद्यर्थे प्रथमया** ।

प्रगत आचार्य प्राचार्य । प्रपितामह, प्रपौत्र ।

(२) **अत्यादयः क्रान्ताद्यर्थे द्वितीयया** ।

अतिक्रान्तमिन्द्रियाणि अतीन्द्रियम् । अतिमानुषम् ।

(३) **अवादयः क्रुष्टाद्यर्थे तृतीयया** ।

अवक्रुष्ट कोकिलया अवकोकिल ।

(४) **पर्यादयो ग्लानाद्यर्थे चतुर्थ्या**।

परिग्लानोऽध्ययनाय—पर्यध्ययन ।

(५) **निरादयः क्रान्ताद्यर्थे पञ्चम्या** ।

निष्क्रान्त कौशाम्ब्या निष्कौशाम्बि । निर्मलम् ।

गतिप्रसङ्गात्तत्सज्ञाविधिर्मध्ये कथ्यते ।

(२९९८) **ऊर्यादिच्विडाचश्च** । १ । १ । ६१ ।

ऊर्यादय शब्दा च्व्यन्ता डाजन्ताश्च क्रियायोगे गतिसंज्ञाः ।

यथा—ऊरीकरोति । ऊरीकृत्य । उररीकृत, स्वाहाकृत्य । शुक्लीकरोति । पटपटाकरोति ।

(२९९९) **अनुकरणं चानितिपरम्** । १ । १ । ६२ ।

यथा—फूत्कृत्य, खाट्कृत्य । इतिपरे तु 'खाडितिकृत्वा निरष्ठीवत्'

(३००) **आदरानादरयोः सदसती** । १ । १ । ६३ ।

सत्कृत्य = पूजयित्वा । असत्कृत्य = अनादृत्य ।

(१६०१) **भूषणेऽलम्** । १ । १ । ६४ । अलङ्कृत्य = भूषयित्वा ।

(१६०२) **साक्षात्प्रभृतीनि च** (विभाषा कृञि) । १ । १ । ७४ ।

साक्षात्कृत्य, साक्षात्कृत्वा । मिथ्याकृत्य मिथ्याकृत्वा इत्यादि ।

अथ प्रकृत. समासविधिरेवानुबध्यते । उक्ता गतिसमासा. । अनन्तरमुपपदसमासा उच्यन्ते—

(१६०३) **उपपदमतिङ्** । २ । २ । १९ ।

नित्यमिति वर्त्तते । उपपद समर्थेन शब्देन नित्य समस्यते तिङन्तावटितश्चाय समास । 'अत्रोपपद सप्तमीस्थम्' इति कृद्विधावुपपदानि तत्र तत्रोक्तानि ।

यथा—कुम्भकार, स्थण्डिलशायी, कर्णेजप ।

अतिङ् इति निषेधो ज्ञापयति 'सुप्सुपा' इत्यविकारोऽत्र न सम्बध्यत इति । ज्ञापकसिद्धश्चार्थो वार्त्तिककारेण कण्ठत उक्तः—

॥ * ॥ **गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः** ।

(१६०४) **अमैवाव्ययेन** । २ । २ । २० ।

अव्ययेनोपपदस्य समास अमन्तेनैव । स्वादुङ्कारम् ।

(१६०५) **तृतीयाप्रभृतीन्यन्यतरस्याम्** । २ । २ । २१ ।

'उपदशस्तृतीयायाम्' इत्यत प्रभृति यान्युपपदानि तान्यमन्तेनान्यतरस्यामेव समस्यन्ते । मूलकोपदशं, मूलकेनोपदशं वा भुङ्क्ते ।

(१६०६) **क्त्वा च** । २ । २ । २२ ।

तृतीयाप्रभृतीनि क्त्वान्तेन सह वा समस्यन्ते ।

उच्चैःकृत्य, उच्चैःकृत्वा ।

(१६०७) **शेषो बहुव्रीहिः** । २ । २ । २३ ।

(१६०८) **अनेकमन्यपदार्थे** । २ । २ । २४ ।

अनेक सुबन्तमन्यपदार्थे वर्त्तमान समस्यते, बहुव्रीहिश्च समास. । प्रथमार्थमेक वर्जयित्वा सर्वेषु विभक्त्यर्थेषु बहुव्रीहिर्भवति । यथा—

प्राप्तमुदकं यं स प्राप्तोदको ग्रामः — द्वितीयाबहुव्रीहिः ।
ऊढो रथो येन स ऊढरथोऽनड्वान् — तृतीया ,,
उपहृतः पशुर्यस्मै स उपहृतपशू रुद्रः — चतुर्था ,,
उद्धृतमोदनं यस्यां सा उद्धृतौदना स्थाली — पञ्चमी ,,
चित्रा गावो यस्य स चित्रगुर्देवदत्तः — षष्ठी ,,
वीरा पुरुषा यस्यां सा वीरपुरुषा नगरी — सप्तमी ,,
सुसूक्ष्मजटकेशेन सुलभाजिनवाससा
पुत्री पर्वतराजस्य कुतो हेतोर्विवाहिता } बहुपदबहुव्रीहिः ।

(१) **बहुव्रीहिः समानाधिकरणनामिति वक्तव्यम्** ।

तथैवोदाहृतम् । तेन पञ्चभिर्भुक्तं यस्य स पञ्चभुक्त इति बहुव्रीहिर्न भवति ।

(२) **सप्तम्युपमानपूर्वपदस्योत्तरपदलोपश्च** ।

कण्ठे स्थितः काळो यस्य स कण्ठेकाळः । उरसिलोमा । उष्ट्रस्य मुखमिव मुखं यस्य स उष्ट्रमुखः । मृगाक्षी ।

(३) **प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः** ।

प्रपतितं पर्णं यस्य स प्रपर्णस्तरुः । उन्मुखः, सम्मुखः ।

(४) **नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपः** ।

अविद्यमानः पुत्रो यस्य सः अपुत्रः अविद्यमानपुत्रः । अभार्यः ।

(१६०९) **संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये** ।२।२।२५।

सप्तम्येयवाचिना सङ्ख्यापदेनाव्ययादयः समस्यन्ते स च बहुव्रीहिः ।

दशानां समीपे ये वर्तन्ते ते उपदशाः ।
आसन्नविंशाः अदूरत्रिंशाः, अधिकविंशाः ।
द्वौ वा त्रयो वा द्वित्राः, त्रिचतुराः, चतुष्पदाः ।

अत्र सर्वत्र समासान्तो वक्ष्यते ।

(१६१०) **दिङ्नामान्यन्तराले** ।२।२।२६।

दिङ्नामान्यन्तराले वाच्ये समस्यन्ते । पूर्वस्या उत्तरस्याश्च दिशोऽन्तराळमुत्तरपूर्वा । एवं दक्षिणपश्चिमा । 'सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः' इति पुंवद्भावात् पूर्वपदह्रस्वः ।

(१६११) **तत्र तेनेदमिति सरूपे** ।२।२।२७।

सप्तम्यन्ते तृतीयान्ते च समानरूपे पदे मिथः समस्येते । अर्थविशे-

ष. सर्वो लोकप्रसिद्ध इति इतिशब्देन द्योतित । तस्मिन् प्रगृह्य, तेन प्रहृत्य वा इद युद्ध प्रवृत्तमित्यर्थ इतिशब्दद्योत्यः । 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घ, इच् समासान्तश्च वक्ष्यते । इजन्त चाव्ययम् । यथा—

केशेषु केशेषु प्रगृह्येद युद्ध प्रवृत्त—केशाकेशि । दण्डैश्च दण्डैश्च प्रहृत्येद—दण्डादण्डि । एव हस्ताहस्ति, मुसलामुसलि इत्यादि ।

(१६१२) तेन सहेति तुल्ययोगे ।२।२।२८।

सहशब्दस्तृतीयान्तेन समस्यते । तेन सहवर्त्तते इत्यर्थे । सहशब्दस्य सभावो वक्ष्यते । यथा—

पुत्रेण सह वर्त्तत इति सपुत्र । सकर्मक ।

द्वन्द्वः ।

(१६१३) चार्थे द्वन्द्वः ।२।२।२९।

अनेक सुबन्त चार्थे समस्यते, द्वन्द्वश्च समास' । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्था । तत्र परस्परानिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चय' । यथा—ईश्वर गुरु च भजस्व । यथा वा रक्त पट कुण्डलच ।

अन्यतरस्यानुषङ्गिकत्वे अन्वाचय । यथा—भिक्षामट । गाञ्चानय ।

मिळितानामन्वय इतरेतरयोगः । यथा—रामश्च लक्ष्मणश्च वने प्रव्राजितौ ।

समूह. समाहार । यथा—हस्तिनोऽश्वा रथा पदातयश्च व्रजन्ति ।

एषु प्रथमद्वितीययोरेकार्थीभावरूपसामर्थ्यासम्भवान्न समास । कालभेदेन भजनक्रियान्वयेऽपि परस्परनिरपेक्षयोर्गुर्वीश्वरयो कथमेकपदोपादानयोग्यता ? कथतरा वा प्राधान्यस्य भिक्षाटनस्यानुषङ्गिकस्य गवानयनस्य च । इतरेतरयोगसमाहारयोस्तु परस्परसाहित्यसत्त्वात् समासो भवति । यथा—

रामलक्ष्मणौ प्रव्राजितौ—इतरेतरयोग ।
हस्त्यश्वरथपादात व्रजति—समाहारस्यैकत्वादेकवचनम् ।
रामलक्ष्मणभरतशत्रुघ्ना । गिरिनगरनदीग्रामा ।

अथ समासेषु षटकपदसन्निवेशव्यवस्था—

(१६१४) **उपसर्जनं पूर्वम्** । २ । २ । ३० ।

'प्रथमानिर्दिष्टं समास उपसर्जनम्' इत्युक्तम् । तस्य पूर्वं प्रयोग कार्यं । तथैव च दर्शितम् ।

(१६१५) **राजदन्तादिषु परम्** । २ । २ । ३१ ।

एवूपसर्जनं परं प्रयोज्यम् । दन्तानां राजते तत्पुरुषे राजदन्त इत्युपसर्जनस्य दन्तशब्दस्य परप्रयोग. । गणे निपातनादनुपसर्जनस्यापि क्वचित् परप्रयोग , कार्यान्तराणि च ।

राजदन्त , अग्रेवण, भार्यापती, जम्पती इत्यादि ।

(१६१६) **द्वन्द्वे घि** । २ । २ । ३२ ।

द्वन्द्वे विसज्ञं पूर्वं प्रयोज्यम् । हरिहरौ, पटुगुप्तौ ।

(१६१७) **अजाद्यदन्तम्** । २ । २ । ३३ ।

द्वन्द्वे अजादि अदन्तं च पदं पूर्वम् । उष्ट्रखरम् ।

॥ * ॥ **बहुष्वनियम** —अश्वरथेन्द्रा , इन्द्ररथाश्वा वा ।

(१६१८) **अल्पाच्तरम्** । २ । २ । ३४ ।

वृक्षन्यग्रोधौ । धवखदिरपलाशा ।

॥ * ॥ **अभ्यर्हितं पूर्वम्** । **युधिष्ठिरार्जुनौ** । सर्वेय व्यवस्था प्रायिकी ।

(१६१९) **सप्तमीविशेषणे बहुव्रीहौ** । २ । २ । ३५ ।

सर्वोपसर्जनत्वादनियमे प्राप्ते नियमार्थं वचनम् । सप्तम्यन्तं विशेषणं च बहुव्रीहौ पूर्वं प्रयोज्यम् । यथा—

कण्ठेकाळ , उरसिलोमा—अत्र अलुग्वक्ष्यते ।

चित्रगु , पीताम्बर , उष्णरश्मि , कृशाश्वी ।

सप्तम्या पूर्वनिपातविधानाज्ज्ञापकादेव व्यधिकरणो बहुव्रीहि । ज्ञापकसिद्धमेव वार्तिककारेण व्याख्यात 'सप्तम्युपमानपूर्वपदस्य' इति ।

(१) **सर्वनामसंख्ययोरुपसंख्यानं**—सर्वश्वेत , द्विशुक्ल ।

(२) **वा प्रियस्य पूर्वनिपातः**—प्रियगुड , गुडप्रिय ।

(३) **गङ्वादिभ्य. सप्तम्यन्तं परं**—गङ्कण्ठ , कण्ठगङ् ।

(४) प्रहरणार्थेभ्य परे निष्ठासप्तम्यौ प्रायिक चेद् निष्ठायां } चक्रपाणि, पिनाकपाणि, अभ्युद्यत उद्यतासिर्वा ।

(५) जातिकालसुखादिभ्यो निष्ठाया परनिपातः } पलाण्डुभक्षिणी, मानसजात, सुखजात । इदमपि प्रायिकम् ।

(१६२०) वाहिताग्न्यादिषु । २ । २ । ३७ ।

आहिताग्नि, अग्न्याहितो वा । जातपुत्र पुत्रजातो वा ।

(१६२१) कडाराः कर्मधारये । २ । २ । ३८ ।

कडारजैमिनि जैमिनिकडारो वा । वृद्धवीर वीरवृद्धो वा ।
कडार, गौर, काण, खञ्ज, खलति, वृद्ध इत्यादि ।

एकशेषः ।

(१६२२) सरूपाणामेकशेष एकविभक्तौ । १ । २ । ६४ ।

प्रत्यर्थं शब्दनिवेशाच्चैकेनानेकस्याभिधान सम्भवतीति द्विवचनबहुवचनयो शब्दस्य सख्यानुसारेणावृत्ति प्रसज्यते इत्येकशेष आरभ्यते । एकस्यामेव विभक्तौ यानि तुल्यरूपाणि प्रातिपदिकानि तेषामेकमेव शिष्यते अन्यानि निवर्त्तन्ते । यथा--

वृक्षश्च वृक्षश्च–वृक्षौ । वृक्षश्च वृक्षश्च–वृक्षा । वृक्षैश्च वृक्षैश्च–वृक्षै ।

सरूपाणामित्युक्तेरर्थभेदेऽपि रूपसाम्ये एकशेषो भवेत् । यथा--

'रदविप्राण्डजा द्विजा'

विरूपाणामपि समानार्थकानां एकशेष इष्यते । यथा--

वक्रदन्तश्च कुटिलदन्तश्च वक्रदन्तौ कुटिलदन्तौ वा ।

(१६२३) वृद्धो यूना तल्लक्षणश्चेदेव विशेषः । १ । २ । ६५ ।

वृद्ध इति गोत्रस्य सज्ञा प्राचाम् । गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ ।

(१६२४) स्त्री पुंवच्च । १ । २ । ६६ ।

यूना सहैकशेषे वृद्धस्त्रिया पुवद्भावश्च । यथा --

गार्गी च गार्ग्यायणश्च–गार्ग्यौ ।

(१६२५) पुमान् स्त्रिया । १ । २ । ६७ ।

स्त्रिया सहोक्तौ पुमान् शिष्यते, स्त्रीपुंसलक्षणश्चेदेव विशेष ।

कुक्कुटश्च कुक्कुटी च कुक्कुटौ । युवा च युवतिश्च युवानौ ।

(१६२६) **भ्रातृपुत्रौ स्वसृदुहितृभ्याम् ।१।२।६८।**

भ्राता च स्वसा च भ्रातरौ । पुत्रश्च दुहिता च पुत्रौ ।

(१६२७) **नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ।१।२।६९।**

लिङ्गमात्रलक्षणे विशेषे, अक्लीबेन सहोक्तौ क्लीब शिष्यते, तस्यैकवचन च वा । यथा—

शुक्लश्च कम्बल, शुक्ला च बृहतिका, शुक्ल च वस्त्र, तदिद शुक्लम् । तानीमानि शुक्लानि ।

(१६२८) **पिता मात्रा ।१।२।७०।**

अन्यतरस्यामित्येव । माता च पिता च पितरौ । मातापितरौ वा ।

पूर्वपदस्य आत्वं वक्ष्यते ।

(१६२९) **श्वशुरः श्वश्रा ।१।२।७१।**

श्वश्रूश्च श्वशुरश्च श्वशुरौ । श्वश्रूश्वशुरौ वा ।

(१६३०) **त्यदादीनि सर्वैर्नित्यम् ।१।२।७२।**

सर्वै सहोक्तौ त्यदादीनि नित्य शिष्यन्ते । यथा—

स च देवदत्तश्च नौ । अय च देवदत्तश्च इमौ ।

त्व च सर्वे लोकाश्च यूयम् । अह च ग्रामजनाश्च वयम् ।

त्यदादीनां मिथस्सहोक्तौ पर पर शिष्यते ।

स चाय च इमौ । अय च त्व च युवाम् । त्व चाह चावाम् ।

समासेषु लिङ्गवचनव्यवस्था—

(१६३१) **द्विगुरेकवचनम् ।२।४।१।**

समाहारे द्विगुरेकवचन स्यात् । त्रयो लोका समाहृतास्त्रिलोकी ।

(१६३२) **द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् ।२।४।२।**

प्राण्यङ्गाना द्वन्द्व एकवचन, तूर्याङ्गानां सेनाङ्गाना च तथा । इतरेतरयोगे समाहारे च द्वन्द्वो विहित. । तत्र समाहारस्यैकत्वादेकवचन.

सिद्धमेव । इतरेतरयोगेऽपि प्राण्यङ्गादीनामेकत्वसिद्ध्यर्थमारम्भ' । 'न दधिपयआदीनि' इति एकत्वनिषेध समाहारेऽपि द्विबहुवचनसिद्ध्यर्थ । एव च प्राण्यङ्गादीना समाहार एव द्वन्द्व, दधिपयआदीना तु इतरेतरयोग एवेति फलितम् । 'विभाषा वृक्ष ....' इत्यादिना येषामेकवचन विकल्पित तेषामेव उभयोरपि द्वन्द्व । यथा--

पाणिपाद, शिरोग्रीव--प्राण्यङ्गानाम् । सार्द्धद्विकपाणविक--तूर्याङ्गानाम् । रथपादात, हस्त्यश्व --सेनाङ्गानाम् ।

(१६३३) **जातिरप्राणिनाम् ।२।४।६।**

जातिवाचिना द्वन्द्व एकवत्, न तु प्राणिवाचिनाम् ।

मृत्पाषाणम्, धानाशष्कुलि ।

(१६३४) **क्षुद्रजन्तवः ।२।४।८।**

द्वन्द्वे एकवत् स्यु । यथा— यूकालिक्ष, दशमशकम् ।

(१६३५) **येषां च विरोधः शाश्वतिकः ।२।४।९।**

मार्जारमूषकम् । श्वसृगालम् । अहिनकुलम् । काकोलूकम् ।

(१६३६) **गवाश्वप्रभृतीनि च ।२।४।११।**

एतानि कृतैकवचनानि सविशेषप्रक्रिय निपात्यन्ते ।

गवाश्व, गवाहिक, कुब्जवामन, पुत्रपौत्रम् इत्यादि ।

(१६३७) **विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडव-पूर्वापराधरोत्तराणाम् ।२।४।१२।**

वृक्षमृगतृणधान्यव्यञ्जनपशुशकुनीनां द्वन्द्व', अश्ववडव, पूर्वापरम्, अधरोत्तरम् इति निर्दिष्टाश्च वा एकवत्स्यु । यथा--

प्लक्षन्यग्रोध,	धा –वृक्ष	गोमहिष,	षा –पशु
रुरुपृषत ,	ता –मृग	तित्तिरिकपिञ्जल,	ला –शकुनि
कुशकाश ,	शा.–तृण	अश्ववडव,	वौ –
व्रीहियव ,	वा –धान्य	पूर्वापर,	रे –
दधिघृत ,	ते –व्यञ्ज	अधरोत्तर,	रे –

बहुप्रकृति' फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम् ।

बहुवचनाना द्वन्द्व एवैषामेकवद्भाव । यथा—

बदराणि चामलकानि च बदरामलकम् । बदर चामलक च बदरामलके इत्येव ।

अत एव प्रकृतसूत्रोदाहरणे प्लक्षन्यग्रोधा· रुरुपृषता इत्यादि बहुत्वं दर्शितम् ।

(१६३८) **विप्रतिषिद्धं चानधिकरणवाचि** । २ । ४ । १३ ।

परस्परविरुद्धानामद्रव्यवाचिना च द्वन्द्वो वैकवत् । यथा—

शीतोष्ण,—ष्णे । सुखदु ख,—खे । जीवितमरण,—णे ।

द्रव्यवाचित्वे तु शीतोष्णे उदके इत्येव ।

(१६३९) **न दधिपयआदीनि** । २ । ४ । १४ ।

दधिपयसी, सर्पिर्मधुनी, शुक्लकृष्णौ, इभ्याबह्वियो इत्यादि ।

(१६४०) **अधिकरणैतावत्त्वे च** । २ । ४ । १५ ।

आश्रयपदार्थस्यैतावत्त्वे सख्याविशेषे निर्णीतेऽपि नैकवद्भाव· ।

यथा—दश दन्तोष्ठा । षट् करितुरगा ।

(१६४१) **स नपुंसकम्** । २ । ४ । १७ ।

द्विगुरेकवचनमित्यादिना प्रकरणेन यस्यैकवचन विहित स समासो नपुंसक स्यात् । तथैव चोदाहृतम् । 'द्विगो' इति ङीप्विधानाददन्तोत्तरपदो द्विगु स्त्रियाम् । अन्यत्र दशगवम् इत्यादावेव तस्य नपुसकता ।

॥ * ॥ **पात्राद्यन्तस्य न** । पञ्चपात्र, त्रिभुवन, चतुर्युगम् ।

(१६४२) **अव्ययीभावश्च** । २ । ४ । १८ ।

अयं नपुसकं स्यात् । अव्ययत्वेन लिङ्गाभावेऽपि 'ह्रस्वो नपुंसके ....' इति ह्रस्वसिद्ध्यर्थं क्लीबत्वविधानम् । यथा—

अधिस्त्रि । उपकुमारि । पारेगङ्गम् ।

॥ * ॥ **क्रियाविशेषणानां च क्लीवतेष्यते** ।

एषां कर्मणि द्वितीयोक्ता । अत क्रियाविशेषणानि नपुंसकद्वितीयैकवचनान्तानि । यथा—

मृदु पचति । स्फुटदन्ताश्रि वदति । प्रकटितप्रेम लिखितम् ।

(१६४३) **तत्पुरुषोऽनञ्कर्मधारयः** । २ । ४ । १९ ।

नञ्समास कर्मधारय च वर्जयित्वा तत्पुरुषो नपुसकमित्यधिक्रियते ।

(१६४४) **उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ।२।४।२१।**

उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुसक उपज्ञेयस्योपक्रम्यस्य चार्थस्यादित्वमाख्यातुमिष्यते चेत् । न तु नञ्समासकर्मधारययो । यथा—

पाणिनेरुपज्ञा पाणिन्युपज्ञ ग्रन्थ —पाणिनिना प्रथम विज्ञाय प्रणीत ।
नन्दस्योपक्रमो नन्दोपक्रम द्रोण —नन्देन प्रथम प्रवर्त्तित ।

(१६४५) **छाया बाहुल्ये ।२।४।२२।**

न्यग्रोधच्छायम् । वैरल्येतु शाकोटच्छाया । अबाहुल्येऽपि विकल्पं वक्ष्यति ।

(१६४६) **सभा राजामनुष्यपूर्वा ।२।४।२३।**

राजशब्दे पर्यायग्रहणमात्रम् । अमनुष्या रक्ष पिशाचादय । यथा—

इनसभम्, ईश्वरसभ, रक्षस्सभ, पिशाचसभम् । पर्यायेष्वपि नृपसभा, क्षितिपालसभेत्यादि यौगिकपदपूर्वत्वे स्त्रीलिङ्ग एव दृश्यते ।

(१६४७) **अशाला च ।२।४।२४।**

सङ्घातवाची सभाशब्दोऽपि क्लीबम् । स्त्रीसभम् ।

(१६४८) **विभाषा सेनासुराच्छायाशालानिशानाम् ।२।४।२५।**

ब्राह्मणसेन,—ना । यवसुर,—रा । तृणच्छाय,—या । गोशाल,—ला । श्वनिश,—शा ।—कृष्णचतुर्दश्या सङ्गेयम् ।

(१६४९) **परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ।२।४।२६।**

इतरेतरद्वन्द्वस्य तत्पुरुषस्य चोत्तरपदस्येव लिङ्गं स्यात् ।

कुक्कुटमयूर्यौविमे, कुक्कुटमयूराविमौ । अर्धं पिप्पल्या अर्धपिप्पली । पूर्वं कायस्य पूर्वकाय ।

(१६५०) **रात्राह्नाहाः पुंसि ।२।४।२९।**

पूर्वरात्र, सायाह्न, अह्न । एषु समासान्तो वक्ष्यते ।

संख्यापूर्वं रात्रं क्लीबम् । त्रिरात्र, गणरात्रम् ।

पुण्यसुदिनाभ्यामह्न क्लीबतेष्टा ।—पुण्यमहम् । सुदिनाहम् ।

(१६५१) **अपथं नपुंसकम् ।२।४।३०।**

(१६५२) **अर्धर्चाः पुंसि च ।२।४।३१।**

ऋचोऽर्धम् अर्धर्च,—र्चं वा ।

इह गणे बहव केवलशब्दा एव पठिताः । पुन्नपुंसकशब्दा. सर्वेऽप्यस्मिन् गणे पठनीया ।

बहुव्रीहेरन्यपदार्थप्रधानत्वाद्विशेष्यानुसारेण लिङ्गमिति प्रकाशमेव ।

पूर्वपदकार्याणि ।

१. अलुक्—

(१६५३) **अलुगुत्तरपदे** । ६ । ३ । १ ।

अलुगित्यानड्पर्यन्तम्, उत्तरपदे इत्यापादपरिसमाप्तेश्चाधिक्रियते । अलुक् 'सुपो धातुप्रातिपदिकयो.' इति लुकोऽभाव. ।

(१६५४) **पञ्चम्याः स्तोकादिभ्यः** । ६ । ३ । २ ।

एभ्य. पञ्चम्या अलुगुत्तरपदे परे । पूर्वपदस्थाया· पञ्चम्या लुक् न स्यादित्यर्थ । 'स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन' (२-१-३९) इति पञ्चमीतत्पुरुषविधावुपात्ता स्तोकादय· ।

स्तोकान्मुक्तम्, अन्तिकादागत, दूरादागत, कृच्छ्राल्लब्धम् इत्यादि ।

(१६५५) **ओजःसहोऽम्भस्तमसस्तृतीयायाः** । ६ । ३ । ३ ।

॥ * ॥ **अञ्जस उपसंख्यानम्** ।

ओजसाकृत, सहसाकृतम्, अञ्जसाकृतम् ।

(१६५६) **आत्मनश्च** । ६ । ३ । ६ । **पूरण इति वक्तव्यम्** ।

आत्मनाचतुर्थ, आत्मनाद्वितीय इत्यादि ।

(१६५७) **वैयाकरणाख्यायां चतुर्थ्याः** । ६ । ३ । ७ ।

(१६५८) **परस्य च** । ६ । ३ । ८ ।

आत्मनेपदम्, आत्मनेभाषा । परस्मैपद, परस्मैभाषा ।

(१६५९) **हलदन्तात् सप्तम्याः संज्ञायाम्** । ६ । ३ । ९ ।

त्वक्सिार, युधिष्ठिर ।

(१६६०) **अमूर्धमस्तकात्स्वाङ्गादकामे** । ६ । ३ । १२ ।

कण्ठेकाळ, उरसिलोमा ।

(१६६१) **तत्पुरुषे कृति बहुलम्** । ६ । ३ । १४ ।

स्तम्बेरम , कर्णेजप , पङ्केरुह, वनेचर ।

(१६६२) **प्रावृट्शरत्कालदिवां जे** । ६ । ३ । १५ ।

प्रावृषिज , शरदिज , कालेज , दिविज । अन्यत्र पङ्कजमित्येव ।

बाहुलकात्—मनसिज , मनोज इत्युभयमपि ।

(१६६३) **घकालतनेषु कालनाम्न** (वा) । ६ । ३ । १७ ।

सप्तम्या अलुग्वा । तरप्तमपौ घ । यथा—

पूर्वाह्णेतरे, पूर्वाह्णतरे । पूर्वाह्णेकाले, पूर्वाह्णकाले इत्यादि ।

(१६६४) **शयवासवासिष्वकालात्** । ६ । ३ । १८ ।

सप्तम्या अलुग्वा—खेशय , खशय इत्यादि ।

(१६६५) **नेन्सिद्धबध्नातिषु च** । ६ । ३ । २९ ।

इन्नन्तादिषु सप्तम्या अलुक् । स्थण्डिलशायी, साङ्काश्यसिद्ध , चक्रबन्ध ।

(१६६६) **षष्ठ्या आक्रोशे** । ६ । ३ । २१ ।

चोरस्यकुलम् । आक्रोशाभावे तु—ब्राह्मणकुलम् ।

॥ * ॥ **वाग्दिक्पश्यद्रथो युक्तिदण्डहरेषु** ।

वाचोयुक्ति , दिशोदण्ड , पश्यतोहर ,—पश्यन्तमनादृत्य यो हरतीति अनादरे भावलक्षणषष्ठ्या अलुक् ।

(१६६७) **पुत्रेऽन्यतरस्याम्** । ६ । ३ २२ ।

षष्ठ्या आक्रोशे इत्येव । दास्या पुत्रो, दासीपुत्रो वा ।

(१६६८) **ऋतो विद्यायोनिसम्बन्धेभ्यः** । ६ । ३ । २३ ।

विद्यासम्बन्धवाचिनः योनिसम्बन्धवाचिनो वा ऋदन्तात् षष्ठ्या अलुक् । उत्तरपदमपि सम्बन्धवाचकमेव भवितुमर्हति ।

होतुरन्तेवासी । पितु पुत्र ।

(१६६९) **विभाषा स्वसृपत्योः** । ६ । ३ । २४ ।

ऋदन्तात् षष्ठ्या अलुग्वा ।

मातु स्वसा, मातु'ष्वसा, मातृष्वसा । पितु स्वसा, पितु ष्वसा, पितृष्वसा ।

लुकि नित्य षत्वम् । अलुकि तु वा तत्प्रकरणे विहितम् ।

---

२. आनङ्—

(१६७०) **आनङुतो द्वन्द्वे** । ६ । ३ । २५ ।

विधायोनिसम्बन्धेभ्य इत्यनुवर्त्तते । उत्तरपदे इत्यधिकारश्चानुवर्त्तते । आनङो नकारस्य प्रातिपदिकान्तलोप ।

होतापोतारौ । मातापितरौ ।

(१६७१) **देवताद्वन्द्वे च** । ६ । ३ । २६ ।

ऋत इति नानुवर्त्तते । मित्रावरुणौ । सूर्याचन्द्रमसौ वेदप्रसिद्धदेवताद्वन्द्व एव । तेन हरिहरावित्यादौ नानङ् ।

अग्नीषोमौ । अग्नीवरुणौ । द्यावापृथिव्यौ इत्यादिरूपविशेषाश्च देवताद्वन्द्वे ।

(१६७२) **मातरपितरावुदीचाम्** । ६ । ३ । २२ ।

एकशेषाभावपक्षे विकल्पोऽयम् । तेन त्रीणि रूपाणि—

मातापितरौ, मातरपितरौ, पितरौ इति ।

---

३. पुवद्भावः—

(१६७३) **स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु** । ६ । ३ । ३४ ।

भाषितपुस्कात्परस्य ऊङ्भिन्नस्य स्त्रीप्रत्ययस्य समानाधिकरणे स्त्रीलिङ्गे उत्तरपदे पुल्लिङ्गस्येव रूप स्यात् न तु पूरण्यां प्रियादौ वा उत्तरपदे ।

यथा—रूपवती भार्या यस्य स रूपवद्भार्य । चित्रा गावो यस्य स चित्रगु । युवतिर्भार्या यस्य स युवद्भार्य ।

ऊङन्तस्य तु रम्भोरूभार्य इत्येव । अनेकपदे बहुव्रीहौ उत्तरपदस्य परत्वाभावात् पूर्वपदस्य न पुंवद्भाव । चित्राजरद्गु । कर्मधारयपूर्वपदे तूभयोः पुवद्भावेन चित्ररजद्गु । अपूरणीप्रियादिष्वित्युक्ते कल्याणी पञ्चमी यासा ता कल्याणीपञ्चमा रात्रय । अत्र पञ्चमी इति अप्प्रत्ययेन समासान्तेन वक्ष्यमाणेन रूपनिष्पत्ति । कल्याणी प्रिया यस्य स कल्याणीप्रिय । प्रिया, मनोज्ञा, कल्याणी, सुभगा, दुर्भगा, भक्ति , स्वसा, कान्ता, समा, चपला, दुहिता, वामा इत्यादिप्रियादि ।

(१६७४) **तसिलादिष्वा कृत्वसुचः** । ६ । ३ । ३५ ।

तसिलादिषु कृत्वसुजन्तेषु तद्धितेषु परेषु स्त्रिया पुवत् । तसिलादय पारिगणिता कात्यायनेन —

तत्रसौ घश्चरट्कल्पपरूपब्देशीयपाशप ।
जातीयथालितल्यनश्च तसिलाद्याख्रयोदश ॥ यथा —

तस्या तत । बह्वीषु बहुत्र । इत्यादि ।

१ **शसि बहुलपार्थस्य पुंवद्भावो वक्तव्य** —बह्वी-यो, बहुश ।

२ **त्वतलोर्गुणवचनस्य** । —शुक्लाया भाव शुक्लता, शुक्लत्वम् ।

३ **कुक्कुट्यादीनामण्डादिषु** । —कुक्कुट्या अण्ड कुक्कुटाण्डम् ।

४ **भस्याढे तद्धिते** । —हस्तिनीना समूहो हास्तिकम् ।
ढे तु—रोहिण्या अपत्य रौहिणेय ।

५ **सर्वनाम्नो वृत्तिमात्रे पुंवद्भाव** । —तस्या मुख तन्मुखम् । तस्या इद तदीय तामर्थयतीति तदर्थी, ताङ्कामयति तत्काम्यति ।

(१६७९) **क्यङ्मानिनोश्च** । ६ । ३ । ३६ ।

क्यङ्—एनीवाचरति एनायते । मानिन्-दर्शनीयमानिनी ।

(१६७६) **न कोपधायाः** । ६ । ३ । ३८ ।

ककारोपधाया स्त्रिया न पुवत् । पाचिकाभार्य, रसिकाभार्य ।

(१६७७) **संज्ञापूरण्योश्च** । ६ । ३ । ३८ ।

दत्ताभार्यः । पञ्चमीभार्य ।

(१६७८) **वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे** । ६ । ३ । ३९ ।

सौग्रीभार्य । माथुरीमानिनी ।

(१६७९) **स्वाङ्गाच्चेतः** । ६ । ३ । ४० ।

(१६८०) **जातेश्च** । ६ । ३ । ४१ ।

स्वाङ्गात् जातेश्च विहित स्त्रीप्रत्ययो न पुवत् । यथा—
सुकेशीभार्य । शूद्राभार्य । ब्राह्मणीभार्य ।

(१६८१) **पुंवत्कर्मधारयजातीयदेशीयेषु** । ६ । ३ । ४२ ।

अपूरणीप्रियादिष्विति निषिद्ध पुवद्भाव· कर्मधारयादौ प्रतिप्रमूयते । यथा—

महानवमी, कृष्णचतुर्दशी, महाप्रिया । पाचिका चासौ स्त्री च पाचकस्त्री । पञ्चमी चासौ भार्या च पञ्चमभार्या । ब्राह्मणी चासौ भार्या च ब्राह्मणभार्या ।

एव—पाचकजातीया, पाचकदेशीया ।

---

४. ङ्यन्तह्रस्वः—

(१६८२) **धरूपकल्पचेलद्रुघ्नगोत्रमतहतेषु ङ्योऽनेकाचो ह्रस्वः ।६।३।४३।**

भाषितपुस्काद्यो ङी तदन्तस्यानेकाचो ह्रस्व स्यात् धरूपादिषु परेषु चेलडादिषु चोत्तरपदेषु । यथा—

ब्राह्मणितरा, ब्राह्मणिरूपा, ब्रह्मणिघ्नी इत्यादि ।

चेलडादय कुत्सावाचका ।

(१६८३) **नद्याः शेषस्यान्यतरस्याम् ।६।३।४४।**

अङ्यन्तनद्या ङ्यन्तस्यैकाचश्च धादिषु वा ह्रस्व ।

ब्रह्मबन्धूतरा, ब्रह्मबन्धुतरा, स्त्रीतरा, स्त्रितरा ।

कृत्यद्या न । लक्ष्मीतरा ।

(१६८४) **उगितश्च ।६।३।४४।**

उगिन्नद्या वा ह्रस्व । यथा—विदुषितरा । विद्वत्तरा ।

ह्रस्वाभावे 'तसिलादिष्वा कृत्वसुच ' इति पुवद्भाव. ।

---

५. आत्वम्—

(१६८५) **आन्महतः समानाधिकरणजातीययोः ।६।३।४६।**

महत आकारोऽन्तादेश· समानाधिकरणे उत्तरपदे जातीयप्रत्यये च परे । यथा—महान् चासौ राजा च महाराज । महागिरि. ।

स्त्रियामपि पुवद्भावानन्तरमात्व—महानदी ।

(१६८६) **द्वयष्टनः संख्यायामबहुव्रीह्यशीत्योः** । ६ । ३ । ४७ ।

द्वौ च दश च द्वादश । द्वाविंशति । द्वात्रिंशदित्यादि ।

अष्ट च दश च अष्टादश । अष्टाविंशति । अष्टात्रिंशत् ।

बहुव्रीहौ तु द्विंत्रा । अशीत्यामपि—द्व्यशीति ।

(१६८७) **त्रेस्त्रयः** । ६ । ३ । ४८ ।

त्रयोदश । त्रयोविंशति । त्रयस्त्रिंशत् ।

॥ * ॥ **प्राक्छतादिति वक्तव्यम्** । द्व्यष्टन आत्व त्रे त्रयादेशश्च शतात् पूर्वस्या संख्यायामुत्तरपद एव । द्विशत, त्रिशतम्, अष्टशतम् ।

(१६८८) **विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्** । ६ । ३ । ४९ ।

चत्वारिंशत्-पञ्चाशत्-षष्टि-सप्तति नवतिपूत्तरपदेषु आत्व त्रयादेशश्च वा । यथा—

द्वाचत्वारिंशत्, द्विचत्वारिंशत् । त्रय पञ्चाशत्, त्रिपञ्चाशत् इत्यादि ।

॥ * ॥ **षष उत्व दतृदशधासूत्तरपदादेः ष्टुत्वं च धासु वेति वाच्यम्** ।

षोडन्, षोडश, षोढा, षड्ढा ।

---

६. ङ्यापो ह्रस्वः—

(१६८९) **इको ह्रस्वोऽङ्यो गालवस्य** । ६ । ३ । ६१ ।

इगन्तस्याऽङ्यन्तस्य ह्रस्वो गालवमते । आमणिपुत्र, आमणीपुत्र । **इयङुवङ्भाविनामव्ययानां च न** । श्रीमद् शुक्लीभाव. ।

(१६९०) **ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्** । ६ । ३ । ६३ ।

कालिदास, अजक्षीरम् ।

(१६९१) **त्वे च** । ६ । ३ । ६४ ।

ङ्यापोर्वा ह्रस्व । अजत्वम् अजात्वम् । रोहिणित्व,-णीत्वम् ।

(१६९२) **इष्टकेषीकामालानां चिततूलभारिषु** । ६ । ३ । ६५ ।

यथासख्य ह्रस्व.—इष्टकचितम्, इषीकतूल, मालभारी ।

---

७ नञ् आदिलोप —

(१९९३) **नलोपो नञः** । ६ । ३ । ७३ ।

नञो नकारस्य लोप उत्तरपदे । न ब्राह्मण —अब्राह्मण ।

(१९९४) **तस्मान्नुडचि** । ६ । ३ । ७४ ।

लुप्तनकारात्परस्याचो नुडागम । न आदि अनादि । अ, न, अन्, अन इति चत्वारो निषेधार्थका निपाता । तेषु 'अ' हलादिनैव समस्यते । 'अन्' अजादिनैव । 'न'कारस्तूभयेनापि । 'अन' इत्यकारान्तोऽतीव विरळप्रयोग । अनेन नैकम्, अनेक, नग, अग, इत्युभयथाप्रयोगा व्याख्याता ।

---

८ आदेश —

(१९९५) **वोपसर्जनस्य** (सहस्य स) । ६ । ३ । ८२ ।

उपसर्जनस्य सहशब्दस्य सभावो वा । —सहपुत्र —सपुत्र ।

(१९९६) **ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबन्धुषु** (समानस्य स) । ६ । ३ । ८४ ।

एषूत्तरपदेषु समानस्य सभाव । सज्योति सनाभिरित्यादि ।

दृग्दृशवतुषु । ६ । ३ । ८९ । (व्याख्यातमिदम्) सदृक्—सदृश ।

(१९९७) **अषष्ठ्यतृतीयान्तस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु** । ६ । ३ । ९९ ।

अन्यशब्दस्य दुगागम स्याद्दाशीरादिषु परेषु । न तु षष्ठ्यन्तस्य तृतीयान्तस्य च । कारके च्छे च नाय निषेध इष्यते । यथा—

अन्यदाशी, अन्यदाशा, अन्यदारया, अन्यदास्थित, अन्यदुत्सुक, अन्यदूति, अन्यत्कारक, अन्यद्राग, अन्यदीय ।

(१९९८) **अर्थे विभाषा** । ६ । ३ । १०० । अन्यदर्थ, अन्यार्थ ।

(१९९९) **कोः कत्तत्पुरुषेऽचि** । ६ । ३ । १०१ ।

अजादावुत्तरपदे । कुत्सितोऽश्व, कदश्व । अचीत्युक्ते कुगज इत्येव ।

(१७००) **का पथ्यक्षयोः** । ६ । ३ । १०४ । कापथ काक्ष ।

(१७०१) **ईषदर्थे** । ६ । ३ । १०५ ।

को कात्वमजादावपि ।—ईषज्जल, काजलम् । ईषदम्ल, काम्लम् ।

(१७०२) **विभाषा पुरुषे** । ६ । ३ । १०६ । कापुरुष, कुपुरुष ।

(१७०३) **कवञ्चोष्णे** । ६ । ३ । १०७ । कवोष्ण, कोष्ण, कदुष्णम् ।

(१७०४) **पृषोदरादीनि यथोपदिष्टम्** । ६ । ३ । १०९ ।

पृषोदरादय शब्दा यथोपदिष्ट साधव । नानाविधप्रक्रियाजटिलत्वात्ते शब्दा न व्युत्पाद्यन्ते । व्यत्यस्ता सर्वेऽपि शब्दा अत्र गणे पठनीया इत्यर्थ । पृषत उदर पृषोदरम् । वारिवाहका वलाहक इत्यादि ।

(१७०५) **संख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ** । ६ । ३ । ११० ।

अहन्शब्दस्याह्नादेशो वक्ष्यते । सख्यादिपूर्वपदत्वे तस्य सप्तम्येकवचने अह्नीति यथास्थितमेव रूप वा । यथा—

द्व्यहि, द्व्यहनि, द्व्यह्ने । सायाह्नि, सायाहनि, सायाह्ने ।

---

९. दीर्घः—

(१७०६) **नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ** (दीर्घ) । ६ । ३ । ११६ ।

क्विन्तेषु नह्यादिषु पूर्वपदस्य दीर्घः । यथा—

उपानत्, नीवृत्, प्रावृट्, मर्मावित्, नीरुक्, ऋतीषट्, पुरीतत् ।

(१७०७) **उपसर्गस्य घञ्यमनुष्ये बहुलम्** । ६ । ३ । ११२ ।

घञन्ते उत्तरपदे उपसर्गस्य बहुल दीर्घ, न तु मनुष्ये वाच्ये । परीपाक, परिपाक । मनुष्ये तु निपाद ।

(१७०८) **अन्येषामपि दृश्यते** । ६ । ३ । १३७ ।

उत्तरपदे अन्येषामपि दीर्घो दृश्यते । यथाप्रयोगं दीर्घो द्रष्टव्य इत्यर्थ । अनेन 'तत्र तेनेदमिति' बहुव्रीहौ पूर्वपदस्य दीर्घः । दण्डादण्डि, मुष्टीमुष्टि, बाहूबाहवि ।

उत्तरपदकार्याणि ।

(१७०९) **समासान्ताः** ।५।४।६८।

तद्धिताधिकारस्यान्त्यभागेऽयमधिकारः । तेन तद्धिकार्याण्यूह्यानि ।

(१७१०) **न पूजनात्** ।५।४।६९।

पूजावाचकात् समासान्तो न । सु, अति इति निपातद्वयमेवात्र पूजावाचकं विवक्षितम् । यथा—शोभनो राजा सुराजा, अतिराजा । अत्र 'राजाहःसखिभ्य' इति टच् समासान्तो न भवति ।

(१७११) **किमः क्षेपे** ।५।४।७०।

कुत्सितार्थककिंशब्दघटितात् समासान्तो न । कुत्सितो राजा किंराजा । अत्रापि टच् प्राप्तः ।

(१७१२) **नञस्तत्पुरुषात्** ।५।४।७१।

राजा न भवतीत्यराजा । तत्पुरुषादिति नियमात् धूरस्य नास्तीत्यधुरं शकटमिति बहुव्रीहौ अप्रत्ययस्समासान्तो भवत्येव ।

(१७१३) **पथो विभाषा** ।५।४।७२।

नञ्पूर्वात् पथ्यन्तात्तत्पुरुषाद्वा समासान्तः ।—अपथम्, अपन्थाः । निषेधं पूर्वमेवोक्त्वा समासान्तान् विदधाति—

(१७१४) **बहुव्रीहौ संख्येये डजबहुगणात्** ।५।४।७३।

'संख्ययाव्यया...' (१६०९) इति संख्येये बहुव्रीहिर्विहितः । तत्र डच् समासान्तः । न तु बहुगणान्तात् । यथा—

उपदशाः, पञ्चषाः । बह्वन्ते तु उपबहवः ।

ङित्त्वात् भस्य टिलोपः । त्रिचतुरशब्दस्तु 'त्र्युपाभ्यां चतुरोऽजिष्यते' इत्यच्प्रत्ययान्तः ।

(१७१५) **ऋक्पूरब्धूःपथामानक्षे** ।५।४।७४।

अ अनक्ष इति च्छेदः । बहुव्रीहाविति नानुवर्त्तते । अतः समासमात्रस्यायं विधिः । ऋगाद्यन्तस्य समासस्य 'अ' प्रत्ययः समासान्तः । यथा—

ऋचोऽर्धम् अर्धर्च	अक्षस्य वू अक्षवुरा ।
कृष्णस्य पू कृष्णपुरम्	सता पन्थाः सत्पथ ।
विमला आपो यत्र विमलाप सर	

'द्यन्तरुपसर्गेभ्योऽप ईत्' 'ऊदनोर्देशे' इति सूत्राभ्यम् 'अप्' शब्दाकारस्य-ईत्व-ऊत्वयोर्विधानात् द्वीपम्, अन्तरीप परीपम्, अनूपम् इति रूपसिद्धि ।

(१७१६) **अच्प्रत्यन्ववपूर्वात् सामलोम्नः** ।५।४।७५।

अच समासान्त । 'नस्तद्धिते' इति टिलोप । प्रतिसाम, प्रतिलोमम् इत्यादि ।

कृष्णोदकपाण्डुसख्यापूर्वाया भूमेरजिष्यते ।

कृष्णभूम , द्विभूम , सप्तभूम . प्रासाद । भूमिरत्र भूमिका ।

(१७१७) **अदृणोऽदर्शनात्** ।५।४।७६।

गवामक्षाव गवाक्ष ।

(१७१८) **अचतुरविचतुरसुचतुरस्त्रीपुसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तदिवरात्रिन्दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वा** ।५।४।७७।

पञ्चविंशतिरजन्ता निपात्यन्ते ।

(१७१९) **अवसमन्धेभ्यस्तमस** ।५।४।७९।

अवतमस, सन्तमसम्, अन्धतमसम् ।

(१७२०) **तत्पुरुषस्याङ्गुले सङ्ख्याव्ययादे** ।५।४।८६।

द्व्यगुल, व्यगुलम् इत्यादि ।

(१७२१) **अहस्सर्वैकदेशसंख्यातपुण्याच्च रात्रे** ।५।४।८७।

अहोरात्र , सर्वरात्र , पूर्वरात्र इत्यादि । तत्पुरुषस्येत्यनुवृत्तावपि अहन्शब्दग्रहणसामर्थ्यादहोरात्र इति द्वन्द्वेऽप्यच । अत्र तत्पुरुषो हि दुस्साध ।

(१७२२) **अह्नोऽह्न एतेभ्यः** ।५।४।८८।

सर्वैकदेशादिभ्य । सर्वाह्ण , पूर्वाह्ण , प्राह्ण इत्यादि ।

(१७२३) **न संख्यादेः समाहारे** ।५।४।८९।

द्वयोरह्नो समाहारो व्यह , त्र्यह , दशाह । अत्र वक्ष्यमाणे टचि 'अह्नष्टखोरेव' इति टिलोप एव ।

(१७२४) **उत्तमैकाभ्यां च** ।५।४।९०।

उत्तमम् 'अहस्सर्वै ' त्यत्रान्त्य, पुण्यशब्द । पुण्याहम, एकाहम्।

(१७२९) **राजाहःसखिभ्यष्टच्** ।५।४।९१।

एतदन्तात्तत्पुरुषाट्टच्। महाराज, वायुसख, पुण्याहम्।

(१७२६) **गोरतद्धितलुकि** ।५।४।९२।

पञ्चाना गवा समाहार पञ्चगवम। तद्धितलुकि तु पञ्चभिर्गोभि क्रीत पञ्चगु। द्विगोरपि तत्पुरुषत्वादय समासान्त ।

कृष्णा गौ कृष्णगवी। राज्ञो गौ राजगवी। टित्वाद् ङीप्।

(१७२७) **द्वन्द्वाच्चुदषहान्तात्समाहारे** ।५।४।१०१।

चवर्गदषहकारान्ताद् द्वन्द्वात्समाहारार्थकाट्टच्।

वाक्च त्वक्च वाक्त्वच, त्वक्स्रजम्। शमीदषदम्। वाक्त्वचम्। छत्रोपानहम्। असमाहारे तु प्रावृट्च्छरदौ।

(१७२८) **अव्ययीभावे शरत्प्रभृतिभ्यः** ।५।४।१०७।

उपशरदम्, अध्यनसम् इत्यादि।

(१७२९) **अनश्च** ।५।४।१०८। उपराजम्, अध्यात्मम्।

(१७३०) **नपुंसकादन्यतरस्याम्** ।५।४।१०९। अधिवर्त्मि,-र्त्मम्।

(१७३१) **ह्रयः** ।५।४।१११। उपसमिधम्, उपसमित्।

(१७३२) **बहुव्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच्** ।५।४।११३।

स्वाङ्गवाचिसक्थ्यक्ष्यन्तात् बहुव्रीहे षच्। पृथुसक्थ। पङ्कजाक्ष। षित्त्वात् ङीष्। पृथुसक्थी. पङ्कजाक्षी। अस्वाङ्गाभ्या तु—दीर्घसक्थि शकटम्। स्थूलाक्षा वेणुयष्टि । 'अक्ष्णोऽदर्शनात्' इत्यच्।

(१७३३) **अप्पूरणीप्रमाण्योः** ।५।४।११६।

पूरणप्रत्ययान्तस्त्रीलिङ्गान्तात् प्रमाणीशब्दान्ताच्च बहुव्रीहेरप्।

कल्याणी पञ्चमी यासा ता—कल्याणीपञ्चमा रात्रय ।

(१७३४) **सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः** ।५।४।११०।

एते बहुव्रीहावच्प्रत्ययान्ता निपात्यन्ते। शोभन प्रातर्यस्य सुप्रात दिनम्।

(१७३५) **नञ्दुस्सुभ्यो हलिसक्थ्योरन्यतरस्याम्** ।५।४।११९।

अहल, अहलि । असक्थ असक्थि ।

(१७३६) **नित्यमसिच्प्रजामेधयोः** । ५ । ४ । १२२ ।

नञ्दुस्सुभ्य इत्येव । अप्रजा, सुप्रजा, दुष्प्रजा, अमेधा, दुर्मेधा, सुमेधा ।

(१७३७) **धर्मादनिच् केवलात्** । ५ । ४ । १२४ ।

केवलात् पूर्वपदात्परात् धर्मशब्दादनिच् बहुव्रीहौ । द्विपदे बहुव्रीहावित्यर्थः । कल्याणधर्मा । सन्दिग्धसाध्यधर्मा इत्यादौ कर्मधारयपूर्वपदत्व कल्प्यम् । एव चानेकपदे समानाधिकरणे बहुव्रीहौ विकल्प फलित ।

(१७३८) **इच् कर्मव्यतीहारे** । ५ । ४ । १२७ ।

'तत्र तेनेदमिति सरूपे' इति कर्मव्यतीहारे बहुव्रीहिर्विहित' । तस्मादिच् समासान्त । केशाकेशि, मुसलामुसलि ।

(१७३९) **ऊधसोऽनङ्** । ५ । ४ । १३१ ।

'अल्लोपोऽन'—कुण्डोघ्नी ।

(१७४०) **जायाया निङ्** । ५ । ४ । १३४ ।

रमा जाया यस्य स रमाजानि । ङित्त्वादन्तादेशो निङ् । यकारस्य 'लोपो व्योर्वलि' इति लोप ।

(१७४१) **गन्धस्येदुत्पूतिसुसुरभिभ्यः** । ५ । ४ । १३५ ।

उद्गन्धि, पूतिगन्धि, सुगन्धि, सुरभिगन्धि ।

(१७४२) **अल्पाख्यायाम्** । ५ । ४ । १३७ । सूपगन्धि भोजनम् ।

(१७४३) **उपमानाच्च** । ५ । ४ । १३७ । मद्यगन्धि मुखम् ।

(१७४४) **उरःप्रभृतिभ्यः कप्** । ५ । ४ । १५१ ।

व्यूढोरस्क, प्रियसर्पिष्कः । पुमान्, अनड्वान्, पयस्, नौस्, लक्ष्मीः इति शब्दा अत्र गणे एकवचनान्ता पठिता । अतो बहुवचनान्तेभ्यो वक्ष्यमाणो वैकल्पिक कबेव । द्विपुमान्, द्विपुरुषो वा ग्राम ।

(१७४५) **इनः स्त्रियाम्** । ५ । ४ । १५२ ।

बहुवाग्मिनका सभा पुसि तु बह्वनुजीवी बह्वनुजीविको वा राजा ।

(१७४६) **नद्यृतश्च** ।५।४।१५३।

नद्युत्तरपदाट्टदन्तोत्तरपदाच्च बहुव्रीहे. कप् ।

बहुकुमारीक गृहम् । बहुभर्तृका भूमि ।

(१७४७) **शेषाद्विभाषा** ।५।४।१५४।

अनुक्तसमासान्ताद्बहुव्रीहे कप्वा । महायशा. महायशस्को वा ।

सुडागम —

(१७४८) **सुट्कात्पूर्वः** ।६।१।१३५।

॥ * ॥ अडभ्यासव्यवायेऽपीति वक्तव्यम् । इत्यधिकृत्य—

(१७४९) **सम्परिभ्याम् करोतौ भूषणे** ।६।१।१३७।

(१७५०) **समवाये च** ।६।१।१३८।

सम्परिपूर्वस्य करोते. कात्पूर्वं सुडागम. स्यात् भूषणे समवाये चार्थे ।

सस्करोति । सञ्चस्कार । समस्करोत् । परिष्करोति परिष्कीर्षा । पर्यस्करोत् । समवायस्सङ्घात । 'सस्कृत भक्षा' इति ज्ञापकादर्थान्तरेष्वपि सुट् ।

(१७५१) **उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च** ।६।१।१३९।

चात् भूषणसमवाययो । प्रतियत्नो गुणाधानम् । वैकृतं विकार । वाक्याध्याहार आकाङ्क्षितैकदेशपूरणम् । उपस्कृता कन्या—भूषिता । उपस्कृता ब्राह्मणा—समुदिता । लवण तेमनस्योपस्कुरुते—गुणमादधाति । उपस्कृतमोदन—विकृतमित्यर्थ । उपस्कृत भुंते—साकाङ्क्षापूरणम् ।

(१७५२) **किरतौ लवने** ।६।१।१४०।

उपादित्येव—उपस्किरति । उपस्कीर्णम् ।

(१७५३) **हिंसायां प्रतेश्च** ।६।१।१४१।

उपप्रतिभ्या किरतेस्सुट् । उपस्किरति, प्रतिष्किरति ।

(१७५४) **अपाच्चतुष्पाच्छकुनिष्वालेखने** ।६।१।१४२।

हर्षजीविकाकुलायकरणेष्वेव सुट्, तदा किरतेरात्मनेपद च ।

अपस्किरते वृषो हृष्ट । कुक्कुरो भक्षार्थी । श्वा आश्रयार्थी । भूमिमालिखतीत्यर्थः ।

(१७५५) **पारस्करप्रभृतीनि च संज्ञायाम् ।१।१।१५७।**

कृतसुट्कानि निपात्यन्ते । पारस्कर, किष्किन्धा, तस्कर, बृहस्पति, प्रायश्चित्त प्रायश्चित्ति ।

द्विरुक्तिप्रकरणम् ।

(१७५६) **सर्वस्य द्वे ।८।१।१।**

इत परं समुदितस्य पदस्य द्वित्वं विधीयत इत्यधिकार ।

(१७५७) **तस्य परमाम्रेडितम् ।८।१।२।**

द्विरुक्तस्य पर रूपमाम्रेडितसज्ञम् ।

(१७५८) **नित्यवीप्सयोः ।**

पौनःपुन्ये वीप्साया च समुदितस्य पदस्य द्वित्वम् । यथा—

पचतिपचति । भुक्त्वाभुक्त्वा । भोजभोजम् । वृक्षवृक्ष सिञ्चति ।

(१७५९) **उपर्यध्यधसः सामीप्ये ।८।१।७।**

उपर्युपरि, अध्यधि, अधोऽध । सामीप्यमत्र द्योत्यम् ।

(१७६०) **वाक्यादेरामन्त्रितस्यासूयासम्मतिकोपकुत्सनभर्त्सनेषु ।८।१।८**

असूयाया—सुन्दरसुन्दर वृथा ते सौन्दर्यम् ।
सम्मतौ—देवदेव वन्द्योऽसि । इत्यादि ।

(१७६१) **एकं बहुव्रीहिवत् ।८।१।९।**

द्विरुक्त एकशब्दो बहुव्रीहिवत् स्यात् । तेन सुब्लोपपुवद्भावौ ।

एकैकस्मै देहि—वीप्साया द्वित्वम् ।

(१७६२) **आबाधे च ।८।१।२०।**

पीडायां द्योत्यायां पदस्य द्वित्व बहुव्रीहिवद्भावश्च ।

गतगतो मे राम । गतगता सीता । पुत्रशोकार्त्तस्य दशरथस्य वचनम् ।

(१७६३) **कर्मधारयवदुत्तरेषु** । ८ । १ । ११ ।

वक्ष्यमाणेषु द्वित्वेषु कर्मधारयवद्भावोऽपि स्यात् । प्रयोजनं सुब्लोपपुवद्भावावेव । स्वरे विशेषोऽस्तीति वचनम् ।

(१७६४) **प्रकारे गुणवचनस्य** । ८ । १ । ११ ।

प्रकार सादृश्यम्— पटुपटु, पटुपट्वी, पटुसदृशीत्यर्थ । एव मन्दमन्द इत्यादि ।

१ **आधिक्ये द्वे वाच्ये**—'भीतभीत इव शीतमयूख' अतिभीत ।

२ **आनुपूर्व्ये द्वे वाच्ये**—मूलेमूले स्थूल, अग्रेऽग्रे कृश ।

३ **सम्भ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः** ।
सर्प सर्प, बुध्यस्वबुध्यस्व । सर्प ३, बुध्यस्व ३ ।

४ **क्रियासमभिहारे च**—याहियाहीति याति ।

५ **कर्मव्यतीहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्** ।

६ **असमासवद्भावे पूर्वपदस्य सुपः सुर्वाच्यः** ।
अन्योन्य विप्रा नमन्ति । 'अन्योन्येषा पुष्करैरामृशन्त' । एव परस्परम् । उत्तरोत्तरम् ।

७ **स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा** ।
अन्योन्यम्, अन्योन्याम् । 'परस्परामर्पितहस्ततालं तत्कालमालीभिरहस्यताल'—परस्परस्यामित्यर्थ ।

(१७६५) **यथास्वे यथायथम्** । ८ । १ । १४ ।

यथास्वमिति वीप्सायामव्ययीभाव. । यथाशब्दस्य वीप्साया द्वित्व क्रीबत्व च निपात्यते । यथा—

सर्वे यथायथमुपविशन्ति—स्वस्वोचितेषु स्थानेष्वित्यर्थ ।

ये शब्दशुल्कै परमाचरन्ति समाप्लव व्याकरणाम्बुराशौ ।
सुखावगाहक्षम एष तेषा मयेह सोपानपथो निबद्ध ॥ १ ॥

समुद्धृत नाखिलमेव सूत्र समुद्धृतेष्वप्यनतिस्फुटस्य ।
बालानुरोधेन यथाश्रुतार्थव्याख्यानमेवाचितं मयात्र ॥ २ ॥

क्षुद्रश्च सोऽयं मम मन्तुरन्तर्वाणिप्रवीरैर्ननु मर्षणीय ।
अरुन्धतीदर्शनरीतिरेव मयादृता यत् सुखबोधनाय ॥ ३ ॥

अपूर्वसज्ञापरिभाषगुप्ते सालातुरीयस्य वचोरहस्ये ।
प्रवेशनद्वारमिदं यदि स्यादवन्ध्य एवात्र परिश्रमो मे ॥ ४ ॥

आयुर्मितं ज्ञेयमिहामितं च तन्त्रं त्वपारं पणिगोत्रजस्य ।
व्युत्पत्तयेऽध्येयमिदं च सर्वैरिति प्रणीतं **लघुपाणिनीयम्** ॥ ५ ॥

प्रकाशकाश्यात् सहजाद्यमर्थं न कौमुदी सा विशदीकरोति ।
तमेष सौम्यो **लघुपाणीय**बालातपः सुग्रहमातनोतु ॥ ६ ॥

माहेश्वर्यामनघगुणवृच्युज्वलाया न को वा
सस्कारार्थी सकृदभिषव प्रार्थयेत्तीर्थभूर्याम् ।
कृच्छ्रप्राप्ये महति विषये काशिकादौ तदर्थं
ये ग्लायन्ति प्रचरितुमिह स्नान्तु ते तन्निपाने ॥ ७ ॥

यो वैयाकरणाधिराज्यपदवीसिंहासनाधिष्ठित—
द्रष्टुं वाञ्छति पाणिनिं स विविधां कक्ष्यां समारोहतु ।
सीव्यन्तं लघु सूत्रजालमुटजे व्याघ्राजिनासीनम-
प्येन सेवितुमुत्सुकस्तु विशतु स्वैरं मदुक्ताध्वना ॥ ८ ॥

॥ लघुपाणिनीयं सम्पूर्णम् ॥

॥ शुभम् ॥

लघुपाणिनीय-सूत्रसूची ।

६ अ अ
५४ अक सवर्णे दीर्घ
१२४३ अकथित च
११४३ अकर्त्तरि च कार०
१२६६ अकर्त्तर्यृणे पञ्चमी
९१४ अकर्मकाच्च
९२३ अकर्मकाच्च
९३३ अकर्मकाच्च
८२८ अकृत्सार्वधातुकयो०
१२९८ अकेनोर्भविष्यदाध०
१७१७ अक्ष्णोऽदर्शनात्
१०१२ अच उपसर्गात्त
३०२ अच
८८६ अच कर्मकर्त्तरि
८६१ अच परस्मिन् पूर्वविधौ
१७१८ अचतुरविचतुरसुच०
६६० अचस्तास्वत्थल्य०
३१० अचि र ऋत
८२५ अचि विभाषा
३६४ अचि श्नुधातुभ्रुवाम्०
२८२ अचो ञ्णिति
२१ अचोऽन्त्यादि टि
१०२५ अचो यत्
१०८ अचो रहाभ्यां द्वे
२४२ अच घे
१५१७ अजादा गुणवचनादेव
५९७ अजादेर्द्वितीयस्य
१३९ अजाद्यतष्टाप्
१६१७ अजाद्यदन्तम्
१०४२ अजिरशिशिरशुचिषु
७७६ अजेर्व्यघञपो
८१५ अञ्चेर्लुक्
६६५ अञ्चे र्णिचि
३९४ अट्कुप्वाङ्नुम्व्य०
५७७ अड् गार्ग्यगालवयो
२२१ अड् इतरादिभ्य पञ्चभ्य
९७३ अणावकर्मकाच्चि०
३८ अणुदित्सवर्णस्य चा०
११४ अणोऽप्रगृह्यस्या०
११७१ अण्कर्मणि च
६१४ अत आदे
१३७२ अत इञ्
१४८१ अत इनिठनौ
५४६ अत उत्सार्वधातुके
७३४ अत उपधाया
७३९ अत एकहल्मध्ये०
१०० अत कृकमिकस०
१३१४ अतिरतिक्रमणे च
१५१२ अतिशायने तमबिष्ठनौ
३१३ अतो गुणे
४६७ अतो दीर्घो यञि
२०४ अतो भिस ऐस्
२२० अतोऽम्
५०७ अतो येय
८९ अतो रोरप्लुतादप्लुते
८०७ अतो लोप
७०१ अतो ल्रान्तस्य
७०६ अतो हलादेर्लघो
५०३ अतो हे
१५७३ अत्यन्तसयोगे च
८१४ अत्र लोपोऽभ्यासस्य
७५ अत्रानुनासिक पूर्वस्य०

२६१ अत्वसन्तस्य चाधा ०
६३६ अत्सृद्दृत्वरप्रथम्रद ०
५७८ अद सर्वेषाम्
४६५ अद्यश्वस्तात्
३२९ अदर्शन लोप
३१६ अदस औ सुलोपश्च
५८ अदसो मात्
३१७ अदसोऽसेर्दादु दो म
४४७ आदिप्रभृतिभ्य शप
१९ अदेङ् गुण
७५७ अदो जग्धिर्ल्यप्ति ०
१२९६ अधिकरणवाचिनश्च
१०८८ अधिकरणे बन्ध
१६४० अधिकरणैतावच ०
१३१२ अधिपरी अनर्थकौ
१३१६ अधिरीश्वरे
१२३८ अधिशीङ्स्थासा कर्म
१२९० अधीगर्थदयेशा ०
९२१ अधे प्रसहने
१३५९ अन्
२८४ अनङ् सौ
१०९ अनचि च
४२९ अनद्यतने लङ्
४३१ अनद्यतने लुट्
१२४६ अनभिहिते
११८१ अनवक्लृप्त्यमर्ष ०
१७२९ अनश्च
३२४ अनाप्यक
४०३ अनिते
८७२ अनिदिता हल ०
१५९९ अनुकरण चा ०
३५५ अनुदात्त सर्वम ०
४१९ अनुदात्तादित आत्म ०
६८३ अनुदात्तस्य चर्दुपध ०
५५९ अनुदात्तोपदेशवनति ०
७६ अनुनासिकात्परोऽनु ०
९६४ अनुपराभ्या कृञ
९६२ अनुपसर्गाज्ञ
९३१ अनुपसर्गात्
१४६ अनुपसर्जनात्
१२३३ अनुप्रतिगृणश्च
१५६६ अनुर्यत्समया
१३०३ अनुर्लक्षणे
१३३४ अनुशतिकादीना च
११५ अनुस्वारस्य यथि ०
१६०८ अनेकमन्यपदार्थे
३४ अनेकाल्शित्सर्वस्य
१४४ अनो बहुव्रीहे
९३७ अनोरकर्मकात्
१७९ अन्तर बहिर्योगोप ०
१२४८ अन्तरान्तरेणयुक्ते
१२२० अन्तर्धौ येनादर्शन ०
४६ अन्तादिवच्च
१५२१ अन्तिकवाढयोर्नेद ०
१५१ अन्यतो ङीष्
१०७४ अन्यथैवकथमित्थ ०
१२७१ अन्यारादितरर्तेदि ०
१७०८ अन्येषामपि दृश्यते
११३० अन्येष्वपि दृश्यते
८०१ अपगुरो णमुलि
१६५१ अपथ नपुंसकम्
३७१ अपदान्तस्य मूर्धन्य
१५६३ अपपरिबहिरञ्चव ०
१३०७ अपपरी वर्जने
१२५० अपवर्गे तृतीया
९३२ अपह्नवे ज्ञ
१७५४ अपाच्चतुष्पाच्छकु ०
१५३८ अपादाने चाही ०
१२७० अपादाने पञ्चमी
१०९९ अपादाने परीप्सायाम्
९५९ अपाद्वद
१३१५ अपि पदार्थसम्भाव ०

२३३ अपृक्त एकाल्प्रत्यय
२६० अमृन्तृच्स्वसृनप्तृ०
१७३३ अप्पूरणीप्रमाण्यो
११५३ अप्प्रत्ययात्
१६३ अभाषितपुस्काच्च
१२११ अभिज्ञावचने लृट्
१२३९ अभिनिविशश्च
९६५ अभिप्रत्यतिभ्य क्षिप
१३१० अभिरभागे
११४६ अभिविधौ भाव इनुण्
१५४२ अभिविधौ सम्पदा च
७३५ अभ्यासस्यासवर्णे
५६२ अभ्यासाच्च
१११ अभ्यासे चर्च
१९९ अभि पूर्व
१६६० अमूर्धमस्तकात्स्वा०
१६०४ अमैवाव्ययेन
२३१ अम्बार्थनद्योर्ह्रस्व.
२९० अम् सम्बुद्धौ
७८३ अयामन्ताल्वा०
१०५४ अरुर्द्विषदजन्तस्य मुम्
६२० अर्तिपिपर्त्योश्च
७८६ अर्तिह्रीब्लीरीक्नूयी०
१२४ अर्थवदधातुरप्रत्यय०
१६९८ अर्थे विभाषा
१५९३ अर्ध नपुंसक
१६५२ अर्धर्चा पुसि च
२९१ अर्वणस्त्रसावनञ
१४८३ अर्शआदिभ्योऽच्
१२०० अर्हे कृत्यतृचश्च
११३३ अलंकृञ्निराकृञ्प्र०
१०७० अलंखल्वो प्रतिषे०
१६५३ अलुगुत्तरपदे
३१ अलोऽन्त्यस्य
२२ अलोऽन्त्यात् पूर्व उपधा
१७४२ अवक्षेपणाया
१६१८ अव्ययात्तर
२९९ अश्लोपोऽन
१३२८ अवयवाद्तो
१७१९ अवसमन्वेभ्यस्तमस
३८४ अवाच्चालम्बनाविदूर्ययो.
९३९ अवाद् ग्र
१५४६ अव्यक्तानुकरणाद्यज०
१५५६ अव्यय विभक्तिसमीपसमृद्धि०
१५२९ अव्ययसर्वनाम्नामक०
१३९५ अव्ययात्त्यप्
१२९ अव्ययादाप्सुप
१५५५ अव्ययीभाव
१०६३ अव्ययीभावश्च
१६४२ अव्ययीभावश्च
१७२८ अव्ययीभावे शरत्प्र०
११०६ अव्ययेऽयथाभिप्रेताख्या०
८४५ अशनायोदन्यधना०
१६४७ अशाला च
६१६ अश्नोतेश्च
८४६ अश्वक्षीरवृष०
१६९७ अषष्ठ्यतृतीयास्थस्था०
३०७ अष्टन आ विभक्तौ
२१५ अष्टाभ्य औश
६८७ असयोगाल्लिट् कित्
५८५ असिद्धवदत्राभात्
५७५ अस्तिसिचोऽपृक्ते
७७२ अस्तेर्भू
२६८ अस्थिदधिसक्थ्यक्ष्णा०
४२५ अस्मत्तुल्य
१४८२ अस्मायामेधास्रजो०
८४३ अस्य च्वौ
११०४ अस्यतितृषो०
४५९ अस्यतिवक्तिख्याति०
७२२ अस्यतेस्थुक्
१७२१ अह सर्वैकदेशसंख्या०
७१ अहन्

१३४१ अह्नष्टखोरेव
१७२२ अहोढ एतेभ्य
१८२ आकडारादेका संज्ञा
११६० आक्रोशे नञ्यनि
११३१ आ क्त्वेस्तच्छीलतद्धर्म ०
१२२१ आख्यातोपयोगे
९२८ आङ उद्गमने
२२९ आङि चाप
९०८ आङो दोऽनास्यविहरणे
२४३ आङो नाऽस्त्रियाम्
९१६ आङो यमहन
५२३ आडो यि
१५६४ आङ् मर्यादाभिविध्योः
१३०८ आङ् मर्यादावचने
१४४५ आ च त्वात्
५५३ आ च हौ
२७१ आच्छीनद्योर्नुम्
५१० आटश्च
४६९ आतश्चादीनाम्
४८३ आतुत्तमस्य पिच्च
२३६ आप् नद्या
७३६ आत औ णल
४९९ आत
१११३ आतश्चोपसर्गे
५०९ आतो ङित
३०६ आतो धातो
१११६ आतोऽनुपसर्गे क
८९२ आतो युक् चिण्कृतो
१०५० आतो युच्
७२० आतो लोप इटि च
१६५६ आत्मनश्च
४६६ आत्मनेपदेष्वनत
७६४ आत्मनेपदेष्वन्यतरस्याम्
७१८ आत्मनेपदेष्वन्यतरस्याम्
११२८ आत्ममाने खश्च
१३६१ आत्माध्वानौ खे
१६०० आदरानादरयो सदसती
१६४ आदाचार्याणाम्
९८६ आदिकर्मणि क्त कर्तरि च
६७७ आदितश्च
९ आदिरन्त्येन सहेता
१३ आदिर्ञिटुडव
३३ आदे परस्य
७९४ आदेच उपदेशेऽशिति
३७५ आदेशप्रत्यययो
४८ आद् गुण
३२६ आद्यन्तवदेकस्मिन
२५ आद्यन्तौ टकितौ
१२३७ आधारोऽधिकरणम्
१६७० आनङृतो द्वन्द्वे
४०० आनि लोट्
९९४ आने मुक्
१६८५ आन्महत समानाधि ०
८११ आपृङ्भ्यामीत्
१७६२ आबाधे च
१०७२ आभीक्ष्ण्ये णमुल् च
७५१ आम
३६१ आमन्त्रित पूर्वमवि ०
२४४ आमि सर्वनाम्न सुट्
४८१ आमेत
७५३ आमेप्रत्ययवत् कृञोऽनु ०
१०५२ आयनेयीनीयिय फढ ०
८४० आयादय आर्धधातुके ०
१२७९ आयुक्तकुशलाभ्या चासे ०
४५० आर्धधातुक शेष
६४२ आर्धधातुकस्येड् वलादे
७५६ आर्धधातुके
१२०१ आवश्यकाधमर्ण्ययोर्णिनिः
११७३ आशसायां भूतवच्च
११७५ आशसावचने लिङ्
४३५ आशिषि लिङ्लोटौ
११२२ आ सर्वनाम्न

५७२ आहस्थ
२६५ इकोऽचि विभक्तौ
६९१ इको झल
४३ इको यणचि
१६८९ इको ह्रस्वोऽङ्यो ०
१४५१ इगन्ताच्च लघुपूर्वात्
१११२ इगुपधज्ञाप्रीकिरः क
२९४ इग्यण सम्प्रसारणम्
७६८ इडश्च
१०५५ इच एकाचोऽम् प्रत्ययवच्च
१७३८ इच् कर्मव्यतीहारे
११९६ इच्छार्थेभ्यो विभा ०
४०८ इजादेः सनुम
७४७ इजादेश्च गुरुमतोऽनृच्छ
६८६ इट ईटि
४९२ इटोऽत्
६४८ इट सनि वा
३८८ इण षीध्वंलुङ्लिटाम् ०
७६५ इणो गा लुङि
५८९ इणो यण
३७३ इण् को
१४९७ इतराभ्योऽपि दृश्यन्ते
९०४ इतरेतरान्योन्योपपदा ०
४८६ इतश्च
२७७ इतोऽत्सर्वनामस्थाने
१२६४ इत्थंभूतलक्षणे
११२१ इदंकिमोरीश्की
१४८६ इदम इश्
१५०६ इदमस्थमु
३२० इदमो म
१४९५ इदमो हः
५१८ इदितो नुम् धातोः
२४० इदुद्भ्याम्
५५० इद्दरिद्रस्य
१७४५ इन स्त्रियाम्
१३५६ इनण्यनपत्ये
१५६ इन्द्रवरुणभवशर्वरुद्र ०
६८८ इन्धिभवतिभ्यां च
२५६ इन्हन्पूषार्यम्णां शौ
४६२ इरितो वा
५३७ इषुगमियमां छ
१६९२ इष्टकेषिकामालानाम् ०
१३५२ इष्टस्य यिट् च
१३८७ इसुसुक्तान्तात् कः
८७१ ईद्यास्योः
६३८ ईद् च गणः
५६६ ईडजनोर्ध्वे च
९९५ ईदासः
५७ ईदूदेद्विवचनं प्रगृह्यम्
८६४ ईधतेः
५६५ ईशः से
१७०१ ईषदर्थे
१५२५ ईषदसमाप्तौ कल्पब्देश्य ०
१०४८ ईषद्दुःसुषु कृच्छ्रा ०
५४९ ईहृल्यघोः
९४१ उगितश्च
१६८४ उगितश्च
२६२ उगिदचां सर्वनामस्थाने ०
२ उच्चैरुदात्तः
५०४ उतश्च प्रत्ययादसंयोग ०
११८८ उताप्योः समर्थयोः ०
५६७ उतो वृद्धिर्लुकि हलि
१७२४ उत्तमैकाभ्यां च
१३२७ उत्तरपदस्य
६२९ उत्परस्यात्
३०४ उद ईत्
११८ उद स्थास्तम्भोः पूर्वस्य
९४१ उदश्वरः सकर्मकात्
६५६ उदितो वा
१६२ उदीचामातः स्थाने ०
१०६६ उदुपधाद्भावादिः ०
९१२ उदोऽनूर्ध्वकर्मणि

५२८ उदोष्ठ्यपूर्वस्य
९१५ उद्ध्व्या तप
१६४४ उपज्ञोपक्रम तदा ०
१०९४ उपदशस्तृतीयायाम्
१० उपदेशेऽजनुनासिक ०
६६१ उपदेशेऽत्वत
५२७ उपधायाश्च
५३२ उपधाया च
१६०३ उपपदमतिङ्
९२७ उपपराभ्याम्
१७४३ उपमानाच्च
८४८ उपमानादाचारे
१५८४ उपमानानि सामान्य ०
१०९२ उपमाने कर्मणि च
१५८५ उपमित व्याघ्रादिभि ०
१७५९ उपर्यध्यधस सामीप्ये
१७०७ उपसर्गस्य घञ्यम ०
८२३ उपसर्गस्यायतौ
१३३ उपसर्गा क्रियायोगे
५२४ उपसर्गात् खल्घञो
३८१ उपसर्गात् सुनोतिसुव ०
३९८ उपसर्गादसमासेऽपि ०
५१ उपसर्गादति धातौ
११५१ उपसर्गे घो कि
१६१४ उपसर्जन पूर्वम्
९६९ उपाच्च
१७५१ उपात्प्रतियत्नवै ०
९४४ उपाद्यम स्वकरणे
९१३ उपान्मन्त्रकरणे
१२४० उपान्वध्याङ्वस
१००४ उपेयिवाननाश्वान ०
१३०६ उपोऽधिके च
१२९४ उभयप्राप्तौ कर्मणि
६०० उभे अभ्यस्तम्
१७४४ उर प्रभृतिभ्य कप्
३० उरण् रपर
६१० उरत्
७३२ उर्कत्
६९४ उश्च
७४९ उषविदजागृभ्यो ०
५०२ उस्यपदान्तात्
१ ऊकालोऽज्झ्रस्वदीर्घप्लुत
७१७ ऊदुपधाया गोह
१७३९ ऊधसोऽनङ्
८०५ ऊर्णोतेर्विभाषा
५६८ ऊणोतेर्विभाषा
१०९१ ऊ वेष्टिपूरो
१५९८ ऊर्यादिच्विडाचश्च
१७१५ ऋक्पूरब्धू पथामानक्षे
७३८ ऋच्छत्यृताम्
१०२२ ऋणमाधमर्ण्ये
२०१ ऋत उत्
६३३ ऋतश्च
६५० ऋतश्च सयोगादे
७३७ ऋतश्च सयोगादेर्गुण
८३८ ऋतेरीयङ्
२३४ ऋतोऽद्विसर्वनाम ०
६६२ ऋतो भारद्वाजस्य
१६६८ ऋतो विद्यायोनिस ०
६० ऋत्यक
१०३७ ऋदुपधाच्चाकलृपिचृते
२८५ ऋदुशनस्पुरुदसोऽनै ०
७२१ ऋदृशोऽङि गुण
६६४ ऋदृनो स्ये
१४० ऋन्नेभ्यो ङीप्
१०३८ ऋहल्योर्ण्यत्
५२६ ऋत इद्धातो
११४८ ऋदोरप्
१७६१ एक बहुव्रीहिवत्
४५ एक पूर्वपरयो
२२५ एकवचन सम्बुद्धि
३३८ एकवचनस्य च

१५५० एकविभक्ति चापूर्व ०
६७२ एकाच उपदेशेऽनुदा ०
६८ एकाचो बशो भष् ०
५९६ एकाचो द्वे प्रथमस्य
३९६ एकाजुदात्तपदे ण
५५ एङ पदान्तादति
५२ एङि पररूपम्
२२४ एङ्ह्रस्वात् सम्बुद्धे
२७ एच इग्घ्रस्वादेशे
४४ एचोऽयवायाव
३१८ एत ईद्बहुवचने
४८४ एत ऐ
३२७ एतत्तदो सुलोपो ०
१४८८ एतदोऽश्
१०३६ एतिस्तुशास्वृदृजु ०
१४८७ एतैतौ रथो
५० एध्येधत्यूठ्सु
१२७३ एनपा द्वितीया
११४७ एरच्
३६७ एरनेकाचोऽस ०
४७८ एरु
८६५ एर्लिङि
३६८ ओ सुपि
१६५५ ओज सहोऽम्भस्तम ०
५९ ओत्
५४१ ओत श्यनि
८७ ओतो गार्ग्यस्य
१०१६ ओदितश्च
५३ ओमाङोश्च
१०३९ ओरावश्यके
१३४२ ओर्गुण
२१२ औङ आप
२४१ औत्
२०३ औतोऽम्शसो
१६२१ कडारा कर्मधारये
८३६ कण्ड्वादिभ्यो यक
८३९ कर्मणिह
११६४ करणाधिकरणयोश्च
१०८४ करणे हन
९०२ कर्तरि कर्मव्यतीहारे
९८३ कर्तरि कृत्
८३७ कर्तरि शप्
११२५ कर्तर्युपमाने
८४९ कर्तुं क्यङ् सलोपश्च
१२४१ कर्तुरीप्सिततमं कर्म
१२६१ कर्तृकरणयोस्तृतीया
१५७५ कर्तृकरणे कृता बहु ०
१२९३ कर्तृकर्मणो कृति
१०४९ कर्तृकर्मणोश्च भूकृञो
९२५ कर्तृस्थे चाशरीरे कर्मणि
१०९० कर्त्रीजीविपुरुषयो ०
१२२४ कर्मणा यमभिप्रैति ०
१०७६ कर्मणि दृशिविदो ०
१२४७ कर्मणि द्वितीया
८५४ कर्मणो रोमन्थ ०
१११५ कर्मण्यण्
१०७३ कर्मण्याक्रोशे कुञ ०
१७६३ कर्मधारयवदुत्तरेषु
१२५२ कर्मप्रवचनीययुक्ते ०
१३०२ कर्मप्रवचनीया
८९७ कर्मवत् कर्मणा तुल्य ०
११४५ कर्मव्यतीहारे ण ०
१७०३ कव चोष्णे
१०९३ कषादिषु यथाविध्य ०
८५३ कष्टाय क्रमणे
१०१ कस्कादिषु च
१७०० का पथ्यक्षयो
११८९ कामप्रवेदनेऽक ०
८४७ काम्यच्च
१२१५ कारके
१०५७ कारे सत्यागदस्य
११९८ कालसमयवेलासु ०

१५९४ काला परिमाणिना
१४०३ कालाट्टन्
१२४९ कालाध्वनोरत्यन्तस ०
७४६ कास्प्रत्ययादाममे ०
११८२ किंकिलास्त्यर्थेषु लृट्
११८० किंवृत्ते लिड् लृटौ
११६९ किंवृत्ते लिप्सायाम्
१४८५ किंसर्वनामबहुभ्यो ०
१३१९ किति च
४९० किदाशिषि
३१४ किम क
१७११ किम क्षेपे
१५०७ किमश्च
१४५७ किमिदम्भ्या वो घ
१५१४ किमेत्तिङव्ययघादा ०
१४९६ किमोऽत्
१७५२ किरतो लवने
६६९ किरश्च पञ्चम्य
१५९७ कुगतिप्रादय
१४९१ कुतिहो
९७ कुप्वो ँक ँपौ च
३९७ कुमति च
९०० कुषिरञ्जो ०
६०९ कुहोश्चु
१२९१ कृञ प्रतियत्ने
७५२ कृञानुप्रयुज्यते लिटि
१२६ कृत्तद्धितसमासाश्च
४०५ कृत्यच
११६१ कृत्यल्युटो बहुलम्
१०२३ कृत्या
१२९९ कृत्याना कर्त्तरि वा
१२०२ कृत्याश्च
१२९२ कृत्वोर्थप्रयोगे का ०
९८१ कृदतिङ्
१०६१ कृन्मेजन्त
८२२ कॄपो रो ल
१५४० कृञ्वस्तियोगे सम्पद्यक ०
६६३ कृसृभृवृस्तुद्रुस्रुश्रुवो ०
१३२१ केकयमित्रयुप्रलयाना ०
५१४ केटिति च
१००५ क्तक्तवतू निष्ठा
१२९५ क्तस्य च वर्तमाने
९९१ क्तोऽधिकरणे च
१६०६ क्त्वा च
१०६२ क्त्वातोसुन्कसुन
८७८ क्त्वि स्कन्दिस्यन्दो
१६७५ क्यङ्मानिनोश्च
८४४ क्यचि च
८०९ क्यस्य विभाषा
५३६ कम परस्मैपदेषु
१०२९ कव्यस्तदर्थे
१२५८ क्रियार्थोपपदस्य च क ०
७९७ क्रीङ्जीना णौ
९०९ क्रीडोऽनुपसम्परिभ्यश्च
१२२९ क्रुधद्रुहेर्ष्यासूयार्था ०
१२३० क्रुधद्रुहोरुपसृष्टयो कर्म
४४५ क्र्यादिभ्य श्ना
१००२ क्रमुश्च
१४९२ क्राति
११२३ क्विप् च
१०२८ क्षय्यजय्यौ शक्यार्थे
१०१९ क्षायो म
११७४ क्षिप्रवचने लृट्
१६३४ क्षुद्रजन्तव
४१३ क्षुभ्नादिषु च
७१५ क्षत्रियाचि
८२ क्षरवसानयोर्वि ०
११२ क्षरि च
१०५३ क्षिपनव्ययस्य
२०२ क्ष्यत्यात् परस्य
१२४४ गतिबुद्धिप्रत्यवसाना ०
१३४ गतिश्च

१२५६ गत्यर्थकर्मणि द्वितीया०
९८७ गत्यर्थाकर्मकश्लिष०
९२० गन्धनावक्षेपणसेवन०
१७४१ गन्धस्येदुत्पूतिसुसु०
५६० गमहनजनखनघ०
६५७ गमेरट् परस्मैपदेषु
११८५ गर्हायां च
११७८ गर्हायां लडपि०
१६३६ गवाश्वप्रभृतीनि च
७६९ गाङ् लिटि
७०८ गातिस्थाघुपाभूभ्य०
१३५७ गार्गविदधिकेशि०
१४४९ गुणवचनब्राह्मण०
५६९ गुणोऽर्तिसंयोगाद्यो
६२३ गुणो यर्ल्लुको
८६९ गुणोऽर्तिसंयोगाद्यो
८३७ गुपूधूपविच्छिपणि०
८३२ गुरीज्जिद्भ्रथ सन्
११५४ गुरोश्च हल
९५६ गृधिवञ्च्यो प्रलम्भने
२८१ गोतो णित्
१३७१ गोत्राद्यून्यस्त्रियाम्
१७२६ गोरतद्धितलुकि
१५५१ गोस्त्रियोरुपसर्जनस्य
५१६ ग्रहिज्यावयिव्यधिव०
६४४ ग्रहोऽलिटि दीर्घ
१३८४ ग्रामजनबन्धुभ्यस्तल्
१३९२ ग्रामाद्यखञौ
८२४ ग्रो यङि
१६६३ घकालतनेषु काल०
७५९ घञपोश्च
८७५ घञि च भावकरणयो
१६८२ घरूपकल्पचेलड्रुवि०
८३१ घुमास्थागापाजहाति०
२३५ घेर्डिति
५९५ ध्वसोरेद्धावभ्यास०
९३ ङमो ह्रस्वादचि ङमुण्नित्यम्
२०० ङसिङसोश्च
२०९ ङसिङ्योः स्मात्स्मिनौ
३२ ङिच्च
१८६ ङिति ह्रस्वश्च
३३४ ङेप्रथमयोरम्
२३९ ङेराम्नद्यामीभ्य
२०७ ङेर्यः
१६९० ङ्याप्पो संज्ञा०
१३७ ङ्याप्प्रातिपदिकात्
७७४ चक्षिङः ख्याञ्
६०५ चङि
१०४० चजो कुघिण्ण्यतो
२८९ चतुरनडुहोरामुदात्त
१३०१ चतुर्थी चाशिष्यायुष्य०
१५७६ चतुर्थी तदर्थार्थ०
१२५७ चतुर्थी सम्प्रदाने
६२८ चरफलोश्च
१०७८ चर्मोदरयो पूरे
१३१ चादयोऽसत्वे
१६१३ चार्थे द्वन्द्व
८९१ चिणो लुक्
८९६ चिण्णमुलोर्दीर्घो०
८८४ चिण्ते पद
८९० चिण् भावकर्मणो
११८६ चित्रीकरणे च
८०२ चिस्फुरोर्णौ
१५ चुटू
१०८० चेले क्नोपे
६२ चोः कुः
३०३ चौ
४५५ च्लि लुङि
४५६ च्लेः सिच्
८२९ च्वौ च
१००० छन्दसि लिट्
१६४५ छाया बाहुल्ये

६०१ जक्षित्यादय षट्
१३७६ जनपदशब्दात् क्ष ०
१३९० जनपदे लुप्
१२२२ जनिकर्तु प्रकृति
८९४ जनिवध्योश्च
६२७ जपजभदहदश ०
३११ जराया जरसन्यतरस्याम्
११३५ जल्पभिक्षकुट्टलुण्ट ०
२१४ जश्शसो. शि
२११ जस शी
२३३ जसि च
५५२ जहातेश्च
१०१० जहातेश्च क्त्वि
७५४ जाग्रोऽविचिण्ण ०
१६३३ जातिरप्राणिनाम्
११८३ जातुयदोर्लिङ्
१६० जातेरस्त्रीविषयाद ०
१६८० जातेश्च
८७९ जान्तनशा विभाषा
१७४० जायाया निङ्
५७९ जुसि च
४४८ जुहोत्यादिभ्य श्लु
५३९ ज्ञाजनोर्जा
९४५ ज्ञाश्रुस्मृदृशा सन
१२८९ ज्ञोऽविदर्थस्य करणे
१५१९ ज्य च
१३५३ ज्यादादीयस
१७३१ ज्ञय
११९ ज्ञयो होऽन्यतरस्याम्
६९ झला जशोऽन्ते
११० झला जश् झशि
६८४ झलो झलि
५५६ झषस्तथो र्धोऽध
४९१ झस्य रन्
४९७ झेर्जुस्
४६४ झोऽन्त
११४० ति क्त
२०६ टाङसिङसामिना ०
१४७ टिड्ढाणञ्द्वयस ०
४७१ टित आत्मनेपदानां टेरे
१३३९ टे
१३४८ टे
११५० ट्वितोऽथुच
१३८६ ठस्येक
२१८ ङति च
१४५ डाबुभाभ्यामन्यरस्याम्
११४९ ङित कि
१३४३ ढेलोपोऽकद्व
७९ ढो ढे लोप
८१ ढ्रलोपे पूर्वस्य दी ०
७३३ णलुत्तमो वा
९६० णिचश्च
४५८ णिश्रुद्रुस्रुभ्य कर्त ०
९५४ णेरणौ यत् कर्म ०
७८१ णेरनिटि
४०६ णेर्विभाषा
५१३ णौ च
७६६ णौ गमिरबोधने
७२६ णौ च ड्युपधाया ह्रस्व.
७७१ णौ च सश्चडौ
१०४३ ण्य आवश्यके
११५७ ण्यासश्रन्थो युच्
१११० ण्वुल्तृचौ
४१८ तङानावात्मनेपदम्
१५७० तत्पुरुष.
१५४८ तत्पुरुष समाना ०
१७२० तत्पुरुषस्यागुले ०
१६६१ तत्पुरुषे कृति ब ०
७७९ तत्प्रयोजको हेतुश्च
१४०६ तत्र जात
१४४२ तत्र तस्येव
१६११ तत्र तेनेदमिति स ०

१४०७ तत्र भव
१४२९ तत्र साधु
९८० तत्रोपपद सप्तमीस्थम्
१२४२ तथायुक्त चानी०
१३८८ तदधीते तद्वेद
१५४३ तदधीनवचने च
१४३८ तदर्हति
१४६१ तदस्मिन्नधिकमि०
१४७३ तदस्यास्त्यस्मिन्नि०
३१५ तदो स सावन०
१५०२ तदो दा च
१०६० तद्धितश्चासर्वविभक्ति
१३१७ तद्धिता
१५८२ तद्धितार्थोत्तर०
१३१८ तद्धितेष्वचामादे
४४४ तनादिकृञ्भ्य उ
७१२ तनादिभ्यस्तथासो
८१६ तनोतेर्विभाषा
३९ तपरस्तत्कालस्य
८९८ तपस्तप कर्मकस्यैव
८८९ तपोऽनुतापे च
९८५ तयोरेव कृत्यक्त०
१५१५ तरप्तमपौ घ
१४०२ तवकममकावेकवचने
३५० तवममौ डसि
१६७४ तसिलादिष्वाकृत्वसुच
१९४ तसौ मत्वर्थे
४८७ तस्थस्थमिपा ता०
१९६ तस्माच्छसो न पुसि
३६ तस्मादित्युत्तरस्य
१६९८ तस्मादुडचि
६१५ तस्मादुद्द्विहल
१४०१ तस्मिन्नणि च युष्माका०
३५ तस्मिन्निति निर्दिष्टे पूर्वस्य
१७५७ तस्य परमाम्रेडितम्
१४६३ तस्य पूरणे डट्
१४४४ तस्य भावस्त्वतलौ
१७ तस्य लोप
१४१४ तस्य विकार
१३८२ तस्य समूह
१३६९ तस्यापत्यम्
१४१३ तस्येदम्
४२३ तान्येकवचनद्विवचन०
९९० ताभ्यामन्यत्रोणादय
५९२ तासस्त्योर्लोप
६५९ तासि च क्लृप
१५१३ तिङश्च
४२२ तिङस्त्रीणि त्रीणि०
४४९ तिङ्शित् सार्वधातुकम्
६३० ति च
६७१ तितुत्रतथसिसुसरक०
४१६ तिप्तस्झिसिप्थस्थमि०
५८० तिप्यनस्ते
३०५ तिरसस्तिर्यलोपे
१३३८ ति विंशतेर्डिति
७३० तिष्ठतेरित्
१५६८ तिष्ठद्गुप्रभृतीनि च
६५३ तीषसहलुभरुष०
४४१ तुदादिभ्य श
३४९ तुभ्यमह्यौ ङयि
११०९ तुमुन् ण्वुलौ क्रियाया०
१३४७ तुरिष्ठेमेय सु
५७४ तुरुस्तुशम्यम सा०
१३०० तुल्यार्थैरतुलोप०
७ तुल्यास्यप्रयत्न सवर्णम्
२८६ तृज्वत् क्रोष्टु
५७० तृणह इम्
२६६ तृतीयादिषु भाषितपुस्क०
१३०४ तृतीयार्थे
१५५८ तृतीयासप्तम्योर्बहुलम्
१७३ तृतीयासमासे
७४१ तृफलभजत्रपश्च

११३२ तृन्
१३७७ ते तद्राजा
१४३७ तेन क्रीतम्
१४४१ तेन तुल्य क्रिया चे ०
१६१२ तेन सहेति तुल्ययोगे
३५८ तेमयावेकवचनस्य
१०५ तो षि
११७ तोलि
९९८ तौ सत्
१११९ त्यदादिषु दृशोऽन ०
३१२ त्यदादीनाम
१३९८ त्यदादीनि च
१६३० त्यदादीनि सर्वैर्नित्यम्
३०९ त्रिचतुरो स्त्रियां ०
१४६९ त्रे सम्प्रसारणं च
१६८७ त्रेस्त्रय
३५१ त्वमावेकवचने
३५९ त्वामौ द्वितीयायाः
३४८ त्वाहौ सौ
७४० थलि च सेटि
४७२ थास से
२७८ थोन्थ
८७३ दशसङ्ख्यस्वङ्गा शपि
६४० दधस्तथोश्च
१००९ दधातेर्हि
८१२ दम्भ इच्च
७४८ दयायासश्च
३२१ दश्च
५८२ दश्च
९४३ दाणश्च सा चेच्चतुर्थ्यर्थे
६४ दादेर्धातोर्घ
६३९ दाधा घ्वदाप्
१५०१ दानी च
९८८ दाशगोघ्नौ सम्प्र ०
१५८१ दिक्सङ्ख्ये सञ्ज्ञायाम्
१४०८ दिगादिभ्यो यत्
१६१० दिङ्नामान्यन्तराळे
१३६६ दित्यदित्यादित्यपत्यु ०
२७५ दिव उत्
२७४ दिव औत्
१२३५ दिव कर्म च
४३८ दिवादिभ्य श्यन्
८८५ दीपजनबुधपूरि ०
६१३ दीर्घ इणः किति
१२३ दीर्घं च
१९८ दीर्घाज्जसि च
६२४ दीर्घोऽकितः
६३५ दीर्घो लघोः
८८७ दुहश्च
११२० दृग्दृशवतुषु
१५४४ देयेत्रा च
१६७१ देवताद्वन्द्वे च
१३३५ देवताद्वन्द्वे च
१५४५ देवमनुष्यपुरुष ०
१३२० देविकाशिंशपादित्य ०
१०११ दो दद्धो
१०२७ द्यतिस्यतिमास्थामि ०
६११ द्युतिस्वाप्योः सम्प्रसा ०
९७६ द्युद्भ्यो लुङि
१४५३ द्वन्द्वमनोज्ञादिभ्यश्च
१६३२ द्वन्द्वश्च प्राणितूर्यसेना ०
१७२७ द्वन्द्वाच्चुदषहान्ता ०
१६१६ द्वन्द्वे धि
१७४ द्वन्द्वे च
१३२३ द्वारादीना च
१६३१ द्विगुरेकवचनम्
१५७१ द्विगुश्च
१४९ द्विगोः
३६३ द्वितीयाटौस्स्वेन
११०० द्वितीयायाश्च
३४१ द्वितीयायाश्च
१५७२ द्वितीयाश्रितातीत ०

१५३२ द्वित्रिचतुर्भ्य सुच्
८६३ द्विर्वचनेऽचि
१५१६ द्विवचनविभज्योप०
५०१ द्विषश्च
१४६८ द्वैस्तीय
१६८६ ध्यटन सख्यायाम०
१६८ ध्येकयोर्द्विवचनै०
१७३७ धर्मादनिच् केवलात्
१२०६ धातुसम्बन्धे प्रत्यया
९७९ धातो.
८०६ धातो कर्मण समा०
८१९ धातोरेकाचो हलादे०
१०२७ धातोस्तन्निमित्तस्यैव
५१२ धात्वादे ष स
१२२७ धारेरुत्तमर्ण
६८० धि च
१२१६ ध्रुवमपायेऽपादानम्
१९० न क्ये
१३२५ न कर्मव्यतीहारे
१०६४ न क्त्वा सेट्
१५९ न क्रोडादिबह्वच
१०४१ न क्र्यादि
१२८४ नक्षत्रे च लुपि
९०३ न गतिहिंसार्थेभ्य.
२५४ न डिसम्बुभ्यो
३६० नचवाहाहैवयुक्ते
१५९५ नञ्
१३३६ नञ शुचीश्वरक्षेत्रज्ञ०
१७१२ नञस्तत्पुरुषात्
१७३५ नञ्दु सुभ्यो हलि०
२४९ न तिसृ चतसृ
१६३९ न दक्षिणयआदीनि
८९९ न दुहस्नुनमा यक्चिणौ
७१८ न दृश
१७४६ नवृतश्च
१११९ नन्दिग्रहिपचादि०
५९८ नन्द्रा सयोगादय
८६२ न पदान्तद्विर्वचन०
१०८ न पदान्ताट्टोरनाम्
९७४ न पादम्याङ्यमाङ्यस०
१६२७ नपुसकमनपुसकेनैक०
२६४ नपुसकस्य झलच
२१३ नपुसकाच्च
१७३० नपुसकादन्यतरस्याम्
११६२ नपुसके भावे क्त
१७१० न पूजनात्
१०२ न बहुव्रीहौ
५३३ न भकुर्छुराम्
३७० न भूसुधियो
१२५९ नम स्वस्तिस्वाहा०
४७० नमाङ्योगे
३१९ न मु ने
८५८ नमोवरिवश्चित्रङ क्यच्
१२१२ न यदि
१३२१ नय्यस्या पदान्ताभ्याम्०
८८८ न रुम
६४६ न लिडि
३३२ न लुमताङ्गस्य
१२९७ न लोकाव्ययनिष्ठा०
२५२ न लोप प्रातिपदि०
२५३ नलोप सुप्स्वरस०
१६९३ नलोपो नञ
८६७ न ल्यपि
१२ न विभक्तौ तुस्मा
६५८ न वृद्भ्यश्चतुर्भ्य
७९५ न व्यो लिटि
७४५ न शासदद्वादिगु०
९२ नश्चापदान्तस्य झलि
७८ न च्छव्यप्रशान्
१४२ न षटस्वस्रादिभ्य
१७२३ न सख्यादे समाहारे
२९६ न सम्प्रासरणे सम्प्रसारणम्

३०१ न सयोगाद्वमन्तात्
५१५ न सुदुर्भ्यां केवलाभ्याम्
१३४० नस्तद्धिते
१७०६ नहिवृतिवृधिव्यधि ०
६६ नहो ध
७२७ नाग्लोऽपिशास्वृदिताम्
८ नाञ्जलो
८७७ नाञ्चे पूजायाम्
१९७ नादिचि
९४६ नानोर्ज्ञे
६४१ नाभ्यस्तस्याचि पिति ०
२६९ नाभ्यस्ताच्छतु
३६२ नामन्त्रिते समाना ०
२४८ नामि
११०५ नाम्न्यादिशिग्रहो
१५५७ नाव्ययीभावा दतो ०
१५८ नासिकोदराष्ठ ज ०
९७२ निगरणचलनार्थे ०
६१८ निजा त्रयाणा गुण ०
५४४ निञ् करोते
८२० निञ् कौटिल्ये गर्ता
४८५ निञ् डित
९९ निञ् समासेऽनुत्तरदस्थस्य
८०५ निञ् स्मयते.
१७५८ निञवीप्सयो
१०८१ निमूलसमूलयो कष
१००६ निष्ठा
७८२ निष्ठाया सेटि
१०६५ निष्ठाशीङ् स्विदिमिदि
९१८ निसमुपविभ्यो ह्व
६२५ नीग्वञ्चुस्रन्सु ध्वसु ०
३ नुचैरनुदत्त
६२६ नुम्गतोऽनुनासिका ०
३७४ नुम् विसर्जनीयशर्व्य ०
२५० नृ च
७०३ नेटि
६७० नेड्वशिकृति
२०५ नेदमदसोरको
१६६५ नेन्सिद्धबघ्नादिषु च
१८४ नेयङुवङ्स्थानावस्त्री
४०१ नेर्गदनदपतपद ०
९०५ नेर्विश
८९३ नेर्द्यात्तोपदेशस्य ०
२५१ नोपधाया
१४२६ नौवयो धर्मविषमूल ०
१३२४ न्यग्रोधस्य च केवलस्य
१०१८ पचो व
१५७७ पञ्चमी भयेन
१२८१ पञ्चमी विभक्ते
१२५८ पञ्चम्यपाङ्परिभि
३३७ पञ्चम्या अत्
१४९० पञ्चम्यास्तसिल
१६५४ पञ्च्या स्तोकादिभ्य·
७२४ पत पुम्
१८८ पति समास एव
२७६ पथिमथृभुक्षामात्
१७१३ पथो विभाषा
४१२ पदव्यवायेऽपि
३५३ पदस्य
३५४ पदात्
४११ पदान्तस्य
२३ पर सन्निकर्ष संहिता
१६४९ परवल्लिङ् द्वन्द्वतत्पु ०
१३६ परश्च
४७४ परस्मैपदाना णल ०
१६५८ परस्य च
१२१८ पराजेरसोढ
१०७१ परावरयोगे च
१२३६ परिक्रयणे सम्प्रदान ०
११०२ परिक्लिश्यमाने च
३८६ परिनिविभ्य सेव ०
११४४ परिमाणाख्याया ०

१३३२ परिमाणान्तस्यासं०
९०६ परिव्यवेभ्य क्रियं
९६७ परेर्मृषं
८२६ परेश्च घाङ्कयो
४३० परोक्षे लिट्
११०८ पर्याप्तिवचनेष्वलमर्थेषु
५३८ पाघ्राध्मास्था०
१११४ पाघ्राध्माधेट्दृश शः
१५७९ पात्रेसमितादयश्च
१७५५ पारस्करप्रभृतीनि०
१५६९ पारे मध्ये षष्ठ्या वा
१६२८ पिता मात्राः
१४१२ पितुर्यच्च
१५५ पुयोगादाख्यायाम्
१६८१ पुवत् कर्मधारयजातीय०
११६५ पुंसि संज्ञायां घः प्रायेण
२८० पुसोऽसुङ्
५११ पुगन्तलघूपधस्य च
८५९ पुच्छभाण्डचीवराण्णिङ्
१६६७ पुत्रेऽन्यतरस्याम्
७७ पुम खय्यम्परे
१६२५ पुमान् स्त्रिया
४६१ पुष्यसिद्धौ०
१५८० पूर्वकालैकसर्व०
६१ पूर्वत्रासिद्धम्
१७७ पूर्वपरावरदक्षिणो०
९५० पूर्ववत्सनः
१५७४ पूर्वसदृशसमोना०
२१० पूर्वादिभ्यो नवभ्यो वा
१५९२ पूर्वापरावरोत्तरमेकः०
५९९ पूर्वोऽभ्यास
१२७४ पृथग्विनानानाभिस्तृ०
१४४७ पृथ्वादिभ्य इमनि०
१०३० पोरदुपधात्
१५२७ प्रकारवचने जातीयः०
१५०५ प्रकारवचने थाल्
१७६४ प्रकारे गुणवचनस्य
९११ प्रकाशनस्थेयाख्ययोश्च
१३५५ प्रकृत्यैकाच्
८०३ प्रजने वीयते
१५३४ प्रज्ञादिभ्यश्च
१३११ प्रति प्रतिनिधि प्रतिः०
१२५५ प्रतिनिधिप्रतिदानेः०
१५३७ प्रतियोगे पञ्चम्यास्तः०
१२५ प्रत्ययः
३३१ प्रत्ययलोपे प्रत्ययः०
१६१ प्रत्ययस्थात् कात् पूर्वस्यः०
३३० प्रत्ययस्य लुक्श्लुलुपः
३५२ प्रत्ययोत्तरपदयोश्च
९४७ प्रत्याङ्भ्यां श्रुवः
१२३२ प्रत्याङ्भ्यां श्रुवः पूर्वस्यः०
१७६ प्रथमचरमतयाल्पार्धः०
१९५ प्रथमयोः पूर्वसवर्णः
१५४९ प्रथमानिर्दिष्टं समः०
३४२ प्रथमायाश्च द्विवचने०
१०९८ प्रमाणे च
१४५५ प्रमाणे द्वयसज्दघ्नः०
१५२४ प्रशंसायां रूपप्
१५८९ प्रशंसावचनैश्च
१५१८ प्रशस्यस्य श्रः
१२८३ प्रसितोत्सुकाभ्यां तृतीया च
१५५३ प्राक्कडारात् समासः
१४३१ प्राक्क्रीताच्छः
३७९ प्राक्सितादड्व्यवायेऽपि
१५२८ प्रागिवात्कः
१४२३ प्राग्घिताद्यत्
१४८४ प्राग्दिशो विभक्तिः
१३६४ प्राग्दीव्यतोऽण्
१४१९ प्रागवहतेष्ठक्
१४३५ प्रागवतेष्ठम्
३९५ प्रातिपदिकान्तनुम्विभक्ति०
१२८५ प्रातिपदिकार्थलिङ्ग०

१३२ प्रादय
९६६ प्राङ्नह
१६६२ प्राङ्मरुशरत्कालदिवां जे
१११७ प्रियवशे वद खच्
१३५० प्रियस्थिरस्फिरो ०
११९७ प्रैषातिसर्गप्रा ०
९५१ प्रोपाभ्या युजेरयज्ञ ०
९३० प्रोपाभ्यां सम ०
५६ प्लुतप्रगृह्या अचि नित्यम्
५४० प्वादीना ह्रस्व
७४४ फणा च सप्तानाम्
१४१७ फले लुक्
१४६६ बहुगणगणसङ्ख्यस्य ०
३५७ बहुवचनस्य व ०
२२७ बहुवचने झल्येत्
१७१४ बहुव्रीहौ सक्थ्येये ड ०
१६७ बहुषु बहुवचनम्
१३५१ बहोर्लोपो भू च बहो
१५३५ बह्वल्पार्थच्छस्कार ०
१५४ बह्वादिभ्यश्च
८५५ बाष्पोष्मभ्यामुद्वमने
८०४ बिभेतेर्हेतुभये
९७१ बुधयुधनशजनेङ् ०
५७१ ब्रुव ईट्
४७६ ब्रुव पञ्चानामा ०
७७३ ब्रुवो वचि
११३७ भक्षभासमिदो घुरच्
८८० भक्षेश्च क्षिणि
१३९९ भवतष्ठक्छसौ
६१७ भवतेर
११६६ भविष्यति गम्यादय
९८४ भव्यगेयप्रवचनीया ०
२९२ भस्य
२७९ भस्य टेर्लोप
९०१ भावकर्मणो
११७० भाववचनाश्च
११४२ भावे
१००३ भाषाया सदवसश्रुव
९३५ भासनोपसम्भाषा ०
१०२१ भित्त शकलम्
५५१ भियोऽन्यतरस्याम्
७९० भियो हेतुभयेषुक्
१२१७ भीत्रार्थाना भयहेतु
९८९ भीमादयोऽपादाने
९५५ भीस्म्योर्हेतुभये
७५० भीह्रीभृहुवा श्लुवच्च
९५३ भुजोऽनवने
१२२३ भुव प्रभव
१०३४ भुवो भावे
७१० भुवो वुग्लुङ्लिटो
११७६ भूते च
१२५ भूवादयो धातव
१६०१ भूषणेऽलम्
७०९ भूसुवोस्तिङि
६१९ भृञामित्
८५१ भृशादिभ्यो भुव्यच्वे ०
१०४७ भोज्य भक्ष्ये
८४ भोभगोअघोअ ०
३३६ भ्यसो भ्यम्
७२८ भ्राजभासभाष ०
१६२६ भ्रातृपुत्रौ स्वसृदुहि ०
११४१ मतिबुद्धिपूजार्थेभ्यश्च
७४ मतुवसोरु सम्बुद्धौ ०
१४३ मन
११२७ मन
१२६० मन्यकर्मण्यनादरे वि ०
३४५ मर्यन्तस्य
८६८ मयतेरिदन्यतरस्याम्
१५९१ मयूरव्यसकादयश्च
५२० मस्जिनशोर्झलि
१२०४ माङि लुङ्
१६७२ मातरपितराबुदीचाम्

१४७४ मादुपधायाश्च मतो ०
८३३ मान् बन्धदान् शान्भ्यो ०
८३५ मिता ह्रस्व.
९५८ मिथ्योपपदात् कृञो ०
२६ मिदचोऽन्त्यात् पर
७९९ मीनातिमिनोतिदीङा ०
५ मुखनासिकावचनो ०
८१३ मुचोऽकर्मकस्य ०
५९० मृजेर्वृद्धि
६८९ मृडमृदगुधकुष ०
४८० मेर्नि
९१ मोऽनुस्वार
८८२ मो नो धातो
९४९ म्रियतेर्लिङलुङोश्च
८८३ म्वोश्च
३२२ य सौ
८७० यङि च
८२७ यङोऽचि च
५७३ यङो वा
१९३ यचि भम्
११८४ यचयत्रयो
१०४४ यजयाचरुचप्रवचर्चश्च
१२८० यतश्च निर्धारणम्
१४५६ यत्तदेतेभ्य परि ०
१३३७ यथातथयथापुरयो ०
१०७५ यथातथयोरसूया ०
१२०९ यथाविध्यनुप्रयोग ०
४१ यथासख्यमनुदे ०
१५५९ यथाऽसादृश्ये
१७६५ यथास्वे यथायथम्
६६७ यमरमनमाता सक्च
६९७ यमो गन्धने
१०७ यरोऽनुनासिकेऽनु ०
१८९ यस्मात् प्रत्ययाविधिस्त ०
१२५३ यस्मादधिक यस्य ०
१२७६ यस्य च भावेन भाव ०
१५६७ यस्य चायाम
९७६ यस्य विभाषा
८०८ यस्य हल
१३४४ यस्येति च
२३७ याडाप
१५०९ याये पाशप्
१०७७ यावति विन्दजीवो
११६७ यावत्पुरानिपातयो ०
१५६० यावदवधारणे
८८९ यासुट् परस्मैपदे ०
१५२२ युवाल्पयो कनन्यत ०
३४६ युवावौ द्विवचने
१०५१ युवोरनाकौ
३५६ युष्मदस्मदो षष्ठी ०
३४० युष्मदस्मदोरनादेशे
१४०० युष्मदस्मदोरन्य ०
३३३ युष्मदस्मद्भ्या ङसोऽश
४२४ युष्मद्युपपदे समा ०
३४७ यूयवयौ जसि
१८३ यूस्त्र्याख्यौ नदी
५४५ ये च
१३६० ये चाभावकर्मणो
४० येन विधिस्तदन्तस्य
१२६३ येनाङ्गविकार
१६३५ येषा च विरोध शा ०
३४३ योऽचि
१४५० योपधाद्गुरूपोत्तम ०
१३५४ र ऋतो हलादेर्लघो
८७४ रञ्जेश्च
१०१३ रदाभ्या निष्ठातो न ०
६५२ रधादिभ्यश्च
५२१ रभेरशब्लिटो
१०६७ रलो व्युपधाद्धलादे ०
३९३ रषाभ्या नो ण समा ०
१४७९ रसादिभ्यश्च
१६१५ राजदन्तादिषु परम्

१४७८ राजन्वान् सौराज्ये
१७२५ राजाह सखिभ्यष्टच्
१६५० रात्राह्नाहा पुंसि
१०५८ रात्रे कृति विभाषा
५९१ रात्सस्य
१२३१ रात्साभ्यैर्यस्य विप्रश्न
७४२ रावो हिंसायाम्
३०८ रावो हलि
५२९ रिङ् शयग्लिङ्क्षु
५९३ रि च
६२१ रीगृदुपधस्य च
८३० रीङृत
६३२ रुग्रिकौ च लुकि
१२२५ रुच्यर्थाना प्रीयमाण
६९० रुदविदमुषग्रहिस्व ०
५७६ रुदश्च पञ्चभ्य
५६४ रुदादिभ्य सार्वधातुके
४४३ रुधादिभ्य श्नम्
७९३ रुह पोऽन्यतरस्याम्
८३ रो सुपि
११५८ रोगाख्यायां ण्वुल् बहुलम्
८० रो र
७२ रोऽसुपि
५३० वॉरुपधाया ०
४१४ ल कर्मणि च भावे ०
४१७ ल परस्मैपदम्
९९७ लक्षणहेत्वो क्रिया ०
१३०९ लक्षणेत्थम्भूताख्यान ०
१५६५ लक्षणेनाभिप्रती आ ०
५०० लड शाकटायनस्यैव
९९२ लट शतृशानचा ०
१२१४ लट् स्मे
८२२ लभेश्च
१६ लशकतद्धिते
११३४ लषपतपदस्थाभू ०
४१५ लस्य
४९६ लिड सलोपोऽनन्त्यस्य
८८८ लिड सीयुट्
४५२ लिङाशिषि
११९५ लिङ् च
४३६ लिङ्निमित्ते लृङ् ०
११९९ लिङर्थे
६९३ लिङ्सिचावात्मने ०
६४९ लिङसिचोरात्मने ०
१००१ लिट कानज्वा
४७३ लिटस्तझयोरेशिरेच्
६०२ लिटि धातोरनभ्यासस्य
४५१ लिट् च
७६० लिट्यन्यतरस्याम्
५१७ लिट्यभ्यासस्योभयेषाम्
४६० लिपिसिचिह्वश्च
९५७ लिय सम्माननशालीनी ०
७८९ लीलोर्नुग्लुकावन्यत ०
१५५२ लुक्तद्धितलुकि
७१६ लुग्वा दुहदिहलिह ०
४२८ लुङ्
७६३ लुडि च
४६८ लुङ्लङ्लुङ्क्ष्वडुदात्त
७५८ लुट्सनोर्घस्लृ
६७९ लुट प्रथमस्य डारौ रस
९७८ लुटि च क्लृप
८२१ लुप सद्-चर जप जभ ०
१३८१ लुपि युक्तवद्व्यक्ति ०
१४१८ लुप् च
१३८० लुबविशेषे
९९९ लृट सद्वा
४३१ लृट शेषे च
४७७ लोटो लङ्वत्
४३४ लोट च
७२९ लोप पिबतेरीच्चा ०
८६ लोप शाकल्यस्य
५४३ लोपश्चास्यान्यतर ०

५५४ लोपो यि
४९४ लोपोव्योर्वलि
१४८० लोमादिपामादि०
८५२ लोहितादिडाज्भ्य०
१७८४ ल्यपि लघुपूर्वात्
१६३ ल्युट् च
१०१५ ल्वादिभ्य
७२५ वच उम्
५१५ वचिस्वपियजादीना किति
१०४५ वचोऽशब्दसज्ञायाम्
१४६७ वतोरिथुक्
१०३२ वद सुभि क्यप् च
७०२ वदव्रजहलन्तस्याच
१४८ वयसि प्रथमे
१४४८ वर्णदृढादिभ्य ष्यञ्च
१५० वर्णादनुदात्तात्तो०
१५९० वर्णो वर्णेन
११७२ वर्तमानसामीप्ये वर्तमाना०
४२७ वर्तमाने लट्
१०७९ वर्षप्रमाणे ऊलोपश्चा०
१३३१ वर्षस्याभविष्यति
३६९ वर्षाभ्वश्च
६५५ वसतिक्षुधोरिट्
७३ वसुस्रसुध्वसुध्वसु०
२९३ वसो सम्प्रसारणम्
९७५ वा क्यष
१७६० वाक्यादेरामन्त्रितस्या०
६९५ वा गम
१०५६ वाचि यमपुरन्दरौ च
७४३ वा जृभ्रमुत्रसाम्
६५ वा हसुहण्डुहृष्णिहाम्
२७० वा नपुसकस्य
१०२६ वान्तो यि प्रत्यये
८६६ वान्यस्य सयोगादे
११६ वा पदान्तस्य
४३९ वा भ्राशम्लाभ्रमु०
१८७ वामि
३६६ वाशसो
७७७ वा यौ
१२१९ वारणार्थानामीप्सित
७७५ वा लिटि
१०६९ वा त्यपि
११३ वावसाने
९६ वा शरि
९८० वासरूपोऽस्त्रियाम्
२९७ वाह ऊठ्
१६२० वाहिताग्न्यादिषु
१४७० विशल्यादिभ्यस्तमड०
१०२० वित्तो भोगप्रत्ययो
७५५ विदाकुर्वन्त्वित्यन्य०
११३८ विदिभिदिछिदे कुरच्
९९६ विदे शतुर्वसु
४७५ विदो लटो वा
४३३ विनिमन्त्रणा०
१५२३ विन्मतोर्लुक्
९०७ विपराभ्या जे
१६३८ विप्रतिषिद्ध चा०
१६९ विभक्तिश्च
१५६२ विभाषा
११७९ विभाषा कथमि लिड् च
११६८ विभाषा कदाकर्हो
९७० विभाषाकर्मकात्
१२६७ विभाषा गुणेऽस्त्रियाम्
७११ विभाषा घ्रावेट्शा०
३०० विभाषा छिद्र्यो
१६८८ विभाषा चत्वारिश०
८१८ विभाषा चे
१७५ विभाषा जसि
२८८ विभाषा तृतीयादिष्वचि
१७१ विभाषा दिक्समासे
११९१ विभाषा धातौ सम्भा०
७८५ विभाषाऽऽप

१७०२ विभाषा पुरुषे
१५२६ विभाषा बहुच ०
६७८ विभाषा भावादिकर्मणो
८०० विभाषा लीयते
७७० विभाषा लुङ्लुङो
९३८ विभाषा विप्रलापे
१६३७ विभाषा वृक्षमृगतृण ०
६३७ विभाषा वेष्टिचेष्ट्यो
१२१३ विभाषा साकाङ्क्षे
१५४१ विभाषा सातिकात्स्न्यें
१५२६ विभाषा सुपो बहुच्
१६४८ विभाषा सेनासुरा ०
१६६९ विभाषा स्वसृपत्योः
३८९ विभाषेट
९६३ विभाषोपपदेन प्रती ०
६९८ विभाषोपयमने
२४ विरामोऽवसानम्
११०३ विशिपतिपदिस्कन्दा ०
१५८६ विशेषण विशेष्येण ०
९४ विसर्जनीयस्य स
९२६ वृत्तिसर्गतायनेषु क्रम
१५२० वृद्धस्य च
१३९६ वृद्धाच्छ
१६७८ वृद्धिनिमित्तस्य च ०
१८ वृद्धिरादैच्
४९ वृद्धिरेचि
१३९७ वृद्धिर्यस्याचामादि ०
१६२३ वृद्धो यूना तल्लक्षण ०
९७७ वृश्च स्यसनो
६४५ वृतो वा
९२९ वे पादविहरणे
९२२ वे शब्दकर्मण
७६१ वेजो वयि
५८८ वेत्तेर्विभाषा
८५० वेरपृक्तस्य
३८५ वेश्च स्वनो भोजने
१६५७ वैयाकरणाख्याया ०
११७७ वोताप्यो
१५३ वोतो गुणवचनात्
१६९५ वोपसर्जनस्य
७८८ वो विधूनने जुक्
९३६ व्यक्तवाचा समुच्चा ०
६१२ व्यथो लिटि
९६८ व्याङपरि-योरम
८५ व्योर्लघुप्रयत्नतर ०
११२६ व्रते
६७ व्रश्चभ्रस्जसृजमृज ०
११०७ शकधृषज्ञाग्लाघट ०
१२०३ शकिसिड च
१०३१ शकि सहोश्च
१४६२ शदन्तविंशतेश्च
९४८ शदे शित
७९२ शदेरगतौ त
१७२ शप्श्यनोर्नित्यम्
८५६ शब्दवैरकलहाभ्र ०
५३४ शमामष्टाना दीर्घ श्यनि
१६६४ शयवासवासिष्वकालात्
१४०९ शरीरावयवाच्च
९५ शर्परे विसर्जनीय.
६०८ शर्पूर्वा खय
४५७ शल इगुपधादनिट क्स
१२० शर्छोऽटि
३३५ शसो न
७८७ शाच्छासाह्वाव्या ०
१००८ शाच्छोरन्यतरस्याम्
१०६ शात्
५८३ शास इदङहलो
३७६ शासिवसिघसीनां च
५८४ शा हौ
१४२१ शिल्प
१३७४ शिवादिभ्योऽण्
१८० शि सर्वनामस्थानम्

५८६ शडि सार्वधातुके०
५८७ शीङो रुट्
१०१७ शुष क
१०८२ शुष्कचूर्णरूक्षेषु पिष
५१९ शे मुचादीनाम्
४२१ शेषात् कर्तरि पर०
१७४७ शेषाद्विभाषा
१३९१ शेषे
४२६ शेषे प्रथम
११८७ शेषे लङ्यदौ
३४४ शेषे लोप
४०२ शेषे विभाषाऽकखा०
१८७ शेषो घ्यसखि
१६०७ शेषो बहुव्रीहि
५४७ श्नसोरल्लोप
५५८ श्नान्नलोप
५४८ श्नाभ्यस्तयोरात
४४१ श्रुव श्रृ च
६७३ श्रुक किति
१२२६ श्लाघह्नुङ्स्थाशपा०
७१३ श्लिष आलिङ्गने
६०४ श्लौ
७२३ श्वयतेर
२९८ श्वयुवमघोना०
१६२९ श्वशुर श्वश्रूवा
६७५ श्वीदितो निष्ठायाम्
१४ ष प्रत्ययस्य
१४६५ षट्कतिकतिपयचतुरा०
२४७ षट्चतुर्भ्यश्च
२१६ षट्भ्यो लुक्
५५७ षढो क सि
४७ षत्वतुकोरसिद्ध
१४७२ षष्ठ्यादेश्चासख्या०
१५९६ षष्ठी
१२७७ षष्ठी चानादरे
१२८८ षष्ठी शेषे
७८ षष्ठी स्थानेयोगा
१२६८ षष्ठी हेतुप्रयोगे
१२७२ षष्ठ्यतसर्थप्रत्ययेन
१६६६ षष्ठ्या आक्रोशे
१५११ षष्ठ्या रूप्य च
१५३९ षष्ठ्या व्याश्रये
४१० षात् पदान्तात्
१७२ षिद्भिदादिभ्योऽङ
१०३ ष्टुना ष्टु
५३५ ष्ठिवुक्लमुचमा शिति
२१७ ष्णान्ता षट्
७०७ स स्यार्धधातुके
३७८ स स्विदिस्वदिसहीना च०
१३५८ सयोगादिश्च
१०१४ सयोगादेरातो०
२५९ सयोगान्तस्य लोप
१२२ सयोगे गुरु
२८३ सख्युरसम्बुद्धौ
१६०९ सख्ययाव्ययासन्न०
१५८३ सख्यापूर्वो द्विगु
१४३६ सख्याया अतिश०
१४५९ सख्याया अवयवे तयप्
१५३१ सख्याया क्रियाभ्या०
१३३० सख्याया सवत्सर०
१५०८ सख्याया विधार्थे धा
१७०५ सख्याविसायपूर्वे०
१५३६ सख्यैकवचनाच्च०
१६७७ सज्ञापूरण्योश्च
११५९ सज्ञायाम्
१०८९ सज्ञायाम्
१४७६ सज्ञायाम्
८३४ सत्यापपाशरू०
३८२ सादेरप्रते
१५०४ सद्य परुत्परा०
१६४१ स नपुसकम्

१२७ सनाद्यन्ता धातव
११३९ सनाशंसभिक्ष उ
६७४ सनिग्रहगुहोश्च
७६७ सनि च
८१० सनिमीमाधुरभ ०
६७४ सनीवन्तर्धभ्रस्ज ०
१४०४ सन्धिवेलाद्यृतु ०
६०३ सन्यङो
६२१ सन्यत
८१७ सन्लिटोर्जे
६३४ सन्वल्लघुनि च ०
१२५१ सप्तमीपञ्चम्यौ ०
१६१९ सप्तमी विशेषणे ०
१५७८ सप्तमी शौण्डै
१२७५ सप्तम्यधिकरणे च
१०९६ सप्तम्या जोप ०
११२९ सप्तम्या जनेर्ड
१४९४ सप्तम्यास्त्रल्
१६४६ सभा राजामनुष्यपूर्वा
९५२ सम क्षणुव
९४० सम प्रतिज्ञाने
१५४७ समर्थ पदविधि
१३६३ समर्थाना प्रथमाद्वा
९१० समवप्रविभ्य स्थ
१७५० समवाये च
९४२ समस्तृतीयायुक्तात्
१०५९ समानकर्तृकयो पू०
११९४ समानकर्तृकेषु तुमुन्
१०९७ समासत्तौ
१५३० समासाच्च तद्विषयात्
१७०९ समासान्ता
१०६८ समासेऽनञपूर्वे ०
४ समाहार स्वरित
१२०८ समुच्चयेऽन्यतरस्याम्
१२१० समुच्चये सामान्यव ०
९६१ समुदाङ्भ्यो यमोऽग्रन्थे
१०८३ समूलाकृतजीवेषु ०
९१७ समो गम्यृच्छिभ्याम् ०
१७४९ सम्परिभ्या करो ०
९३४ सम्प्रतिभ्यामना ने
२९५ सम्प्रमारणाच्च
२३० सम्बुद्धौ च
१२८६ सम्बोधने च
९९३ सम्बोधने च
११९० सम्भावनेऽलमिति चे ०
९२४ सम्माननोत्सञ्जन ०
१५२२ सरूपाणामेकशेष ०
७१९ सर्त्तिशास्त्यर्ति भ्यश्च
१११८ सर्वकूलाभ्रकरीषेषु कष
२५५ सर्वनामस्थाने चा ०
२०८ सर्वनाम्न स्मै
२३८ सर्वनाम्न स्याड्ढ्रस्वश्च
१२६९ सर्वनाम्नस्तृतीया च
१७५६ सर्वस्य द्वे
१४८९ सर्वस्य सोऽन्यतरस्यादि ०
१७० सर्वादीनि सर्वनामानि
१४९८ सर्वैकान्यकियत्तद ०
४८२ सवाभ्या वा मौ
७० ससजुषो रु
१२६२ सहयुक्तेऽप्रधाने
१५५४ सह सुपा
६८१ सहिवहोरोदवर्णस्य
३७२ सहे साड स
१६०१ साक्षात्प्रभृतीनि च
३९२ सातपदाद्यो
१२३४ साधकतम करणम्
१२८९ साधुनिपुणाभ्याम ०
२५८ सान्तमहत सयोगस्य
३३९ साम आकम्
१२८७ सामन्त्रितम्
१४०५ सायचिरप्राह्णे प्रगे ०
५०८ सार्वधातुकमपित्

४६३ सार्वधातुकार्धधातुकयो
४५२ सार्वधातुके यक्
२७३ सावनडुह
६४७ सावेकाचस्तृतीयादेः परस्मैपदेषु
७०० सिचि वृद्धिः परस्मैपदेषु
४९८ सिजभ्यस्तविदिभ्यश्च
१९१ सिति च
७९८ सिध्यतेरपारलौकिके
५८१ सिपि धातोरुर्वा
३८७ सिवादीनां वाड्व्यवायेऽपि
१३१३ सुङ् पूजायाम्
८५७ सुखादिभ्यः कर्तृवेदनायाम्
१७४८ सुट् कात्पूर्वः
४९३ सुट्तिथोः
१८१ सुडनपुंसकस्य
८४१ सुप आत्मनः क्यच्
१६६ सुपः
२२६ सुपि च
८४२ सुपो धातुप्रातिपदिकयोः
१२८ सुप्तिङन्तं पदम्
१५६१ सुप्रातेन मात्राढ्ये
११२४ सुप्यजातौ णिनिस्ताच्छील्ये
१७३४ सुप्रातसुश्वः
३९० सुप्रातिपदिकात्
१३२९ सुबामन्त्रिते पराङ्गवत्स्वरे
१३४५ सूर्यतिष्यागस्त्यमदपुनर्वसूनां नक्षत्रे
६८२ सृजिदृशोर्झल्यमकिति
४७९ सेर्ह्यपिच्च
३२८ सोऽचि लोपे चेत्पादपूरणे
२५७ सौ च
४९५ स्कोः संयोगाद्योरन्ते च
४४६ स्तनन्धयतुन्धयस्कन्धयः
३८३ स्तम्भेः
६६६ स्तु स्तुवन्योः परस्मैपदेषु
१०२ स्तोः श्चुना श्चुः
३७७ स्तौतिण्योरेव षणि
३६५ स्त्रियाः
१६७३ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे
१३८ स्त्रियाम्
११५२ स्त्रियां क्तिन्
२८७ स्त्रियां च
१६२४ स्त्रीपुंसाभ्यां नञस्नञौ भवनात्
१३६७ स्त्रीपुंसाभ्यां नञस्नञौ भवनात्
१३७५ स्त्र्याख्यौ ढक्
६९९ स्थाध्वोरिच्च
३८० स्थादिष्वभ्यासेन च
८६० स्थानिवदादेशोऽनल्विधौ
२९ स्थानेऽन्तरतमः
१३४९ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रपटुपाण्डुकृशाश्लिष्टपलितजरतीपलाय्यवलीनां गुणः
६४३ स्नुक्रमोर्वनात्मनेपदेषु
१०८५ स्नेहने पिषः
९१९ स्पर्धायामाङि
११३६ स्पृहिगृहिपतिदयिनिद्राशिप्रमदवनां च
१२२८ स्पृहेरीप्सितः
७९१ स्फायो वः
७९६ स्फुरतिस्फुलत्योर्घञि
६६८ स्मिपूङ्रञ्वशां सनि
१२०५ स्मोत्तरे लङ् च
४५४ स्यतासी लृलुटोः
८७६ स्यदो जवे
८९५ स्यसिच्सीयुट्तासिषु भावकर्मणोः
३७ स्वं रूपं शब्दस्याशब्दसंज्ञा
७७८ स्वतन्त्रः कर्ता
१७८ स्वमज्ञातिधनाख्यायाम्
२१९ स्वमोर्नपुंसकात्
९५१ स्वरतिसूतिसूयतिधूञूदितो वा
१३० स्वरादिनिपातमव्ययम्
४२० स्वरितञितः कर्त्रभिप्राये क्रियाफले
४२ स्वरितेनाधिकारः
१३२६ स्वागतादीनां च
१६७९ स्वाङ्गाच्चतेरसंयोगोपधात्
१५७ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्

११०१ स्वाङ्गेऽध्रुवे
४४० स्वादिभ्य श्नु
१९२ स्वादिष्वसर्वनामस्थाने
१२७८ स्वामीश्वराधिपतिदा ०
१०८७ स्वे पुष
१६५ स्वौजसमौट्छष्टाभ्या ०
५९४ ह एति
६९६ हनस्सिच्
१०३५ हनस्त च
८८१ हनस्तोऽचिण्णलो
७६२ हनो वध लिङि
४०४ हन्तेरत्पूर्वस्य
५६३ हन्तेर्ज
५५५ हल श्न शानज्झौ
१६५९ हलदन्तात् सप्तम्या स ०
६९२ हलन्ताच्च
११ हलन्त्यम्
४०७ हलश्चेजुपधात्
१३४६ हलस्तद्धितस्य
६०७ हलादि शेष
५३१ हलि च
३२५ हलि लोप
८८ हलि सर्वेषाम्
२० हलोऽनन्तरा सयोग
२२२ हल्ङ्याभ्यो दीर्घा ०
९० हशि च
१०८६ हस्ते वर्तिग्रहो
१४५० हायनान्तयुवा ०
१७५३ हिंसाया प्रतेश्च
१०९५ हिंसार्थानां च समा ०
३९९ हिनुमीना
१३०५ हीते
५०५ हुझल्भ्यो हेर्धि
५४२ हुश्नुवो सार्वधातुके
१२४५ हृकोरन्यतरस्याम्
१४२८ हृदयस्य प्रिय
१३३३ हृद्भगसिन्ध्वन्ते ०
७८० हेतुमति च
११९२ हेतुहेतुमतोर्लिङ्
६३ हो ढ
१२६५ हेतौ
५६१ हो हन्तेर्ञ्णिन्नेषु
७०४ ह्मयन्तक्षणश्वस ०
६०६ ह्रस्व
१२१ ह्रस्व लघु
२८६ ह्रस्वनद्यापो नुट्
२२२ ह्रस्वस्य गुण
१०३३ ह्रस्वस्य पिति कृति तुक्
३९१ ह्रस्वात्तादौ तद्धिते
६८५ ह्रस्वादङ्गात्
२६७ ह्रस्वो नपुसके ०

सूत्रसूची परिशिष्टम् ।

१३८५ अचित्तहस्तिधे०
१७१६ अच्प्रत्यन्ववo
१५०० अधुना
१५०३ अनद्यतने हिंल्
१४१५ अवयवे च प्रा०
१३६५ अश्वपत्यादिभ्यश्च
११५६ आतश्चोपसर्गे
१४३४ आत्मन्विश्वजन०
११९३ इच्छार्थेषु लिङ्०
१४९९ इदमो हिंल्
३२३ इदोऽय् पुंसि
९८ इसुसो सामर्थ्ये
१४३२ उगवादिभ्यो यत्
१४७७ उदन्वानुदधौ च
१४११ ऋतष्ठञ्
१५३३ एकस्य सकृच्च
१३७० एको गोत्रे
६२२ ओ पुयण्ज्यपरे
२२८ ओसि च
१३७८ कम्बोजाल्लुक्
१४३९ कालात्
१४५८ किम सख्यापरि०
१६९९ को कत्तत्पुरुषेऽचि
१५८७ क्तेन नञ्विशिष्टेनानञ्
१२०७ क्रियासमभिहारे लो०
२६३ क्विन्प्रत्ययस्य कु.
१३७३ गर्गादिभ्यो यञ्
७३१ जिघ्रतेर्वा
१६९६ ज्योतिर्जनपद०
१४७५ ज्ञय
१४१० तत आगत
१६४३ तत्पुरुषोऽनञ्०
१४४३ तदर्हम्
१४५४ तदस्य सञ्जात
१३६२ तद्धिता
१४२४ तद्वहति रथयुगप्रा०
१०२४ तव्यत्तव्यानीयर
१४९३ तसेश्च
१४२३ तस्मै हितम्
५०६ तुह्योस्तातङ्ङाशि०
१६०५ तृतीयाप्रभृतीन्य०
१४२० तेन दीव्यति खनति०
१४४० तेन निर्वृत्तम्
२४५ त्रेरुय
१६९१ त्वे च
१३९४ दक्षिणापश्चात्पु०
१३६८ द्विगोर्लुगनपत्ये
१४६० द्वित्रिभ्यां तयस्यायौ०
१४२७ धर्मपथ्यर्थन्यायाद०
१४२५ धुरो यड्ढकौ
१६७६ न कोपधायाः
१३७९ नक्षत्रेण युक्तः कालः
१४४६ नञ्पूर्वात्तत्पु०
१३९३ नद्यादिभ्यो ढक्
१६८३ नद्यादेशेष्वन्यतरस्याम्
४०९ न भाभूपूकमिगमि०
१४६४ नान्तादसंख्यादेर्मट्
२४७१ नित्यं शतादिमासार्ध०
१७३६ नित्यमसिच् प्रजामेधयोः
१४३० पथ्यतिथिवसति०
१७०४ पृषोदरादीनि च०
१५८८ पोटायुवतिस्तो०
१४०६ प्रयोज्यनियोज्यौ०
१४२२ प्रहरणम्
१३८९ प्रोक्ताल्लुक्
१७३२ बहुव्रीहौ सक्थ्य०
१३८३ भिक्षादिभ्योऽण्
१५१० भूतपूर्वे चरट्
१४१६ मयडैतयोर्भाषा०

शुद्धिपत्रिका ।

पृष्ठं	पङ्क्तिः	अशुद्धम्	शुद्धम्
११	५	उत्	इत्
१२	४	आ + इ	आ + ए
,,	,,	आ + उ	आ + ओ
१९	१०	पूर्वोक्तं	पूर्वोक्ते
३१	१५	नकारस्य	हकारस्य
३४	,,	प्रयोगश्च	प्रयोगञ्च
३७	२३	स्वरवसा	खरवसा
३९	६	९४	८६
,,	,,	४४	,,
,,	८	,,	,,
४०	१८	गुण	गुण
४५	२२	१०९	१०८
४६	१९	सुह्यच्च्य	सुह्यच्चर्य
,,	,,	द्रुग्द्ध	दुग्द्ध
४७	१	घोषाणा	घोषाणां
५१	१२	बोधका	बोधिका
५२	२	प्रदश्येते	प्रदर्श्येते
५३	२३	२२८	१२८
५७	१३	टाच्	टाप्
५८	२४	उदित्	उगित्
६२	१	२२	४०
६४	,,	५१	१
६५	२४	श्रसिद्धा	प्रसिद्धा
६८	२५	तम्भे	स्तम्भे
६९	२०	ग्लो + आम्	ग्लौ + आम्
७०	२	लोपा	लोपो
७१	११	पर्यय	पर्याय
७४	८	४।१	१।४
७५	७	इदूद न्तौ	ईदूदन्तौ
७५	११	इदूतौ	ईदूतौ
७६	१४	तदाति	तदादि
७९	८	१०१	१०४
७९	७	व्यम्	बोद्धव्यम्
८३	९	२४	२५
८५	७	सम्बोधन	सम्बोधन
९५	५	नाभावणा	नाभावगुणा
९६	१७	७९	८०
९८	१६	९६	९२
,,	२४	५	७
१००	८	१।९	१।८
१०१	२३	१५८	२५८
१०३	२४	पदसज्ञा	पदसज्ञाया
१०४	९	।६	।७
,,	२१	।८	।५
१०६	१	द्विवाचक	द्वित्वबाचक
,,	२५	१०	८०
११६	१४	।८।२	।८।१
११८	२१	भूपि	भूरपि
११९	९	२३६	२३९
१२३	१५	।८।१	।८।३
१२४	१२	।३।	।८।
१२६	१५	१७	१८
१२७	२२	९५	३९५
,,	२५	।३।	।८।
१३६	११	त्युक्त	त्युक्तम्
१३७	१	४६	६९
,,	४	४७	७७
,,	७	४८	७८

पृष्ठ	पङ्क्ति	अशुद्धम्	शुद्धम्
१३८	१८	४१४	४२४
१४१	२०	१६२	१६१
१४५	१७	।४।	।३।
१४९	२४	७३	८३
१५२	४	मेत्रि	मेवि
,,	१५	१९०	१०४
१५५	२५	लङ्प्रक्रिया	लङ्प्रक्रिया
१५६	१८	द्विलोपस्य	लोपस्य
१५९	२	वृद्ध	वृद्धि
१६०	,,	स्वरितत्त्वात्	स्वरितेत्त्वात्
,,	२५	नीव्	णीव्
१६२	२३	लुण्टित	लुण्टत
१६४	१६	दिक्रीडा	दिवुक्रीडा
१७४	१७	जज्ञे	जज्ञे
,,	,,	जज्ञाते	जज्ञाते
१७७	१०	(झलि)	(थलि)
१८२	२	शयथे	शयाथे
,,	८	५८	८२
१८३	७	५८०	५९०
१८४	१५	अस्+मि	अस्+सि
१८६	१	अद्विदि	अदिदि
,,	,,	द्विल	द्वित्व
,,	१४	६०२	६०१
,,	२२	एव	एव
१९१	२५	अळील	अलील
१९२	१	६३७	६३८
१९२	१४	४५६	४६५
,,	१५	जुहोति	जुह्वति
१९३	९	५३०	५३१
१९५		स्यप्रत्ययोहि	निमित्तमि-
		निमित्तमि	डागम ।
		डागम ।	स्यप्रत्ययोहि
१९७	२३	रुभारिष	रुषारिष
,,	२६	न्यापिसना	ज्ञापिसना

पृष्ठ	पङ्क्ति	अशुद्धम्	शुद्धम्
१९८	२६	लत्वा	लूत्वा
२०५	१५	५९८	४९८
२०७	२६	उपसग	उपसर्ग
२१२	३	४४९	५५९
२१३	२१	४२९	४५९
२२१	२	अपराव	अपरार्ध
२२५	२	लुटि	ल्युटि
,,	१४	२९४	४९४
,,	१६	६३९	६९३
२२७	२१	जिगिषाप	जिगाप
२२९	३	विवक्षित	विवक्षित
२३०	२१	५४१	५२१
२३१	७	७०४	७९४
२३२	९	आदन्तत्वे	आदन्तत्वे
		लुक्	पुक्
,,	११	आत्वणौ	आत्व णौ
२३३	२८	नुमर्थमवे	नुमर्थमेव
२३४	२	ऐदिधिषता	एदिधिषतां
,,	३	एदिधिषिष्ट	ऐदिधिषिष्ट
२३५	२	इत	इति
२३९	३	चेक्रियते	चेक्रीयते
२४०	२५	विनिषेधौ	विधिनिषेधौ
२४५	९	पुत्रायति	पुत्रीयति
२४८	१८	३८४	८३४
२५०	२१	वाक्यर्थ	वाक्यार्थ
२५१	४	७३१	८३१
,,	२७	हन्तेहिंसा	हन्तेर्हिंसा
२५२	२५	८८७	८७७
२५३	१४	न प्रकीरो	नकारो
२५४	१३	मभूयावहे	मनुभूयावहे
२५५	१०	श्चलेश्चिण्	श्चलेश्चिण्
,,	१२	भानकर्म	भावेकर्म
२५७	५	जी-	जि-
,,	१७	५२७	५२८

पृष्ठं	पङ्क्ति	अशुद्धम्	शुद्धम्
२६१	८	मुखव्या	मुखव्या
,,	१७	मिद्धतीत्यर्थ	मिच्छतीत्यर्थ
२६५	६	पररप	परस्प
२६६	७	पूर्वव	पूर्ववं
,,	१०	५३७	७५३
,,	१२	यज्ञापा	यज्ञपा
२६९	८	चलनार्थेश्च	चलनार्थेभ्यश्च
२७०	२	अवर्त्तिषत	अवर्त्तिष्यत
,,	४	५६९	६५९
२७२	७	धावितु	धावितु
२७३	२३	ख्याताना	ख्यातकाना
२७८	,,	९७७	९९७
२८३	१३	९८३	९८२
२८५	२७	भव्यस्य	भव्यस्य
२८९	१२	इत्यनन्त	इत्यस्यानन्त
२९३	१६	उदपदे	उपपदे
,,	२७	सामीष्ये	सामीप्ये
२९७	५	पद	प्रद
३००	२२	११४७	११४६
३०२	११	श्रन्थाना	श्रन्थना
३०६	१२	१२८०	११८०
३०७	८	११८६	११८७
३०८	११	उपपदे	उपपदेषु
,,	२५	अर्धायै	अध्ययै
३२०	१२	कटकरोति	कटकरोति

पुट	पङ्क्ति	अशुद्धम्	शुद्धम्
३२३	३	११७७	१२५७
,,	५	बावाच्या	वाच्या
३२६	२३	३३	३६
,,	२५	सूत्रद्वयने	सूत्रत्रयेण
३२७	४	स्वेद्विषय	स्वेन्विषय
३३२	११	कृतपूर्वी	कृतपूर्वा
३४०	२१	अतोल्लटा	अतोल्लडा
३४१	२२	मत्स्यस्य	मत्स्यस्य
३४२	९	स्थविष्ठ	स्थविष्ठ
,,	१९	भूम	भूमन्
३४३	६	सरावित्रि	सारावित्रि
३४७	११	१३४६	१३४५
३४९	१९	१७१	१९१
३५१	२६	१६३	१६९
३५६	,,	१४२२	११२२
३६६	२	११३१	१५३१
३६७	१५	विषया	विषये
३७१	२	ल्पार्थादीना	ल्पाद्यर्थादीनां
३७८	१८	१३९३	१५९३
,,	२१	१७९४	१५९४
३८०	८	अत्रोप	तत्रोप
३८८	२०	कुक्कुटमयूरा-विमौ	मयूरी कुक्कुटावि-मौ
३९२	१३	कामयति	कामयते
४००	१३	कुण्डोग्नी	कुण्डोग्नौ